BHAGAVAD-GĪTĀRTHAPRAKĀS'IKĀ

OF

S'RĪ UPANISAD-BRAHMA-YOGIN

WITH THE TEXT

EDITED BY

THE PANDITS OF THE ADYAR LIBRARY

THE ADYAR LIBRARY, ADYAR

1941

॥ श्री ॥

श्रीमद्भगवद्गीताऽर्थप्रकाशिका

श्रीमदुपनिषद्ब्रह्मयोगिविरचिता

मूलसहिता

अड्यार्पुस्तकालयस्थपण्डितैः संशोधिता

अड्यार्-पुस्तकालयार्थे
प्रकटीकृता च
१९४१

ॐ नमो
ब्रह्मादिभ्यो
ब्रह्मविद्यासंप्रदायकर्तृभ्यो
वंशऋषिभ्यो
नमो गुरुभ्य

DEDICATED TO

Brahma and the Rishis,
The Great Teachers
Who handed down Brahmavidya
through Generations

PREFATORY NOTE

WITH this publication of *S'rī-mad-Bhagavad-Gītā*, we have completed the series of Scriptures (The 108 Upanisads and the *Gītā* which is also an *Upanisad* according to the colophon at the end of each chapter) with the hitherto unpublished commentary of Upanisad Brahma Yogin In this series consisting of 9 volumes, there are included practically all the Upanisads that have come down to us under that name, including 71 not included in the well-known 'hundred and eight' and published separately under the title of *Unpublished Upanisads* (1933)

The Adyar Library has also started a corresponding series of English Translations for the Upanisads and two volumes are already published It is hoped that these series of Texts and Translations will be of some help to persons who are interested in Indian Religion and Philosophy

The name of Pandit S Subrahmanya S'āstrī, who has edited this volume is well-known to Sanskritists and especially to the readers of the various publications of the Adyar Library and The Theosophical Publishing House He is now engaged in going through a number of works in various branches of Sanskrit Literature with a view to their early publication It is a wonder to us all how he finds time to attend to all these works, and that, with characteristic and unsurpassed thoroughness and precision

The least I could do is to tender, once more, my grateful thanks both to the Editor, Brahma s'rī Subrahmanya S'āstriar (who has been ably assisted in his work by the Pandits of the Adyar Library) and to my colleague and erudite scholar Dr C Kunhan Rājā who has contributed a valuable introduction to this publication

Adyar G SRINIVASA MURTI,

3rd March, 1941 *Honorary Director*

विषयसूची

INTRODUCTION

THE Adyar Library is now presenting to the world the text of Srīmad Bhagavad Gītā with the commentary of S'rī Upanisad Brahma Yogin, for the first time The Library has already published the commentaries of S'rī Upanisad Brahma Yogin on the 108 Upanisads The 98 Minor Upanisads were brought under six main classes, namely, Samnyāsa, Yoga, Sāmānya-Vedānta, Vaisnava, S'aiva and S'ākta, and were published in six corresponding volumes Of the Major Upanisads, eight were published in one volume and the Chāndogya and the Brhad-āranyaka appeared in another volume The Bhagavad Gītā, along with the Upanisads, comes within the field of the basic texts of the Vedānta, and as such, it is quite fitting that this work also should appear in a volume uniform with the Upanisads

The question may very legitimately be asked, why, when there are many commentaries on the Gītā, this new commentary, a rather modern one, should be published What is the contribution which this addition has to make to our knowledge of the teaching of the Gītā or the text of the Gītā? The fact that there are commentaries and commentaries on the Gītā is the one main justification for the publication of this commentary The presence of the many commentaries shows that the text affords scope for many interpretations No commentary is a mere recapitulation of the previous one Each one of them has an individuality This commentary is written by one who was brought up in the tradition of the S'ankara School He

closely follows the commentary of S'ankara and, in many places, he even reproduces expressions from the commentary of S'ankara But it is not a copy or a summary or a mere paraphrase of that commentary There is selection, there is re-presentation Indeed there is no new doctrine, no new approach, no new interpretation, there is only a new presentation

The text followed in this commentary is the text accepted by the great Ācāryas That is the text containing 700 verses in 18 chapters That is the traditional text That is the real text of the Gītā The commentator is not concerned with the many textual problems that are presented to modern scholars by research workers It is very doubtful if he had any notion of such problems It is very likely that he had never heard of them, and not thought about them The text shows the unbroken and unshaken continuity of the tradition of the text of the Gītā in India No orthodox commentator in India, either in early days or in modern days, has recognised another text of the Gītā

But in modern times the problem of the text of the Gītā has been brought to the forefront by certain research scholars The problem cannot be denied as it presents certain difficulties which cannot be overlooked The question of the authentic text of the Gītā is not a simple one Ancient texts themselves form the root of this difficulty If there had not been certain ancient texts which provoked some doubt regarding the genuineness of the traditional text, the problem would not have been considered with the same enthusiasm as it is being done now

The Bhagavad Gītā forms chapters 25 to 42 of the Bhīsma Parvan of the Mahābhārata In the chapter that immediately follows, namely, chapter 43, there is a mention of the number of verses that are to be found in the Gītā This number does not fit in with the actual number found in the

traditional text, which is 700 The number as given in verses 4 and 5 of chapter 43 is 745 (or 741 according to certain readings) The verses are

षटशतानि सविशानि श्लोकाना प्राह केशव ।
अर्जुन सप्त(पञ्च)पञ्चाशत सप्त(पञ्च)षष्टि च सजय ॥
धृतराष्ट्र श्लोकमेक गीताया मानमुच्यते ॥

According to this, the text of the Bhagavad Gītā is to be distributed as follows

S'rī Krsna	620	s'lokas
Arjuna	57	,,
Sañjaya	67	,,
Dhrtarāstra	1	s'loka
Total	745	s'lokas

Some manuscripts read पञ्च instead of सप्त in both the places and in this case the number will be 4 less, that is, only 741 But the usual reading is with सप्त and the number is 745 It is reported that the translation into Persian follows a text with 745 verses

In the extant text of the Bhagavad Gītā, the distribution is as follows

Ch	S'rī Krsna	Arjuna	Sañjaya	Dhrtarāstra	Total
1		21	25	1	47
2	63	6	3		72
3	40	3			43
4	41	1			42
5	28	1			29
6	42	5			47
7	30				30

Ch	S'rī Krsna	Arjuna	Sañjaya	Dhrtarāstra	Total
8	26	2			28
9	34				34
10	35	7			42
11	14	33	8		55
12	19	1			20
13	34				34
14	26	1			27
15	20				20
16	24				24
17	27	1			28
18	71	2	5		78
Total	574	84	41	1	700

If the two sets of figures are put together it would be as follows

	No in Ch 43	No in the text	Difference
S'rī Krsna	620	574	46 less
Arjuna	57	84	27 more
Sañjaya	67	41	26 less
Dhrtarāstra	1	1	nil
Total	745	700	

It is a matter deserving serious consideration that in the Mahābhārata itself, after giving the Gītā in 18 chapters with 700 s'lokas, there should be mentioned in the immediately following chapter a number that has nothing to do with the actual number in the text This matter has been a puzzle and it is really a puzzle There are two possibilities . Either the text we have now is different from the genuine and authentic text which should have been in the Mahābhārata , S'ankara commented on a certain recension , this recension is

different from the genuine Mahābhārata text of the Gītā, the differences must be vital and material, on account of the importance which this recension assumed, having been adopted by S'ankara and also by the Ācāryas who followed him, this text has replaced the genuine text of the Mahābhārata, the original genuine text is now lost Or it may be that the text accepted by S'ankara is the genuine text, the verses where the enumeration is given are later interpolations based on some other text and the interpolation continued in manuscripts though this later recension was not accepted by anybody

An organisation located in Madras bearing the designation of Suddha Dharma Mandala published about quarter of a century ago, a text of the Gītā with a commentary by one Hamsa Yogin, which has 745 s'lokas The Association claims for this text an antiquity earlier than S'ankara, the commentator being placed in the fifth century Unfortunately, there is no evidence for the existence of such a text except the verbal testimony of the members of the Association and the printed text But this is something which research cannot accept as a basis for critical examination The original manuscript which formed the basis of the publication must be produced The genuineness of the manuscript must be tested In the absence of any such possibility, the claim has to be set aside for the time being by those engaged in research Research scholars will only be too happy to get at a genuine ancient text which agrees with the traditional enumeration With due respect to the diligence and enthusiasm of the members of the Association and without casting any slur on the good faith of the members in bringing out the edition and in doing propaganda for its acceptance, it must be definitely stated that until the original manuscripts are made available for scientific investigation and

scrutiny, the theory of this text being the genuine Mahābhārata text of the Gītā with 745 s'lokas cannot be seriously considered

Dr F O Schrader, a former Director of this Library, has brought forward a theory of the existence of a recension of the Gītā which is really ancient and which has been widely accepted by scholars of reputation in ancient times He calls it the Kashmerian recension This recension of the Gītā does not give any help for the solution of the riddle of the number of s'lokas in the Gītā, except in a negative way It at best proves that the text as commented on by S'ankara is not the only text of the Gītā known in ancient India and that there is at least another text, it may be that there were other texts and the text with 745 s'lokas may be one of them

The S'uddha Dharma Mandala edition of the Gītā has 26 chapters The first and the last are introductory and concluding The remaining 24 are divided into four groups of 6 chapters each The verse in the 43rd chapter of the Bhīsma Parvan where the number of verses in Gītā is given, does not give the number of chapters So we have no evidence either way, for the 18 chapters of the traditional text or for the 26 chapters of the S'uddha Dharma Mandala edition In the traditional dhyāna s'loka of the Gītā, the number of chapters is given as 18 (अष्टादशाध्यायिनीम्).

What is called the Kashmerian recension is not such a different text from the traditional one as the S'uddha Dharma Mandala edition is There are a few verses added, a very small number of verses found in the traditional text are omitted in the Kashmerian recension There are considerable variations in readings The Gītā in this recension also is in 18 chapters Nothing definite can be said about the number of verses in this recension, since what is called the Kashmerian recension is not a fixed one There are considerable variations

in regard to the additional passages in different manuscripts that are considered the sources for our information about this recension

Dr F O Schrader published a part of what he calls the Kashmerian recension of the Gītā from Stuttgart in 1930 The traditional text of the Gītā was published by Mr S N Tadpatrikar from Poona in 1934 with the variations found in the Kashmerian recension given as foot notes Prof S K Belvalkar contributed an article to the *New Indian Antiquary* of 1939 (July Vol II, No 4) in which he submits the so called Kashmerian recension to a very searching analysis and attempts to establish the genuineness of the traditional text of the Gītā He has special opportunities and facilities for the work in so far he has undertaken the edition of the Bhīsma Parvan of the Mahābhārata for the Bhandarkar Institute He has closely studied a large number of Mahābhārata manuscripts His conclusion is that there is nothing which can legitimately be called a Kashmerian recension There are certain variants in certain manuscripts of Mahābhārata But these variants have nothing particular to do with Kashmere

It will take me too far out of the path if I begin to examine the whole problem of the Kashmerian recension of the Gītā in this Introduction I am not interested, in this Introduction, in the historical problem of whether the so called Kashmerian recension is an earlier and as such the really genuine recension of the Gītā or whether the Kashmerian recension is only a later recast of the real Gītā, which is the text as accepted by the great Ācāryas, where an attempt has been made to improve on the orginal Gītā What interests me is only the question of what the Gītā is No one can deny the fact that the Gītā has assumed its present important position because the Ācāryas have accepted the

text as something of divine origin I do not think that there is anything in the text itself which marks it out so prominently that its importance would have been recognised by modern scholars even without the initiative and guidance of the Ācāryas If S'ankara had not commented on the text, if through the tradition of the Ācāryas, the text had not been endowed with a divine origin, the text would have merely formed a part of the Mahābhārata as any other part, and no one would have troubled about its original form and its evolution and transmutation And once it is conceded that the importance of the Gītā lies in the value which the Ācāryas have attached to it, it must follow naturally that only that Gītā is important which has been accepted as the words of the Lord by the Ācāryas

It is something which we cannot accept that there was the real Gītā, the real words of the Lord, as contained in the Kashmerian recension and that the Ācāryas did not know the real Gītā That the Ācāryas were victims of a dupe as regards the Gītā or were themselves guilty of being dupes having dumped on humanity a text which they knew is not the real teaching of the Lord, this is a position which I cannot for a moment think of considering, with any sort of sympathy If there is a Gītā which is worth anything, if there is a Gītā which derives its value, being accepted by the Ācāryas as the direct Teaching of the Lord, it is the Gītā with seven hundred verses divided into eighteen chapters, as has been commented upon by the Ācāryas There are Gītās and Gītās and if there is any other Gītā whether a Kashmerian Gītā or a S'uddha Dharma Mandala Gita, it is only one among the many Gītās and not *the* Gītā

The relative age of the so called Kashmerian recension is a point of minor importance The real Gītā accepted by

the Ācāryas loses not a bit of its value even if it can be proved with dependable evidence that the Kashmerian recension is known to have existed at an age earlier than the time when the Gītā accepted by the Ācāryas can be proved to have existed The Adyar Library has published the Gītā whose genuineness is established by its acceptance by the Ācāryas, which, after all, is the only test for the genuineness of such a work All that one can prove in favour of the Kashmerian Gītā is that it existed at a certain definite ancient time, and perhaps also that there is no evidence of the Gītā accepted by the Ācāryas having existed at that time But they cannot prove that the Gītā of the Ācāryas did not exist at that time or at an earlier time Until it can be proved that the Kashmerian Gītā is the Gītā which has been accepted by the Ācāryas, the value of the 700 verses Gītā remains unshaken and supreme The Kashmerian Gītā may have a value for the historian, but it cannot claim the sanctity of the real Gīta

The phantom of a Kashmerian Gītā may be driven out rather easily But the difficulty of the number of verses in the Gītā is still there The number is given in the Mahābhārata immediately after the Gītā is written out in 700 verses and the number is undisputedly 745 Professor S K Belvalkar has attempted to solve this Gītā-riddle in a rather ingenious way The solution is original and clever, but I am afraid it is neither final not acceptable He has contributed an article to the *Annals of the Bhandarkar Oriental Research Institute*, Vol XIX, Part IV with the heading—" The Bhagavad gītā riddle unriddled " His general position is as follows

What is contemplated in the verses where the number of s'lokas in the Gītā is given, is not merely the Gītā with the 700 s'lokas but the Gītā along with another portion called

Gītāsāra That is now available as a separate work, but in some manuscripts it is mentioned as part of the Bhīsma Parvan There are two recensions of the work If one of these recensions is also added to the Gītā and if some further manipulations are also effected we can get 743 verses distributed among S'rī Krsna, Arjuna, Sañjaya and Dhrtarāstra according to one reading of the enumeration in the verses Even then the total comes only to 743 Then he concludes that in one of the two places, we must accept the alternative reading five (pañca) for seven (sapta) found in some of the manuscripts and the total may be reduced by two

The further process necessary after including the Gītāsāra as an integral part of the Gitā is to transpose some verses that are now credited to Arjuna to the credit of Sañjaya The words of the different speakers are indicated by the direction—"so and so says" Wherever in the narration itself it is stated that the following words are by a particular person, this direction— so and so speaks —is not needed In such cases the words that follow need not be taken as the words of the speaker but only as the words of the narrator indirectly quoting the speaker s words Thus in the first chapter of the of the Gītā, s'loka 20 and the first half of 21 are

अथ व्यवस्थितान् दृष्ट्वा धार्तराष्ट्रान् कपिध्वज ।
प्रवृत्ते शस्त्रसंपाते धनुरुद्यम्य पाण्डव· ॥
हृषीकेशं तदा वाक्यमिदमाह महीपते ।

"Then the monkey bannered (Arjuna), seeing the sons of Dhrtarāṣṭra well arrived when the fall of weapons had started, the son of Pāṇḍu spoke thus to the Lord of sense organs (Kṛṣna), O Lord of Earth"

This is the narrative by Sañjaya. Then there is the direction—Arjuna speaks. After this follow two verses which are the words of Arjuna.

Now Prof. Belvalkar proposes to take the two verses as the words of Sanjaya in which he reports the speech of Arjuna. The same is the case with verses 28 and what follows. In this way he reduces the ślokas to the credit of Arjuna by 21 and adds them to the verses of Sanjaya. On the same principle the words of Kṛṣṇa (verses 2 and 3 of Ch. II) are transferred to Sanjaya. Thus we are very near the mark in the case of Arjuna and Sanjaya. The additions from the Gītāsāra bring the number to the credit of Kṛṣṇa also very near the mark. The next step to bring the totals to very near accuracy is to take a few verses as having six Padas instead of the usual four. I am not giving here the details of the Professor's calculations. I give only the general method he has followed. Those who are interested in the details can look into the article itself.

The hitch comes in when the Professor is compelled to limit to the first chapter and the first 10 verses of the 2nd chapter the process of transferring verses from the speaker to the narrator where the narration itself, apart from the direction that follows, expresses that what follows is the speech of such and such a person.

The Professor says that the real Gītā begins only from the eleventh verse in the second chapter, the place where S'ankara begins his commentary. Therefore although the eleventh verse is preceded by the statement in the narration itself

तमुवाच हृषीकेशः प्रहसन्निव भारत ।
सेनयोरुभयोर्मध्ये विषीदन्तमिदं वचः ॥

"To him spoke the Lord of the sense organs (Krsna), with a smile as though, O Bhārata, as he was bemoaning in the middle of the two armies, these words"
the following verses are not included in the words of Sañjaya as an indirect report, but only as the actual words of Krsna One may concede that there is a difference between the first chapter and the first ten verses of the second chapter on the one hand and the rest of the Gītā on the other The real teaching of the Gītā begins only at that point and it is this fact that differentiates the two parts But the whole text is the Gitā and there is nothing to justify a difference in the method of introducing the words of one speaker and another in the two sections or in the method of construing the text It is a peculiarity of the Mahābhārata style of narration that sometimes a speech is introduced simply with the direction—"so and so speaks without the speaker being announced in the metrical narration itself and sometimes there is the mention in the metrical narration as well as the direction

Therefore the suggestion of the entire first chapter and the first ten verses of the second chapter being assigned to Sañjaya except the first verse of the first chapter is not quite acceptable I do not know what the method is in the Gītāsāra Since I do not consider the procedure quite satisfactory, I do not propose to take the trouble to examine the Gītāsara Again a sloka is always taken as consisting of four Pādas whether the sense ends there or not It is true that normally there is the end of a completed idea at the end of every sloka But there are cases where the sense continues in the following lines also If a metrical unit is taken as corresponding to a meaning unit there are cases where a metrical unit is longer than four Pādas But that is quite different from calculating a sloka as consisting of more than four Pādas

when we fix the number of verses in a work. If the Professor can establish that in counting the number of slokas, traditionally what was counted was not units of four Pādas but sense-units, then we can accept the Professor's position that in counting the number of slokas in the Gītā it is not uniformly units of four Pādas that were counted as a sloka but sometimes longer units containing even six Pādas were regarded as one sloka.

The Professor's calculations entails too many links that cannot be readily accepted. It at best amounts to an attempt at a clever way of accommodating something we cannot avoid. It is not at all a natural way of calculating the number of verses in a work. It is true that Indian S'āstraic tradition is full of compromises and spirit of accommodation. The Mimāmsakas and the Vedāntins have to compromise on a large number of points and have to accommodate a large number of unwelcome theories in establishing their doctrine of Vedas and their authoritative nature. S'ankara's monism is not free from disagreeable positions. The ultra rationalism of the Naiyāyikas often lead them to the most unreasonable assumptions. Postulation of God to explain various phenomena of Nature creates more difficulties than are solved by the postulation. I have to admit that the Professor's procedure is not at all a departure from the traditional Indian S'āstraic path. But in Mimāmsā, in Vedānta, in monism, in rationalism, in theism, everywhere there is a certain fundamental point at issue which has to be defended at all costs. But has the Professor any such fundamental point at issue which has to be protected at all costs, even at the risk of landing oneself in precarious positions? Is there an unbroken universal tradition about the number of the slokas in the Gītā being 745? Apart from the stray reference at a particular

place in the Mahābhārata, has the enumeration any authority ? Did S'ankara know the number of s'lokas in the Gītā to be 745 ? Did he accept it ? Has any Ācārya, any commentator worth recognition, accepted the number ? The answer is an emphatic 'no'. S'ankara definitely says that the number of verses in the Gītā is 700. All the Ācāryas have accepted the text as containing 700 s'lokas. Under the conditions is it not better to assume that the enumeration given in the Mahābhārata is a later interpolation without a tradition behind it ? Is it reasonable to assume that S'ankara knew the Gītā as containing 745 s'lokas, consisting of the present Gītā and the Gītāsāra and that he started a new tradition of his own, with a Gītā of only 700 s'lokas omitting the Gītāsāra portion, which till his time was an intergral part of the Gītā ?

Since Prof. Belvalkar has undertaken the edition of the Bhisma Parvan for the Bhandarkar Oriental Research Institute, he will be the best judge to decide about the authenticity of the enumeration. Does the portion containing the enumeration find a place in manuscripts representing different parts of India and also representing the different ages in the histroy of the Mahābhārata manuscripts ? Is there any evidence to show that the enumeration has a tradition behind it, that it must be taken as a genuine part of the Mahābhārata, that it is authentic and reliable ? Are we bound by that tradition ?

I may mention that there is no uniformity about this tradition. Messrs. V. Ramaswami Sastrulu and Sons of Madras have recently brought out an edition of the Mahābhārata based on South Indian manuscripts. It is found that in bringing out the edition a fairly large number of manuscripts have been made use of and the readings are sufficiently representative of the South Indian tradition. The chapter containing this enumeration is not found in this edition. In this edition the

chapter that follows the eighteenth chapter of the Bhagavad Gītā begins

धृतराष्ट्र उवाच-

एव व्यूढेष्वनीकेषु मामकेष्वितरेषु च ।

के पूर्वं प्राहरन्स्तत्र कुरव पाण्डवा नु किम् ॥

This is the chapter that follows the one where the enumeration of the extent of the Gītā is given according to the Kumbhakonam edition

In a Telugu Edition of the Mahābhārata the first few verses of the chapter, containing the enumeration of the verses of the Gītā and the praśasti of the Gītā, are omitted and the chapter begins

ततो धनञ्जय दृष्ट्वा ।

On a par with the attempt of the Śuddha Dharma Maṇḍala to produce a Gītā with 745 verses is the attempt to produce another version of the Gītā with 745 verses by the Editor of the Gītā in the publication of the Rasaśālā Auṣadhāśramam of the Gondal State Here the Gītā is in eighteen chapters but contains many extra verses in comparison with the normal Gītā This edition is based on a very rare and old copy in manuscript form available in their Library The text printed there does not contain 45 extra verses The first chapter contains only 46 verses as compared with the 47 of the normal Gītā But in the other chapters there are 20 verses extra Thus the text contains only 719 verses

According to the editor, the instruction given to Arjuna by the Lord was introduced into the Mahābhārata by Vyāsa in the form of the verses and is not in the language or form of the original instruction

It is supposed that the Persian translation of the Gītā is in 745 verses. Rao Bahadur Prof. K. V. Rangaswami Aiyangar has contributed a short note on the subject to the Hindu of 15th August, 1937. There he says that there are two translations into Persian, one by Ábul Fazul into Persian Prose and the other by Faizi into Persian verses. I have seen a copy of one of the editions of the latter. That contains exactly 700 verses and is in Prose. Chapter by Chapter it is identical with the normal Gītā both in content and in the number of verses. The colophons also agree.

From the Catalogues of Persian Manuscripts in the British Museum and in the Indian Office, I am not able to ascertain the real name of the translator and the number of verses translated. The question whether the translation is prose or verses is also not quite clear. The whole Mahābhārata is available in Persian translation. One has to ascertain if the Gītā is only a part of that translation or whether there is an independent translation of the Gītā into Persian. The name of Dara Shukoh also appears as the name of one of the translations in the Libraries in London. As things are, the authority of Persian translations to establish the tradition of a Gītā with 745 verses is too shaky.

Prof. Belvalkar has special facilities and opportunities to examine the question fully. After a thorough examination of all the manuscripts and all relevant materials, he can best give a decision regarding the authenticity of the enumeration given in the 43rd chapter of the Bhīsma Parvan according to the Kumbhakoṇam edition. If it is a mere interpolation of a far later day, I see no reason why scholars should worry about the matter and try to resort to out of the way methods to bring in the Gītā to the scheme of this enumeration. If it is proved beyond question

that the enumeration is authentic and ancient and if it is also proved that we must accept the number given there, then some method like the one followed by the Professor may be resorted to. There are at present only two attempts at the solution: one by the S'uddha Dharma Mandala and by the Ausadhālaya in the Gondal State and the other by Prof. Belvalkar. As between the two, the choice lies in favour of the latter. The so called Kashmerian recension does not have any pretension to offering a solution on the matter.

Apart from the fact that the S'uddha Dharma Mandala has not produced any evidence of the real existence of a work called the Gītā as printed by them with the commentary of the Hamsa Yogin which too is published, there is the other still unsatisfactory position that even after getting at this text of the Gita with 745 slokas there is the need for a further re-allocation of 12 slokas from Arjuna to Krsna to equalise the text to the enumeration. One also wonders why, if the number of chapters is based on the number of syllables in the Gāyatri, the number of verses in the Gita has not any arithmetical relation to this number: 745 is not a multiple of 24.

Further, everyone knows that the real Gāyatrī of the Veda consists of three Pādas of eight syllables each and not of four Pādas of six syllables each. Since at a later stage in the history of classical Sanskrit, slokas were fixed in a regular four Pāda scheme, the Gāyatrī was at a later age accepted as consisting invariably of four the Pādas of six syllables each. The contention that the Gītā as found in the Mahabharata is only an elaboration of the teaching of the Lord incorporated in the text by Vyāsa and is not in the exact form in which the teaching was given, introduces further complications and I can better consider this aspect of the problem in connection with the relation of the text to the Mahābhārata.

I have already considered one aspect of the problem of the text of the Gītā, namely that the Gītā originally had 745 verses and was mutilated in course of time into its present form of 700 verses I have also pointed out the two ways of approach to this problem There is the other theory of the Gītā having once been a much shorter text, which in course of time gathered additional matter and assumed its present dimensions This is what may be called the modern school of historical criticism It was the late Prof Garbe who first evolved this theory He held that it must have been originally an independent short work, which was later infixed into the Mahābhārata with much new matter added to it It must originally have been a short work on the Bhāgavata or Bhakti cult All other doctrines coming within the text must be later additions The main thesis in this theory was accepted by his disciple the late Prof Rudolph Otto of the Marburg University, who did not accept the theory of the text having been infixed into the Mahābhārata at a later stage His view is that the text formed an integral part of the Mahābhārata only, the original text dealt with Bhakti All other doctrines were later added

I have had the privilege of meeting Prof Otto constantly for nearly two years when I was a student at his University, namely the Marburg University, and I had also the privilege of being associated with some of his works During that time I had discussed this point about the Gītā with him on various occasions It is true that at that time he had not been working on this book He was then bringing out the re edition of the Visnu nārāyana and the Doctrine of Rāmānuja (the latter being a translation of the commentary of Bhagavān S'rī Rāmānujacārya on the first Sūtra of the Vedānta) "The Original Gītā" was published only ten years after I was in

his constant company at his University I had opportunities of meeting him during his later visits to India also, after my return from Europe.

Naturally we could not agree on what he called the "Urgestalt der Bhagavad Gītā." Even after reading the learned Professor's work on the subject, I still wonder why the text of the Gītā must be split up into two parts, one forming the original text and the other forming the later additions. The main contention is that there is no unity in the present text; that there are diverse and even conflicting tenets woven into the same text. My position is this: If there are certain portions in the present Gītā which are at variance with the central core, then we have necessarily to assume that some one interpolated the portion into an original unitary text and thus brought about the mixture of mutually conflicting tenets. It cannot be denied that the great Ācāryas have accepted this later version of the text as the basis for the development of their doctrines. This leads on naturally to the position that there was at some early stage some one with a clear mind which could discriminate between things that will mix together and things that will not so mix. Some such mind was the source of the original Gītā where there is unity and harmony, where there is no attempt at bringing in things that will not well mix. At some later stage came into the field minds that could not so distinguish between what will well mix and what will not so mix. Being naturally incapable of noticing incongruities and inconsistencies, such minds were the source of the later interpolations of portions throughout the text which were essentially at variance with the original matter.

The presumption is that there were two kinds of currents in Indian thought. One was straightforward and rational. The other was crooked and dogmatic. The Gītā was in origin

the product of the straightforward method of thinking Later this text was corrupted by the crooked and dogmatic mind Any one who reads through the European contribution to Indological research can notice the prejudice, in many cases unintentional, which the Europeans have entertained for what they call the Brāhmana mentality Garbe was one of the fore most in drawing a distinction between the Brāhmaṇas and the Ksatriyas in so far as contribution to Religion and Philosophy is concerned He traces all the high and sublime flights of philosophical thoughts in India, found in the Upanisads to the Ksatriyas and all the so called fantastic religious, ritualistic and social superstitions to the Brahmanas Pargiter in his "Ancient Indian Historical Tradition' draws a distinction between the reliable genecology of dynasties according to Ksatriya tradition and the unreliable tradition handed down by Brāhmanas In the case of the Bhagavad Gītā the antithesis is not between the Ksatriyas and the Brāhmanas but between the pure Bhāgavata cult and the later Brahmanical revival

If we accept the position that there was an original Gītā with a pure and unmixed line of Bhakti thought and that later this Gitā was stuffed with doctrines not coherent with the ori ginal thought then we cannot escape the position that all the persons responsible for this adulteration of the Original Gītā, all the great Ācāryas who accepted this adulterated Gītā, were incapable of consistent thought If we read the later philos ophical works in Sanskrit what strikes us most is that they made a fetish of consistency All the Vāda Granthas are the results of an attempt to correlate the different parts of a S'āstra into a consistent whole, ignoring differences due to difference in time and place and differences of these authors who expounded the doctrines Thus in the field of Grammar, the traditional exponents of the subject disregarded the

historical growth of language and tried to deal with language as though it is a static and unchanging phenomenon in man's life and they also tried to expound the works of Pāṇini, Kātyāyana and Patanjali as a single unitary science. The exponents knew that there was inconsistency and yet they tried to build up a consistent system out of the three texts. The entire Vedic literature divided into the different strata of the Saṁhitās, Brāhmaṇas and the Upaniṣads, the products of different currents of evolution of thoughts at different times and in different places, were for the teachers of Indian religion, philosophy and sociology a consistent whole forming the foundation of Indian life in all its aspects. And so far as Vedanta philosophy is concerned the Brahma Sutras and the Bhagavad Gitā along with the latest portions of the Vedic literature, namely the Upaniṣads formed the basis of that system of philosophy. When Indian minds were making such efforts to find out a consistent form of thought in incoherent texts, it is inconceivable that they should have been guilty of taking up a simple straightforward text and adding up incoherent matter into it.

It is one thing to say that the Gitā, as it is, contains incoherent thoughts. It is quite a different thing to say that it was originally a simpler text, which was converted into a muddle of inconsistent thoughts at a later stage. I am now discussing only this second question and it is this which I want to oppose. If Gitā contains incoherent thoughts, then such incoherence is an original and integral part of the Gitā and not a later transformation. This is my position.

When we take up the question of the consistency of the text of the Gitā, there are two questions that should be considered. One is the consistency of the text with the main Mahābhārata and the other is the consistency of the different

in a plane where there are no limitations like time and space Thus the problem of how such a long conversation could have taken place on the Battle field should not be raised The consequent inconsistency between the Gītā and its context vanishes

Man's mind functions in mysterious ways and one should not ask why doubts arise in the minds of different men in different ways If the Gītā were a short treatise written by some one to deal with a particular problem, then we can talk about precision and consistency The Lord has to clear Arjuna's mind of its doubts and vascillations When doubts arise in his mind regarding various points, the Lord has to give a reply, instead of questioning the relevancy of the doubts It is in the very nature of the situation in which the Gītā teaching is imparted that the text should deal with different problems and should present problems and their solutions as viewed from different angles

Among the different and seemingly conflicting thoughts in the Gītā what is the real teaching ? Some Ācāryas lay the emphasis on Jñāna and Vairāgya, others lay the emphasis on Bhakti, still others emphasise the Karma aspect Some people find in it an inspiration to use physical force in defence of virtue Others consider the general setting as not of much importance and accept the text as essentially a teaching of peace If one can say that among the doubts in the mind of Arjuna, a particular one was the chief one, then we can also say that the answer to that doubt is the chief teaching of the Lord As it is, there are many problems and there are the corresponding solutions Every one can take as the real teaching that solution which removes his particular doubt No one can give a categorical answer to the problem of the real Teaching of the Gītā I consider the question as irrelevant

It is as irrelevant as the question whether in creating man, there was more emphasis on the hands or on the legs We cannot say that the back bone is the real and original man and that all other parts are later accretions due to confusion of thought and as such should be removed from the original and pure body of man The same thing is true of the Gītā also The Gītā is a unit and serves the varying needs of a suffering humanity It is an indivisible whole a unit

It is in this spirit that I present this edition of the Gītā to the world

C KUNHAN RAJA

The Adyar Library
15 January 1941

श्री

श्रीमद्भगवद्गीताऽर्थप्रकाशिका

ॐ श्रीमद्विश्वाधिष्ठानपरमहससद्गुरुरामचन्द्राय नम

गीताऽर्थं प्रत्यगद्वैतमविभक्तचतुष्पदम् ।
आत्माराम नतिपद कुर्वे नारायणाभिधम् ॥ १ ॥
त्रिपान्नारायणव्यासप्राणिपादरजासि न ।
कुलदैव नमस्तभ्य पुनस्तेभ्यो नमो नम ॥ २ ॥
यस्मिन्वसति विश्वालिर्विश्वालौ यो वसन्स्वयम् ।
देदीप्यमानरूपो ऽभूत्त भजे देशिकोत्तमम् ॥ ३ ॥
नत्वा श्रीगुरुपादाब्ज भाष्यसूक्त्यनुरोधत ।
मन्दबुद्ध्यनुरोधेन गीता व्याक्रियते मया ॥ ४ ॥
अस्ति भाष्यादिक तत्र पण्डिताल्यधिकारत ।
मन्दाल्यनवकाशत्वात्तदर्थो ऽयमुपक्रम ॥ ५ ॥
भाष्यानुरोधाद्व्याख्याया अनुबन्धादिक मया ।
न पृथग्वचनीय स्यात्तदेवात्रोपयुज्यते ॥ ६ ॥

नारायण परो ऽव्यक्तादण्डमव्यक्तसभवम् ।
अण्डस्यान्तस्त्विमे लोका सप्तद्वीपा च मेदिनी ॥ '

इति श्रीमद्भगवद्गीताभाष्यादौ भाष्यकारप्रयुक्तस्मृत्यर्थपर्यालोचनयोपोद्धात-सिद्धि स्यादिति तदर्थं उच्यते ।

'आपो नारा इति प्रोक्ता आपो वै नरसूनव ।
ता यदस्यायन पूर्वं तेन नारायण स्मृत ॥'

यद्वा नरशब्दतश्चराचरात्मक शरीरजातमुच्यते । तत्र संनिहिताश्चिदा-भासा नारा उच्यन्ते । 'य सर्वेषु भूतेषु तिष्ठन्सर्वेभ्यो भूतेभ्यो ऽन्तरो य सर्वाणि भूतानि न विदुर्यस्य सर्वाणि भूतानि शरीर य सर्वेभ्यो भूतेभ्यो ऽन्तरो यमयत्येष त आत्मा ऽन्तर्याम्यमृत[1]' इति श्रुतिसिद्धो ऽन्तर्यामी नेषामयनम्, आश्रयत्वात् । अयमेव नारायण इत्यर्थ । अथ वा, नरा एव नारा जीवास्त्वंपदवाच्या । तेषामयनमधिष्ठान तत्पदवाच्य नारायणशब्दार्थ । आहो स्वित्, 'तत्र जात्वपि सूरयो न रमन्ते' इति नर स्वाज्ञानम् । तस्मान्नरात्स्वाज्ञानादाविर्भूतमविद्यापदतत्कार्यजात नारम् । तस्यायनमधिष्ठानमप्यविभक्तचतुष्पद नित्यशुद्धबुद्धप्रत्यक्परविभागा-सहसत्तासामान्याखण्डानन्दत्रिपान्नारायणाभिधमेकमेवाद्वय ब्रह्म नारायण-शब्दार्थ । ननु, अधिष्ठानाधिष्ठेययोरेकत्वेनाधिष्ठानस्याप्यधिष्ठेयगतानृतजड-दु खता स्यादित्यत आह—पर इति । स्वाधिष्ठेयाव्यक्ताभिधाविद्यापद-तत्कार्यजातस्य स्वाज्ञदृष्टिविकल्पितत्वेन मिथ्यात्वात्तदधिष्ठानस्य निर्मायत्वेन परमार्थसत्यत्वात्तम प्रकाशयोरिव वितथावितथयोरेकत्वासभवादधिष्ठेयाभावेन निरधिष्ठानताध्रौव्यादव्यक्तात्परत्व सिद्धमेवेत्यर्थ । किं पुनरविद्यापदस्य कल्पितत्वम्' उच्यत । निरविद्यापदे त्रिपान्नारायणे स्वाज्ञानदृष्टिभि स्थूलसूक्ष्मबीजतुरीयाशाद्यव्यष्टिसमष्टिविभागयुक्तत्रिगुणात्मकाव्यक्ताविद्यापद कल्पितम् । तदेवाकाशाद्यपञ्चीकृतपञ्चीकृतपञ्चमहाभूततत्कार्याविद्याऽण्डतदन्त-

[1] बृ अ—३, ७, ४

गेतानन्तकोटिपिण्डाण्डोपेतब्रह्माण्डपटलतत्तदण्डोचितचतुर्दशभुवनतत्तद्भुवनोचितसप्तद्वीपादिरूपेण परिणतवद् दृश्यते, निरधिष्ठानत्वेन स्वेतरवस्त्वन्तरासहमपि त्रिपान्नारायणाख्य ब्रह्म कृष्णरक्तश्वेतस्वच्छवर्णानुरञ्जितचतुष्कपालघटितघटमठावच्छिन्नव्योमवद्व्यष्टिसमष्ट्यात्मकस्वाधिष्ठेयमिथ्याभिदाऽनुयोगतो नियम्यविश्वतैजसप्राज्ञनियामकविराड्ढिरण्यगर्भेश्वरतत्सर्वोपाधिभावाभावप्रकाशकसाक्षिवच्च भासत। तत्राविद्यापदसमष्टिबीजांशानुगतमीश्वरचैतन्यम् 'तत्सृष्ट्वा तदेवानुप्राविशत्[1]' 'अनेन जीवेनात्मना ऽनुप्रविश्य नामरूपे व्याकरवाणि[2]' इति 'स्वयमेव जगद्भूत्वा प्राविशज्जीवरूपत' इत्यादिश्रुत्यनुरोधेनाभिन्ननिमित्तोपादानकारण सचराचरात्मक निखिल जगत्सृष्ट्वा तदभ्युदयनिःश्रेयसहेतुस्वनिःश्वासरूपेण सषडङ्गचतुर्वेदषट्शास्त्रादिर्भूत्वा स्वारोपितससारप्रवृत्तिनिवृत्तिधर्मानपि द्विधा विभज्य मरीच्यादिप्रजापतीन्प्रवृत्तिधर्मनिष्ठान्, नारदादीन्निवृत्तिधर्मनिष्ठान्विधाय तत्परपरया ब्राह्मणादिवर्णब्रह्मचर्याद्याश्रमतदभिमानिभिरनुष्ठेयमित्याज्ञाप्य कालान्तरे तद्धर्मद्वयानुष्ठातृकामसकल्पहेत्वधर्माभिभूते धर्मद्वये, तेन जगत्साकर्ये जाते, ब्राह्मणाधीनत्वात्सर्वस्य पुनर्निष्ठाद्वयप्रदर्शनतस्तद्रक्षणेन सर्वं रक्षितं स्यादिति मन्वान स्वप्रयोजनाभावे ऽपि भक्तवृन्दानुकम्पया वैष्णवीं त्रिगुणात्मिका माया वशीकृत्य देवकीवसुदेवयोर्जात इव लक्ष्यमाण स्वज्ञानशिथिलीकृतस्वाज्ञान स्वांशजमर्जुन निमित्तीकृत्य तादृशेन गृहीतमनुष्ठीयमान च धर्मद्वय वृद्धि गमिष्यतीति मन्वानस्तस्मिन्स्वमायाप्रसरण कृत्वा तया मोमुह्यमानायापारशोकमोहाविष्टायात्यन्तभक्तायार्जुनाय वैदिकधर्मद्वयमुपदिदेश। तमेतमर्थं सर्वज्ञो भगवान्वेदव्यासः सप्तभि श्लोकशतैर्निबन्धन कृतवान्

[1] तै—२, ६

[2] छा—६, ३, २

'या स्वय पद्मनाभस्य मुखपद्माद्विनि सृता ।
सैव श्रीभगवद्गीता निष्ठायुग्मप्रकाशिनी ॥'

इति स्मृत्यनुरोधेन भगवन्मुखविनि सृता एव प्रायश श्लोका , तेषा सगतये किंचित्किंचिद्रचयामासेत्यर्थ । तदिदमुपायोपेयभूत निष्ठाद्वयमधिकृत्य प्रवृत्त गीताशास्त्र भक्तकोटिनमस्कृत जयति । तत्कालीनाना प्राची विशुद्धचित्तत्वेन सकृत्तदर्थानुसधानतस्ते कृतकृत्या अभवन् । तदिद गीताशास्त्र कामसकल्पकुण्ठितचित्तैरिदानींतनै कैश्चिद् भगवदाशयप्रतिकूलतया स्वस्वबुद्ध्यनुसारेण व्याख्यातम् । तद्व्याख्यापूगस्य स्वाशयप्रतिकूलत्वेन स्वभक्ताना पुरुषार्थो न भवेदिति परमदयालुरतिकृपया पुन स्वयमेव शकरभगवत्पादाचार्यरूपेणाविर्भूय स्वाशयप्रतिकूलव्याख्याखण्डनपूर्वक भाष्यरूपेण स्वाशय प्रकटीचकार । ततस्तद्भाष्यलब्धविवेका कृतकृत्या भवेयुस्तराम्, तदवलोकनासमर्थाना मुमुक्षूणा गीताशास्त्रार्थावगतये व्याख्योपक्रम इति पुरस्तादेवोक्तत्वात् । 'धर्मक्षेत्रे' इत्यारभ्य 'न योत्स्य इति गोविन्दम्' इत्यन्तस्य ग्रन्थस्य द्वितीयाध्यायैकदेशत्वेनोपोद्घातत्वात् तदर्थ उच्यते ।
प्रज्ञालोचनस्य धृतराष्ट्रस्य स्वकीयपरकीयजयापजयदर्शनाक्षमत्वेन व्यासप्रसादलब्धदिव्यदृष्टिं स्वहितोपदेष्टार सजय प्रति धृतराष्ट्र उवाच—

धृतराष्ट्र उवाच—

धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः ।
मामकाः पाण्डवाश्चैव किमकुर्वत संजय ॥ १ ॥

धर्मक्षेत्र इति । हे सजय ! धर्मवृद्धिहेतुत्वाद्धर्मक्षेत्रम् । कौरवैरधिष्ठितत्वात्कुरुक्षेत्रम् । तस्मिन् धर्मक्षेत्राभिधे कुरुक्षेत्रे योद्धुमिच्छवो युयुत्सव

मामका पाण्डवाश्चैव मिथ समवेता मिलिता सन्त किमकुर्वत किं कृतवन्त । तत्सर्वं वदेति शेष ॥ १ ॥

विख्यातपौरुषैर्भीष्मादिभी रक्षितमस्मदीय बल दृष्ट्वा पाण्डवा भीता न वा, अहिंसाशास्त्रमवष्टभ्य पक्षद्वय युद्धादुपरत न वेति पुत्रस्नेहाभिनिविष्टहृदयेन धृतराष्ट्रेण कृतस्य प्रश्नस्योत्तर सजय उवाच दृष्ट्वेत्यादिना ।

संजय उवाच—

दृष्ट्वा तु पाण्डवानीकं व्यूढं दुर्योधनस्तदा ।
आचार्यमुपसंगम्य राजा वचनमब्रवीत् ॥ २ ॥

दृष्ट्वेति । तुशब्देन पाण्डवाना भयलेशो ऽपि नास्ति, प्रत्युत दुर्योधनस्यैव भय प्रादुर्भूतमिति द्योत्यते । अतिधृष्टैर्धृष्टद्युम्नादिभि व्यूढमधिष्ठित पाण्डवानाम् अनीक सैन्य दृष्ट्वा तदा युद्धप्रदेशावस्थितिकाले परित्रस्तहृदयो राजा दुर्योधन स्वरक्षितार द्रोणाचार्यमुपसगम्य वक्ष्यमाणमर्थसहित वचनमब्रवीत् उक्तवानित्यर्थ ॥ २ ॥

तद्वचनमेव नवभि श्लोकैराह—पश्येत्यादिना ।

पश्यैतां पाण्डुपुत्राणामाचार्य महतीं चमूम् ।
व्यूढां द्रुपदपुत्रेण तव शिष्येण धीमता ॥ ३ ॥

हे आचार्य' तव शिष्यो धीमान्द्रुपदपुत्र शस्त्रास्त्रविद्यापारीणत्वेन धृष्टद्युम्न इति प्रख्यातकीर्त्ति . तेन व्यूढा व्यूहरचनया ऽधिष्ठिता दिगन्तविश्रान्तपराक्रमवतो युष्मदादीनलक्षीकृत्य धैर्येण व्यवस्थिता महतीम् अनेकाक्षौहिणीजुष्टामेतामक्षोभ्या पाण्डुपुत्राणा चमू पश्य यथावदवलोकयेत्यर्थ ॥ ३ ॥

परपक्षे शूराणां विद्यमानत्वात्ते नोपेक्षणीया इति स्वाचार्यं प्रत्याह —

अत्र शूरा महेष्वासा भीमार्जुनसमा युधि ।

अत्रेति । अत्र परसेनायाम् अस्मदपारभीकरधनुर्धरत्वात् महान् इषुरास्ते ऽस्मिन्धनुषीति इष्वासः येषां ते महेष्वासाः, पक्षद्वयविदितपराक्रमाभ्यां भीमार्जुनाभ्यां युधि समाः तुल्याः निर्भयान्तरङ्गत्वेन तृणीकृतपरपक्षाः शूराः राजानः वर्तन्ते ॥ ३- ॥

परपक्षानुरागिणो राज्ञो विज्ञापयति—युयुधान इत्यादिना सर्व एव महारथा इत्यन्तेन ।

युयुधानो विराटश्च द्रुपदश्च महारथः ॥ ४ ॥
धृष्टकेतुश्चेकितानः काशिराजश्च वीर्यवान् ।
पुरुजित्कुन्तिभोजश्च शैब्यश्च नरपुंगवः ॥ ५ ॥
युधामन्युश्च विक्रान्त उत्तमौजाश्च वीर्यवान् ।
सौभद्रो द्रौपदेयाश्च सर्व एव महारथाः ॥ ६ ॥

युयुधान इत्यादीनां पृथक्पृथग्दशभिः सहस्रैर्धन्विनां योद्धृत्वात्तेषूपेक्षा न कार्येत्यर्थः ॥ -४ — ६ ॥

परबलदर्शनभीतश्चेत्तैः सख्यं रोचयेत्याचार्याशयमाशङ्क्याह -

अस्माकं तु विशिष्टा ये तान्निबोध द्विजोत्तम ।
नायका मम सैन्यस्य संज्ञाऽर्थं तान्ब्रवीमि ते ॥ ७ ॥

अस्माकमिति । तुशब्दः स्वभयगोपनप्रदर्शनार्थः । अस्माकम् अस्मत्पक्षे ये विशिष्टाः सर्वोत्कृष्टाः राजानः वर्तन्ते मयोच्यमानान् तान्

निबोध मद्वचनादवधारय । यद्यपि त्वमेव तान्वेदितु प्रभवसि तथा ऽपि मम सेनानायका य .वर्तन्ते सज्ञार्थं तानह ब्रवीमि विज्ञापन करोमि । द्विजोत्तमेति सबोधनात्तवाज्ञात न किंचिदस्तीत्यभिप्राय ॥ ७ ॥

स्वभयमोचनदक्षान्पुरुषधौरेयानाह—भवानित्यादिभ्या द्वाभ्याम् ।

भवान्भीष्मश्च कर्णश्च कृपश्च समितिंजयः ।
अश्वत्थामा विकर्णश्च सौमदत्तिस्तथैव च ॥ ८ ॥

भवान्द्रोण इत्यारभ्य सौमदत्त्यन्ता प्रख्यातपराक्रमा इत्यर्थ ॥८॥

स्वमनाया परिशिष्टसख्यान निरस्यति - अन्ये चेति ।

अन्ये च बहवः शूरा मदर्थे त्यक्तजीविताः ।
नानाशस्त्रप्रहरणाः सर्वे युद्धविशारदाः ॥ ९ ॥

अन्ये च भीष्मादिव्यतिरिक्ता बहव शूरा सन्ति । सन्तु नाम, समय त्वामेक विहाय पलायन्ते दुर्वीय इति तत्राह -मदर्थे इति । मदर्थे मन्निमित्त त्यक्तजीविता स्वप्राणेष्वपि दया न कुर्वन्तीत्यर्थ । प्रतिपक्षद-मनसाधनाभावात्किं कुर्वन्तीति तत्राह --नानेति । नानाविधानि शस्त्राणि प्रहरणसाधनानि येषा ते नानाशस्त्रप्रहरणा । प्रहरणसाधनसपत्तावपि तत्प्रयोगे नैपुण्याभावात्करभूषणानि तानीति तत्राह—युद्ध इति । सर्वे युद्धविशारदा परपक्षघातिन इत्यर्थ ॥ ९ ॥

स्वभयाभावे हेत्वन्तरमाह—

अपर्याप्तं तदस्माकं बलं भीष्माभिरक्षितम् ॥
पर्याप्तं त्विदमेतेषां बलं भीमाभिरक्षितम् ॥ १० ॥

अपर्याप्तमिति। एकादशाक्षौहिणीपरिमित सूक्ष्मबुद्धिमद्भीष्माभिरक्षित-मस्माक बलमपर्याप्तमपरिमितम्। एतेषा पाण्डवाना सप्ताक्षौहिणीपरिमित-मकुशलधीभीमाभिरक्षित बल पर्याप्त स्वल्पमित्यर्थ। यद्वा भीष्माभिरक्षित-मस्मदीयं बलमेकादशाक्षौहिणीपरिमितमपि पाण्डवपरिभवे किंचिदप्यपर्याप्तम् असमर्थम्, नालमित्यर्थ। भीमाभिरक्षित बलं सप्ताक्षौहिणीपरिमितमप्य-स्मत्परिभवे पर्याप्तम्, अलमित्यर्थ ॥ १० ॥

यत एवमतो भवद्भिर्मदुक्तरीत्या वर्तितव्यमित्याह---

अयनेषु च सर्वेषु यथाभागमवस्थिताः।
भीष्ममेवाभिरक्षन्तु भवन्तः सर्व एव हि ॥ ११ ॥

अयनेष्विति। सर्वेष्वयनेषु व्यूहप्रवेशमार्गेषु च सर्वे भवन्तो विकर्णादयो यूय रणभुवमनतिक्रम्य यथाभागं व्यवस्थिता सन्त भीष्ममेवाभितो रक्षन्तु। तद्रक्षणेनास्मदीय बल रक्षित स्यादिति भाव ॥ ११ ॥

बहुमानयुक्तराजवचनश्रवणतो भीष्मो यदकरोत्तदाह---

तस्य संजनयन्हर्षं कुरुवृद्धः पितामहः।
सिंहनादं विनद्योच्चैः शङ्खं दध्मौ प्रतापवान् ॥ १२ ॥

तस्येति। प्रख्यातपराक्रमत्वात्प्रतापवान्। कुरूणा कौरवाणा वयसा बुद्धितो वा वृद्धत्वात्कुरुवृद्ध। पाण्डुधृतराष्ट्रपितुरग्रजत्वात्पितामाहो भीष्माचार्य। तद्वशवर्तित्वेन तस्य दुर्योधनस्य हर्षं सजनयन् यथाबल स्वपौरुष-ख्यापनार्थमुच्चै सिंहनाद विनद्य कृत्वा शङ्खमपि दध्मौ, मुखवायुना शङ्ख पूरितवानित्यर्थ ॥ १२ ॥

राजाभिप्रायानुरोधेन भीष्मप्रवृत्त्यनन्तरमन्ये ऽपि प्रवृत्ता इत्याह—

ततः शङ्खाश्च भेर्यश्च पणवानकगोमुखाः ।
सहसैवाभ्यहन्यन्त स शब्दस्तुमुलो ऽभवत् ॥ १३ ॥

तत इति । तत भीष्मयुद्धप्रवृत्त्यनन्तरम्, इतरै द्रोणप्रभृतिभि, शङ्खाश्च भेर्यश्च पणवानकगोमुखाख्या वाद्यविशेषाश्च सहसैवाभ्यहन्यन्त अभितस्ताडिता । स शङ्खादिप्रयुक्त शब्द तुमुल अधिको ऽभवत ॥१३॥

कौरवानीकयुद्धोत्साहानन्तर पाण्डवयुद्धोत्साहमाह—तत इत्यादिभि पञ्चभि ।

ततः श्वेतैर्हयैर्युक्ते महति स्यन्दने स्थितौ ।
माधवः पाण्डवश्चैव दिव्यौ शङ्खौ प्रदध्मतुः ॥ १४ ॥

तत इति । तत प्रतिपक्षयुद्धप्रवृत्त्यनन्तरं माया लक्ष्म्या धवो माधव पाण्डवश्चैव, परिसरवर्तिनौ कृष्णार्जुनौ पराक्रमान्वितै श्वेताश्वै युक्ते महत्यप्रधृष्ये स्यन्दने स्थितौ दिव्यावप्राकृतौ शङ्खौ प्रदध्मतु· पूरितवन्तावित्यर्थ ॥ १४ ॥

तयोर्दिव्यत्व स्फोरयति--

पाञ्चजन्यं हृषीकेशो देवदत्तं धनंजयः ।

पाञ्चजन्यमिति । स्वार्थसयोगतो हृष्यन्तीति हृषीकाणि इन्द्रियाणि, तेषामधीशत्वात् हृषीकेशो भगवान् । शत्रूञ्जित्वा तद्धनापहरणाद् धनजयो ऽर्जुन । पञ्चजनासुरदेहज पाञ्चजन्यनामक शङ्खम् । देवेन इन्द्रेण दत्त देवदत्तनामक शङ्खम् । प्रदध्मतुरिति पूर्वेणान्वय ॥ १४- ॥

कृष्णार्जुनयुद्धोत्साहानन्तरं भीमादीना चतुर्णां प्रवृत्तिमाह—

पौण्ड्रं दध्मौ महाशङ्खं भीमकर्मा वृकोदरः ॥ १५ ॥
अनन्तविजयं राजा कुन्तीपुत्रो युधिष्ठिरः ।
नकुलः सहदेवश्च सुघोषमणिपुष्पकौ ॥ १६ ॥

पौण्ड्रमिति ॥ भीम घोर कर्म यस्य स भीमकर्मा । वृकवद्रिक्तोदरत्वाद् वृकोदरो भीम इत्यर्थः । एव भीमयुधिष्ठिरनकुलसहदेवा यथाबल शङ्खान्दध्मुरित्यर्थ ॥ -१५, १६ ॥

धृतराष्ट्रदुराशोन्मूलनाय पाण्डवानुगाना राज्ञामैकमत्यमाह—

काश्यश्च परमेष्वासः शिखण्डी च महारथः ।
धृष्टद्युम्नो विराटश्च सात्यकिश्चापराजितः ॥ १७ ॥
द्रुपदो द्रौपदेयाश्च सर्वशः पृथिवीपते ।
सौभद्रश्च महाबाहुः शङ्खान्दध्मुः पृथक्पृथक् ॥ १८ ॥

काश्य इति । हे पृथिवीपते महीपते धृतराष्ट्र । काश्यादिसौभद्रान्ताना परमेष्वासत्वादि विशेषणचतुष्टय प्रत्येक सबध्यते ।

'[1]परैरधृष्यशरधि परमेष्वास उच्यते ॥
एकादश सहस्राणि धन्विना यस्तु योधयेत् ।
शस्त्रशास्त्रप्रवीणश्च स महारथ उच्यते ॥
अमितान्योधयेद्यस्तु स प्रोक्तो ऽतिरथो महान् ।
रथेनैकेन योद्धा चेत्स वा अर्धरथो मत ।
प्रतिपक्षापृष्ठदर्शी स भवेदपराजित ॥

[1] म भा उद्योग

विष्णुतद्भक्तपूजाया स्वाश्रमोचितकर्मणि ।
दाने च शौण्डौ यद्बाहू स महाबाहुरुच्यते ॥'

इति राजधर्मे । एवंविशेषणविशिष्टा मया परिगणिता काश्यादयो राजान तदन्ये च पृथक्पृथक् शङ्खान्दध्मुरित्यर्थ ॥ १७, १८ ॥

स शङ्खनादसमूहस्त्वदीयाना भयावह आसीदित्याह—

स घोषो धार्तराष्ट्राणां हृदयानि व्यदारयत् ।
नभश्च पृथिवीं चैव तुमुलो व्यनुनादयन् ॥ १९ ॥

स इति । स शङ्खसमूहघोष नभश्चान्तरिक्ष च पृथिवीं मर्त्यलोकमपि व्यनुनादयन् प्रतिध्वनिना पूरयन्सन् धार्तराष्ट्राणा हृदयानि व्यदारयत् व्यभिनदित्यर्थ ॥ १९ ॥

तदानीमर्जुनो भगवन्त प्रति किंचिद्विज्ञापन कृतवानित्याह— अथेति सार्धेन श्लोकेन ।

अथ व्यवस्थितान्दृष्ट्वा धार्तराष्ट्रान्कपिध्वजः ।
प्रवृत्ते शस्त्रसंपाते धनुरुद्यम्य पाण्डवः ॥ २० ॥
हृषीकेशं तदा वाक्यमिदमाह महीपते ।

अथेति । हे महीपते धृतराष्ट्र । अथशब्द आनन्तर्यार्थे । उभयो सेनयो युद्धप्रवृत्त्यनन्तरम्, कपिर्हनुमान्ध्वजे यस्य स कपिध्वज, पाण्डवो ऽर्जुन हृदयदौर्बल्यात्पलायनयोग्या अपि बलाद् धैर्यमवष्टभ्य युद्धाय व्यवस्थिता 'य धार्तराष्ट्रा तान् दृष्ट्वा, शस्त्रसपाते शस्त्राणा समुदाये प्रवृत्ते सति, तदा तदानीं धनुरुद्यम्य हृषीकेश प्रति इद वक्ष्यमाण वचनमाह अब्रवीदित्यर्थ ॥ २०, २० ॥

अर्जुन उवाचेत्यर्जुनवाक्यमनुक्रामति—सेनयोरिति सार्धेन द्वयेन ।

अर्जुन उवाच—

सेनयोरुभयोर्मध्ये रथं स्थापय मे ऽच्युत ॥ २१ ॥

सेनयोरिति । उभयो सेनयो मध्ये मे मम रथ स्थापयेत्यर्जुनेन स्वधामतो जात्वपि न च्यवत इत्यच्युतेति सबोधनया स्वय सर्वनियामको ऽपि भगवान्सारथ्ये नियुज्यते । सर्वेश्वरो यन्नियोगमनुवर्तते तस्य किमशक्यम् । भक्तचित्तानुवर्तन भगवतो ऽपि युक्तमेव भक्तवश्यत्वप्रसिद्धेरित्यभिप्राय ॥ -२१ ॥

रथस्थापनप्रदेश निर्दिशति-—

यावदेतान्निरीक्षे ऽहं योद्धुकामानवस्थितान् ।
कैर्मया सह योद्धव्यमस्मिन्रणसमुद्यमे ॥ २२ ॥

यावदिति । युद्धारम्भे प्रवृत्ते सति कै सह राजभि मया योद्धव्यम् । यावद्गत्वैतान् योद्धुकामान् अवस्थितान् परपक्षस्थान्भीष्मादीनह निरीक्षे तावति प्रदेशे रथ स्थापयेत्यर्थः ॥ २२ ॥

युद्धोन्मुखता न फलवतीत्याह—

योत्स्यमानानवेक्षे ऽहं य एते ऽत्र समागताः ।
धार्तराष्ट्रस्य दुर्बुद्धेर्युद्धे प्रियचिकीर्षवः ॥ २३ ॥

योत्स्यमानानिति । स्वरक्षणोपायमप्रतिपद्यमानस्यैव युद्धाय सरम्भ कुर्वतो दुर्बुद्धे· धार्तराष्ट्रस्य युद्धे ऽत्र युद्धभूमौ प्रियचिकीर्षवो ये केचित् एते राजान समागता तान् योत्स्यमानान् युद्धोद्युक्तान् अहमवेक्षे । नानादेश-

समागतै राजभिरर्जुनस्य पूर्ववैराभावे ऽपि तेषा धार्तराष्ट्रप्रियकरत्वाद् वैरित्वमुचितमेवेत्यर्थ ॥ २३ ॥

एवमर्जुनेन भगवान्प्रेरितो ऽप्यहिंसाशास्त्रार्थोपदेशेनार्जुन युद्धान्निवर्तयिष्यतीति धृतराष्ट्राशयमाशङ्क्य भगवदवतारस्य भूभारहरणार्थकत्वान्नैवमिति मनसि निधाय सजय उवाच—एवमिति द्वाभ्याम् ।

सजय उवाच—

एवमुक्तो हृषीकेशो गुडाकेशेन भारत ।
सेनयोरुभयोर्मध्ये स्थापयित्वा रथोत्तमम् ॥ २४ ॥
भीष्मद्रोणप्रमुखतः सर्वेषां च महीक्षिताम् ।
उवाच पार्थ पश्यैतान्समवेतान्कुरूनिति ॥ २५ ॥

एवमिति । हे भारत धृतराष्ट्र । गुडाका निद्रा, तस्या ईश गुडाकेश जितनिद्र अर्जुन, तेनैवमुक्तो हृषीकेश श्रीकृष्ण उभयो सेनयो मध्ये अधोमुख रेत ऊर्ध्वमुख कृत्वा भीष्मीकरणात् स्तम्भनाद् भीष्मश्च शस्त्राकर्षणत द्रोणीकृतकरयुगत्वाद् द्रोणश्च भीष्मद्रोणौ, तयो प्रमुखत: सर्वेषा महीक्षितामन्तिके च रथोत्तम स्थापयित्वा हे पार्थेति सबोधयन् एतान्समवेतान्कुरून्पश्येत्युक्तवान् । इतिशब्द संजयोक्तिद्योतनार्थ ॥ २४, २५ ॥

तत किमासीदित्यत आह---

तत्रापश्यत्स्थितान्पार्थः पितॄनथ पितामहान् ।
आचार्यान्मातुलान्भ्रातॄन्पुत्त्रान्पौत्त्रान्सखींस्तथा ॥
श्वशुरान्सुहृदश्चैव सेनयोरुभयोरपि ।

तत्रेति । तत्र युद्धार्थं भगवदनुज्ञाया जातायाम् । उभयो सेनयो स्थितान् । पितॄन् पितृव्यान् । अथ तथेत्यर्थ । उक्ताननुक्ताश्च सर्वान्पार्थो ददर्शेत्यर्थ ॥ २६, २६- ॥

ततः किमिति तत्राह—

तान्समीक्ष्य स कौन्तेयः सर्वान्बन्धूनवस्थितान् ॥२७॥
कृपया परया ऽऽविष्टो विषीदन्निदमब्रवीत् ।

तानिति । स कौन्तेयो ऽर्जुन उभयो सेनयो व्यवस्थितान् सर्वान्बन्धून्समीक्ष्य परया कृपया दयया आविष्टो भूत्वा विषीदन् उभयो सेनयो हिंसाप्रयुक्त विषाद कुर्वन्सन् इद वक्ष्यमाण वाक्य श्रीकृष्ण प्रत्यब्रवीत् उक्तवानित्यर्थ ॥ -२७, २७- ॥

कि तद्वाक्यमित्याकाङ्क्षाया यावदध्यायपरिसमाप्ति अर्जुन उवाचेत्याह—

अर्जुन उवाच—

दृष्ट्वेमं स्वजनं कृष्ण युयुत्सुं समुपस्थितम् ॥ २८ ॥
सीदन्ति मम गात्राणि मुखं च परिशुष्यति ।

दृष्ट्वेत्यादि । युयुत्सु समुपस्थित स्वजनं दृष्ट्वा मम गात्राणि सीदन्ति व्यथामनुभवन्ति, मुख च परिशुष्यति अनार्द्रं भवतीत्यर्थ ॥ -२८,२८- ॥

गात्रव्यथादिं शोकलिङ्गमुक्त्वा सप्रति वेपथुप्रभृतीनि शोकलिङ्गानि दर्शयति—

वेपथुश्च शरीरे मे रोमहर्षश्च जायते ॥ २९ ॥

गाण्डीवं स्रंसते हस्तात्त्वक् चैव परिदह्यते ।

वेपथुरिति । शरीरे मे वेपथु अकस्मात् कम्पश्च, रोम्णा पुलकितत्व रोमहर्ष रोमाञ्चश्च जायते । कि तेनेति तत्राह—गाण्डीवमिति । गाण्डीव-नामक धनुरपि स्वहस्तात्स्रंसते च्यवत इत्यर्थः । किं च त्वक् चैव त्वगि-न्द्रियमपि स्वजनवधप्रयुक्तेन शोकवह्निना परित समन्ताद् दह्यते सतप्यत इत्यर्थ ॥ -२९, २९- ॥

स्वभयहेतूक्त्यनन्तरमधीरतामाह—

न च शक्नोम्यवस्थातुं भ्रमतीव च मे मनः ॥ ३० ॥
निमित्तानि च पश्यामि विपरीतानि केशव ।

न चेति ॥ क ब्रह्माणम् ईश वृषभध्वज च अवतीति हे केशव, युद्धभूमौ अवस्थातु चापि न शक्नोमि । कस्मात् ? मे मम मनश्च भ्रमतीव स्थितम् । किमर्थम् ? अनिष्टसूचकानि विपरीतानि वामनेत्रस्फुरणादिरूपाणि निमित्तानि च पश्यामि ॥ -३०, ३०- ॥

यत शत्रुहिंसया श्रेयो विजयो राज्यादिक च भवति अतो युद्धादु-परतिर्व्यर्थेति तत्राह—

न च श्रेयो ऽनुपश्यामि हत्वा स्वजनमाहवे ॥ ३१ ॥
न काङ्क्षे विजयं कृष्ण न च राज्यं सुखानि च ।

न चेति । स्मर्तॄपापाना कर्षणाव् निर्मूलीकरणात् हे कृष्ण, आहवे युद्धे स्वजन हत्वा श्रेय· किंचिदपि न पश्यामि, विजय राज्यम् ऐहिक-सुखानि च न काङ्क्षे ॥ -३१, ३१- ॥

सर्वजनेप्सित राज्यभोगादिक कि नेच्छसीति तत्राह—

किं नो राज्येन गोविन्द किं भोगैर्जीवितेन वा ॥ ३२ ॥

किमिति । गोभि गीर्भि तत्त्वमस्यादिमहावाग्भि विद्यत उपलभ्यत इति हे गोविन्द तत्त्वमस्यादिमहावाक्यवेद्य ! राज्येन स्रक्चन्दनादिभोगै जीवितेन वा अस्माक कि प्रयोजनम् ? न किमपीत्यर्थ ॥ -३२ ॥

राज्यादिपरित्यागे हेतुमाह—

येषामर्थे काङ्क्षितं नो राज्यं भोगाः सुखानि च ।
त इमे ऽवस्थिता युद्धे प्राणांस्त्यक्त्वा धनानि च ॥ ३३ ॥
आचार्याः पितरः पुत्त्रास्तथैव च पितामहाः ।
मातुलाः श्वशुराः पौत्त्राः श्यालाः संबन्धिनस्तथा ॥३४॥

येषामिति । येषा बन्धूनामर्थे राज्य काङ्क्षित भोगा सुखानि च काङ्क्षितानि त इमे बान्धवा आचार्यादय प्राणान् धनानि च त्यक्त्वा युद्धार्थमवस्थिता तिष्ठन्तीत्यर्थ ॥ ३३, ३४ ॥

दयया धार्तराष्ट्रादीनहत्वा तूष्णीं तिष्ठसि चेत् त्वा धार्तराष्ट्रा बाधिष्यन्तेतराम्, ततस्तान्हत्वा राज्य प्राप्स्यसीति तत्राह—

एतान्न हन्तुमिच्छामि घ्नतो ऽपि मधुसूदन ।
अपि त्रैलोक्यराज्यस्य हेतोः किं नु महीकृते ॥ ३५ ॥
निहत्य धार्तराष्ट्रान्नः का प्रीतिः स्याज्जनार्दन ।

एतानिति । मधुर्नाम कश्चन दानव, त सूदितवानिति हे मधुसूदन ! अस्मान् घ्नत सहर्तुमागतान् एतान्भीष्मादीन् त्रैलोक्यराज्य-

हेतोरपि हन्तु नेच्छामि । महीकृते महीमात्रप्राप्तये न हन्मीति कि वक्तव्यम् ८ स्वभक्तजनाना स्वप्राप्तिप्रतिकूल दुरितमर्दयति नाशयतीति हे जनार्दन [1] धार्तराष्ट्रान् •निहत्य नो ऽस्माक का प्रीति सतोष स्यात् ॥ ३५, ३५- ॥

'अग्निदो गरदश्चैव शस्त्रपाणिर्धनापह ।
क्षत्रदारापहर्ता च षडेते आततायिन ॥
अततायिनमायान्त हन्यादेवाविचारयन् ।
नाततायिवधे दोषो हन्तुर्भवति कश्चन[1] ॥'

इत्यादिस्मृतित नेषा वधो युक्त एवेति तत्राह

पापमेवाश्रयेदस्मान्हत्वैतानाततायिनः ॥ ३६ ॥
तस्मान्नार्हा वयं हन्तुं धार्तराष्ट्रान्स्वबान्धवान् ।

पापमिति । आततायिनमायान्तमित्यादिकमर्थशास्त्रम् । तच्च धर्मशास्त्राद् दुर्बलम् । तदुक्त याज्ञवल्क्येन

'स्मृत्योर्विरोधे न्यायस्तु बलवान्व्यवहारत ।
अर्थशास्त्रात्तु बलवद्धर्मशास्त्रमिति स्थिति[2] ॥'

इति । यस्मादेतद्वधस्याधर्मत्वेनान्याय्यत्वमनिवार्य स्यात् तस्मात् आततायिनामप्येतेषामाचार्यादीना वधे ऽस्मान् पापमेवाश्रयेत् । अतो वय स्वबान्धवान्• धार्तराष्ट्रान् हन्तु नार्हा न योग्या इत्यर्थ ॥ -३६, ३६- ॥

[1] मनु अ ८
[2] या स्मृ व्यव २१

आमुष्मिकसुखाभावे ऽप्यैहिक सुखं स्यादेवेति तत्राह—

स्वजनं हि कथं हत्वा सुखिनः स्याम माधव ॥ ३७ ॥

स्वजनमिति । हे माधव ! स्वजन हत्वा कथ सुखिन स्याम, न सुखिनो भवेमेत्यर्थ । ऐहिकस्यापि सुखाभावस्य द्योतको हिशब्द ॥-३७॥

उभयोर्बन्धुवधदोषे समाने ऽपि धार्तराष्ट्रा यथा तमङ्गीकृत्य युद्धे प्रवृत्ता तथा त्वमपि प्रवर्तेथा , किमनेन विषादेनेति तत्राह—यद्यपीति द्वाभ्याम् ।

यद्यप्येते न पश्यन्ति लोभोपहतचेतसः ।
कुलक्षयकृतं दोषं मित्रद्रोहे च पातकम् ॥ ३८ ॥
कथं न ज्ञेयमस्माभिः पापादस्मान्निवर्तितुम् ।
कुलक्षयकृतं दोषं प्रपश्यद्भिर्जनार्दन ॥ ३९ ॥

यद्यपीति । हे जनार्दन ! राज्यलोभेन उपहत कबलित चेतो येषा ते लोभोपहतचेतस एते धार्तराष्ट्रा कुलक्षयकृत कुलक्षयकरणेन कृत दोष मित्रद्रोहे सभवत्पातक च यद्यपि न पश्यन्ति तथा ऽपि कुलक्षयकृत दोष प्रपश्यद्भिरस्माभि अस्मात्पापान्निवर्तितु कथ न ज्ञेयम् । अतस्तत्प्रवृत्ति निरसनाय तत्कृत दोषशब्दित पाप ज्ञातव्यमेवेत्यर्थ ॥ ३८, ३९ ॥

त दोषमेव व्यक्तीकरोति—

कुलक्षये प्रणश्यन्ति कुलधर्माः सनातनाः ।
धर्मे नष्टे कुल कृत्स्नमधर्मो ऽभिभवत्युत ॥ ४० ॥

कुलक्षय इति । पारंपर्यक्रमेणागतत्वात्सनातना अग्निहोत्रादय कुल-धर्मा कुलक्षये सति प्रणश्यन्ति । धर्मे नष्टे सति कृत्स्न कुलमपि अधर्मोऽभिभवति उत व्याप्नोति खल्वित्यर्थ ॥ ४० ॥

कुलस्याधर्मभूयिष्ठत्वे को दोष इति तत्राह—

अधर्माभिभवात्कृष्ण प्रदुष्यन्ति कुलस्त्रियः ।
स्त्रीषु दुष्टासु वार्ष्णेय जायते वर्णसंकरः ॥ ४१ ॥

अधर्मेति । हे कृष्ण कुलस्य अधर्माभिभवात् अधर्मभूयिष्ठत्वत कुलस्त्रिय प्रदुष्यन्ति । दोषयुक्ता भवन्तीत्यर्थ । वृष्णयो यादवा तत्कुले आविर्भूतत्वात् हे वार्ष्णेय स्त्रीषु दुष्टासु सतीषु वर्णसकरो जायते, वर्णमर्यादोल्लङ्घनेनेत्यर्थ ॥ ४१ ॥

वर्णसाकर्ये किं स्यादिति तत्राह—

संकरो नरकायैव कुलघ्नानां कुलस्य च ।
पतन्ति पितरो ह्येषां लुप्तपिण्डोदकक्रियाः ॥ ४२ ॥

सकर इति । कुलघ्नाना कुलस्य च वर्णसकरो नरकायैव भवति । पुत्राद्यभावे एषा पितर, लुप्ता पिण्डोदकक्रिया येषा ते लुप्तपिण्डोदकक्रिया प्रेतत्वनिवृत्त्यभावात् नरके पतन्तीत्यर्थ ॥ ४२ ॥

उक्तदोषमुपसहरति— दोषैरिति द्वाभ्याम ।

दोषैरेतैः कुलघ्नानां वर्णसंकरकारकैः ।
उत्साद्यन्ते जातिधर्माः कुलधर्माश्च शाश्वताः ॥ ४३ ॥

उत्सन्नकुलधर्माणां मनुष्याणां जनार्दन ।
नरके नियतं वासो भवतीत्यनुशुश्रुम ॥ ४४ ॥

दोषैरिति । हे जनार्दन ! एतैः पूर्वोक्तैः वर्णसंकरकारकैः कुलघ्नानां दोषैः शाश्वताः जातिधर्माः कुलधर्माश्च उत्साद्यन्ते लुप्यन्ते । उत्सन्नाः विनष्टाः कुलधर्माः जातिधर्माश्च येषां तेषाम् उत्सन्नकुलधर्माणां मनुष्याणां त्रैवर्णिकानां नरके वासो नियतमवश्यं भवतीति वयमनुशुश्रुम श्रुतवन्तः इत्यर्थः ॥ ४३, ४४ ॥

'प्रायश्चित्तमकुर्वाणाः पापेषु निरता नराः ।
अपश्चात्तापिनः कष्टान्निरयान्यान्ति दारुणान् ॥'

इत्यादिवचनतः स्वबन्धुवधप्रयुक्तमहामोहपरवशोऽर्जुनो भगवन्तमाह—

अहो बत महत्पापं कर्तुं व्यवसिता वयम् ।
यद्राज्यसुखलोभेन हन्तुं स्वजनमुद्यताः ॥ ४५ ॥

अहो इति । राज्यसुखलोभेन स्वजनं हन्तुमुद्यता इति यदेतन्महदधिकं पापं कर्तुं व्यवसिता वयम् । अहो बत ! तदतिकष्टमित्यर्थः ॥४५॥

एवं सततप्तहृदयः सन् मृत्युं प्रार्थयत इत्याह—

यदि मामप्रतीकारमशस्त्रं शस्त्रपाणयः ।
धार्तराष्ट्रा रणे हन्युस्तन्मे क्षेमतरं भवेत् ॥ ४६ ॥

यदीति । अप्रतीकारं प्रतिक्रियामकुर्वाणम् अशस्त्रम् अशस्त्रपरिग्रहं मां शस्त्रपाणयो धार्तराष्ट्रा रणे हन्युः संहरेयुः यदि तन्मे क्षेमतरम् अत्यन्तहितं भवेत् ॥ ४६ ॥

तत किमिति शङ्कमान प्रति सजय उवाच—

पजय उवाच—

एवमुक्त्वा ऽर्जुनः संख्ये रथोपस्थ उपाविशत् ।
विसृज्य सशरं चापं शोकसंविग्नमानसः ॥ ४७ ॥

इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे अर्जुनविषादयोगो नाम प्रथमो ऽध्याय ।

एवमिति । अशुद्धान्त करणत्वादर्जुनो बन्धुवधप्रयुक्तशोकसविग्न मानस सन्नेवमुक्तरीत्योक्त्वा सख्ये युद्धभूमो सशर गाण्डीवनामक चाप विसृज्य न योत्स्य ऽहम् इति ब्रुवन् रथोपस्थे रथमध्ये शस्त्रपरिग्रहाच्छस्त्र-सन्न्यासमेव श्रेय साधन मत्वा उपाविशत उपविष्टवान । इतिशब्द अध्या-यपरिसमाप्त्यर्थ ॥ ४७ ॥

इति श्रीमद्भगवद्गीताऽर्थप्रकाशिकायां प्रथमो ऽध्याय ।

अथ द्वितीयोऽध्यायः

ॐ। अहिंसाशास्त्रमवष्टभ्यार्जुनयुद्धवैमुख्यश्रवणात स्वपुत्राणां राज्यं ध्रुवं मन्वानं धृतराष्ट्रमालक्ष्य तद्दुराशामुन्मूलयितुं संजय उवाच—

संजय उवाच—

तं तथा कृपयाऽऽविष्टमश्रुपूर्णाकुलेक्षणम्।
विषीदन्तमिदं वाक्यमुवाच मधुसूदनः॥ १॥

तमिति। मधुसूदनो भगवान् स्वजनहिंसाप्रयुक्तया कृपयाऽऽविष्टम् अश्रुभिः पूर्णे आकुले ईक्षणे यस्य तम् अश्रुपूर्णाकुलेक्षणम् अश्रुव्याप्ततरलाक्षं विषीदन्तं शोचन्तम् अर्जुनम् इदं वक्ष्यमाणं वचनम् उवाच॥ १॥

किं तद्वाक्यमित्यपेक्षायाम् अर्जुनं सन्मार्गे प्रवर्तयितुं सर्वज्ञो भगवानुवाच—कुत इति द्वाभ्याम्।

श्रीभगवानुवाच—

कुतस्त्वा कश्मलमिदं विषमे समुपस्थितम्।
अनार्यजुष्टमस्वर्ग्यमकीर्त्तिकरमर्जुन॥ २॥

कुत इति। स्वशरासावरिमण्डलाख्यं हविर्जुहोति नाशयति चेति हे अर्जुन! अनुपमपराक्रमवानर्जुन इति प्रख्यातकीर्तेस्तव अनार्यजुष्ट

श्रुत्याचार्यलब्धविवेकान्वितपुरुषासेव्यम् अकीर्त्तिकरम् अयशस्यम् अस्वर्ग्य स्वर्गानर्हम् इद कश्मल युद्धवैमुख्य विषमे समय क्षत्रियश्रेष्ठ त्वा त्वा कुत कस्माद्धेतो समुपस्थितम् ' शिष्टगर्हितत्वादिद तव नोचितमित्यर्थ ॥ २ ॥

यत एवमतो युद्धायोत्तिष्ठेत्याह—

क्लैब्यं मा स्म गमः पार्थ नैतत्त्वय्युपपद्यते ।
क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परंतप ॥ ३ ॥

क्लैब्यमिति । पृथा नाम कुन्ती तस्या अपत्यम्, हे पार्थ ' क्लैब्यम् अधैर्य मा स्म गम मा गा न प्राप्नुहि । कस्मात् ' ईश्वरेणापि कृताहवे दिगन्तविश्रान्तपराक्रमे त्वय्येतन्नोपपद्यते । परान् प्रतिपक्षनीहारान् स्वपौरुषगभस्तिभि तापयति शोषयति इति हे परतप ' क्षुद्र तुच्छ हृदयदौर्बल्यम् अधीरता त्यक्त्वा युद्धायोत्तिष्ठ झटितीत्यर्थ ॥ ३ ॥

भगवतैव बो यमानो ऽपि नाहमधैर्येण युद्धादुपरतो ऽस्मि, कि तु परहिसाया अन्याय्यत्वादिति भगवन्त प्रत्यर्जुन उवाच—

अर्जुन उवाच—

कथं भीष्ममहं संख्ये द्रोणं च मधुसूदन ।
इषुभिः प्रति योत्स्यामि पूजाऽर्हावरिसूदन ॥ ४ ॥

कथमिति । स्वाज्ञोल्लङ्घकानरीन्स्वहस्तपरहस्ताभ्या सूदयतीति हे अरिसूदन ' मधुसूदन ' सख्ये युद्धे पुष्पादिभि पूजार्हौ तौ भीष्मद्रोणाचार्यौ केवलवाचा ऽपि योत्स्यामीति वक्तुमविषयौ प्रति कथम् इषुभि योत्स्यामि युद्ध कुर्वे ॥ ४ ॥

तथा चेत्तव देहयात्रा न सिध्यतीति तत्राह—

गुरूनहत्वा हि महाऽनुभावा-
ञ्श्रेयो भोक्तुं भैक्षमपीह लोके ।
हत्वा ऽर्थकामांस्तु गुरूनिहैव
भुञ्जीय भोगान्रुधिरप्रदिग्धान् ॥ ५ ॥

गुरूनिति । श्रुताध्ययनपारीणत्वान्महाऽनुभावा गुरवो भीष्मद्रोणादय , तानहत्वा इहास्मिल्लोके राज्ञा निषिद्धमपि भैक्ष भिक्षाऽन्न भोक्तु श्रेयो हि । आमुष्मिकसुखाभावे ऽप्यैहिक सुख निरङ्कुशमिति तत्राह—हत्वेति ।

'अर्थस्य पुरुषो दासो दासस्त्वर्थो न कस्यचित ।
इति सत्य महाभाग बद्धो ऽस्म्यर्थेन कौरवै ॥'

इति युधिष्ठिर प्रति भीष्मेणोक्तत्वात् अर्थकामान्गुरून् हत्वा तु हत्वा ऽपि रुधिरप्रदिग्धान् लोहितलिप्तान् भोगान् अत्यन्तगर्हितान् भुञ्जीय अश्नीयाम् । अतो गुरुवधसाध्यभोगापेक्षया भैक्षाशनमेव श्रेयो भवेदित्यर्थ ॥ ५ ॥

युद्धस्य क्षत्त्रियधर्मत्वे ऽपि अहिंसाशास्त्रप्रतिषिद्धत्वात् भैक्षयुद्धयो कतरत् श्रेय इति न विद्म , किं च जयाजयस्थितिरपि संदिग्धेत्याह—

न चैतद्विद्मः कतरन्नो गरीयो
यद्वा जयेम यदि वा नो जयेयुः ।
यानेव हत्वा न जिजीविषाम-
स्ते ऽवस्थिताः प्रमुखे धार्तराष्ट्राः ॥ ६ ॥

न चेति। हिंसाशून्यत्वाद् भैक्षम्, स्वधर्मत्वाद्युद्धम्, भैक्षयुद्धयो कतरत् अन्यतरत् नो ऽस्माक गरीय श्रेयस्करमिति न विद्मो न विजानीम इत्यर्थ। परधर्मापेक्षया स्वधर्म श्रेयानिति तत्राह—यद्वेति। उभयो जयादिस्थिते सदिग्धत्वात् किमुभयेषा तत्साम्यम्। यद्वा परपक्षान् वय जयेम जेष्याम, यदि वा धार्तराष्ट्रा नो ऽस्मान् जयेयु जेष्यन्ति। यद्यप्यस्माकमेव त्वत्प्रभावतो जयो भवतु नाम, तथा ऽपि न स फलवान् यस्मात् यान् बन्धून् हत्वा नैव जिजीविषाम जीवितु नेच्छाम, प्रमुखे अस्मत्पुरोभागे ते धार्तराष्ट्रा खलु अवस्थिता। तस्मात् युद्धात् क्षत्रिय गर्हितमपि भैक्षमेव श्रेय साधनमित्यर्थ ॥ ६ ॥

एव विदितससारदोषस्य मुमुक्षोरेव ब्रह्मात्मैक्योपदेशग्रहणाधिकार व्यक्तीकुर्वन्नर्जुनो भगवन्तमाचार्यत्वेन वृण्वन् नि श्रेयससाधनमुपदिशेति प्रार्थयते—

कार्पण्यदोषोपहतस्वभावः
पृच्छामि त्वा धर्मसंमूढचेताः।
यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे
शिष्यस्ते ऽहं शाधि मां त्वां प्रपन्नम् ॥ ७ ॥

कार्पण्येति। यो ऽनात्मवित्परिच्छिन्नदृष्टि स कृपण, अपरिच्छिन्नप्रबोधाभावात् 'यो वा एतदक्षर गार्ग्यविदित्वा ऽस्माल्लोकात्प्रैति स कृपण [1]' इति श्रुते, तस्य भाव कार्पण्यम् अतस्मिंस्तद्भाव, तदेव दोष तेनोपहत कवलित स्वभाव स्वज्ञान यस्य सो ऽह कार्पण्यदोषोपहतस्वभाव,

प्रत्यक्परैक्यज्ञानधारणार्हो धर्मे, तस्मिन् समूढम् अविवेकदशाऽऽपन्न चेतो यस्य सो ऽह धर्मसमूढचेता सन् त्वा त्वामह पृच्छामि । कि पृच्छसीति तत्राह —यदिति । भैक्षयुद्धयोर्मध्ये यदन्यतरन्नि श्रेयससाधन स्यादिति विचार्य निश्चित तदेतन्मह्य ब्रूहि । 'नापुत्रायाशिष्याय' इति निषेधात् न वक्तव्यमिति तत्राह—शिष्य इति । यतो ऽहं ते शिष्य· अत त्वा शरण प्रपन्न शाधि शिक्षय, सन्मार्गे नियोजयेत्यर्थ ॥ ७ ॥

कुत सर्व परित्यज्य नि श्रेयसमेवेच्छसीति तत्राह—

न हि प्रपश्यामि ममापनुद्या-
यच्छोकमुच्छोषणमिन्द्रियाणाम् ।
अवाप्य भूमावसपत्नमृद्धं
राज्यं सुराणामपि चाधिपत्यम् ॥ ८ ॥

न हीति । भूमावसपत्न शत्रुवर्जित निष्कण्टकम् ऋद्धं समृद्धम्, प्रजारक्षणशिक्षणहेतु राज्य सुराणामाधिपत्यमिन्द्रत्व ब्रह्मत्व वा ऽवाप्यापि ममेन्द्रियाणामुच्छोषण यच्छोकमविवेकजं मनस्तापमपनुद्यात् अपनयेत्, तच्छोकनिवृत्तिसाधन न हि प्रपश्यामि । यत एवमत त्वमेव मच्छोकाग्नि प्रत्यगभिन्नत्वत्प्रबोधामृतवर्षेण शमनं कुर्वित्यर्थ । 'तरति शोकमात्मवित्[1]' इति श्रुते ॥ ८ ॥

एवमर्जुनेन भगवन्त प्रति विज्ञापितमिति सञ्जय उवाच—

संजय उवाच—

एवमुक्त्वा हृषीकेशं गुडाकेशः परंतपः ।
न योत्स्य इति गोविन्दमुक्त्वा तूष्णीं बभूव ह ॥ ९ ॥

एवमिति । दृष्ट्वेम स्वजनम् इत्याद्येवमुक्तप्रकारेण गुडाकेशो ऽर्जुन· स्वय परतपो ऽपि हृषीकेशमुक्त्वा पुनर्गोविन्द परपक्षै कदाचिदपि न योत्स्य इत्युक्त्वा च समाध्याविष्ट इव तष्णीं बभव ह किल ॥ ९ ॥

तत. किमित्यत आह—

तमुवाच हृषीकेशः प्रहसन्निव भारत ।
सेनयोरुभयोर्मध्ये विषीदन्तमिदं वचः ॥ १० ॥

तमिति । उभयो सेनयो मध्ये विषीदन्तमर्जुन प्रति प्रहसन्निव हृषीकेश प्रसन्नमुखपङ्कज सन् हे भारनेति सबोध्य वक्ष्यमाणमिद-मपवर्गप्राप्तिसाधन निष्ठाद्वयात्मक गीताशास्त्रमुवाच उक्तवानित्यर्थः । ननु नेह भगवतोपायोपेयभूत निष्ठाद्वय प्रतिपाद्यत, क्षत्त्रियच्छलरक्षोगणभारपीडितया धरण्या प्रार्थितेन ब्रह्मणा ऽर्थितस्य नारायणस्य भूभारहरणार्थमेव देवकीवसु-देवयोराविर्भूतत्वेन तादर्थ्येनार्जुन प्रेरयितु धर्माधर्मयोर्वक्तव्यत्वात् . अतो ऽस्य शास्त्रस्य न निष्ठाद्वयात्मकतेति चेत् तत्रोच्यते—भगवदवतारस्योपायोपेयभूत-निष्ठाद्वयस्थापकत्वेन भूभारनिवृत्तेश्चार्थिकत्वादधिकारिणमर्जुन निष्कामकर्म-प्रवर्तनद्वारा प्रत्यगभिन्नब्रह्मज्ञाननिष्ठायामवतारयितु गीताशास्त्रस्य वर्णितत्वात् निष्ठाद्वयविषयत्व सिद्धमेवेत्यर्थ । न च स्वाज्ञानावृतस्य न ज्ञानोपदेशार्हता स्यादिति वाच्यम्, ज्ञानोपदेशस्याज्ञैकगोचरत्वात्, तद्विपरीतस्य ब्रह्मात्म-भावापन्नत्वेन ज्ञानोपदेशनैरपेक्ष्यात्, यस्याधिष्ठानाज्ञान तस्यातस्मिस्तद्भाव, यस्यैव तस्य निष्कामकर्मानुष्ठानजनितचित्तशुद्धिप्राप्यसर्वकर्मसन्यासपदमा-रूढस्य तत्त्वपदार्थशोधकवाक्यार्थविचारद्वारा अधिष्ठानज्ञानसभवादज्ञस्यैव ज्ञाने ऽधिकार । न च प्रत्यक्परचिदैक्यज्ञानस्य तत्त्वपदविचारगम्यत्वेनार्जुन प्रति भगवता तदेवोपदेष्टव्यम्, तद्विहाय किमिति गीताशास्त्रमुपदिष्टमिति

वाच्यम्, गीताशास्त्रस्यापि तत्त्वपदविचारपरत्वात्, अष्टादशाध्यायवतो गीताशास्त्रस्य खण्डत्रयात्मकत्वेन तत्र पूर्वखण्ड त्वपदार्थशोधकम्, मध्यमखण्ड तत्पदार्थशोधकम्, अन्तिमखण्ड शोधिततत्त्वपदार्थैक्यबोधकमिति निश्चितत्वाद् गीताशास्त्रमेव कैवल्यसाधनमिति सिद्धम् ॥ १० ॥

एव स्वनियोजिताज्ञानावृतचित्तत्वेन धर्मसमूढचेतस कर्तव्याकर्तव्यविवेकविकलस्य दुरुत्तरशोकसागरमध्ये प्रविश्य क्लिश्यतो ऽर्जुनस्य स्वाज्ञानतत्कार्यनिवर्तकप्रत्यगभिन्नब्रह्मज्ञानहेतुतत्त्वपदलक्ष्यैक्यविचारादन्यत्रोद्धारमपश्यन् तमनन्यशरणमर्जुन स्वाविद्याकामकर्मससारादुद्धर्तुमिच्छन् सर्ववेदान्तसग्रहभूत तत्त्वपदलक्ष्यैक्यविषयम् 'अशोच्यान्' इत्यादि 'सर्वधर्मान्परित्यज्य' इत्यन्तं तदिद गीताशास्त्रं श्रीभगवानुवाच—अशोच्यानित्यादिना ।

श्रीभगवानुवाच—

अशोच्यानन्वशोचस्त्व प्रज्ञावादांश्च भाषसे ।
गतासूनगतासूंश्च नानुशोचन्ति पण्डिताः ॥ ११ ॥

अशोच्यानिति । शोकविषया शोच्या न भवन्तीत्यशोच्या भीष्मद्रोणादय । 'दृष्ट्वेम स्वजनम्' इत्यादिना यान्प्रत्येवं त्वमन्वशोच अनुशोचितवानसि, ते कि भीष्मादिशब्दवाच्या उत तद्भिन्ना वा ? नाद्य', भीष्मादिशब्दवाच्याना शिर पाण्यादिमता तूलाविद्याविकल्पितत्वेन मिथ्यात्वात् मिथ्याभूतस्य शोकानास्पदत्वात् । न द्वितीय, भीष्मादिशब्दवाच्यतत्कार्यभावाभावप्रकाशकप्रत्यग्रूपाणा नित्यशुद्धबुद्धपरमानन्दाभिन्नत्वेन परमार्थसत्यत्वात् पक्षद्वये ऽपि न ते शोच्यतापदमश्नुवीरन् ।

यस्मादुभयथाऽपि अशोच्यान् भीष्मादीनुद्दिश्य त्वमन्वशोच, तस्मात् असर्पभूते रज्जुखण्डे सर्पबुद्धि पुरुष इव भ्रान्तोऽसि। किं च—'कुतस्त्वा कश्मलम्' इत्यादिना मया बोधितोऽपि मन्निमित्त भीष्मादयो म्रियन्ते, तैर्विनाभूतोऽह राज्यसुखादिना किं करिष्यामीति प्रज्ञावादान् बुद्धिमत' वचनानि भाषसे उत्तम इव, पाण्डित्यच्छलेन मौढ्यमेव प्रकटीकरोषीत्यर्थ। देहादावात्मात्मीयाभिमानेनाहमिव सर्वेऽपि शोचन्तीति तत्राह—नेति।

यत पण्डिता गतासून् गतप्राणान् अगतासून् जीवतश्च वा बन्धूनुद्दिश्य नानुशोचन्ति। सूक्ष्मबुद्धिमत्त्व पण्डितत्वम्, न त्वात्मज्ञत्वम्, हेत्वभावादिति तत्राह—पण्डिता इति। पण्डा प्रत्यगभिन्नब्रह्मज्ञानतोऽखण्डाकारा वृत्तिर्येषामस्ति ते पण्डिता। तदेतत्खलु पाण्डित्यम्, न लौकिकविषयकसूक्ष्मबुद्धिमत्त्वम्। तथा च श्रुतिस्मृती—'पाण्डित्य निर्विद्य बाल्येन तिष्ठासेत्', 'पण्डा परात्मविज्ञान तदस्यास्तीति पण्डित' इति। अत त्वमशोच्यशोचनादपण्डितोऽसीत्यर्थ ॥ ११ ॥

अशोच्यान् शोचतो ममास्त्वपण्डितत्वम्, पण्डितानामपि सभव प्रलयदर्शनादिति देहात्मबुद्ध्या शङ्कमानमालक्ष्य आत्मा न जायते प्रागभावाप्रतियोगित्वात्, तथा न म्रियते भावत्वे सत्यजडत्वात्, यन्नैव तन्नैव यथा घट इति व्यतिरेकानुमानात् तदनुरोधेन 'न जायते म्रियते वा विपश्चित्'[1] इत्यादिश्रुतेश्च मम तव भीष्मादीनामपि प्रत्यगभिन्नब्रह्मरूपेण जात्वपि सभवप्रलयाभावादशोच्यत्व सिद्धमेवेत्याह—

न त्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः।
न चैव न भविष्यामः सर्वे वयमतः परम् ॥ १२ ॥

न त्विति । अह परमेश्वरो जातु कदाचिदपि भक्तेच्छोपात्तलीला विग्रहस्याविर्भावतिरोभावसत्त्वे ऽपि नासमिति न, कि त्वासमेव । चिरतनत्वेन तव सच्चिदानन्दरूपत्वात् त्वादृशस्य जननमरणाभावे ऽपि त्वद्विपरीतस्य मम कथमेव स्यादिति तत्राह—न त्वमिति । यथा ऽह परमेश्वर तथा त्वमपि नासीरिति न, कि त्वासीरेव मदशत्वात् । त्वदशत्वेन मम जननाद्यभावे ऽपि भीष्मादीना त्वदशत्ववैधुर्यात् तेषा जन्माद्यभाव कथमिति तत्राह—नेम इति । इमे जनाधिपा भीष्मादय नासन्निति न, कि त्वासन्नेव, 'पादो ऽस्य विश्वा भूतानि[1]' इति श्रुत्यनुरोधेन तेषामपि मदशत्वाविशेषात् भीष्मादिशब्दवाच्यदेहादौ जन्मस्थितिभङ्ग गते ऽपि तद्विलक्षणचैतन्यस्य परमार्थसत्यत्वात् । अह त्व चेमे च सर्वे वयमत पर देहोत्पत्ते प्राक् प्रलयानन्तर च न भविष्याम इति न, कि तु भविष्याम एव, देहदेहानुवृत्त्या सर्वे वयमिति बहुवचन नात्मभेदाभिप्रायेण । आत्मन एकत्वादशोच्यत्व सिद्धमित्यर्थ ॥ १२ ॥

आत्मन एकत्वे नित्यत्वमुक्तम् , तस्यैव पूर्वदेहपरित्यागे नूतनदेहस्वीकारे च विकारस्यावश्यभावात्तद्वतो नित्यत्व कथमित्यत्र सदृष्टान्तमुत्तरमाह—

देहिनो ऽस्मिन्यथा देहे कौमारं यौवनं जरा ।
तथा देहान्तरप्राप्तिर्धीरस्तत्र न मुह्यति ॥ १३ ॥

देहिन इति । देहो ऽस्यास्तीति देही, तस्य देहिनो देहाभिमानवत अस्मिन्वर्तमाने स्थूलदेहे यथा येन प्रकारेण कुमारस्य भाव कौमार बाल्यावस्था, यूनो भावो यौवन मध्यमावस्था, देहेन्द्रियपाटव जरयतीति जरा चरमावस्था इत्येतास्तिस्रो ऽवस्था मिथो विलक्षणा आबालगोपाल साधारण्यो

[1] ऋ, अ, ८, अ, ४, व, १७—३

भवन्ति, एवमवस्थात्रयाभिमानिनो लोकस्य बालो युवा वृद्ध इत्यभिमान-व्यापारभेददर्शनात् कथमविक्रियत्वमित्यत्रोच्यते---प्रथमावस्थाऽपाये द्वितीया-वस्थाऽऽगमे चापायागमयोरभावाद्यो ऽहं बालो बालकै क्रीडामन्वभूव स एव यौवने दारादिभि सुखी स्याम्। यो ऽहं युवा स एव स्थविरो भवामीत्यवस्था-त्रये व्यभिचारिण्यपि स्वस्याव्यभिचारित्वेनैकत्वानुभवात् बालो ऽहमित्याद्य-भिमानव्यापाराणा कौमाराद्यवस्थात्रयास्पदस्थूलशरीरनिष्ठत्वादात्मन तद्वि-लक्षणत्वेनाविक्रियत्व सिद्धम्। तथा पूर्वदेहादन्यो देहो देहान्तर तत्प्राप्ति देहान्तरप्राप्तिरपि लिङ्गदेहनिष्ठा जातमात्रस्य शिशो पूर्ववासनात स्तन्यपा-नादिप्रवृत्तिदर्शनात्। यतो जन्मनाशौ देहादेरेव तद्विपरीतस्यात्मनो नोपपद्येते अत तत्र देहादिनिष्ठजन्मनाशयो श्रुत्याचार्यप्रसादलब्धपरमार्थभावारूढ-त्वेन धीरो ज्ञानी न मुह्यति। देहे जाते मृते वा जातो मृतो वा ऽहमिति न मोहमापद्यते स्वस्य नित्यत्वेनाविक्रियत्वादित्यर्थ ॥ १३ ॥

विदुष आत्मनाशनिमित्तमोहाभावे ऽपि सुखवियोगदु:खसयोग-निमित्तो मोह स्यादिति तत्राह—

मात्रास्पर्शास्तु कौन्तेय शीतोष्णसुखदु:खदा:।
आगमापायिनो ऽनित्यास्तांस्तितिक्षस्व भारत ॥ १४ ॥

मात्रास्पर्शा इति। कुन्त्या अपत्य कौन्तेय ' मीयन्ते आभि. इति मात्रा इन्द्रियाणि, तेषा स्पर्शा शब्दादिसयोगा, ते शीतोष्णसुखदु खानि प्रयच्छन्तीति शीतोष्णसुखदु खदा। यद्वा स्पृश्यन्त इति स्पर्शा शब्दा-दयो विषया। मात्राश्च स्पर्शाश्च शीतोष्णसुखदु खदा, कदाचित् कस्य-चित शीतमुष्ण वा सुख तद्विपर्ययो वा भवेदिति तेषामनियतरूपत्वात्, यत एवम् आगमापायिन सभवप्रलयवन्तो भवन्ति। एवम् इष्टजनसयोग

वियोगा अपि आगमापायिन अत एवानित्या तथा ऽपि यत शीतोष्णादिद्वन्द्वेषु हर्षविषादवतामनर्थपरपरा अनिवार्या स्यात् , अत तेषु हर्षविषादरहितो भूत्वा, भरतो नाम पौर्विको भूपति तस्यान्वये जात इति हे भारत! शीतोष्णादीस्तितिक्षस्व सहस्वेत्यर्थ । 'शान्तो दान्त उपरतस्तितिक्षु श्रद्धावित्तो भूत्वा ऽऽत्मन्येवात्मान पश्यति'[1] इति श्रुतेः। अस्मिन् श्लोके भगवदुक्तसबोधनद्वयादुभयकुलविशुद्धस्यैव ब्रह्मविद्याऽधिकारित्व द्योत्यते। अत एव भगवानेव सबोध्यार्जुनाय ब्रह्मविद्यामुपदिष्टवानिति भाव ॥ १४ ॥

केवलशीतोष्णादिसहनस्य मुक्तिसाधनत्वाभावे ऽपि तस्यैव पुनर्विवेकवैराग्यसहितस्य ज्ञानद्वारा मुक्तिसाधनत्वात् तत्प्रतीकारप्रयत्नादपि तत्सहनमेवोचितमित्याह —

यं हि न व्यथयन्त्येते पुरुषं पुरुषर्षभ।
समदुःखसुखं धीरं सो ऽमृतत्वाय कल्पते ॥ १५ ॥

य हीति। पौरुषान्विता पुरुषा क्षत्रियश्रेष्ठा क्षमावन्तश्च, तेषाम् ऋषभ श्रेष्ठो ऽयमिति हे पुरुषर्षभ! समे दु खसुखे यस्य त समदु खसुखमित्यादिसाधनचतुष्टयसपत्त्या कबलितसुखदु खप्रयुक्तहर्षविषादधी धीर । यद्वा स्वव्यावृत्तकार्यजातानुवृत्तब्रह्मात्ममात्रावशेषकृद्धीर । त धीर पूर्णब्रह्मभावारूढ य पुरुषम् एते पूर्वोक्ता मात्रास्पर्शप्रभवा शीतोष्णादयो न व्यथयन्ति न चालयन्ति। स्वभावकबलितशीतोष्णादिद्वन्द्वो विद्वान् सो ऽमृतत्वाय कैवल्याय कल्पते हि योग्यो भवतीत्यर्थ ॥ १५ ॥

[1] बृ, ४, ४, २३

सदसदात्मकद्वैतस्य सत्त्वेनाद्वैतस्वरूपावस्थानलक्षणकैवल्यस्य मृग्यत्वात् सदसद्विवेकस्यापि दुरवग्रहत्वात् द्वन्द्वसहनप्रयोजनाभावाच्च कथ विद्वानमृतत्वाय कल्पत इति तत्राह—

नासतो विद्यते भावो नाभावो विद्यते सतः।
उभयोरपि दृष्टो ऽन्तस्त्वनयोस्तत्त्वदर्शिभिः ॥ १६ ॥

नेति। अनृतजडदु खात्मकस्थूलदेहादे जाग्रदादे शीतोष्णादेश्च द्वैतस्यासत सद्भाव अस्तित्व न विद्यते, प्रतिक्षण विकारित्वेन व्यभिचारित्वात्। यथा घटशरावादिक मृद्व्यतिरेकेण निरूपयितुमशक्यम्, तथैव विकाराणा कारणाव्यतिरेकप्रमाणाद्व्यावृत्तस्य कार्यजातस्य स्वोत्पत्तिप्रलयाभ्या प्रागूर्ध्व चादर्शनात् व्यावृत्तस्यानुवृत्ते ब्रह्मणि कल्पितत्वेनासत अविद्यमानत्व सिद्धम्। अनृतजडदु खात्मकव्यावृत्तप्रपञ्चप्रतियोगिसृताजडानन्दात्मकत्वेनानुवृत्तस्य सत अभाव अविद्यमानता न विद्यते सर्वत्र सर्वदा अव्यभिचारित्वेन परमार्थसत्यत्वात् यथा व्यावृत्तसर्पधाराऽऽद्यनुवृत्तरज्जोरिदमशमन् तथा ऽनुवृत्त ब्रह्म सत्यम्। व्यावृत्तेषु व्यभिचारिष्वप्यव्यभिचारितया सर्वत्रानुवृत्तत्वात् सत्त्व निरङ्कुशम्। एवमुभयोरनयो सदसत्पदार्थयो सत्सदेव असदसदेवेत्यन्तो निर्णयो दृष्ट । कै ? तत्त्वदर्शिभि, तस्य भाव तत्त्वम्, तत्त्वपदलक्ष्यप्रत्यगभिन्नब्रह्मयाथात्म्य द्रष्टु शील येषा ते तत्त्वदर्शिन, तै। तुशब्द तत्त्वविदितरै सदसद्विवेको दुरवग्रह इति द्योतयति। त्वमपि तत्त्वदर्शिना मार्गमवष्टभ्य सर्वत्रानुवृत्तसद्ब्रह्मव्यतिरेकेण व्यावृत्तासद्द्वैतप्रपञ्चाभावात् परमार्थसत अद्वैतत्वेन कैवल्यरूपत्वात् विवेकवैराग्यपूर्वकद्वन्द्वसहनस्य ज्ञानद्वारा कैवल्यहेतुत्वमस्तीति निश्चित्य शीतोष्णादि सहस्वेत्यर्थ ॥ १६ ॥

कबलितासत्प्रपञ्चस्य सत सर्वविक्रियारहितत्वेन सामान्यविशेष-शून्याखण्डैकरसत्व चाह—

अविनाशि तु तद्विद्धि येन सर्वमिदं ततम् ।
विनाशमव्ययस्यास्य न कश्चित्कर्तुमर्हति ॥ १७ ॥

अविनाशीति । चराचरात्मक जगत् सर्व येन विष्ण्वाख्येन ब्रह्मणा आकाशेन घटादिकमिव तत कबलितम्, तत्तु प्रत्यगभिन्न ब्रह्माविनाशीति विद्धि । सर्वथा स्वत परतो वा विनाशाभावद्योतक तुशब्द, 'अविनाशी वा अरे ऽयमात्मा[1]' इति श्रुते । अविनाशित्वे हेतुरव्यय इति । तस्य निरवयवत्वेन स्वभिन्नावयवापचयोपचयशून्यत्वेन च स्वसबन्धि-वस्त्वभावात् यथा कश्चिल्लोके धनादिहानितो व्येति न तथा ब्रह्म, स्वभिन्न-धनाद्यभावत कुत्राप्यात्मात्मीयत्वाभिमानाभावात् । अत तादृशस्याव्ययस्य ब्रह्मणो विनाशं स्वरूपाभावं कर्तुं न कश्चिदर्हति, स्वनाशप्रसङ्गात् स्वस्यैव ब्रह्मत्वात् स्वनाशस्य तावदाबालगोपालमनिष्टत्वात् । यथा चक्षुर्गत कृष्णतार चक्षुर्न पश्यति तथैव स्वनाशं स्वय न करोति, एकस्यैव कर्मत्वकर्तृत्व-विरोधात् । तस्मादीश्वरो ऽपि स्वनाश कर्तुं नेश्वर इत्यर्थ ॥ १७ ॥

कालत्रयाव्यभिचारित्वेन सत्स्वरूपमुक्त्वा तद्विपरीतमसत्स्वरूपमाह—

अन्तवन्त इमे देहा नित्यस्योक्ताः शरीरिणः ।
अनाशिनो ऽप्रमेयस्य तस्माद्युध्यस्व भारत ॥ १८ ॥

अन्तवन्त इति । यथा ऽधिष्ठानभूतमरुशुक्तिरज्ज्वादिस्वाज्ञानदशा नीररजतसर्पादिरूपेण सत्यवद्भासमानो ऽपि पुनः स्वज्ञानदशामधिष्ठेयनीर-

रजतसर्पादिरन्तवान्भवति, तथैव सर्वाधिष्ठानभूतब्रह्मात्माज्ञानत इमे अनृत-जडदु खात्मकस्थूलसूक्ष्मकारणदेहा आत्मात्मीयाभिमानास्पदान्यपि पुन स्वज्ञानत स्वप्नमायाकल्पितदेहवच्चान्तो नाशो येषा ते अन्तवन्तो भवन्ति। तेषा मिथ्यात्वे ऽपि शरीरिणो जीवस्य नित्यत्वात् नित्यस्यानाशिन आत्मन इमे देहा सूरिभि अन्तवन्त इत्युक्ता। न च नित्यस्यानाशिन इत्यत्र पुनरुक्ति, नित्यत्वानाशित्वयो भिन्नत्वात्। आत्यन्तिकनाशास्पृष्टत्व नित्यत्वम्। आपेक्षिकनाशास्पृष्टत्वमनाशित्वम्। देहो ऽदर्शन गतो नष्ट इत्यत्रात्यन्तिकनाश, विद्यमानो ऽपि देहो व्याध्यादियुक्तो नष्ट इत्यत्रापेक्षिकनाश। नित्यस्यानाशिन इति द्वयोरुक्त्या आत्मनो द्विविधनाशसबन्धाभाव प्रतीयते। अन्यथा घटादिनित्यत्ववदापेक्षिकमेव स्यात्, तन्मा भूदिति नित्यस्यानाशिन इत्युक्तम्। नित्यत्वानाशित्वयो हेतु अप्रमेयस्येति। प्रत्यक्षादिप्रमाणै प्रमातुमयोग्यस्येत्यर्थ। प्रत्यक्षाद्यप्रमेयत्वे ऽपि वेदान्तवेद्यत्वेन प्रमेयता स्यादिति चेन्न, स्वत सिद्धत्वादात्मन। सिद्धे सति प्रमातरि प्रमाणेच्छा जायते। न चाहमिति पूर्वमात्मानमप्रमाय परिच्छेदप्रवृत्तिरुपपद्यते। अहमह वा न वेत्याबालगापालमात्मन असदिग्धत्वात्। वेदान्तास्तावदात्मन्यतद्धर्मारोपनिरासकत्वेन प्रमाणपद भजन्ते न ह्यज्ञातार्थज्ञापकत्वेन, 'यत्साक्षादपरोक्षाद् ब्रह्म य आत्मा सर्वान्तर [1]' इति श्रुते। हे भारत! यस्मात् देहादय आगमापायित्वेनानित्या तद्विपरीतत्वेनात्मा अविक्रियो नित्यश्च भवति, तस्मान्मोहज शोक त्यक्त्वा युध्यस्व, युद्धाद्विमुखो मा भूरित्यर्थ। युध्यस्वेत्यत्र ज्ञानाङ्गत्वेन न युद्धकर्तव्यता विधीयते। सर्वेषा युद्धस्य क्षत्रियधर्मत्वेन स्वय क्षत्रियो भूत्वा युद्धे प्रवृत्त एव ह्यर्जुन शोकमोहावृत तूष्णीमास्तेति तस्य मोहावृतिनिरासो भगवता

क्रियते । यत एवमतो गीताशास्त्रस्य संसारकारणाविद्याद्वयतत्कार्यमहामोह-निरासकत्वादर्जुन प्रति युध्यस्वेत्यनुवादमात्रम्, न सर्वेषा ज्ञानाङ्गत्वेन तत्कर्तव्यता विधीयत इत्यर्थ ॥ १८ ॥

यथा भीष्मादिमरणप्रयुक्तः शोको निर्निमित्तः, तथा 'एतान्न हन्तुमिच्छामि' इत्यादिस्स्वत्सबन्धिहन्तृत्वप्रयुक्त शोको ऽपीत्यत्रानुवाद-कत्वेन द्वौ मन्त्रावनुक्रामति—

य एनं वेत्ति हन्तारं यश्चैनं मन्यते हतम् ।
उभौ तौ न विजानीतो नायं हन्ति न हन्यते ॥ १९ ॥

य इति । य पुमान् एनम् अस्मत्प्रत्ययालम्बनमात्मान हननक्रिया-कर्तृत्वेन हन्तार वेत्ति, यश्चैन प्रकृतमात्मान हननक्रियाकर्मत्वेन हत मन्यते, तावुभावपि देहात्मभावारूढत्वेन तद्विलक्षणमात्मान न विजानीत, न जानीत एवेत्यर्थ । यत एवमतो हननक्रियाकर्तृत्वकर्मत्वे आत्मनो न पारमार्थिके, कि त्वविद्याकल्पिते इत्यत्र हेतुमाह—नायमिति । अयमात्मा न परान्हन्ति, परैर्वा स्वय न हन्यते । अविक्रियत्वादात्मनो हननक्रिया-कर्तृत्व तत्कर्मत्व वा न सभवतीत्यर्थ. ॥ १९ ॥

हननक्रियाकर्तृत्व तत्कर्मत्व वा नास्तीति यदुक्त तन्मृष्यम्, आत्मन षड्भावविकारास्पदत्वादित्येव प्राप्ते, द्वितीयो मन्त्र आम्नायते—

न जायते म्रियते वा कदाचि-
न्नायं भूत्वा भविता वा न भूयः ।
अजो नित्यः शाश्वतो ऽयं पुराणो
न हन्यते हन्यमाने शरीरे ॥ २० ॥

न जायत इति । अयमात्मा कदाचिदपि न जायते, जनिक्रियारहितत्वात् । अयमात्मा कदाचिदपि न म्रियते वा । वा शब्दश्चार्थे । न म्रियते चेत्यर्थ, नाशक्रियाविधुरत्वात् । यद्यपि आद्यान्त्यविक्रिययो प्रतिषेधेन सर्वा विक्रिया प्रतिषिध्यन्ते, तथा ऽपि मध्यभाविविक्रियाप्रतिषेधो वक्तव्य इत्याह—नायमिति । न चायमात्मा भूत्वा उत्पद्य भविता अस्तित्वभाग्भवति, सर्वदा पारमार्थिकसत्यत्वेन जन्मानन्तरास्तित्वलक्षणद्वितीयविक्रियाविकलत्वात् । वाशब्द-नशब्दाभ्यामयमात्मा ऽभूत्वा प्राग्देहवद्भूयो वा पुनरपि न भविता । यो हि जायते स जन्मानन्तरमस्तित्व भजते । यस्तद्विपरीत सो ऽयमात्मा न जायत इत्यजो भवति । अजत्वे सति सर्वदैकरूपत्वान्नित्य । नित्यत्वे ऽप्यपक्षयविकार कि न स्यादिति तत्राह—शाश्वत इति । शश्वद्भव शाश्वत । निरवयवत्वे सति निर्गुणत्वात्स्वरूपतो गुणतो वा ऽपक्षयशून्य इत्यर्थ । अपक्षयाभावे ऽपि वृद्धिविक्रिया कि न स्यादिति तत्राह—पुराण इति । पुरा ऽपि नव पुराण । इदानीतनस्य नवस्य सावयवत्वेन वृद्धिविक्रिया स्यात् । आत्मनो निरवयवत्वेन पुरा ऽपि नवत्वादयमात्मा तूलाविद्याविकारदेहादिवत् कदाचिदपि न वर्धत इत्यर्थ । अपक्षयवृद्ध्योरवयवनिष्ठत्वे ऽपि परिणामित्वं कि न स्यादिति तत्राह—न हन्यत इति । हन्यमाने विपरिणम्यमाने शरीरे अयमात्मा कदाचिन्न हन्यते न विपरिणम्यते निरुपाधिकत्वात् । न च म्रियते हन्यत इति न पौनरुक्त्यम्, हन्ते परिणामार्थत्वसभवात् । न जायत इत्यस्मिन्मन्त्रे यास्काचार्यावलम्बितषड्भावविकारनिराकरणतो हननक्रियाकर्तृत्व तत्कर्मत्व चात्मनो निरस्तमित्यर्थ ॥ २० ॥

पूर्वमन्त्रतो हननक्रियाकर्तृत्व तत्कर्मत्व वा ऽऽत्मनो नेवेति प्रतिज्ञाय तत्सिद्धय षड्भावविकारविकलत्वमुक्त्वा प्रतिज्ञातार्थमुपसहरति—

वेदाविनाशिनं नित्यं य एनमजमव्ययम् ।
कथं स पुरुषः पार्थ कं घातयति हन्ति कम् ॥ २१ ॥

वेदेति । हे पार्थ ! य एनमिति पूर्वमन्त्रोक्तलक्षणमविनाशिनमापेक्षिकनाशास्पृष्टम्, नित्यमात्यन्तिकनाशास्पृष्टम्, अज जन्मादिपञ्चविकारविकलम्, अव्ययमन्त्यविक्रियाशून्यमात्मानमस्मत्प्रत्ययालम्बनत्वेन यो वेद विजानाति, स पुरुषो विद्वान् कथ केन प्रकारेण क घातयति हन्तार नियोजयति, क वा हन्ति हननक्रिया करोति, न कथचिद्घातयति न कथचिद्धन्तीत्याक्षेपार्थ एव स्यात्, उत्तरत्र प्रतिवचनादर्शनेन प्रश्नार्थत्वासभवात्, 'यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन क पश्यत्' इत्यादिक्रियाकारकफलनिराकरणश्रुत्यनुरोधेन स्वभिन्नसामान्यविशेषवस्त्वभावात्कथ क वा ऽन्य परेण घातयति स्वय क वा कथ वा हन्तीत्याक्षेपार्थस्यैव युक्तत्वात् । उत्पन्नचित्तशुद्धे मुमुक्षो विदुषश्च सर्वकर्मसन्यास एवाधिकारो नान्यत्रेति प्रकरणार्थ ।

'प्रवृत्तिलक्षण कर्म ज्ञान सन्यासलक्षणम् ।
तस्माज्ज्ञान पुरस्कृत्य सन्यस्येदिह बुद्धिमान् ॥
यदा तु विदित तत्त्व पर ब्रह्म सनातनम् ।
तदैकदण्डं संगृह्य सोपवीतं शिखा त्यजेत् ॥'

इत्यादिश्रुते ॥ २१ ॥

आत्मनो ऽविक्रियत्वे विविदिषोर्विदुषश्च सर्वकर्मसन्यासाधिकार स्यादेव, तदभावात्पुरातनदेहहाने नूतनदेहोपादाने च सविक्रियत्वस्य ध्रौव्यात्तेन विद्वत्ताऽऽद्यसिद्धौ सर्वकर्मसन्यासासिद्धिरिति तत्राह—

वासांसि जीर्णानि यथा विहाय
नवानि गृह्णाति नरो ऽपराणि ।

तथा शरीराणि विहाय जीर्णा-
न्यन्यानि संयाति नवानि देही ॥ २२ ॥

वासासीति ।.यथा कथचिल्लौकिको नरो जीर्णानि वासासि विहाय नवानि सुदृढानि वासासि गृह्णाति, पुरातनवस्त्रपरित्यागे नूतनवस्त्रस्वीकारे च विकाराभावत एकरूपेणावतिष्ठते, तथैव देही जीर्णानि वयोहानिं गतानि शरीराणि विहाय नवानि शरीराणि सयाति गृह्णाति, पुरातन-देहपरित्यागे नूतनदेहस्वीकारे चात्मा अविक्रिय एवावतिष्ठत इत्येव जानतो विद्वत्ताया सभवात् । अत सर्वकर्मसन्यासाधिकारो विदुषो निरङकुश स्यादित्यर्थ ॥ २२ ॥

यदुक्तमात्मनोऽविक्रियत्व तन्न सभवति, पृथिव्यादिभूतचतुष्टय-प्रयुक्तविकाराणामनिवार्यत्वादिति, तत्राह--

नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः ।
न चैनं क्लेदयन्त्यापो न शोषयति मारुतः ॥ २३ ॥

नैनमिति । अस्यादीना द्वैधीकरणसामर्थ्यात्तान्यात्मान तथा कुर्वन्तीति तत्राह--नेति । एन प्रकृतमात्मान पार्थिवविकारा अस्या दीनि शस्त्राणि न च्छिन्दन्ति नावयवविभाग कुर्वन्ति, निरवयवत्वात् । अग्ने सर्वदग्धृत्वसामर्थ्यादात्मानमपि स दहेदिति तत्राह– नेति । तथा एन प्रकृतमात्मान पावकोऽग्नि न दहति, अमूर्तत्वात् । अपा क्लेदनसामर्थ्या दात्मान ता क्लेदयेयुरिति तत्राह—नेति । आपश्चैन न क्लेदयन्ति सधिबन्ध-विश्लेषण न कुर्वन्ति, भूतभौतिकजातिशून्यत्वात् । मारुतस्य सर्वशोषण सामर्थ्यादात्मानमपि स शोषयेदिति तत्राह—नेति । मारुतोऽप्येन न शोषयति, स्नेहगुणरहितत्वात् ॥ २३ ॥

आत्मनो ऽविक्रियत्वे हेतूनुपन्यस्यति—

अच्छेद्यो ऽयमदाह्यो ऽयमक्लेद्यो ऽशोष्य एव च।
नित्यः सर्वगतः स्थाणुरचलो ऽयं सनातनः ॥ २४ ॥

अच्छेद्य इति। अस्मत्प्रत्ययालम्बन प्रकृतो ऽयमात्मा अच्छेद्यः, निरवयवत्वे सति नित्यत्वात्। अयमदाह्य, नित्यत्वे सति सर्वगतत्वात्। अयमक्लेद्य, सर्वगतत्वे सति स्थाणुवत् स्थिरस्वभावत्वात्। अयमशोष्य एव च, स्थाणुत्वे सति पूर्वरूपापरित्यागेनाचलस्वभावत्वात्। अयमात्मा सनातन, अचलत्वे सति कारणान्तरानिष्पन्नत्वात्। यतो ऽन्योन्यनाशकारणानि शस्त्राग्निजलवाय्वात्मकानि आत्मान नाशयितु नोत्सहन्ते अतो ऽयमात्मैव नित्य, नित्यत्वात्सर्वगत, सर्वगतत्वात्स्थाणु, स्थाणुत्वादचल, अचलत्वात्सनातन, सनातनत्वादेवोक्तानुक्तविकारपूगरहित इत्यर्थ। अच्छेद्यो ऽयमित्यस्मिन् श्लोके नित्यत्व सर्वगतत्व स्थाणुत्व सनातनत्व च आत्मन प्रतिपादितमपि परमकारुणिको भगवानात्मनो दुर्विज्ञेयत्व मन्यमान सन् यथा यथा व्यावृत्तसस्मृतिर्बुद्धिरनुवृत्ते ब्रह्मण्यवतार्यते तथा तथा भूयो भूय प्रसङ्गमापाद्यापाद्य प्रतिपादितमर्थमेव क्वचित्क्वचिच्छब्दान्तरेणार्थान्तरेण च यतो निरूपितवानत कुत्राप्यस्मिन् शास्त्रे न पुनरुक्तिदोषावकाश इति भाव ॥ २४ ॥

पूर्वोक्तप्रत्यगात्मन परमात्माभेदेन सर्वातीतत्वमाह—

अव्यक्तो ऽयमचिन्त्यो ऽयमविकार्यो ऽयमुच्यते।
तस्मादेवं विदित्वैनं नानुशोचितुमर्हसि ॥ २५ ॥

अव्यक्त इति। तूलान्त करणाविद्याविजृम्भितस्य जाग्रदादिविमोक्षान्तस्य ससारस्य व्यक्तत्वात् तद्विपरीतत्वेन तद्भावाभावप्रकाशकचिद्धातोरव्यक्त-

त्वादव्यक्तो ऽयमात्मा, स्वभावकबलिततूलाविद्यातत्कार्यत्वात् । मूलाविद्या-विजृम्भितेक्षणादिप्रवेशान्तससारस्य श्रुत्याचार्यानुगृहीतबुद्धिमच्चिन्त्यत्वात् तन्मूलाविद्याऽध्यारोपापवादाधिष्ठानत्वेन तत्सत्तास्फूर्त्यानन्दप्रदत्वेन च वर्तमान-स्य परमात्मनो ऽचिन्त्यत्वात् अचिन्त्यो ऽयमात्मा, स्वानन्दकबलितमूलाविद्या-तत्कार्यत्वात् ।, व्यष्टिसमष्ट्यात्मकाविद्याद्वयविजृम्भितजीवेशतत्कार्यविभ्रमाणा विकार्यत्वाद्युगपदविद्याद्वयाध्यारोपापवाददोषास्पृष्टप्रत्यक्परविभागासहसत्तासा-मान्यब्रह्मणो ऽविकार्यत्वादविकार्यो ऽयमात्मेत्युच्यते, महासत्ताकबलितस-कार्याविद्याद्वयतद्धेतुमायाकत्वात् । यस्मादेव तस्मात् अव्यक्तो ऽयमित्यादि-विशेषणविशिष्टमेन प्रत्यगभिन्न परमात्मान विदित्वा मिथ्याभीष्मादिशरीरोद्देशेन नानुशोचितुमर्हसि । भीष्मादिशरीराणा व्यावृत्तत्वेन मिथ्यात्वात् भीष्मा-दीनामनुवृत्तत्वेन सत्यत्वाद्व्यावृत्तानुवृत्तयोस्तेजस्तिमिरयोरिव युगपदेकत्रा-वस्थानासभवादनुवृत्तव्यतिरेकेण व्यावृत्ताभावात् सर्वमनुवृत्त ब्रह्माहमस्मीति निश्चयवता न शोकावकाश इति भाव ॥ २५ ॥

एवभूतब्रह्मात्मैक्यश्रवण कृत्वा ऽपि तदनवधारणतो देहात्मदृष्टिमर्जुन-मालक्ष्य पुन पूर्वोक्तज्ञाननिष्ठायामवतारयितु तद्बुद्धिमनुसृत्य देहात्मनोरैक्य यदि मन्यसे तथा ऽपि शोको न कार्य इत्याह—

अथ चैनं नित्यजातं नित्यं वा मन्यसे मृतम् ।
तथा ऽपि त्वं महाबाहो नैवं शोचितुमर्हसि ॥ २६ ॥

अथ चेति । हे महाबाहो! देहादिसबन्धास्पृष्टत्वेन नित्यमेन प्रकृत-मात्मान देहे जाते मृते वा जात मृत वा ऽथ च मन्यसे । अथ-चशब्दो यद्यर्थे । पुण्यपापतत्फलयोरात्मगामित्वेन मूढदृष्ट्या जन्ममरणसत्त्वे ऽपि

तयोरवश्यभावित्वेनानिवार्यत्वात् । तथा ऽप्येवं पूर्ववन्नानुशोचितुमर्हसि, न योग्यो भवसीत्यर्थ ॥ २६ ॥

शोकस्याकर्तव्यत्वे हेत्वन्तरमाह—

जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च ।
तस्मादपरिहार्ये ऽर्थे न त्वं शोचितुमर्हसि ॥ २७ ॥

जातस्येति । हि यस्मादारब्धकर्मणा जातस्य जन्तो मृत्युर्ध्रुव प्रारब्धक्षयात् । मृतस्य च पुनः सचितकर्मोद्भूतारब्धकर्मतो जन्म ध्रुवम् । जन्मवतो नाशो नाशवतो जन्मेत्येवमवश्यभाविनौ जन्मनाशौ भवत । तस्मादपरिहार्ये ऽर्थे न त्व विवेकी शोचितुमर्हसि ॥ २७ ॥

देहादेरदृष्टदृष्टनष्टत्वस्वभाव पर्यालोच्यापि शोको न कार्य इत्याह—

अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत ।
अव्यक्तनिधनान्येव तत्र का परिदेवना ॥ २८ ॥

अव्यक्तादीनीति । हे भारत ! अव्यक्तमदर्शन प्रधानमेव आदि कारण येषा तानि भूतानि शरीराणि भवन्ति, कारणात्मना स्थिताना-मेवोत्पत्तिदर्शनात् । करणग्राह्यत्वाद् व्यक्तम्, जनिमृत्व्योरन्तरालस्थिति मध्यम् , व्यक्तमेव मध्य येषा तानि व्यक्तमध्यानि । पुनरव्यक्तमेव निधन निलयो येषा तानि । तत्रैव पर्यवसन्नानि भूतानि भवन्तीत्यव्यक्तनिधनान्येव । मरणादूर्ध्वमदर्शनता प्रतिपद्यन्त इत्यर्थ ,

'अदर्शनादिहायातो मध्ये दर्शनता गत ।
पुनश्चादर्शन प्राप्त सर्वो लोको न सशय ॥'

इति स्मृतिदर्शनात् । एवमदृष्टदृष्टनष्टदेहेन्द्रियादिसंघातेषु भूतेषु का परिदेवना ' कुत प्रविलाप इत्यर्थ ॥ २८ ॥

तर्हि शास्त्रज्ञ अपि कथ शोचन्तीत्याकाङ्क्षाया निर्विकल्पक-प्रत्यगभिन्नब्रह्मप्रबोधाभावादिति मनसि निधायात्मनो दुर्विज्ञेयत्वमाह—

आश्चर्यवत्पश्यति कश्चिदेन-
माश्चर्यवद्वदति तथैव चान्यः ।
आश्चर्यवच्चैनमन्यः शृणोति
श्रुत्वा ऽप्येनं वेद न चैव कश्चित् ॥ २९ ॥

आश्चर्यवदिति । तत्र प्रथमपादेनात्मदर्शनस्य दुर्लभत्व दर्शयति—आश्चर्यवदिति । कश्चिदधिकारी पुरुष श्रुत्याचार्योपदेशत सच्चिदानन्द-स्वभावत्वेन सर्वगतमेन प्रत्यगभिन्न परमात्मान स्वात्मभूतमप्यैन्द्रजालिकर-चितपश्यद्बिम्मयाम्पदमायाविकल्पजालमिव आश्चर्यवदद्भुतमिव पश्यति, अस-भावनाकवलितदृष्टित्वात । द्वितीयपादत तदीयवदनस्य दुर्लभत्व स्फुटयति—आश्चर्यवदिति । तथा अन्यो ऽप्येनमात्मानमाश्चर्यवद्वदति च । तृतीय-पादत तदीयश्रवणस्य दुर्लभत्व स्फोरयति—आश्चर्यवदिति । तथा एनमा-त्मानमाश्चर्यवदन्य शृणोति । चतुर्थपादेन तदीयश्रवणवदनदर्शनसद्भावे ऽपि तदीयसाक्षात्कारस्यात्यन्तदुर्लभत्व विशदयति—श्रुत्वा ऽपीति । कश्चिदेन श्रुत्वा ऽप्युक्त्वा ऽपि दृष्ट्वा ऽपि यथावन्नैव वेद च विपरीतभावनाऽऽवृतदृष्टि-त्वात । एवमनेकेषु सत्सु कश्चिदेवानन्तकोटिजन्मसुकृतपरिपाकवशाद्यथा-वच्छृणोति वदति साक्षात्करोति च । अतो दुर्विज्ञेय आत्मेत्यभिप्राय ।

तथा च श्रुति —

'श्रवणायापि बहुभिर्यो न लभ्य
श्रृण्वन्तो ऽपि बहवो य न विद्यु ।
आश्चर्यो वक्ता कुशलो ऽस्य लब्धा
आश्चर्यो ज्ञाता कुशलानुशिष्ट ॥'[1]

इति ॥ २९ ॥

एवमात्मनो दुर्विज्ञेयत्वमुक्त्वा ऽशोच्यत्वमुपसहरति—

देही नित्यमवध्यो ऽयं देहे सर्वस्य भारत ।
तस्मात्सर्वाणि भूतानि न त्वं शोचितुमर्हसि ॥ ३० ॥

देहीति । हे भारत! सर्वस्य प्राणिजातस्य प्रारब्धसद्भावासद्भावाभ्या देहे जायमाने वध्यमाने ऽपि देही कूटस्थो ऽयमात्मा अवध्यो भवति । तस्मादवध्यत्वहेतो सर्वाणि भूतानि भीष्मादीन्युद्दिश्य न त्व शोचितुमर्हसि ॥ ३० ॥

आत्मनो नित्यत्वाभिप्रायेण शोकमोहयोरनवकाशता प्रतिपाद्य 'वेपथुश्च शरीरे मे रोमहर्षश्च जायते' इति यदुक्त तदयुक्तम्, युद्धस्य क्षत्रियधर्मत्वेन शोकमोहौ न कार्यावित्याह—

स्वधर्ममपि चावेक्ष्य न विकम्पितुमर्हसि ।
धर्म्याद्धि युद्धाच्छ्रेयो ऽन्यत्क्षत्रियस्य न विद्यते ॥ ३१ ॥

स्वधर्ममिति । स्वस्य क्षत्रियस्य धर्म स्वधर्म, त युद्धमपि चावेक्ष्य युद्धात् विकम्पितु चलितु नार्हसि, युद्धस्य क्षत्रियधर्मत्वात् । 'न च श्रेयो

ऽनुपश्यामि ' इति यदुक्त तत्राह—धर्म्यादिति । तच्च युद्ध स्वारिमण्डलविजय-द्वारत प्रजासरक्षणात्मकधर्मार्थम्, धर्मादनपेत धर्म्यम् । तस्मात् धर्म्याद्युद्धाच्छ्रेयो ऽन्यत्क्षत्रियस्य न विद्यते हि ॥ ३१ ॥

यथा सामान्याहिसाशास्त्रतो यागीयपशुहिसाया प्रबलत्वेनावश्य-कर्तव्यता चोदिता, तथा गुरुभ्रात्रादिहिसारूपस्य युद्धस्य क्षत्रियधर्मत्वेन तत्रोपेक्षा न कार्येत्याह—

यदृच्छया चोपपन्नं स्वर्गद्वारमपावृतम् ।
सुखिनः क्षत्रियाः पार्थ लभन्ते युद्धमीदृशम् ॥ ३२ ॥

यदृच्छयति । हे पार्थ ! यदृच्छया अप्रयत्नतश्चोपपन्नमपावृतमुद्घाटि-तकवाट स्वर्गद्वारमीदृश युद्ध ये लभन्त क्षत्रिया त एव सुखिन सुख भोगिन इत्यर्थ ॥ ३२ ॥

'स्वजन हि कथ हत्वा' इति यदुक्त तदसाधु, स्वधर्मानुष्ठातु स्वर्गदर्शनात् तदकरणे प्रत्यवायस्यावश्यभावित्वात स्वधर्मानुष्ठान कर्तव्य मेवेत्याह—

अथ चेत्त्वमिमं धर्म्यं संग्रामं न करिष्यसि ।
ततः स्वधर्मं कीर्त्तिं च हित्वा पापमवाप्स्यसि ॥ ३३ ॥

अथेति । अथ युद्धाकरणपक्षे, धर्मादनपेत धर्म्यम् इम सग्राम न करिष्यसि चेत् तत स्वधर्माकरणात महादेवमहेन्द्रादिसमागमनिमित्ता कीर्त्ति च हित्वा पापमवाप्स्यसि । 'स्वधर्मत्यागमात्रेण पातकी स्यात' इति स्मृते ॥ ३३ ॥

न केवल स्वधर्मकीर्त्यो परित्याग, किं तु शिष्टगर्हणमपि स्यादित्याह—

अकीर्त्तिं चापि भूतानि कथयिष्यन्ति ते ऽव्ययाम् ।
संभावितस्य चाकीर्त्तिर्मरणादतिरिच्यते ॥ ३४ ॥

अकीर्त्तिमिति । भूतानि सर्वे प्राणिन अव्यया शाश्वतीमकीर्त्ति ते तव कथयिष्यन्ति । स्वरक्षणस्य श्रेयोहेतुत्वेन स्वमरणसदेहाद्युद्धाकरणागता ऽपकीर्त्ति सोढव्येति तत्राह—सभावितस्येति । शूराग्रगण्यो ऽयमर्जुन इति सभावितस्य शूरजनै श्लाघितस्य तवाकीर्त्ति मरणात् अतिरिच्यते । मरणादपि अकीर्त्ति अधिकेत्यर्थ ॥ ३४ ॥

उक्ते ऽर्थे हेत्वन्तरमाह—

भयाद्रणादुपरतं मंस्यन्ते त्वां महारथाः ।
येषां च त्वं बहुमतो भूत्वा यास्यसि लाघवम् ॥ ३५ ॥

भयादिति । येषा दुर्योधनादीना शूरो ऽयमनेकगुणवानर्जुन इति बहुमतो भूत्वा पुनस्त्व लाघव यास्यसि, महारथा कर्णादय· त्वा भयात् रणादुपरत मस्यन्ते, न दययोपरत चिन्तयिष्यन्तीत्यर्थ ॥ ३५ ॥

न केवलमेव चिन्तयिष्यन्ति, त्वत्समक्षमवाच्यवादानपि वदिष्यन्तीत्याह—

अवाच्यवादांश्च बहून्वदिष्यन्ति तवाहिताः ।
निन्दन्तस्तव सामर्थ्यं ततो दुःखतरं नु किम् ॥ ३६ ॥

अवाच्येति। तवाहिता शत्रव त्वत्सामर्थ्य पराक्रम निन्दन्त सन्तो बहूनवाच्यवादान् अवक्तव्यशब्दान् वदिष्यन्ति। भीष्मादिवध-प्रयुक्तक्लेशत स्वसामर्थ्यनिन्दा सोढु शक्येति तत्राह—तत इति। तत स्व-निन्दाप्रयुक्तदु खात् दु खतर किमस्ति ? न किमपीत्यर्थ ॥ ३६ ॥

'यद्वा जयेम' इत्यादि यदुक्त तत्राह—

हतो वा प्राप्स्यसि स्वर्गं जित्वा वा भोक्ष्यसे महीम्।
तस्मादुत्तिष्ठ कौन्तेय युद्धाय कृतनिश्चयः ॥ ३७ ॥

हत इति। युद्धे कर्णादिभि हतो वा स्वर्गसुख प्राप्स्यसि कर्णादीन् जित्वा वा मही भोक्ष्यसे। यस्मात् जयाजययोरपि तव लाभ तस्मात् जेष्यामि शत्रून्मरिष्यामि वेति कृतनिश्चय सन हे कौन्तेय ! युद्धाय स्वधर्मानुष्ठानायोत्तिष्ठ, मा ऽऽलस्य कुर्वित्यर्थ ॥ ३७ ॥

'पापमेवाश्रयेदस्मान्' इति यदुक्त तत्राह—

सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ।
ततो युद्धाय युज्यस्व नैवं पापमवाप्स्यसि ॥ ३८ ॥

सुखेति। इष्टविषयलाभज सुखम्। अनिष्टविषयलाभज दु खम्। सुख च दु ख च सुखदु खे समे कृत्वा तयो कारणभूता शत्रुकोशादिप्राप्ति लाभश्च अलाभस्तद्विपर्ययश्च 'लाभालाभौ रागद्वेषनिमित्तौ, तथा तयो कारणभूतौ 'स्वेन परपरिभवो जयश्चाजय तद्विपर्ययश्च जयाजयौ समौ कृत्वेत्यर्थ। एतेषा कारण सर्वत्र हर्षविषादराहित्येन समत्वम। तत सर्वत्र समबुद्धितो युद्धाय युज्यस्व। यथा स्वधर्मपरित्यागपूर्वक परधर्मानुष्ठा-

नात्पापमवाप्स्यसि, तथैव फलेच्छा विहायेश्वरार्पणबुद्धया युद्धकर्म करोषि चेत् पाप नावाप्स्यसि। कि तु स्वधर्मानुष्ठानत शुद्धान्त करणो भूत्वा ज्ञानद्वारा मोक्षमवाप्स्यसीति भाव ॥ ३८ ॥

पूर्वोक्तोपेयभूतप्रत्यक्परैक्यज्ञानयोगमुपसहरस्तदुपायभूत कर्मयोग प्रस्तौति--

एषा ते ऽभिहिता सांख्ये बुद्धिर्योगे त्विमां शृणु।
बुद्ध्या युक्तो यया पार्थ कर्मबन्धं प्रहास्यसि ॥ ३९

एषेति। हे पार्थ! ब्रह्मात्मतत्त्व सम्यक् ख्यायते प्रकाश्यत इति सख्या, प्रत्यक्परैक्यविषयकविज्ञान साख्यम्, तस्मिन्साख्ये स्वाज्ञानतत्कार्यनिवर्तकप्रत्यगभिन्नब्रह्मापरोक्षात्मिकैषा स्वज्ञानरूपिणी बुद्धि ते तुभ्यम् अभिहिता आख्याता। सेय साख्यबुद्धिनिष्ठा स्वफलप्राप्तौ न कर्मयोगबुद्धिमपेक्षते। स्वाज्ञानागतस्य मोहस्य स्वज्ञान विना निवृत्त्यसभवात् श्रौव्यात् 'नान्य पन्था विद्यते ऽयनाय' इति श्रुते। तथा ऽपि तव चित्तशुद्धयभावात् न सा बुद्धि सफला भवति। तद्बुद्धिप्रतिबन्धकमशुद्धचित्तत्वमित्यर्थ। यत एवमत चित्तशुद्धयर्थे पूर्वोक्तबुद्धिसाधनीभूते कर्मयोगे फलेच्छात्यागपूर्वकमीश्वराराधनरूपामिमा वक्ष्यमाणलक्षणा बुद्धिं शृणु। अर्जुनप्ररोचनाय कर्मानुष्ठानविषया बुद्धि स्तौति—ययेति। यया फलाकाङ्क्षाविकलया परमेश्वरार्पणकृतनित्यकर्मानुष्ठानलक्षणया बुद्धया युक्त सन् ईश्वरप्रसादलब्धापरोक्षज्ञानद्वारा धर्माधर्मसबन्ध कर्मबन्ध, त कर्मबन्ध प्रहास्यसि। साख्यबुद्धिनिष्ठो भूत्वा विमोक्ष्यस इत्यर्थ ॥ ३९ ॥

कृष्यादिवत्कर्मणा विघ्नबाहुल्येनानियतफलत्वात् कर्मानुष्ठानकर्मबन्धयो विरोधाभावात् कर्मानुष्ठानमकिंचित्करमिति तत्राह—

नेहाभिक्रमनाशो ऽस्ति प्रत्यवायो न विद्यते ।
स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात् ॥ ४० ॥

नेति । इह निष्कामतया ऽनुष्ठिते कर्मयोगे ऽभिक्रम उपक्रम , तस्य नाश निष्फलत्व नास्ति, फलाभिसधिविकलत्वात । अभिक्रमनाशाभावे ऽपि किंचिद्वैगुण्यात्प्रत्यवाय स्यादिति तत्राह— न विद्यत इति । कामिनो विगुण कर्म फलोपधायक न भवत्येव । तद्विपरीतस्य फलाभिसधिविकलत्वेन स्वानुष्ठिते कर्मणि किंचिद्वैगुण्यपद गत ऽपि प्रत्यवायात्मको दोषो न विद्यते । प्रत्यवायाभावे ऽपि जन्मादिभयत्राण कथ स्यादिति तत्राह— त्रायत इति । ईश्वरप्रसादार्थं निष्कामतया ऽनुष्ठितस्यास्य धर्मस्य स्वल्पमप्युपक्रममात्रमपि चित्तशुद्धिगम्यज्ञानद्वारा महतो भयात जन्ममृतिप्रदात्कर्मबन्धात् त्रायते रक्षतीत्यर्थ । कृषिवाणिज्यस्थानीयकाम्यकर्मवद्वैगुण्यान्नैष्फल्यमस्य न भवति । निष्कामकर्मणामुपात्तदुरितक्षयद्वारा चित्तशुद्धिहेतुत्वात्

ज्ञानमुत्पद्यते पुसा क्षयात्पापस्य कर्मण ।
यथा ऽऽदर्शे स्वमात्मान पश्यत्यात्मानमात्मनि ॥'

इति स्मृत्यनुरोधेन विशुद्धचित्तस्य ज्ञानसभवात् ज्ञानद्वारा कर्मबन्धनिरासकत्वान्नाकिंचित्करतेति भाव ॥ ४० ॥

भगवदुक्तबुद्धिद्वयातिरिक्ताना बुद्धीना विद्यमानत्वात्कथ बुद्धिद्वयमेव भगवतोपदिष्टमिति तत्राह—

व्यवसायात्मिका बुद्धिरेकेह कुरुनन्दन ।
बहुशाखा ह्यनन्ताश्च बुद्धयो ऽव्यवसायिनाम् ॥ ४१ ॥

व्यवसायात्मिकेति। सत्कर्म कुर्वन्तीति कुरव, तद्वशे जनित्वा स्वयमपि सत्कर्म कुर्वंस्तेषामानन्दकरत्वात् हे कुरुनन्दन! इह श्रेयोमार्गे कुबुद्धिकल्पितकाणादादिशास्त्रप्रसिद्धद्वैतसिद्धान्तगोचरशाखास्थानीय - वृत्तिसहस्रजुष्टबुद्धिपटलग्रासात्सर्ववेदान्तसिद्ध प्रत्यगभिन्न ब्रह्मैवास्मीति व्यवसायात्मिका बुद्धिरेकैव। न च साख्यबुद्धयतिरिक्तयोगबुद्धिसत्त्वात्कथमेकैवेति वाच्यम्, योगबुद्धेस्तदुपायत्वात्। साख्यबुद्धयुपायभूतनिष्कामकर्मानुष्ठानसहकृतभगवद्भक्त्यैव तरिष्यामीति वा निश्चयात्मिका बुद्धिरेकैव, उपायोपेययोरेकत्वान्नैकत्वव्याघात इत्यर्थ। एव व्यवसायिना बुद्धेरेकत्वमुक्त्वा तद्विपरीतानामव्यवसायिना बुद्धेरनेकत्व प्रपञ्चयति—बहुशाखा इति। कामिनामव्यवसायिना या विपरीता बुद्धय तासा बहुशाखास्थानीयवृत्तिपटलभेद प्रचारवशात्तद्विजृम्भित ससारो ऽनन्तो ऽनुपरतो भवति। पुन पूर्वोक्तव्यवसायात्मकबुद्धया ऽनन्तभेदबुद्धिकल्पित ससारो ऽप्युपरमते। वृक्षवद्बुद्धे कुतो बहुशाखत्वमिति चेत्, एकैका बुद्धि प्रति शाखाभेदो ऽवान्तरवृत्तिविशेष। ता इमा बुद्धयो बहुशाखास्थानीया वृत्तयो यासा ता। बहुशाखाश्च प्रतिशाखाभेदेनानन्ताश्च भवन्ति। कामिबुद्धीना शाखाभेदेनानन्त्यद्योतको हिशब्द। सम्यग्ज्ञानमन्तरेण निवृत्तिराहित्य बुद्धेरानन्त्य सम्यग्ज्ञाने सत्यन्तवत्त्वादित्यर्थ ॥ ४१ ॥

अव्यवसायिगोचरबुद्धिपटलसकाशात्साख्ययोगबुद्धि प्रामाणिकी चेद् व्यवसायिनो ऽपि स्वाधिष्ठेया बुद्धि विहाय तामेव किमिति न भजन्तीति तत्राह--

यामिमां पुष्पितां वाचं प्रवदन्त्यविपश्चितः।
वेदवादरताः पार्थ नान्यदस्तीति वादिनः॥ ४२॥

यामिति। हे पार्थ ' अविपश्चितो ऽव्यवसायिन कामिन ' अक्षय्यं ह वै चातुर्मास्ययाजिन सुकृत भवति ' ' अपाम सोमममृता अभूम इत्यादिबहुर्थ-वादफलसाधनप्रकाशकवेदवादरता भूत्वा स्वर्गादिसुखात्परमीश्वरसाक्षात्कारसुख नास्तीति वदनशीला सन्तो या पुष्पिता निष्फलपुष्पसहितकिंशुकवृक्षवदा-पातरमणीयामिमा वक्ष्यमाणलक्षणा कर्मकाण्डात्मिका वाच प्रवदन्ति, तेषा-मव्यवसायिना व्यवसायात्मिका बुद्धिर्न विधीयत इत्युत्तरेणान्वय ॥ ४२ ॥

के ते ऽव्यवसायिन इति तत्राह—

कामात्मानः स्वर्गपरा जन्मकर्मफलप्रदाम् ।
क्रियाविशेषबहुलां भोगैश्वर्यगतिं प्रति ॥ ४३ ॥

कामात्मान इति । स्वर्गपशुवित्तादिविषयक कामो ऽभिलाष आत्मा स्वभावो येषा ते कामात्मान । तृतीयपुरुषार्थावृतदृष्टित्वात्स्वर्ग एव पर परमपुरुषार्थ येषा ते स्वर्गपरा । कृत्स्नवेदवेदान्ततात्पर्यविकलत्वात् भोग स्रक्चन्दनादि , ऐश्वर्य राज्यधनपशुपुत्रादि. भोगश्चैश्वर्य च भोगैश्वर्ये, तयो प्राप्तिरेव गति ता भोगैश्वर्यगतिं प्रति । कर्मण फल कर्मफलम् जन्मैव कर्मफल तत्प्रददातीति जन्मकर्मफलप्रदा, ताम् । अत एव यागदानहोमात्मक क्रियाणा विशेषा स्वर्गपशुपुत्रादिसाधनीभूता ज्योतिष्टोमादय बाहुल्यन यया वाचा प्रकाश्यन्ते सा क्रियाविशेषबहुला, ता वाच ये कामात्मान स्वर्गपरा मूढा वदन्ति, तेषा व्यवसायात्मिका बुद्धि स्वप्ने ऽपि नास्तीत्यर्थ ॥ ४३ ॥

केषा पुन व्यवसायात्मिका बुद्धिर्नास्तीति उच्यते -

भोगैश्वर्यप्रसक्तानां तया ऽपहृतचेतसाम् ।
व्यवसायात्मिका बुद्धिः समाधौ न विधीयते ॥ ४४ ॥

भोगेति । तया क्रियाविशेषबहुलया वाचा अपहृत कबलित चेतो येषा तया वेदवादावृतप्रज्ञत्वात् । इहामुत्र च भोक्तव्यभोगैश्वर्यहेत्वविकल-साधनानुष्ठानेनापि भोक्तव्यो भोग एश्वर्यं चेति भोगैश्वर्ययोरेव प्रसक्ताना तत्प्रणयवतामव्यवसायित्वेन पुरुषाधमाना निष्कामकर्मयोगोपेयभूते साख्ये तदुपायभूते निष्कामकर्मयोगे वा प्रत्यगभिन्नब्रह्मगोचरत्वेन व्यवसायात्मिका बुद्धि समाधीयत अस्मिन्सर्वमिति समाधि अन्त करणम्, तस्मिन् समाधौ न विधीयते नोपलभ्यत इत्यर्थ ॥ ४४ ॥

स्वर्गादे परमपुरुषार्थत्वाभावे स्वर्गसाधनीभूतानि कर्माणि किमिति वेदै विधीयन्त इति तत्राह —

त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन ।
निर्द्वंद्वो नित्यसत्त्वस्थो निर्योगक्षेम आत्मवान् ॥ ४५ ॥

त्रैगुण्येति । हे अर्जुन ! पुण्यपापमिश्रकर्मतत्फलहेतूना सत्त्वादयस्त्रयो गुणा एव त्रैगुण्यमाद्यन्तवत्ससार एव विषयो येषा वेदाना ते त्रैगुण्यविषयाः कामिविषया कर्मकाण्डभागा वेदा, पुण्यपापतन्मिश्रकर्मतत्फलप्रकाशकत्वात् । तदनुरोधेन फलार्थिना कामिना तत्तत्कामोचितकर्मानुष्ठानद्वारा तत्फल-भूतस्य जननमरणात्मकस्य ससारस्य ध्रौव्यात्, तया व्यवसायात्मिका बुद्धि विरलतापदमेव भजेदित्यर्थ । तर्हि ससारनिवर्तकव्यवसायात्मकबुद्धिसिद्धये कि कर्तव्यमिति तत्राह — निस्त्रैगुण्यो भवेति । नित्यसत्त्वस्थो भवेति वाक्यशेषविरोध स्यादित्यपेक्षायां कर्मफलविषयककामसकल्पराहित्यमेव निस्त्रै-गुण्यशब्देन विवक्ष्यते । मन सकल्पतत्कार्यकामतत्कार्यकर्मणा त्रैगुण्यप्रभवत्वात् न गुणत्रयातीतत्व येन वाक्यशेषविरोध स्यात् । परस्परविरोधित्वेन विद्यमानद्वंद्वाक्रान्तस्य कर्मफलविषयककामसकल्पवैकल्यलक्षणा निस्त्रैगुण्यता

कथमिति तत्राह—निर्द्वंद्व इति । शीतोष्णसुखदुःखादिद्वन्द्वशून्यो भव । तत्र हर्षविषादौ मा कुर्वित्यर्थ । रजस्तमोगुणाभ्यामाक्रान्तविवेकस्य निर्द्वन्द्वता कुत इति तत्राह—नित्यसत्त्वस्थ इति । नित्य सर्वदा रजस्तमोगुणसबन्धास्पृष्टविशुद्धसत्त्वगुणाश्रितो भव । योगक्षेमासक्तचेतसो नित्यसत्त्वस्थता कथ स्यादित्यत आह —निर्योगक्षेम इति । अप्राप्तप्राप्तिर्योग . प्राप्तस्य रक्षण क्षेम , तयो योगक्षेमयो व्यापृतचित्तो मा भवेत्यर्थ । योगक्षेमासक्त-चेतस श्रेय प्रतिबन्धकत्वान्मिथोहेतुहेतुमद्भावनिस्त्रैगुण्यादिचतुर्विधसाधनाना प्रमादबाहुल्यात् कथमुक्तार्थसिद्धिरिति तत्राह-- आत्मवानिति । परस्परहेतुहेतुमत्त्वेनोक्ते निस्त्रैगुण्यादिपर्यायचतुष्टये ऽप्रमत्तता खल्वात्मवत्ता, तद्वान्भवेत्यर्थ । एवमुक्तरीत्या स्वधर्ममनुतिष्ठतस्तव मुमुक्षोरेष एव परमोपदेश इति भाव ॥ ४५ ॥

एव त्वद्विहितेन परमोपदेशेन वेदोक्तकर्मफल ऽनपेक्षित यदि तदा 'प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शन वरम्' इति न्यायानुरोधेन कर्मणा निष्फलात्मकत्वेनाकिंचित्करत्वात्तानि बुद्धिमता न कर्तव्यान्येवेति तत्राह

यावानर्थ उदपाने सर्वतःसंप्लुतोदके ।
तावान्सर्वेषु वेदेषु ब्राह्मणस्य विजानतः ॥ ४६ ॥

यावानिति । उदक पीयते ऽस्मिन्निति उदपान वापीकूपादि तस्मिन्नुदपाने स्वल्पोदके । एकत्र स्नानपानादेरसभवात्तत्र तत्र परिभ्रमण नैकत्र स्नानमेकत्र पानमन्यत्रान्यदिति विभागशो यावान स्नानपानादिरूपो ऽर्थ प्रयोजन भवति , तावान सर्वो ऽप्यर्थ स्नानपानादिरेकत्र शुद्धादसमुद्रे यथा ऽन्तर्भवति परिच्छिन्नोदकानामपरिच्छिन्नोदकान्तर्भावात , तथा सर्वेषु वेदोक्तकर्मसु यावान्स्वर्गपशुपुत्रसबन्धप्रयुक्त सुखविशेषो भवति तावान्ब्रह्मा

त्मकत्वेन विजानतो ब्राह्मणस्य सर्वकर्मसन्यासलक्षणब्रह्मनिष्ठामारूढस्य सुखेऽन्तर्भवति । परिच्छिन्नानन्दानामपरिच्छिन्नानन्दान्तर्भूतत्वात् 'सर्वं तदभिसमेति यत्किंचित् प्रजा साधु कुर्वन्ति[1]', 'एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति[2]', 'सर्वं कर्माखिल पार्थ ज्ञाने परिसमाप्यते' इत्यादि-श्रुतिस्मृतिभ्य ईश्वराराधनलक्षणनिष्कामकर्मणामपरिच्छिन्नानन्दप्राप्तावुपाय-त्वात्प्रत्यगभिन्नब्रह्मनिष्ठाया प्राक्कर्मण्यधिकृतेन पुरुषेण तन्निष्ठाऽऽरोहाय कूपतटाकादिस्थानीयमपि कर्म कर्तव्यत्वप्रमाणात् नाकिंचित्करमिति भाव ॥४६॥

चित्तशुद्धिद्वारा ज्ञानसाधन कर्म विना तदुपेयभूतप्रत्यगभिन्नब्रह्म ज्ञानमेवोपदेष्टव्यम्, तस्मै मदीय मन स्पृहयतीति तत्राह—

कर्मण्येवाधिकारस्ते मा फलेषु कदाचन ।
मा कर्मफलहेतुर्भूर्मा ते सङ्गो ऽस्त्वकर्मणि ॥ ४७ ॥

कर्मणीति । प्रथमपादेनाविदितपरमार्थतत्त्वस्य कर्मण्यधिकार स्थापयति—कर्मणीति । ते तव नित्यादिकर्मण्येवाधिकार । अवधारणतो ज्ञाननिष्ठायामधिकाराभावो द्योत्यते । कर्म कुर्वतस्तत्फलस्पृहा स्यादित्यपेक्षाया द्वितीयपादेन तत्कर्मफलकामना निराकरोति— मेति । परमेश्वराराधनबुद्ध्या कर्म कुर्वत तव कदाचन कदाचिदपि कर्मानुष्ठानात्प्राक् तत्काले तदनन्तरमपि श्रुतिस्मृत्युक्तस्वाश्रमोचितदेहेन्द्रियचेष्टारूपकर्मणा फल्गुतया लीयन्त इति फलानि तेष्वधिकारो ऽभिलाषो मा ऽस्तु । कर्मफलाभिलाषस्य बन्धहेतुत्वात्, यथा भोजने कृते तत्फलभूता तृप्ति स्यात्, तथा कर्मणि कृते तत्फल स्यादेवेत्यत्र तृतीयपादेन तत्फलप्राप्तिविभ्रम मार्जयति—मेति ।

[1] छा ४ १ ४
[2] बृ ४ ३ ३२

भोजन विना प्राणधारणासंभवात्प्राणधारणस्यापि ज्ञानहेतुत्वेन तदर्थं भोजन विहितम् । तन्न तृप्त्यर्थम्, तेनैव तृप्तस्य विषयव्यापारोपरतिर्न स्यात् । यत एवमतो ज्ञानसाधनीभूतदेहधारणार्थमेव भोजनम् । कर्मफलस्पृहाऽभावे ऽपि प्राणधारणस्य संभवात्, कर्मफल जन्म, तद्धेतु अतस्मिन् तद्भाव यदा ते कर्म फलसङ्ग स्यात् तदा कर्मफलप्रापकाज्ञानावृतो भवसि । काम्यकर्मणा जन्महेतुत्वात् मा कर्मफलहेतुर्भू कर्मफलतृष्णाहेत्वज्ञानावृतो मा भवेत्यर्थ । करिष्यमाणस्य कर्मण फलाभावे तदकरणमेव श्रेय स्यादित्यपेक्षाया चतुर्थपादेन तदकरणे दोष प्रकटयति— मेति । निष्फलात्मकानि कर्माणीति मोहवशादकर्मणि कर्माकरणे सङ्ग प्रीति यत्नो मा ऽस्तु । चित्तशुद्ध्यर्थमनुष्ठिताना निष्कामकर्मणा ज्ञानद्वारा मुक्तिहेतुत्वात्तदकरण प्रत्यवायश्रवणादिति भाव ॥ ४७ ॥

यत एवमतो वक्ष्यमाणोपायमवष्टभ्य क्लेशात्मकान्यपि कर्माणि विहितत्वात्कर्तव्यानीत्याह—

योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा धनंजय ।
सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते॥४८॥

योगस्थ इति । हे धनजय ' योग परमेश्वरनिष्ठा, तत्र स्थित मन स्वाश्रमोचितवेदोक्तकर्माणि कुरु निर्वर्तयेत्यर्थ । तत्र सङ्ग कर्तृकारकक्रियाफलाभिनिवेशम् ईश्वरस्त्वनेन कर्मणा तुष्यत्विति वा सङ्ग त्यक्त्वा कर्म कार्यमित्यर्थ । कीदृशो भूत्वा तत्कार्यमिति तत्राह—सम इति । कयोरिति तत्राह— सिद्ध्यसिद्ध्योरिति । परमेश्वराराधनलक्षणनिष्कामकर्मानुष्ठानत चित्तशुद्धिद्वारा ज्ञानप्राप्तिलक्षणा सिद्धि, तद्विपर्ययोत्था ऽसिद्धि, तयो सिद्ध्यसिद्ध्यो समो भूत्वा वेदोक्तकर्माणि कुर्वित्यर्थ । को ऽसौ योगस्तत्राह— समत्वमिति । ज्ञानप्राप्त्यप्राप्त्यो समत्व हर्षविषादराहित्यमेव योग उच्यत ॥ ४८ ॥

समत्वबुद्धियुक्तस्य कर्मण चित्तशुद्धिहेतुत्वेन वरत्व तद्विपरीतस्य कर्मण तदभावादवरत्वमाह—

दूरेण ह्यवरं कर्म बुद्धियोगाद्धनंजय।
बुद्धौ शरणमन्विच्छ कृपणाः फलहेतवः ॥ ४९ ॥

दूरेणेति । हे धनजय ! सिद्ध्यसिद्धिसमत्वबुद्धियुक्तात्कर्मण कर्मफलार्थिभि क्रियमाण काम्य कर्म दूरेणात्यन्त निकृष्टत्वादवर हि । यत एवमतो योगबुद्धौ तदुपेयसाख्यबुद्धौ तद्गोचरत्वेन सर्वशरण्ये परमेश्वरे वा अभयप्राप्तिकारण शरणमन्विच्छ । यस्मादवर काम्य कर्म कुर्वाणा कामिन परमपुरुषार्थविकला भवन्ति फलहेत्वज्ञानावृतदृष्टित्वात, तस्मात् फलहेतव कृपणा भवन्ति, 'यो वा एतदक्षर गार्ग्यविदित्वा ऽस्माल्लोकात्प्रैति स कृपण[1]' इति श्रुत ॥ ४९ ॥

समत्वबुद्धियोगमवष्टभ्य स्वधर्ममनुतिष्ठत पुण्यपापास्पर्शनसाख्यपदारोहाय तदुपायस्य कर्मणो ऽवश्यकर्तव्यता द्रढयति—

बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते।
तस्माद्योगाय युज्यस्व योगः कर्मसु कौशलम् ॥ ५० ॥

बुद्धीति । सिद्ध्यसिद्ध्यो समत्वबुद्धियुक्तो योगी सुष्ठु कृत कर्म सुकृत स्वर्गादिप्रापकत्वात्, दुष्ट कृत दुष्कृत निरयप्रापकत्वात्, तयोरपि मुमुक्षोर्बन्धहेतुत्वेन ते उभे सुकृतदुष्कृते परमेश्वरप्रसादलब्धज्ञानादिहैव जन्मनि जहाति त्यजति । यस्मादेवप्रभाववान् समत्वबुद्धियोगो भवति । तस्मात् स्वबन्धहेतुसुकृतदुष्कृतप्रहाणाय समत्वबुद्धियोगाय युज्यस्व । यत सिद्ध्य-

[1] बृ ३ ८ १०

सिद्ध्यो समत्वबुद्धियोग कर्मसु धर्माधर्माख्येषु कौशलम्, स्वतो बन्धहेतूनामपि कर्मणामीश्वराराधनलक्षणनिष्कामप्रवृत्तितो मोक्षप्रापकसामर्थ्ये विपरीतबुद्धिनिवर्तकत्वात् । अत सदा योगयुक्तो भवेत्यर्थ ॥ ५० ॥

पूर्वश्लोकचतुर्थपादोक्तार्थाविष्करणाय कर्मणो मोक्षसाधनत्व विशिनष्टि—

कर्मजं बुद्धियुक्ता हि फलं त्यक्त्वा मनीषिणः ।
जन्मबन्धविनिर्मुक्ताः पदं गच्छन्त्यनामयम् ॥ ५१ ॥

कर्मजमिति । बुद्धि समत्वबुद्धि , तया युक्ता सर्वसाम्यब्रह्मभावारूढा मनस्तद्वृत्तितने प्रेरकत्वात् मनीषा बुद्धि ज्ञान यषा ते मनीषिण ज्ञानिन इत्यर्थ । जन्मैव बन्ध , तेन विमुक्ता देहादावात्मत्वात्मीयत्वाभिमान विकला जीवन्मुक्ता सन्त । कर्मभ्यो जात कर्मज फल्गुत्वेन लीयत इति फल देवतिर्यगादिशरीरप्राप्तिलक्षण निष्कामकर्मानुष्ठानत प्राप्तचित्त शुद्धिलब्धज्ञानबलेन त्यक्त्वा अनामय निरुपद्रव जीवन्मुक्तपूगै पद्यन गम्यत इति पद विदेहकैवल्य निरायासा गच्छन्ति । विरूपसर्वाभिमानविलय लक्षणविदेहमुक्तिभाजो भवन्तीति हिशब्दार्थ ॥ ५१ ॥

कदा तत्पदप्राप्तिसाधन भवतीत्यपेक्षायामाह— यदेति द्वाभ्याम् ।

यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति ।
तदा गन्तासि निर्वेदं श्रोतव्यस्य श्रुतस्य च ॥ ५२ ॥

यदेति । यदा यस्मिन्काले ज्ञानपरिपाकवत ते तव बुद्धिरन्तःकरण देहेन्द्रियादावहममाभिमानरूप मोहकलिलमनर्थिमिस्तद्भावारूढमूल

कालुष्य व्यतितरिष्यति अतिक्रमिष्यति, कामादिवृत्तिकलिता धीर्न भविष्यतीत्यर्थ । तदा तस्मिन्काले अध्यात्मशास्त्रातिरिक्तस्य श्रोतव्यस्य श्रुतस्य च निर्वेद वैराग्य गन्तासि । तयोरनुपादेयत्वेन तद्व्यवसाय न करिष्यसीत्यर्थ ॥ ५२ ॥

अतद्भावविरागत तद्भाव कदा मे भविष्यतीति तत्राह—

श्रुतिविप्रतिपन्ना ते यदा स्थास्यति निश्चला ।
समाधावचला बुद्धिस्तदा योगमवाप्स्यसि ॥ ५३ ॥

श्रुतीति । वैदिकलौकिकानुकूलानेकसाध्यसाधनप्रवृत्तिनिवृत्तिप्रकाशकश्रुतिभि वेदवाक्यश्रवणै पुरा विप्रतिपन्ना विक्षिप्ता बुद्धि ते तव यदा यस्मिन्काले विक्षेपद्वयविकलत्वात् निश्चला सशयविपर्यासहेतुकामसकल्परहितत्वादचला सती, समाधीयते ऽस्मिन् स्वाज्ञानतत्कार्यजातमिति समाधिरन्त करणम्, तद्भावाभावप्रकाशक प्रत्यगात्मा वा, तस्मिन्समाधौ स्थास्यति स्थिरीभूता भविष्यति, तदा तस्मिन्काले विवेकवैराग्यसत्कृतनिष्कामकर्मयोगप्राप्य साख्ययोग तत्फलभूत प्रत्यक्परचितोर्योग वा अवाप्स्यसि ॥ ५३ ॥

पूर्वश्लोके भगवदुक्तप्रश्नबीजावष्टम्भत तत्त्वज्ञलक्षण जिज्ञासुरर्जुन उवाच—

अर्जुन उवाच—

स्थितप्रज्ञस्य का भाषा समाधिस्थस्य केशव ।
स्थितधीः किं प्रभाषेत किमासीत व्रजेत किम् ॥ ५४ ॥

स्थितप्रज्ञस्येति । हे केशव! कबलीकृतबाह्यान्तर्विद्योतविकल्पपूगे समाधौ तिष्ठतीति समाधिस्थ तस्य, अहमेव ब्रह्म ब्रह्मैवाहमिति प्रत्यगभिन्ने ब्रह्मणि स्थिता ऽखण्डाकारवृत्तिलक्षणा प्रज्ञा यस्य तस्य स्थितप्रज्ञस्य अप्रतिबद्धापरोक्षज्ञाननिष्ठस्य । भाष्यते ऽनयेति भाषा का? किं वचनम्? कथमसौ ज्ञानी परै भाष्यते? केन लक्षणेनाय स्थितप्रज्ञ इत्युच्यत इत्यर्थ । श्रुत्याचार्यप्रसादत सप्राप्तदृढापरोक्षज्ञानत्वात् ब्रह्मात्मनि स्थितधी तद्भावारूढबुद्धि किं प्रभाषेत? किं वदेत्? किमासीत केन लक्षणेनाय वर्तेत? कि व्रजेत? केन प्रकारेण गच्छति? आसन व्रजन वा कथमित्यर्थ ॥ ५४ ॥

अर्जुनप्रश्नानुरोधेन सिद्धसाधकलक्षण तत्साधनानि च प्रजहातीत्यारभ्य यावदध्यायपरिसमाप्ति वदन् प्रथमप्रश्नोत्तरमाह श्रीभगवानुवाच प्रजहातीति द्वाभ्याम् ।

श्रीभगवानुवाच—

प्रजहाति यदा कामान्सर्वान्पार्थ मनोगतान् ।
आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते ॥ ५५ ॥

प्रजहातीति । हे पार्थ! परमसुखस्वरूपे परमात्मन्यवात्मना प्रत्यग्रूपेण स्वेनैव बाह्यलाभनिरपेक्षतया तुष्ट प्रत्यगानन्दाभिन्नपरमानन्दरसलाभत सर्वत्रालप्रत्ययवानात्मारामो मुनि यदा यस्मिन्काले स्वान्तर्बाह्यविभागहेतुवृत्तिद्वयपरिणत मनसि गतान्मनोगतान सर्वान कामानन्तर्बहिर्विलसितनानाविधाभिलाषान्प्रकर्षेण जहाति परित्यजति, तदा तत्त्यागकाले यथोक्तलक्षणे ब्रह्मणि स्थिता प्रज्ञा अखण्डाकारा वृत्तिर्यस्य सन्न्यासिन सो ऽय स्थितप्रज्ञ इत्युच्यते । 'न देवा पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च ससाधनाभ्यो व्युत्थाय निरागारा निष्परिग्रहा अशिखा

अयज्ञोपवीता अन्धा बधिरा मुग्धा क्लीबा मूका उन्मत्ता इव परिवर्तमाना शान्ता दान्ता उपरतास्तितिक्षव समाहिता आत्मरतय आत्मक्रीडा आत्ममिथुना आत्मानन्दा प्रणवमेव पर ब्रह्मात्मप्रकाशं शून्य जानन्तस्तत्रैव परिसमाप्ता '' इत्यादिश्रुते ॥ ५५ ॥

एवंभावापन्नस्य स्थितप्रज्ञस्यापि कदाचित्समाधितो व्युत्थानसमये सुखदु खरागद्वेषभयक्रोधादिवृत्तिसभवात्तेन तदानीमस्थितप्रज्ञत्वात् स्थितप्रज्ञता कथमिति तत्राह—

दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः ।
वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते ॥ ५६ ॥

दु खेष्विति । समाधित कादाचित्कव्युत्थानसमये ऽपि यदृच्छया समागतेष्वाध्यात्मिकादिदु खेष्वनुद्विग्नमक्षुभितं मनो यस्य सो ऽनुद्विग्नमना , दु खे प्राप्ते बलान्निगृह्यानुद्विग्नचित्तो भवतु, सुखेषु तु स्पृहा अनिवार्येति तत्राह – सुखेषु विगतस्पृह इति । यदृच्छासप्राप्तविषयजनितेषु सुखेष्वपि विगता स्पृहा तृष्णा यस्य सो ऽय विगतस्पृह , सुखदु खविषयकस्पृहाऽभावे ऽपि रागभयक्रोधानामनिवार्यत्वात्कथमुक्तलक्षणा सिद्धिरिति तत्राह-— वीतरागभयक्रोध इति । विषयाभिलाषो रागश्च द्वैतदर्शनज भय च कामापूरणसजात क्रोधश्च रागभयक्रोधा वीता यस्मात् सो ऽय वीतरागभयक्रोध , प्रत्यगभिन्नब्रह्मातिरेकेण विषयाभावात न रागप्रसक्ति । स्वस्यैवाद्वैतत्वान्न भयावकाश । तथा च नित्यशान्तिस्वरूपत्वात् न क्रोधप्रसङ्ग । दु खसुखरागभयक्रोधाद्यस्पृष्टब्रह्मात्मस्वरूपमननान्मुनि सन्यासी प्रातिभासिकसुखदु खादिवृत्तौ प्रादु-

भूतायामपि सामान्यजनवत्तद्वशमप्राप्य ब्रह्मण्येव स्थिता तद्भावापन्ना धी यस्य सो ऽय सर्वदा स्थितधी स्थितप्रज्ञ इत्युच्यते ॥ ५६ ॥

विदुषो ऽविदुष इव शुभाशुभप्राप्त्युत्थहर्षविषादयोरवर्जनीयत्वात्स्थित प्रज्ञता कथमित्यत्र 'स्थितधी किं प्रभाषेत' इति द्वितीयप्रश्नोत्तरच्छलेन तच्छङ्का शिथिलयति— य इति त्रिभि ।

यः सर्वत्रानभिस्नेहस्तत्तत्प्राप्य शुभाशुभम् ।
नाभिनन्दति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता ॥ ५७ ॥

य इति । उक्तलक्षणो यो मुनि सर्वत्र स्वदेहेन्द्रियतत्सम्बन्धिशिष्य प्रशिष्यवर्गेषु तदितरेषु भक्तेष्वपि परेष्विवाहममाभिमानविकलत्वादनभिस्नेह सन्, इहामुत्र च शोभनहेतु शुभ तद्विपरीतमशुभम्, स्वस्यानुकूल शुभ प्रतिकूलमशुभ च प्राप्यापि शुभलाभतो नाभिनन्दति न प्रशसति, अशुभला भतो न द्वेष्टि न निन्दति, किं तु केवलमुदासीन एव भाषते अविद्वद्विलक्षण त्वात्, तस्य मुने प्रज्ञा ब्रह्मणि प्रतिष्ठिता । सदा तद्भावापन्नेत्यर्थ ॥५७॥

मुक्तस्यैव स्थितप्रज्ञता ऽस्तु इन्द्रियैरिन्द्रियार्थान्भजतो मुमुक्षो स्थितप्रज्ञपदप्राप्ति कथमिति तत्राह—

यदा संहरते चायं कूर्मो ऽङ्गानीव सर्वशः ।
इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ॥ ५८ ॥

यदेति । यथा कूर्म कमठ सर्वश सर्वतो भयात स्वान्यङ्गानि करचरणादीन्युपसहरते, तथा यो ऽय मुमुक्षु ज्ञानकर्मेन्द्रियाणि तत्तदिन्द्रि

यार्थेभ्यो विमुखताया स्थितप्रज्ञताहेतुत्वात् तद्विपर्यये तद्विपर्यय स्यात् इति भिया यदा यस्मिन् काले,

'निन्दाया लोकवार्त्ताया शब्दादेरात्मविस्मृते ।
क्वचिन्नावसर दत्त्वा चिन्तयात्मानमात्मनि ॥'

इत्यादिश्रुत्यनुरोधेन ज्ञानकर्मेन्द्रियाणि तदर्थेभ्य शब्दादिविषयेभ्य सहरते । तन्निग्रहाभ्यासबलाद्यावद्यावदिन्द्रियाणामिन्द्रियार्थेभ्य उपरतिर्भवति, तावत्ता वत्तस्य प्रज्ञा ब्रह्मणि प्रतिष्ठिता भवेत्, नि शेष तत उपरमे सति तदा तस्मिन् काले तस्य योगिन प्रज्ञा निरङ्कुश ब्रह्मात्मनि प्रतिष्ठितेत्यर्थ । यत एवमतो मुमुक्षुणा स्वस्वरूपावस्थानलक्षणकैवल्यहेतुस्थितप्रज्ञतालाभाय सर्वेन्द्रियार्थेभ्य इन्द्रियाणि विमुखीकर्तव्यान्येव । अथ स्थितप्रज्ञताया सिद्धायामिन्द्रियेन्द्रियार्थततेरपि ब्रह्मात्माव्यतिरेकित्वेन तानि स्वयमेव निवर्तन्त इत्यर्थः ॥ ५८ ॥

इन्द्रियैरिन्द्रियार्थाप्रवृत्ति स्थितप्रज्ञस्य लक्षणमिति यदुक्त तद्व्यभिचारि, रोगिणा जडानामातुराणामुपवासिना चेन्द्रियैरिन्द्रियार्थाप्रवृत्तेरविशेषादिति तत्राह—

विषया विनिवर्तन्ते निराहारस्य देहिनः ।
रसवर्जं रसो ऽप्यस्य पर दृष्ट्वा निवर्तते ॥ ५९ ॥

विषया इति । इन्द्रियैरिन्द्रियार्थग्रहणमाहार, तद्विकलस्य निराहारस्य इन्द्रियैरिन्द्रियार्थग्रहणाशक्तस्य देहिनो देहाभिमानिनो ऽज्ञस्य रोगिणो जडस्य कार्यान्तरातुरस्यालाभतो नियमतो वा ऽनश्नतो ज्ञानशून्यत्वेन क्लेशात्मकतपोयोगावष्टम्भेन केवलमौनमुपेयुषो वा पुरुषस्य विषयेषु रागो

रसो मधुरादिविलक्षणत्वात् रञ्जनात्मको रस स्वेप्सितविषयाभिलाष । रसवर्जं विषयस्पृहा विना विषया विषयोपलक्षितानि इन्द्रियाणि स्वार्थेभ्यो विनिवर्तन्ते । विषयग्रहणाशक्तितो विषयानुभवे निवृत्ते ऽपि विषयतृष्णा न निवर्तत इत्यभिप्राय । तर्हि रस केनोपायेन निवर्तेत इति तत्राह - परमिति । अविद्याद्वयतत्कार्यात्पर ब्रह्माहमस्मीति दृष्ट्वा साक्षात्कृत्य स्थितस्य स्थितप्रज्ञस्यास्य रसो विषयेच्छा ऽपि निवर्तते । यत सम्यग्ज्ञानमन्तरेण न रसोच्छेद स्यात्, अतो निर्बीजब्रह्मापरोक्षायेन्द्रियैरिन्द्रियार्थाग्रहणपूर्वक स्थितप्रज्ञता सपादनीया । न च सम्यग्ज्ञानमन्तरेण रागानिवृत्ते रागिणस्तावत्सम्यग्ज्ञानानुत्पत्तेस्तयोरितरेतराश्रयता स्यादिति वाच्यम् रागस्थूलसूक्ष्मबीजाशाना ज्ञानविज्ञानसम्यग्ज्ञाननाश्यत्वात् । परमेश्वराराधनलक्षणनिष्कामकर्मानुष्ठानजनितचित्तशुद्धेरीषद्रागाभिभवो भवति । ततो वेदान्तश्रवणादौ श्रद्धा जायते । तत साधनचतुष्टयसपन्नो भूत्वा वेदान्तश्रवणेतरव्यापारसन्यासपूर्वक वेदान्तश्रवण करोति । तत श्रुत्याचार्यप्रसादेन केवलशास्त्रार्थज्ञानमुदेति । तावन्मात्रेण रागस्थूलाशो विलीयते । तेन श्रुत्याचार्यप्रसादलब्ध ज्ञानमनुभवारूढ सद्विज्ञानपद भजति । तेन रागसूक्ष्मभागो विलीयते । तत पूर्वोक्तविज्ञान सशयविपर्यासविरूपविलयपूर्वक प्रत्यगभिन्नब्रह्मचरमसाक्षात्कारनामेत्य सम्यग्ज्ञानतापद भजति । तेन रागबीजभागो ऽपि नि शेष विलीयत । अत एवाह भगवान् 'रसो ऽप्यस्य पर दृष्ट्वा निवर्तते' इति । यत एवमत सम्यग्ज्ञानतो रागनिवृत्तेर्न तयोरितरेतराश्रयतोत्थदोषावकाश स्यादित्यर्थ ॥ ५० ॥

एव सम्यग्ज्ञानेन रागनिवृत्तित स्थितप्रज्ञताया सत्या स्वार्थेभ्य इन्द्रियाणि स्वयमेव निवर्तन्ते, किं बहुलतरायाससाध्येनेन्द्रियनिग्रहणेत्यपेक्षाया सम्यग्ज्ञानवता स्वव्यतिरेकेणेन्द्रियेन्द्रियार्थतत्प्रवृत्तिनिवृत्तिनिग्रहादिव्यापाराभावप्रमाणात्तेषामिन्द्रियाणि स्वयमेव निवर्तन्ता नाम । तद्विपरीताना

साधकावस्थाऽऽरूढत्वेन सम्यग्ज्ञानप्राप्यप्रत्यगभिन्नब्रह्मणि प्रज्ञाऽऽरोहाया-प्रमत्ततया बहुलतरप्रयत्नेनापि स्वार्थेभ्य इन्द्रियनिग्रह कर्तव्य एवेति प्रतिपादयितु किमासीतेति तृतीयप्रश्नस्योत्तरमाह—यतत इति द्वाभ्याम् ।

यततो ह्यपि कौन्तेय पुरुषस्य विपश्चितः ।
इन्द्रियाणि प्रमाथीनि हरन्ति प्रसभं मनः ॥ ६० ॥

यतत इति । हे कौन्तेय ! विक्षेपहेतु पराग्भाव विहाय तद्विपरीत-प्रत्यग्भावारोहणाय निश्चितबुद्धिर्विपश्चित्, तस्य विपश्चित शास्त्रार्थज्ञानिनो विषयेषु भूयो भूयो दोषदर्शनपूर्वकमिन्द्रियनिग्रहाय यततो ऽपि श्रुत्याचार्य-प्रसादलब्धज्ञानसस्कृत मनो ऽन्त करण प्रसभ बलात्प्रमथ्नन्ति विक्षोभयन्तीति प्रमाथीनि प्रमथनशीलानि चक्षुरादीनीन्द्रियाणि हरन्ति । उक्तार्थप्रसिद्धि-द्योतको हिशब्द ॥ ६० ॥

एव निग्रहासक्तमन्त करण प्रमथ्येन्द्रियाणि हरन्ति चेत् कि कर्तव्यमिति तत्राह—

तानि सर्वाणि संयम्य युक्त आसीत मत्परः ।
वशे हि यस्येन्द्रियाणि तस्य प्रज्ञा प्रतिष्ठिता ॥ ६१ ॥

तानीति । यानि प्रमथनशीलानि तानि सर्वाणि चक्षुरादीनीन्द्रियाणि तद्विषयदोषदर्शनत शनै शनै सयम्य स्ववशीकृत्य गृहीतकरणग्रामत्वेन युक्तो योगी प्रत्यगभिन्नवासुदेवो ऽहमेव पर परायण यस्य सो ऽय मत्परो-मद्भावारूढ सन्नासीत,

‘नैव धर्मी न चाधर्मी न चैव हि शुभाशुभी ।
य स्यादेकासने लीनस्तूष्णीं किंचिदचिन्तयन् ॥’

इति स्मृते । एवमासीनस्य यस्य योगिन अभ्यासपाटवेन चक्षुरादीनीन्द्रियाणि वशे वर्तन्ते तस्य प्रज्ञा ब्रह्मणि प्रतिष्ठितेत्यर्थ ॥ ६१ ॥

बाह्येन्द्रियनिग्रहस्यान्तरिन्द्रियनिग्रहपूर्वकत्वात्तदकुर्वाणा पराभविष्यन्त इति निगमयति —ध्यायत इति द्वाभ्याम् ।

ध्यायतो विषयान्पुंसः सङ्गस्तेषूपजायते ।
सङ्गात्संजायते कामः कामात्क्रोधो ऽभिजायते ॥ ६२ ॥

ध्यायत इति । विषयान् सुखदु खसाधनत्वेन ध्यायत सकल्पयत पुस तेषु विषयेषु सङ्ग आसक्ति उपजायते । तेन कि जायत इति तत्राह-- काम इति । विषयसकल्पसङ्गत तद्विषयक कामो ऽभिलाष सजायते । कामत कि स्यादिति तत्राह—क्रोध इति । येन केनचित् कुण्ठितात् कामात् क्रोधो ऽभिजायते ॥ ६२ ॥

तत किमित्यत आह—

क्रोधाद्भवति संमोहः संमोहात्स्मृतिविभ्रमः ।
स्मृतिभ्रंशाद् बुद्धिनाशो बुद्धिनाशात्प्रणश्यति ॥ ६३ ॥

क्रोधादिति । क्रोधात्कर्तव्याकर्तव्यविवेकविकल समोहो भवति । साधुरप्यत एव क्रोधजसमोहवशात् गुरूनप्याक्रोशति । तेन कि भवतीति तत्राह---स्मृतिविभ्रम इति । समोहात् श्रुत्याचार्यप्रसादलब्धसर्ववेदान्तसिद्धान्ततात्पर्यार्थस्मृतिविभ्रमो भवति । स्मृतिभ्रशे ऽपि बुद्धि स्यादिति तत्राह— बुद्धिनाश इति । स्मृतिभ्रशात् कर्तव्याकर्तव्यविवेककुशलबुद्धिनाशो भवति । यावद् बुद्धि कार्याकार्यविवेककुशला भवति, तावदेव पुस

पुंस्त्वम् । अत एव बुद्धिनाशात्प्रणश्यतीत्युक्तम् । नाशो नाम परमपुरुषार्थच्युति । यतो विषयाभिध्यान सर्वानर्थमूल तत्प्रयत्नेनातो निराकर्तव्य मित्यर्थ । तथा च श्रुति —

'शब्दस्पर्शादयो ये ऽर्था अनर्था इव ते स्थिता ।
येषा सक्तस्तु भूतात्मा न स्मरेच्च पर पदम् ॥' ॥ ६३ ॥

इन्द्रियाणा विषयप्रावण्यशीलत्वेन स्वार्थतो निरोद्धुमशक्यत्वात्तज्जन्यस्य दोषस्य दुर्निवारत्वेन स्थितप्रज्ञता कथमित्याकाङ्क्षायाम् 'व्रजेत किम्' इति चतुर्थप्रश्नस्योत्तरच्छलेन तच्छङ्का व्युदस्यति—रागद्वेषेति द्वाभ्याम् ।

रागद्वेषवियुक्तैस्तु विषयानिन्द्रियैश्चरन् ।
आत्मवश्यैर्विधेयात्मा प्रसादमधिगच्छति ॥ ६४ ॥

रागद्वेषेति । इष्टविषये स्पृहा रागश्च तद्विपरीतविषये द्वेषश्च रागद्वेषौ, ताभ्या वियुक्तै पृथग्भूतै, अत एव आत्मनो मनसो दासवद्वश्यैश्चक्षुरादिभिरिन्द्रियै शरीरस्थितिमात्रप्रयोजनान्यथाऽनुपपत्त्या ऽवर्जनीयानन्नपानादीन्विषयाश्चरन्नश्नन्सन् विधेयो वशीकृत आत्मा ऽन्त करण यस्य सो ऽयं विधेयात्मा योगी प्रसाद चित्तस्वास्थ्यमधिगच्छति । ब्रह्मणि स्थिरचित्तो भवतीत्यर्थ ॥ ६४ ॥

एव मन प्रसादे किं स्यादिति तत्राह—

प्रसादे सर्वदुःखानां हानिरस्योपजायते ।
प्रसन्नचेतसो ह्याशु बुद्धिः पर्यवतिष्ठते ॥ ६५ ॥

प्रसाद इति । अस्य श्रवणाद्यनुष्ठानवतो यते मन प्रसादे स्थैर्ये सति तद्विपर्यये सत्यनिवार्याणामाध्यात्मिकादिसर्वदु खाना हानिर्नाश उपजायते ।

एव नि शेषमाध्यात्मिकदु खनाशे कि स्यादिति तत्राह—बुद्धि· पर्यवतिष्ठत इति । हि यस्मात् कामसकल्पादिवृत्तिसहस्राकुण्ठितत्वेन प्रसन्न प्रत्यक्परचिदैक्यभावापन्न चेतो यस्य तस्य प्रसन्नचेतसो यने , आशु शीघ्र बुद्धि· विजातीयप्रत्ययतिरस्कारपूर्वक 'ब्रह्मैवाहमहमेव ब्रह्मेति सजातीयप्रत्ययप्रवाहफलीभूताखण्डाकारचरमवृत्ति प्रत्यक्परविभागासहसत्तासामान्यब्रह्मणि उपाधिविनिर्मुक्त घटाकाशमिव परि समन्तादवतिष्ठते । स्वभावकबलितस्वाविद्यातत्कार्यजालविदेहकैवल्यरूपेणावतिष्ठत इत्यर्थ ॥ ६५ ॥

यतो रागद्वेषवियुक्तैरिन्द्रियै देहस्थितिमात्रप्रयोजनयदृच्छाप्राप्तान्नपानादिभोगानसङ्गतया ऽश्नत प्रसन्नचेतसो यते कृतकृत्यता प्रतिपादिता खलु , अत कृतकृत्यताहेतवे मुमुक्षुभिरवश्यमप्रमादेनेन्द्रियद्वयनिग्रह कर्तव्य इति व्यतिरेकमुखेण कथयति—

नास्ति बुद्धिरयुक्तस्य न चायुक्तस्य भावना ।
न चाभावयतः शान्तिरशान्तस्य कुतः सुखम् ॥ ६६ ॥

नास्तीति । अवशीकृतबाह्यान्तरिन्द्रियवर्गत्वेनायुक्तस्य श्रुत्याचार्यप्रसादविमुखस्य मूढस्य ब्रह्माहमहमेव ब्रह्मेति ब्रह्मात्मविषया बुद्धिर्नास्ति । तादृशबुद्ध्यभावे ऽपि तद्विषयकभावना किं न स्यादिति तत्राह—न चेति । विक्षेपयुगलकबलितचित्तत्वेन ब्रह्मात्मविषयकबुद्धावयुक्तस्य निष्कलब्रह्मभावना तदुपायभूता सकलब्रह्मभावना वा स्वात्मत्वेन स्वभिन्नत्वेन वा न चास्ति । एव भावनाद्वयाभावे अपि कालान्तरे परमशान्तिर्भवतीति तत्राह—न चेति । श्रुत्याचार्यप्रसादात्तवेदवेदान्तसिद्धान्ततात्पर्यविकलत्वेन निष्कलसकलब्रह्मविषयकभावनाऽन्यतरमप्यभावयत. स्वाविद्याद्वयतत्कार्यजातनिवृत्तिरूपपरमशान्ति स्वप्ने ऽपि प्रमादतो वा न च जात्वस्ति। एवविधपरमशान्त्य-

भावे ऽपि ब्रह्मात्मैक्यसुखस्यापरिच्छिन्नत्वेन तत्सुख स्वयमेव स्यादिति तत्राह—कुत इति। अक्षीणाविद्याद्वयतत्कार्यजातावृतापरिच्छिन्नानन्द-स्वरूपावस्थानलक्षणकैवल्यसुखत्वेनाशान्तस्य तादृशं सुख कुत? न च तादृशसुखाभावे ऽपि वैषयिक सुख निरङ्कुशमिति वाच्यम्, तात्कालिक-प्रातिभासिकसुखस्यापि परिणामे दु खमात्रपर्यवसानात्तत्सुखाभासतृष्णानि-वृत्तिरेव खलु परमसुखम्, तद्विधुरस्य कुत्रापि सुखगन्धो नास्तीत्यर्थ। ब्रह्मात्मविषयकबुद्धियुक्तस्य तद्विषयकभावना जायते। तादृशभावनायुक्तस्य परमशान्तिरुदेति। एव परमशान्तिमारूढस्यैव निरतिशयब्रह्मसुखलक्षण कैवल्य भवतीत्यर्थ ॥ ६६ ॥

अवशीकृतेन्द्रियद्वयस्य ब्रह्मात्मविषयकबुद्धिभावनाशान्तिसुखाभावे हेत्वन्तरमाह—

इन्द्रियाणां हि चरतां यन्मनो ऽनुविधीयते।
तदस्य हरति प्रज्ञां वायुर्नावमिवाम्भसि ॥ ६७ ॥

इन्द्रियाणामिति। स्वार्थेषु निरङ्कुशं चरता चक्षुरादीना सर्वेषामि-न्द्रियाणा यन्मनो ऽन्त करणमनुविधीयते, इन्द्रियवश प्राप्य तदनुकूलतया प्रवर्तत इत्यर्थ। अस्य मुमुक्ष्वाभासस्य तन्मन श्रुत्याचार्यप्रसादात्तात्मानात्म-विवेकजा प्रज्ञा वायुरम्भसि समुद्रे ऽकुशलकर्णधाराधिष्ठिता नावमिव हरति। हि यस्मादेवं तस्माद्विक्षिप्तचित्तस्य ब्रह्मात्मबुद्धिभावनाशान्तिसुखानि न सिध्यन्तीत्यर्थ ॥ ६७ ॥

यततो ह्यपीत्यारभ्योपपादितमर्थमुपसहरति —

तस्माद्यस्य महाबाहो निगृहीतानि सर्वशः।
इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ॥ ६८ ॥

तस्मादिति। हे महाबाहो ! यस्माद्यथेच्छ स्वार्थानुचारीन्द्रियानुकूल तथा चरतो मनसो दोष स्फुटीकृत, तस्माद्यस्य मुमुक्षोरिन्द्रियाणि स्वार्थेभ्य शब्दादिविषयेभ्य स्वापावस्थायामिव सर्वश सर्वप्रकारेण निगृहीतानि उपरमितानि भवन्ति,' तस्य यते प्रज्ञा ब्रह्मात्मनि प्रतिष्ठितेति मन्तव्यमित्यर्थ ॥ ६८ ॥

इन्द्रियद्वयव्यापृतिरहितत्व स्थितप्रज्ञत्वमिति यदुक्त तदसाधु, सुषुप्तपुरुषवत्सर्वात्मना ऽन्तर्बाह्यविलसितेन्द्रियद्वयव्यापृतिशून्यो न कश्चिदस्ति, कुत्राप्यदर्शनादित्यत्रोच्यते—

या निशा सर्वभूतानां तस्यां जागर्ति संयमी ।
यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः ॥ ६९ ॥

येति। सर्वेषा भूतानामतद्भावारूढानामज्ञाना या सर्वकर्मसन्यासलक्षणा ऽद्वितीयब्रह्मात्मनिष्ठा निशेव निशा ब्रह्मानन्दाविवेककरी भवति। यथा चक्षुष्मता प्रचण्डमार्तण्डदीधितिव्याप्तमहरेव दिवाभीताना चक्षुरावारिका निशा भवति। तथोलूकस्थानीयानामज्ञानामद्वितीयब्रह्मनिष्ठा स्वयप्रकाशरूपा ऽपि निशा भवतीत्यर्थ । तस्यामज्ञवृन्दनिशाभूतायामद्वैतनिष्ठायामिन्द्रियद्वयसयमवान् स्थितप्रज्ञ सन्यासी जागर्ति, यथोक्तलक्षणब्रह्मज्ञानाग्निभस्मीकृतस्वस्वरूपावारकाज्ञानतूलराशित्वात् । यस्या ग्राह्यग्राहकभेदलक्षणाया स्वावरणरूपाया स्वाविद्याद्वयतत्कार्यमहामोहनिद्राया परमार्थतत्त्वज्ञातिरिक्तानि भूतानि जाग्रति तद्व्यापारवन्ति भवन्ति अहमेव ब्रह्म ब्रह्मैवाहमिति प्रत्यगभिन्न ब्रह्म पश्यतो मुने सन्यासिन सैव स्वाविद्याविजृम्भितद्वैतनिष्ठा निशा रात्रिर्भवति। तादृशब्रह्मात्मनिष्ठस्य ग्राह्यग्राहकलक्षणद्वैतप्रपञ्चप्रवृत्तिनिवृत्त्यभावात्——

'नैतज्जाग्रन्न च स्वप्नः सकल्पानामभावनात् ।
सुषुप्तभावो नाप्येतदभावाज्जडतास्थिते ॥
किं करोमि क्व गच्छामि किं गृह्णामि त्यजामि किम् ।
यन्मया पूरित विश्वं महाकल्पाम्बुना यथा ॥'
'यत्र त्वस्य सर्वमात्मैवाभूत् तत्केन क पश्येत्'

इत्यादिद्वैतप्रपञ्चप्रवृत्तिनिवृत्त्यभावश्रुते । यस्यैव भेदजात निशेतिज्ञान तस्य सर्वकर्मसन्यास एवाधिकारो न कर्मणि, तद्धेत्वज्ञानाभावात् । अत एव विद्योदयात्प्रागविद्याऽवस्थायामविदुष कर्माणि चोद्यन्ते । उदिते स्वविद्यासवितरि क्रियाकारकफलात्मकस्वाविद्याकर्मध्वान्तादर्शनात्तत्प्रवृत्तिस्तन्निवृत्तिर्वा न सभवति । अत एव ब्रह्मात्मनिष्ठस्य स्वाधिष्ठेयेन्द्रियद्वयतत्कार्याणा ब्रह्मात्मरूपत्वेन सुषुप्तपुरुषवत्प्रवृत्तिनिवृत्त्योरभावात्स्थितप्रज्ञलक्षण साध्वेवेत्यर्थ ॥ ६९ ॥

स्थितप्रज्ञस्य ब्रह्मात्मदृष्टित्वेन विषयपराङ्मुखत्वमुक्तम् , इदानीं विषयभोक्तृत्वे ऽपि न तस्य काचिद्विकृतिरस्तीत्याह—

आपूर्यमाणमचलप्रतिष्ठं
समुद्रमापः प्रविशन्ति यद्वत् ।
तद्वत्कामा यं प्रविशन्ति सर्वे
स शान्तिमाप्नोति न कामकामी ॥ ७० ॥

आपूर्यमाणमिति । नानानदनदीजलैरा समन्तात्पूर्यत इत्यापूर्यमाण । न चलतीत्यचल , अचलवत्प्रतिष्ठा स्थिति यस्य सो ऽयमचलप्रतिष्ठ , स्ववेलाऽवधि स्वस्मिन्नेवाविकारतया स्थितत्वात् । तमेवभूत सर्वत्र मुक्तवत्स्वधामतो न-

द्रवन्त समुद्र प्रावृड्ग्रीष्मकालयो वृद्धिग्लानिशून्यत्वेनाविक्रिय यद्वदापो नानानदनदीमुखा प्रविशन्ति तद्वदिच्छाविशेषा सर्वे कामा किंचिद-प्यविकुर्वन्त सन्तो ब्रह्मात्मनिष्ठ स्वे महिम्नि तिष्ठन्त य प्रविशन्ति, सो ऽय ब्रह्मात्मनिष्ठ स्थितप्रज्ञ' सन्यासी स्वसत्ताकबलिताविद्याद्वयतत्कार्यरूपा कैवल्यरूपिणीं शान्तिमाप्नोति । न च 'आहारशुद्धौ सत्त्वशुद्धि सत्त्वशुद्धौ ध्रुवा स्मृति स्मृतिलम्भे सर्वग्रन्थीना विप्रमोक्ष' इति श्रुते शुद्धमाहारमश्नत क्रमेण सर्वग्रन्थिविप्रमोक्षो न तद्विपरीतस्येति वाच्यम् । तस्यारुरुक्षुविषयत्वात् तद्विपरीतस्य सर्वग्रन्थ्यतीतब्रह्मात्मभावमारूढस्यारुरुक्ष्वाचरणीयनियमानियमप्रवृत्तिनिवृत्तित प्रयोजनाभावात् । तथा ऽपि लोकसग्रहार्थमारुरुक्षुवत्सर्वमाचरणीयमिति चेन्न, लोकसग्रहार्थानुष्ठानस्यारुरुक्ष्वारूढयोरन्तरालावस्थाऽऽपन्नमुन्यधिकारात् । तथा च श्रुति —

'आशीर्युक्तानि कर्माणि हिसायुक्तानि यानि च ।
लोकसग्रहयुक्तानि नैव कुर्यान्न कारयेत् ॥
न चास्ति किंचित्कर्तव्यमस्ति चेन्न स तत्त्ववित्'

इत्यादि । एवं कर्तव्याभावे भोक्तृत्वं कुत इति चेन्न, ब्रह्मात्मनिष्ठस्य स्वव्यतिरिक्तभोक्तृभोग्याभावेन कुत्राप्यात्मत्वात्मीयत्वाभिमानाभावात्परारोपित प्रातिभासिक भोक्तृत्व विदुषो न दोषाय कल्पते । 'सत्य ज्ञानमनन्त ब्रह्म । यो वेद निहित गुहाया परमे व्योमन् । सो ऽश्नुते सर्वान्कामान् सह । ब्रह्मणा विपश्चितेति ।'

'यथा रवि सर्वरसान्प्रभुङ्क्ते हुताशनश्चापि हि सर्वभक्ष ।
तथैव योगी विषयान्प्रभुङ्क्ते न लिप्यते पुण्यपापैश्च शुद्ध ॥
अहमन्न सदा ऽन्नाद इति हि ब्रह्मवेदनम् ।
ब्रह्मविद् ग्रसति ज्ञानात्सर्वं ब्रह्मात्मनैव तु ॥'

इत्यादिश्रुतिप्रमाणतो ब्रह्मात्मनिष्ठस्य विषयभोक्तृत्वे ऽपि न काचित्क्षतिरस्ति। अविदुष कामिनो ऽपि तथा ऽस्त्विति चेत्तत्राह---नेति। काम्यन्त इति कामा विषयाभिलाषा। तानात्मीयत्वाभिमानेन कामयितु शील यस्य देहादावात्माभिमानिन सो ऽय कामकामी भोक्तृत्व स्वस्मिन् स्वेतरेषु भोग्यत्व चारोप्य मोमुह्यमान सन् पूर्वोक्ता शान्ति नाप्नोति। 'विदुष-स्त्यक्तैषणस्य स्थितप्रज्ञस्य यतेरेव मोक्षप्राप्ति, न त्वसन्यासिन कामकामिन' इति भाष्यकारोक्ते अकामिन एव मोक्ष, न कामिन इत्यर्थ ॥ ७० ॥

त्यक्तैषणस्याकामिन एव मोक्षो न कामिन इति यदुक्त तद्वि-चिकित्स्यम्, परिव्राजकेतरस्यापि मोक्षसभवात् स्वशरीरेन्द्रियतत्सबन्धिदार-पुत्त्रधनक्षेत्रादावात्मत्वात्मीयत्वाभिमानविकलेन कामकामिना गृहस्थेनापि मोक्षस्य प्राप्तु शक्यत्वेन सर्वकर्मसन्यासमौनादेरकिंचित्करता स्यादित्येव प्राप्ते, तत्रोच्यते--- स्वदेहदारादावहममाभिमानाभावेन तै प्रयोजनाभावत-स्तेषु विरक्त,

'विरक्त प्रव्रजेद्धीमान् स रक्तस्तु गृहे वसेत्।
सरागो नरक याति प्रव्रजन्हि द्विजाधम॰ ॥'

इति श्रुते प्रथमपादपर्यालोचनया परिव्राट्पदमेव भजेत। यतो द्वितीयादिपादावष्टम्भेन न भजते, अतो दारादिन्यस्ताभिमान दुस्त्यज मत्वा माक्षिकमध्यपतितमक्षिकावत्तत्रैव मोमुह्यमानस्य तदवस्था विना तद्विपरीतसर्वैषणापरित्यागलक्षणसर्वकामग्रासकमोक्षकथाया अपि दुर्लभत्वादन्त-र्बाह्यविलसितविक्षेपद्वयावृतदृष्टे कामकामिनो न मोक्षावकाश इति सिद्धत्वान्न सन्यासमौनयोरकिंचित्करतेति सिद्धम्। न च सन्यासिनो बाह्यविक्षे-पालम्बनाभावे ऽपि नानासकल्पादिवृत्तिमन्मनस सत्त्वेनान्तर्विक्षेपध्रौव्यान्न मोक्षप्रसक्तिरिति वाच्यम्। बाह्यालम्बनाभावे प्रचारप्रदेशाभावतो ऽन्तर्विक्षेप-

स्यापि कामुकास्पृष्टकामिनीकुचवत्स्वात्मन्येव विलयसभवात् यत्किंचिदवशिष्टा-न्तर्विक्षेपतूलाद्रेर्वेदान्तश्रवणमनननिदिध्यासनारणिचिरमथनाविर्भूतसम्यग्ज्ञान -वह्निना नि शेषभस्मीकरणादेवमन्तर्बाह्यविक्षेपद्वयाभावतस्त्यक्तैषणस्य सन्यासिन एव सर्वसकल्पतज्जसर्वकामतज्जसर्वकर्मसंन्यासलक्षणब्रह्मनिष्ठता स्यादित्यत एव भगवानाह— ॥

विहाय कामान्यः सर्वान्पुमांश्चरति निःस्पृहः ।
निर्ममो निरहंकारः स शान्तिमधिगच्छति ॥ ७१ ॥

विहायेति । परमपुमर्थभावत्वात् य पुमान् सन्यासी स्वमात्रावशेष-तया ऽशेषत स्वान्तर्बाह्यविजृम्भितान्सर्वान्कामान्विहाय स्वात्मत्वेन प्रवि-लाप्य शरीरधारणामात्रहेतुचेष्टाऽवशेष सन्निरङ्कुश सर्वासु दिक्षु चरति पर्यटति, स शान्तिमधिगच्छतीति योजना । एव पर्यटतो यते भक्तो-पनीतभिक्षाऽऽदाविदं ममेति ममत्वसभवात्तच्छान्ति कथ स्यादिति तत्राह— निर्मम इति । शरीरधारणामात्रहेतुत्वेनावर्जनीयान्नपानादिपरिग्रहे ऽपि ममे-दमित्यभिमानविकलत्वात् निर्गतो ममकारो यस्मात् सो ऽय निर्मम । स्वदेहा-दन्यत्र ममकाराभावे ऽपि स्वदेहमात्रे ऽहकारस्य ध्रौव्यात्कथमुक्तलक्षणा शान्तिर्भवतीति तत्राह—निरहकार इति । निर्गतो ऽहकारो यस्मात् सो ऽय निरहकार स्वाविद्याविजृम्भितदेहादावहभावध्वान्तस्य स्वविद्यामध्याह्न-प्रचण्डमार्तण्डदीधितिकबलितत्वात्स्वदेहे तदन्यत्र वा अहकारममकाराभावे ऽपि देहधारणस्पृहाया अनिवार्यत्वात्तच्छान्ति कुत इति तत्राह— नि स्पृह इति ।

‘नाभिनन्देत मरणं नाभिनन्देत जीवितम् ।
कालमेव प्रतीक्षेत निर्देश भृतको यथा ॥’

इति श्रुत्यनुरोधेन स्वदेहधारणाधारणयोरपि निर्गता स्पृहा तृष्णा यस्मात्सोऽयं नि स्पृह । एवविशेषणविशिष्ट स्थितप्रज्ञो मुनिरेवाविद्याद्वयतत्कार्य-विजृम्भितसर्वसंसारप्रवृत्तिनिवृत्त्युपरमलक्षणा सशान्तविक्षेपद्वयपुरुषप्राप्या विदेहकैवल्यरूपिणीं शान्तिमधिगच्छति । विदेहमुक्तो भवतीत्यर्थ ।

'यदा सर्वे प्रभिद्यन्ते हृदयस्येह ग्रन्थय ।
अथ मर्त्यो ऽमृतो भवत्येतावदनुशासनम् ॥'

इति श्रुते ॥ ७१ ॥

पूर्वोक्तसर्वकर्मसंन्यासलक्षणब्रह्मात्मनिष्ठा स्तुवन्नुपसहरति—

एषा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य विमुह्यति ।
स्थित्वा ऽस्यामन्तकाले ऽपि ब्रह्मनिर्वाणमृच्छति ॥७२॥

इति श्रीमद्भगवद्गीता० साख्ययोगो नाम द्वितीयो ऽध्याय'

एषेति । एषा सर्ववेदान्तप्रसिद्धा सर्वकर्मसंन्यासपूर्वकप्रत्यगभिन्न-ब्रह्मस्वरूपावस्थानलक्षणेय ब्राह्मी स्थिति निष्ठा सर्वव्यापिका ऽपि 'यश्च श्रोत्रियो ऽवृजिनो ऽकामहत स एको ब्रह्मलोक आनन्द [1]' इत्यादि-श्रुत्यनुरोधेनाकामिष्वेव सर्वोत्कर्षेण वर्तते । न चास्या निष्ठाया काम्य-कामिनोस्तुल्याधिकारत्वेन फलस्यापि समत्वेन च केवलमायासपर्यवसायी संन्यास इति वाच्यम्,

'द्वाविमौ न विराजेते विपरीतेन कर्मणा ।
निरारम्भो गृहस्थश्च कार्यवाश्चैव भिक्षुक ॥'

इति श्रुतिप्रमाणत कामिनो निरारम्भलक्षणब्रह्मनिष्ठतावैरल्यात्, तथाऽपि तदारोढुमिच्छायामपि बहुलतरान्तरायसंभवात् श्रुत्याचार्यप्रसादतो वेदान्त-श्रवणकालमारभ्य देहपतनपर्यन्त स्वान्तर्बाह्यविजृम्भितसकल्पकामकर्मसंन्यास-पूर्वकत्वाद् ब्रह्मनिष्ठायां अकामिनो निरारम्भकत्वेन तत्रान्तरायाभावात् अस्यामकाम्येवाधिक्रियते न कामी ।

'श्रेयश्च प्रेयश्च मनुष्यमेतस्तौ सपरीत्य विविनक्ति धीर ।
श्रेयो हि धीरोऽभिप्रेयसो वृणीते प्रेयो मन्दो योगक्षेमाद्वृणीते[1] ॥'

इत्यादिश्रुत्यनुरोधेन कामिन फल प्रेयोऽभ्युदय तद्विपरीतस्याकामिन फलं नि श्रेयसमिति फलस्यापि वैषम्यात्तदन्यथाभाषणे, 'सोऽकामो निष्काम आप्तकाम आत्मकामो न तस्य प्राणा उत्क्रामन्त्यत्रैव समवलीयन्ते ब्रह्मैव सन्ब्रह्माप्येति[2]'

'यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिता ।
अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते[3] ॥'

इत्यादिसद्योमुक्तिविधायिन्य सर्वकामत्यागोत्तरक्षणे प्रत्यक्परविभागासहसत्ता-सामान्यब्रह्मस्वरूपावस्थानलक्षणविदेहकैवल्यप्रमाणभूता श्रुतय कुप्येरन् । तस्मादस्या निष्ठायामकामिन एवाधिकार इति सिद्धान्त । दुस्त्यजसंसार-त्यागपूर्वकमस्यामकामिन एवाधिकारिता ऽस्तु । कदाचित्तन्निष्ठातोऽकाम्य पि च्यवन् प्रमादत पुन ससारमोहमाप्नुयादिति तत्राह—न मुह्यतीति । उक्तलक्षण परिव्राड् ब्राह्मीमेना निष्ठा प्राप्य कदाचिदपि स्वाविद्याद्वय-

विजृम्भितजीवेशादिनानाभेदास्पदे संसारे न मुह्यति। ब्रह्मात्मनिष्ठाकबलितस्वाविद्याद्वयतत्कार्यमोहत्वादेना प्राप्य अकामी न मुह्यतीत्युक्त्या तद्विपरीत· कामी प्रातिभासिकतयैना प्राप्तो ऽपि संसारे मुह्यतीति द्योत्यते। तर्ह्येवप्रभावभूतायामनुद्वाह्यारूढस्यैव कैवल्यप्राप्ति, न मध्यमवयस्यारूढस्येति तत्रोच्यते—अन्तकाले ऽपीति। स्वायु काल चतुर्धा विभज्य तत्र भागत्रय ससरन्नन्तकाले चरमभागे ऽपि सर्वकर्मसन्यासपूर्वकमस्या ब्राह्मचामप्रमादत स्थित्वा ब्रह्मात्मावशेषेण स्वाध्यस्ताविद्याद्वयतत्कार्यस्य निर्वापण विलापनम्, ब्रह्मनिर्वाण कैवल्यमृच्छति। अन्तकाले ऽपीत्यपिशब्दस्वारस्यात् ब्रह्मचर्यादेव सन्यस्यास्या निष्ठाया स्थितो ऽकामी ब्रह्मनिर्वाणमृच्छतीति किमु वक्तव्यमिति द्योत्यते। ब्रह्मचर्यादेव सन्यस्य संन्यासाज्जातरूपधर कृतकृत्यो भवति—

‘ससारमेव नि सारं दृष्ट्वा सारदिदृक्षया।
प्रव्रजन्त्यकृतोद्वाहा पर वैराग्यमाश्रिता ॥’

इत्यादिश्रुते·। इतिशब्द अध्यायपरिसमाप्त्यर्थ ॥ ७२ ॥

यो बुद्धिद्वयजालेन शोकमोहार्णवं गतम्।
उज्जहार क्षणात्पार्थं नमस्तस्मै दयालवे ॥

इति श्रीमद्भगवद्गीताऽर्थप्रकाशिकाया द्वितीयो ऽध्याय

अथ तृतीयोऽध्यायः

बुद्धिद्वयश्रुते पार्थे सदिग्धे तन्निवृत्तये ।
उपायोपेयभेदेन तदेवाह पुनर्हरि ॥

पूर्वाध्याये गीताशास्त्रप्रवृत्तिविषयभूत बुद्धिद्वय भगवता प्रतिपादित खलु, तत्र साख्यबुद्धिनिष्ठा ये स्थितप्रज्ञास्तेषा प्राधान्येन 'अशोच्यान्' इत्यारभ्य 'एषा ब्राह्मी स्थिति' इत्यन्तेन ग्रन्थेन सर्वकर्मसन्यासपूर्वकसाख्यनिष्ठात कृतार्थता ऽभिहिता। त्वन्नाथायात्यन्तभक्ताय मुमुक्षवे मह्य पदे पदे 'कर्मण्येवाधिकारस्ते' 'तस्माद्युध्यस्व भारत' इत्यादिना साख्यबुद्ध्युपायभूता योगबुद्धिमाश्रित्य भगवता त्वया साख्यबुद्धिनिकृष्टकर्मबुद्धिनिष्ठा चोदितेति व्याकुलीकृतचित्त सन् भगवन्त प्रत्यर्जुन उवाच—ज्यायसीति द्वाभ्याम् ।

अर्जुन उवाच—

ज्यायसी चेत्कर्मणस्ते मता बुद्धिर्जनार्दन ।
तत्किं कर्मणि घोरे मां नियोजयसि केशव ॥ १ ॥

ज्यायसीति । हे जनार्दन! प्रत्यगभिन्नब्रह्मस्वरूपावस्थानलक्षण मोक्ष प्रत्यन्तरङ्गत्वेनं कर्मयोगबुद्धिनिष्ठात साख्यबुद्धिनिष्ठा ज्यायसी मता चेत् ते तव, तर्हि हे केशव! घोरे हिंसारूपे कर्मणि 'तस्माद्युध्यस्व' 'तस्मादुत्तिष्ठ' इत्यादिना भूयो भूय किमर्थं मा नियोजयसि प्रेरयसीत्यर्थ ॥ १ ॥

'धर्म्याद्धि युद्धाच्छ्रेयो ऽन्यत्क्षत्रियस्य न विद्यते' इत्यादिना कर्मणो ऽपि श्रेष्ठत्वमुक्त तत्राह—

व्यामिश्रेणेव वाक्येन बुद्धिं मोहयसीव मे ।
तदेकं वद निश्चित्य येन श्रेयो ऽहमाप्नुयाम् ॥ २ ॥

व्यामिश्रेणेति । क्वचित्क्वचिज्ज्ञानप्रशसा क्वचित्क्वचित् कर्मप्रशसेत्येव व्यामिश्रेण सदेहास्पदेन वाक्येनेव मे मम बुद्धिं मोहयसीवेति प्रतिभाति । इवशब्दद्वयतो विस्पष्टार्थाभिधायिनो भगवत परमदयालुत्वेन मद्बुद्धिगत-महामोहनिवृत्तये प्रवृत्तत्वात् युक्तायुक्तविवेकविकलस्य मम बुद्धिदोषादेव प्रतिभातीति द्योत्यते । एवविध मदपराध क्षमस्वेत्यर्थ । त्वदुक्तबुद्धिद्वया-नुष्ठानस्य भिन्नपुरुषकर्तृकत्वेन मयैकेन युगपदनुष्ठातुमशक्यत्वात् तयो-र्मध्ये येन त्वदुपदिष्टबुद्ध्यनुष्ठानेनाह श्रेयो नि श्रेयसमवाप्नुयाम्, अर्जुनायेदं योग्यमिति निश्चित्य तदेक तयोरन्यतरसाधन वद केवलदययोपदिशेत्यर्थ । न च 'अशोच्यान्' इत्यारभ्य यावदध्यायपरिसमाप्ति भगवता बुद्धि-द्वयस्योक्तत्वेनार्जुनेनावधारितत्वेन च तयोर्बुद्धिद्वयसमुच्चयो ऽभिमत इति सिद्धे, तत्र कामीतराणामधिकारासभवेनाश्रमान्तरासिद्धिरिति वाच्यम् । बुद्धिद्वयसमुच्चयस्तयोरभिमतो यदि तदनुरोधेन तदा प्रश्नप्रतिवचने स्याताम् । न ते दृश्येते । युगपदेकेन पुरुषेण बुद्धिद्वयसमुच्चयानुष्ठान कर्तुमशक्य मन्यमानस्यार्जुनस्य तयो साधनयोरेकमन्यतरत् मदनुष्ठानयोग्य-मिति निश्चित्य वदेति हि प्रश्नवाक्य दृश्यते, अधिकारितरतमभावमवष्टभ्य तदनुरोधेन सर्वज्ञस्य भगवत. प्रतिवचनमपि । तथा हि, प्रत्यगभिन्नब्रह्मज्ञान-तद्धेतुचित्तशुद्धिविकलस्य तूष्णींभावलक्षणसर्वकर्मसन्यासापेक्षया 'जाया मे

स्यादथ प्रजायेय वित्त मे स्यादथ कर्म कुर्वीयेत्येतावान् वै कामो नेच्छंश्च नातो भूय पुत्त्रेणाय लोक कर्मणा पितृलोको विद्यया देवलोक [1]' इत्यादि-श्रुत्यनुरोधेन काम्यबुद्ध्या वा 'नियतं कुरु कर्म त्व कर्म ज्यायो ह्यकर्मण । शरीरयात्रा ऽपि च ते न प्रसिध्येदकर्मण ॥' इत्यादिना स्वर्गादिफलप्ररोचनेन कर्मणि प्रवर्त्य, अथ 'प्लवा ह्येते अदृढा यज्ञरूपा [2]' इत्यारभ्य तत्फलानु-भवानन्तरम् 'इम लोक हीनतर वा विशन्ति' इत्यन्तश्रुत्यनुरोधेन 'त्रैविद्या मा सोमपा' इत्यारभ्य 'गतागत कामकामा लभन्ते' इत्यन्तेन कर्मफलभोगेषु दोष दर्शयित्वा तत्रापि 'तद्यथेह कर्मचितो लोक क्षीयत एवमेवामुत्र पुण्यचितो लोक क्षीयते[3]' इत्यादिना च कर्मफलस्य नश्वरता प्रतिपाद्य कर्मकरणमेवमनेक-दोषास्पदमिति कर्माकरणे प्राप्ते, 'तमेत वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसा ऽनाशकेन[4]' इत्यादिश्रुत्यनुरोधेन 'यज्ञार्थात्कर्मणो ऽन्यत्र लोको ऽय कर्मबन्धन । तदर्थं कर्म कौन्तेय मुक्तसङ्ग समाचर ॥' 'असक्तो ह्याचरन्कर्म परमाप्नोति पूरुष' इत्यादिनोपात्तदुरितक्षयद्वारा फलाभिसधिराहित्यपूर्वकमीश्वराराधनलक्षणनिष्कामकर्मानुष्ठानत कर्मबन्धा-स्पर्शनपूर्वकं चित्तशुद्धि प्रतिपाद्य समुत्पन्नचित्तशुद्धीना प्रत्यगभिन्नब्रह्मज्ञान-निष्ठामारोढु शक्तानाम् 'कि प्रजया करिष्यामो येषा नो ऽयमात्मा ऽय लोक' इत्यात्मलोका सन्त सकलवेदान्तश्रवणादिना 'एत वै तमात्मान विदित्वा ब्राह्मणा पुत्त्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थाय भिक्षाचर्यं चरन्ति' तत्र कश्चिद्विविदिषुश्चेत् 'ब्राह्मण पाण्डित्य निर्विद्य बाल्येन तिष्ठासेत्, बाल्य च पाण्डित्य च निर्विद्याथ मुनिरमौन च मौन च

निर्विद्याथ ब्राह्मणो विद्वान् स ब्राह्मण केन स्याद्येन स्यात्[1]' इत्यादिश्रुत्यनुरोधेन। 'यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानव । आत्मन्येव च संतुष्टस्तस्य कार्यं न विद्यते ॥ नैव तस्य कृतेनार्थो नाकृतेनेह कश्चन । न चास्य सर्वभूतेषु कश्चिदर्थव्यपाश्रय ॥ सर्वं कर्माखिल पार्थ ज्ञाने परिसमाप्यते । सर्वकर्माणि मनसा सन्यस्यास्ते सुखं वशी ॥ नवद्वारे पुरे देही नैव कुर्वन्न कारयन्।' इत्यादिना सर्वकर्मसन्यासलक्षणसाख्यनिष्ठा मिथो भगवता असाकर्येण दर्शितेति तत्र तत्रास्मिञ्शास्त्रे दृश्यते । तत्र काम्यनिष्कामकर्मणोरेकीकृत्य योगबुद्धिस्तदुपेयभूता साख्यबुद्धिरिति च 'लोके ऽस्मिन्द्विविधा निष्ठा पुरा प्रोक्ता मया ऽनघ। ज्ञानयोगेन साख्याना कर्मयोगेण योगिनाम् ॥' इत्यादिना यतो भगवदुक्तबुद्धिद्वयस्याधिकारिणावप्यसदिग्ध प्रतिपादितवतो ऽस्मिन् शास्त्रसमुदये बुद्धिद्वयसमुच्चयासिद्धिराश्रमान्तरसिद्धिश्च निरङ्कुशेति सिद्धम्। तथा च स्मृतय —

'द्वाविमावथ पन्थानौ यत्र वेदा प्रतिष्ठिता ।
प्रवृत्तिलक्षणो धर्मो निवृत्त्याख्यस्तथा ऽपर ॥
कर्मणा बध्यते जन्तुर्विद्यया च विमुच्यते ।
तस्मात्कर्म न कुर्वन्ति यतय पारदर्शिन ॥
प्रवृत्तिलक्षण कर्म ज्ञानं संन्यासलक्षणम् ।
उपायोपेयत कर्मतत्सन्यासौ प्रदर्शितौ ॥
समप्रधानौ तौ चेन्न काम्यकाम्यधिकारत ।
तयो प्रवृत्तित सर्वनिवृत्ति प्रविशिष्यते ॥
प्रवृत्त्या यान्ति ससार तत्पार तु निवृत्तित ।

इत्याद्या ॥ २ ॥

अर्जुनप्रश्नप्रतिवचन श्रीभगवानुवाच--

श्रीभगवानुवाच—

लोकेऽस्मिन्द्विविधा निष्ठा पुरा प्रोक्ता मयाऽनघ।
ज्ञानयोगेन सांख्यानां कर्मयोगेण योगिनाम्॥ ३॥

लोक इति। सदाचारकबलिताघत्वात् हे अनघ! पुरा सर्गादौ प्रजा सृष्ट्वा तासामभ्युदयनिःश्रेयसप्राप्तिसाधनगुरुशिष्यपरम्पराऽध्ययनरूपसम्प्रदायकारिणा सर्वज्ञेन मया अस्मिन् लोके शास्त्रार्थानुष्ठातॄणां त्रैवर्णिकानां द्विधा निष्ठा विस्पष्टं प्रोक्ता। किं तत्प्रकारद्वयमिति तत्राह—ज्ञानेति। प्रत्यगभेदेन ब्रह्म ज्ञायतेऽनेनेति ज्ञानं तदेव योगः, तेन ज्ञानयोगेन वेदान्तविज्ञानसुनिश्चितार्थानां परमहंसपरिव्राजकानां सांख्यानां प्राधान्यतः 'प्रजहाति यदा कामान्' इत्यारभ्य यावदध्यायपरिसमाप्ति ज्ञाननिष्ठोक्ता। परिव्राजकेतराणां योगिनां तु 'कर्मण्येवाधिकारस्ते' इत्यादिना कर्मनिष्ठा चोक्ता। एवमर्जुनभगवत्प्रश्नप्रतिवचनाभ्यां ज्ञानकर्मसमुच्चयाभावो द्योत्यते। स पुरस्तादेव भगवद्भाष्यकाराभ्यां निराकृत इत्यर्थः॥ ३॥

यतः चित्तशुद्धिज्ञानहेतूपायोपेयभेदेन निष्ठाद्वयमुक्तम्, अतः चित्तशुद्ध्या ज्ञानोत्पत्तिपर्यन्तं तत्तद्वर्णाश्रमोचितानि कर्माणि मुमुक्षुणा कर्तव्यान्येव, अन्यथा चित्तशुद्ध्यनुदयेन ज्ञानानुत्पत्त्या कदाऽपि पुरुषार्थो न सिध्यतीत्याह—

न कर्मणामनारम्भान्नैष्कर्म्यं पुरुषोऽश्नुते।
न च संन्यसनादेव सिद्धिं समधिगच्छति॥ ४॥

न कर्मणामिति। 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन' इत्यादिश्रुत्यनुरोधेन पुरुषार्थहेतुकर्माधिकारी पुरुषो

ब्रह्मात्मज्ञानप्रतिबन्धोपात्तदुरितक्षयद्वारा चित्तशुद्धिप्राप्यज्ञानोत्पत्तिहेतूना स्वाश्रमोचितयज्ञदानकृष्यादिकर्मणामनारम्भादननुष्ठनात् नैष्कर्म्यं नाश्नुते । स्वव्यतिरेकेणेद क्रियाकारकफलात्मक कर्म न भवतीति निष्कर्म, तस्य भावो नैष्कर्म्यं प्रत्यगभिन्नब्रह्मज्ञान न प्राप्नोतीत्यर्थ । 'एतमेव प्रव्राजिनो लोकमिच्छन्त प्रव्रजन्ति' इत्याद्यया सन्यासस्य मोक्षाङ्गत्वश्रुत्या चित्तशुद्ध्यभावेऽपि मोक्षसभवात् बहुलतरायाससाध्यचित्तशुद्धिपर्यवसायिस्वाश्रमोचितनिष्कामकर्मानुष्ठानेन किमिति तत्राह— न चेति । चित्तशुद्धिप्राक्कृतकेवलकर्मपरित्यागलक्षणसन्यासात्साधनचतुष्टयसपत्तिवैकल्येन पारिव्राज्यधर्माननुष्ठानलक्षणात् द्वेषमात्रपर्यवसानादेव नैष्कर्म्यलक्षणा सिद्धि नाधिगच्छति ।

'वमनाहारवद्यस्य भाति सर्वैषणाऽऽदिषु ।
तदा सन्यासमिच्छन्ति पतित स्याद्विपर्यये ॥
पारिव्राज्य गृहीत्वा तु य स्वधर्मे न तिष्ठति ।
तमारुढच्युत विद्यादिति वेदानुशासनम् ॥
तितिक्षाज्ञानवैराग्यशमादिगुणवर्जित ।
भिक्षामात्रेण यो जीवेत्स पापी यतिवृत्तिहा ॥'

इत्यादिश्रुतिभ्य विस्मृतपिष्टचमूषलवणाभावोक्तिवत् ज्ञानतदुपायचित्तशुद्धिरहितकेवलकर्मत्यागलक्षणवेषमात्रसन्यासो निरर्थक इत्यर्थ ॥ ४ ॥

अनुत्पन्नज्ञानतदुपायचित्तशुद्धीना केवलकर्मसन्यासो न कर्तव्य इत्यत्र हेत्वन्तरमाह—

न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत् ।
कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः ॥ ५ ॥

न हीति । हि यस्मात् अज्ञ सर्वो जन पूर्वजन्माद्यनन्तकोटिजन्मानुगतवासनामयी प्रकृति, तस्या प्रकृते सकाशादुत्थै रागद्वेषादिहेतुभि सत्त्वादिभिर्गुणैरवश अस्वाधीन सन् कार्यते उच्चावचकर्मणि प्रवर्त्यते, तस्मात् क्षणमात्रमपि कश्चित् जन्तुरकर्मकृत् निर्व्यापारतया न तिष्ठति । न च सर्वशब्दस्य सकोचे मानाभावात् अज्ञेन सह ज्ञो ऽपि स्वप्रकृतिजैर्गुणै स्वोचितकर्मसु प्रवर्त्येतेति वाच्यम् । प्रकृतिप्राकृतास्पृष्टनिर्गुणप्रत्यगभिन्नब्रह्मस्वरूपावस्थानलक्षणनैष्कर्म्यपदमारूढस्य ज्ञस्य प्रकृतिद्वयतत्कार्यत्रिगुणतत्कार्योच्चावचकर्मपूगप्रवृत्तिनिवृत्त्यतीतत्वेन 'न तस्य कार्यं करण च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते[1]', 'गुणा गुणेषु वर्तन्त इति मत्वा न सज्जते', 'गुणैर्यो न विचाल्यते', 'तस्य कार्यं न विद्यते' इत्यादिकर्माभावप्रमाणत सर्वातीतत्वात् न तस्य सर्वान्तपातित्वेन प्रकृतिवशगता स्यादिति भाव ॥ ५ ॥

भूरितरायाससाध्यकर्मकरणापेक्षया ज्ञवदज्ञस्यापि कर्मसामान्याकरणलक्षणस्तूष्णींभाव एव वरमिति तत्राह—

कर्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन् ।
इन्द्रियार्थान्विमूढात्मा मिथ्याऽऽचारः स उच्यते ॥६॥

कर्मेति । य पुमान् वागादिकर्मेन्द्रियाणि संयम्य मनसेश्वर ध्यायामीति व्याजेनेन्द्रियार्थान् शब्दादीन् स्मरन्नास्ते तस्याशुद्धान्त करणत्वेन स्वाज्ञानतो विमूढ आत्मा ऽन्त करण यस्य सो ऽय विमूढात्मा मिथ्याऽऽचारो दम्भाचार पापाचार इत्युच्यते ॥ ६ ॥

तद्विपरीतस्य फलाभिलाषवैकल्येन विहित कर्माचरत सदाचारत्वेन मिथ्याऽऽचाराद्वैशिष्टयमाह—

यस्त्विन्द्रियाणि मनसा नियम्यारभतेऽर्जुन ।
कर्मेन्द्रियैः कर्मयोगमसक्तः स विशिष्यते ॥ ७ ॥

यस्त्विति । हे अर्जुन ! तुशब्दो निष्कामकर्माधिकारिताप्रदर्शनार्थ । य कर्माधिकारी मनसा शब्दादिविषयेभ्य श्रोत्रादिज्ञानेन्द्रियाणि सयम्य वागादिभि कर्मेन्द्रियै कर्मयोगम् असक्त कर्मफलाभिलाषरहित सन् आरभते स पुरुषो मिथ्याऽऽचारात् विशिष्यते, उत्कृष्ट इत्यर्थ ॥ ७ ॥

ज्ञानतद्धेतुचित्तशुद्धिविकलाना कर्मसन्यासापेक्षया कर्तव्य कर्म भोक्तव्य तत्फलमिति फलाभिसधिपूर्वक वा कर्मकरणमेव श्रेय इत्याह—

नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः ।
शरीरयात्राऽपि च ते न प्रसिध्येदकर्मणः ॥ ८ ॥

नियतमिति । हि यस्मात् ज्ञानतद्धेतुचित्तशुद्धिविकलादकर्मण कर्माकरणात्केवलकर्मसन्यासात्फलोद्देशेन वा कर्मकरण ज्याय प्रशस्यतर तस्मात् त्व यो यत्कर्मण्यधिकृत तस्य तत्फलसिद्धिर्भवतीति धिया नियतमवश्य नित्यनैमित्तिकादि कर्म कुरु । कर्माकरणे तत्फलासभवेऽपि शरीरयात्रा सिध्यतीति तत्राह—नेति । अकर्मण कर्माकर्तुस्तव आधिव्याधिभि शीर्यत इति शरीर तस्य यात्रा तद्धारणरूपा स्थितिरपि न प्रसिध्येत् कर्मायत्तत्वाच्छरीरस्येत्यर्थ ॥ ८ ॥

कर्मफलाकाङ्क्षया शरीरस्थित्यर्थं वा कर्म कुर्विति यदुक्तं तन्न रमणीयम्, कर्मण फलपर्यवसायित्वेन तत्फलस्य च पुनर्जन्मादिहेतुत्वेन चारमणीयत्वात् कर्मकरणात कर्माकरण ज्याय इति तत्राह—

यज्ञार्थात्कर्मणो ऽन्यत्र लोको ऽयं कर्मबन्धनः।
तदर्थं कर्म कौन्तेय मुक्तसङ्गः समाचर ॥ ९ ॥

यज्ञेति। हे कौन्तेय! 'यज्ञो वै विष्णु' इति श्रुत्या यतो यज्ञार्थात यज्ञस्य विष्णोराराधनरूपात् कर्मणो ऽन्यत्राय लोको ज्ञजन कर्मण्यधिकृतत्वात् तत्फलेच्छया 'कर्मणा बध्यते जन्तुः' इति श्रुत्या कर्मैव बन्धन यस्य सो ऽय कर्मबन्धनो भवति, अत तद्विष्णोराराधनार्थं तत्कर्मफलेषु निष्कामत्वेन मुक्तसङ्ग सन् श्रुतिस्मृतिविहित स्वाश्रमोचित नित्यनैमित्तिकादि कर्म समाचर निर्वर्तयेत्यर्थ ॥ ९ ॥

प्रजापतिवचनादप्यधिकृतेन नित्यादि कर्म कर्तव्यमिति निगमयति—सहेति चतुर्भि.।

सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः।
अनेन प्रसविष्यध्वमेष वो ऽस्त्विष्टकामधुक् ॥ १० ॥

सहेति। प्रजाना सृष्ट्यादिहेतुत्वात् प्रजापतिश्चतुर्मुख पुरा सर्गादौ यज्ञेन सह वर्तन्त इति सहयज्ञाः यज्ञाधिकारिण त्रैवर्णिकात्मन प्रजा सृष्ट्वोवाच। किमुवाचेति तत्राह —प्रसविष्यध्वमिति। यूयमनेन यज्ञेन प्रसविष्यध्वम् उत्तरोत्तराभिवृद्धि कुरुतेत्यर्थ। कथमस्माभिरनेन यज्ञेन वृद्धि कर्तुं शक्येति तत्राह—कामधुगिति। एष यज्ञ वो युष्माकमिष्टान् कामानभिप्रेतान्विषयान् दोग्धीति इष्टकामधुगस्तु भवतु ॥ १० ॥

कथ पुन यज्ञस्याभीष्टफलहेतुत्व देवताप्रसादसम्यग्ज्ञानाभ्यामृते ऽभ्युदयनि श्रेयसयोर्दुष्प्रापत्वादिति तत्राह--

देवान्भावयतानेन ते देवा भावयन्तु वः ।
परस्परं भावयन्तः श्रेयः परमवाप्स्यथ ॥ ११ ॥

देवानिति । हे प्रजाः ! यूय चरुपुरोडाशादिहविर्भागप्रदानलक्षणेनानेन यज्ञेन सकामा निष्कामा वा सन्तो देवानिन्द्रादीन् तदन्तर्यामिण वा भावयत अभिवृद्धिं भजन वा कुरुतेत्यर्थ । अस्माभिर्भाविता देवा किं कुर्वन्त्विति तत्राह—भावयन्तु व इति । ये युष्माभिर्भाविता ते देवा तदन्तर्यामी वा सकामान् निष्कामान्वा युष्मान् वृष्ट्यादिना चित्तशुद्ध्या वा भावयन्तु तोषयन्त्वित्यर्थ । मिथो भावनेन कि स्यादिति तत्राह—श्रेय इति । यूय देवाश्चैवमुक्तप्रकारेण परस्पर भावयन्त सन्त श्रेय इहामुत्र च स्रक्चन्दनादिस्वर्गादिभोगरूप तद्वैराग्यतो निष्कामकर्मानुष्ठानजनितचित्तशुद्धिगम्य ब्रह्मज्ञान वा क्रमेण अवाप्स्यथ ॥ ११ ॥

कथ पुनरस्माभिर्भाविता देवा पुनरस्मान् भावयन्तीति तत्राह—

इष्टान्भोगान्हि वो देवा दास्यन्ते यज्ञभाविताः ।
तैर्दत्तानप्रदायैभ्यो यो भुङ्क्ते स्तेन एव सः ॥ १२ ॥

इष्टानिति । इन्द्रादयो देवा युष्मत्कृतज्योतिष्टोमादियज्ञविहितहविर्भागैर्भाविता तोषिता सन्तो वो युष्मभ्यमिष्टानभिप्रेतान् दारपुत्त्रमित्रपशुवित्तस्वर्गादिसभवान् भोगान् दास्यन्ते वितरिष्यन्तीत्यर्थ । देवाना सत्त्वप्रधानत्वेन स्वानृण्यपोषणार्थं ते ऽस्मानेवं भावयन्तु, तद्विपरीतो ऽयं लोको न तथा भावयितुमर्हतीति तत्राह—स्तेन इति । तैर्देवर्षिपितृभि दत्तान्

वृष्ट्याद्युत्पन्नान्नपानादिभोगानेभ्यो देवर्षिपितृभ्यो यज्ञब्रह्मचर्यशास्त्रीयप्रजोत्पत्ति-द्वारत पुनरप्रदायानृण्यमकृत्वा केवल कार्यकरणसघातलक्षणस्वकलेबरपोषणाय यो भुङ्क्ते देवर्षिपितृस्वापहारित्वेन, स स्तेन तस्कर एव भवतीत्यर्थ ॥१२॥

देवर्षिपितृभ्यो विभागश स्वस्वभागप्रदानानन्तर भुञ्जानस्य पापाभाव प्रकटयति—

यज्ञशिष्टाशिनः सन्तो मुच्यन्ते सर्वकिल्बिषैः ।
भुञ्जते ते त्वघं पापा ये पचन्त्यात्मकारणात् ॥ १३ ॥

यज्ञेति । ये कर्मण्यधिकृता पुरुषा देवपितृभूतमनुष्यब्रह्मयज्ञशिष्टम-शनमशितु शील येषा कर्मठाना ते यज्ञशिष्टाशिन सन्त· पञ्चसूनासभवै सर्वै किल्बिषै पापै मुच्यन्ते ।

‘खण्डिनी पेषिणी चुल्ली चोदकुम्भी च मार्जनी ।
पञ्चसूना गृहस्थस्य पञ्चयज्ञात्प्रणश्यति ॥’

इति स्मृते । यज्ञशिष्टाशिविपरीतानुदरभरिणो दूषयति—भुञ्जते ते त्वघ-मिति । भोज्यवर्ग ये पचन्ति, किमर्थम्? आत्मन स्वशरीरस्य कारणात् पोषणार्थमुदरभरित्वात् ते तु कर्मठा पापा दुराचारा सन्तो ऽघ पाप भुञ्जते रौरवादिनरकमनुभवन्तीत्यर्थ ॥ १३ ॥

इतश्च कर्मणो जगच्चक्रप्रवृत्तिहेतुत्वादप्यधिकृतेन कर्मैव कर्तव्य-मित्याह—अन्नादिति त्रिभि ।

अन्नाद्भवन्ति भूतानि पर्जन्यादन्नसंभवः ।
यज्ञाद्भवति पर्जन्यो यज्ञः कर्मसमुद्भवः ॥ १४ ॥

अन्नादिति। शुक्लशोणितरूपेण परिणतादन्नात् भूतानि शरीराणि भवन्ति। तदन्न केन जायत इत्यत आह—पर्जन्यादिति। पर्जन्यात् वृष्टे अन्नस्य संभव अन्नसभव। वृष्टेरन्नोत्पत्ति स्यादित्यर्थ। स पर्जन्य केनोद्भूत इति तत्राह—यज्ञादिति। कर्मजन्यापूर्वरूपाद्यज्ञात् पर्जन्यो वृष्टि-र्भवति। स यज्ञ केन समुत्पद्यत इत्यत आह—-कर्मेति। पत्नीयजमानर्त्वि-गादिव्यापाररूप कर्म यस्योत्पत्तौ हेतु स यज्ञ कर्मसमुद्भव तत्तद्देवता-ध्यानपूर्वक तत्तद्देवतोद्देशेनाग्नौ हुता ऽऽहुतिरादित्यरश्मिद्वारेणादित्य प्राप्य पुनस्तद्रश्मिद्वारा वृष्ट्यात्मना धरणीमण्डल प्रविश्य व्रीह्याद्यन्नभावमुपेत्य संस्कारभेदत प्राणिजठर प्रविश्य शुक्लशोणितरूपेण परिणता सती प्रजा-भावमुपैतीत्यर्थ। तथा च स्मृति —

‘अग्नौ प्रास्ता ऽऽहुति सम्यगादित्यमुपतिष्ठते।
आदित्याज्जायते वृष्टिर्वृष्टेरन्न तत प्रजा॥’ इति॥ १४॥

ऋत्विगादिव्यापाररूप कर्म केन जायत इत्यत आह—

कर्म ब्रह्मोद्भवं विद्धि ब्रह्माक्षरसमुद्भवम्।
तस्मात्सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम्॥ १५॥

कर्मेति। अपूर्वहेतु कर्म ब्रह्मोद्भव सर्वस्य ब्रह्मोद्भवाविशेषादिति तत्राह—ब्रह्मेति। सर्वार्थानामुपबृहणात् ब्रह्मशब्देन वेद एवोच्यत इत्यर्थ। तस्मात् ब्रह्मणो वेदादुद्भव संभूति· यस्य कर्मण तत्कर्म ब्रह्मोद्भव विद्धि विजानीहि। अक्षरात्मनो वेदस्याक्षरात् सभूतिरनुपपन्नेति तत्राह—अक्षर-समुद्भवमिति। न क्षरतीति व्युत्पत्त्या ऽक्षरशब्देन पर ब्रह्मोच्यते। तस्मा-दुद्भव सभूति यस्य वेदस्य ब्रह्मण तद् ब्रह्मसमुद्भव विद्धि ‘अस्य महतो

भूतस्य नि श्वसितमेतद्यदृग्वेद ' इत्यादिश्रुते । वेदस्य पौरुषेयत्वेन तदुक्त-कर्मणामप्यप्रामाणिकत्वादक्षराख्य ब्रह्म कासनमर्हतीति तत्राह—यज्ञ इति । वेदो यस्मादक्षरात् आविर्भूतो नोत्पन्न तस्मादपौरुषेयत्वेन नित्यत्वात् तत्प्रकाशितयज्ञादेरपि तथात्वात् वेदाविर्भावहेतोरक्षरस्यापि सर्वगतत्वात् यज्ञस्यापि स्वाराधनबुद्धया ऽनुष्ठातॄणा चित्तशुद्धिद्वारा स्वप्रापकज्ञानहेतुत्वात् तस्मादाकाशवत् सर्वगतमपि परमार्थसत्यत्वात्तदेतन्नित्यमक्षराख्य ब्रह्म यज्ञे प्रतिष्ठितम् । यतो यज्ञोपायगम्यमक्षरमतो यज्ञादिक कर्म मुमुक्षुभिर-प्रमादेनानुष्ठेयमित्यर्थ ॥ १५ ॥

एवभूतस्य जगच्चक्रस्य परमेश्वरेणैव प्रवर्तितत्वात् कर्मण्यधिकृतेन वेदाध्ययनपूर्वक जगच्चक्रमनुवर्तयितव्य तद्विपर्ययकृदीश्वराज्ञालङ्घनदोषत प्रत्य-वैति, 'तज्जीवनमपि व्यर्थमित्याह—

एवं प्रवर्तितं चक्रं नानुवर्तयतीह यः ।
अघायुरिन्द्रियारामो मोघं पार्थ स जीवति ॥ १६ ॥

एवमिति । हे पार्थ ! इहास्मिन् लोके य कर्मण्यधिकृत पुमानी-श्वरेण 'अन्नाद्भवन्ति भूतानि' इत्यादिश्लोकद्वयोक्तप्रकारेण प्रवर्तित कर्मबद्ध चरति क्रमादिति जगच्चक्र नानुवर्तयति नानुकरोति स कर्मठ अघ पापमेव आयुर्जीवन यस्य सो ऽयमघायु भूत्वा इन्द्रियैरिन्द्रियार्थेष्वेवारमण-माक्रीडा यस्य सो ऽयमिन्द्रियाराम सन्मोघ व्यर्थ जीवति । यत स्वा-ज्ञानत कर्माधिकारिता चोदिता अत स्वज्ञानपर्यन्तमेवमप्रमादतया कर्म कर्तव्यमिति प्रकरणार्थ । न चैवमनुवृत्तब्रह्मज्ञानविजृम्भितव्यावृत्तजगच्च-क्रस्येश्वरेण प्रवर्तितत्वेन ज्ञाज्ञयोस्तदन्त पातित्वेन च ताभ्यामविशेष तदनु-वर्तनीयमेवेति वाच्यम् । तत्प्रवर्तकज्ञानसत्त्वासत्त्वाभ्या कर्मकर्तव्याकर्तव्यत्वेन

'ज्ञानयोगेन साङ्ख्याना कर्मयोगेण योगिनाम्' इत्यादिना ज्ञाज्ञयो पृथगुपदेशदर्शनात् स्वप्रयोजनमुद्दिश्याज्ञ कर्मण्यधिकृत प्रवर्तते तद्विपरीतस्य ज्ञस्य स्वव्यतिरेकेण प्रयोजनाभावानुभवप्रमाणत· तत्प्रवृत्तिरनुपपन्ना स्यात्तराम् । कि च इहामुत्रफलभोगार्थमुत चित्तशुद्ध्यर्थमथ वा ज्ञानार्थमाहोस्वित् ज्ञानोत्पत्त्यनन्तर शरीरस्थितिनिर्वाहार्थं वा तत्तत्कार्योचितकर्मप्रवृत्ति स्यादिति चेत्, नाद्य, नित्यादिसाधनचतुष्टयसपद्दशायामेवेहामुत्रविजृम्भितस्रक्चन्दनादिस्वर्गादिसभवभोगतृष्णाया वान्ताशनमूत्रपुरीषादिवत परित्यक्तत्वान् नेहामुत्रफलभोगसिद्धये पुन कर्मप्रवृत्तिरुपपद्यते । चित्तशुद्ध्यर्थं वा प्रवृत्तिरिति चेत्, न द्वितीय, चित्तशुद्धिहेतुकज्ञानस्य पुरैवोत्पन्नत्वात् न तदर्थमीश्वराराधनलक्षणनिष्कामकर्मप्रवृत्तिरुचिता । वेदान्तश्रवणादिकर्म करणीयमिति चेत्, न तृतीय, चित्तशुद्धिज्ञानान्तरालापेक्षितश्रवणादे ज्ञानोदये सति तत्प्रतियोग्यज्ञानेन साक परिसमाप्तत्वात् न श्रवणादिकर्मण करणीयताऽवकाश । उत्पन्नज्ञानस्यापि शरीरस्थितिनिर्वाहार्थं किचित्कर्तव्य स्यादिति चेत्, न चतुर्थ, ब्रह्मैवाहमहमेव ब्रह्मेति प्रत्यगभिन्नब्रह्मज्ञान प्राप्य निवृत्तस्वाज्ञान सन्नज्ञजनदुस्त्यजैषणात्रयतो व्युत्थाय शरीरस्थितिमात्रप्रयोजनो भूत्वा नैष्कर्म्यपदमारुह्य ब्रह्मात्मना यो ऽवतिष्ठते शरीरस्थितिमात्रप्रयोजनभिक्षाचरणादावपीद ममेत्यभिमानवैकल्येन स्वाद्वस्वादुविचारणहेतुस्पृहाऽभावान्न तत्कर्मतापदमर्हति । तस्मात् ज्ञस्य सर्वप्रमाणै कुत्रचित्कचित कस्यचित्कर्तव्यस्य कथा ऽपि दुर्लभेति सिद्धम् ॥ १६ ॥

यत 'न कर्मणामनारम्भात्' इत्यादिना 'मोघ पार्थ स जीवति' इत्यन्तेन चित्तशुद्धिपर्यन्तमधिकृतेन कर्म कर्तव्यमिति प्रतिपाद्य तत चित्तशुद्ध्या सर्वकर्मसन्यासलक्षणज्ञानोत्पत्तौ ज्ञानिन किचिदपि कर्तव्य नास्तीति सर्वज्ञो भगवानत एवाह—यस्त्विति द्वाभ्यम् ।

यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः।
आत्मन्येव च संतुष्टस्तस्य कार्यं न विद्यते ॥ १७ ॥

यस्त्विति। यस्तु सर्वकर्मसन्यामलक्षणसाख्यनिष्ठामारूढो योगी। अज्ञजनवैलक्षण्यद्योतकस्तुशब्द । तुशब्दार्थ स्पष्टयति—मानव इति। नव नव सकल्पविषयजात कामयत इति नव कामी अय नवो मेति तद्विपरीतो मानव अकामी सन्यासीत्यर्थ । स्वरतिहेतुदारादिपरित्यागात् न तस्य रतिरस्तीति तत्राह—आत्मेति। प्रत्यगात्माभिन्नपरमात्मन्येव रति रमण विश्रान्ति यस्य सो ऽयमात्मरतिरेव स्यात् 'स वा एष एव पश्यन्नेव मन्वान एव विजानन्नात्मरतिरात्मक्रीड आत्ममिथुन आत्माऽऽनन्द स स्वराड् भवति[1]' इति श्रुते। यत एवमत सन्यासिना स्वात्मरति विहाय स्वव्यतिरिक्तशब्दादिविषयरति न कार्येत्यर्थ । शब्दादिविषयरमणाभावे कथ तृप्ति स्यादिति तत्राह- आत्मेति। यथा आत्मरति तथा आत्मन्यपि तृप्तश्च भवति। बाह्यशब्दादिविषयनैरपेक्ष्येण भूमब्रह्मात्मानन्देनैव तृप्तत्वात्। 'नित्यतृप्तो ऽप्यभुञ्जानो रमते स्वात्मना ऽऽत्मनि।' इति श्रुते । बाह्यविषयमभुञ्जानस्य सतुष्टि कथमिति तत्राह—आत्मेति। यद्वदात्मरति आत्मतृप्त तद्वत् ब्रह्मात्मन्येव च स सतुष्टो भवति। ब्रह्मात्मव्यतिरेकेण बाह्यवैषयिकतुष्टिहेत्वज्ञानाभावात्

'सतोषामृतपानेन ये शान्तास्तृप्तिमागता ।
आत्मारामा महाऽऽत्मानस्ते महापदमागता ॥'

इत्यादिश्रुते। न च रतितृप्तितुष्टीनामेकार्थत्वेन पुनर्वचो मन्तव्यम्, अर्थभेदसद्भावात्। प्रत्यगभिन्नब्रह्मविषयकाभिलाषो मोदो रतिरित्युच्यते। दिवया-

न्तरस्मृतावुदितायामपि तदुपेक्षया ब्रह्मात्मसुखानुभव प्रमोद तृप्तिरित्युच्यते। विषयान्तरविस्मरणपूर्वक प्रत्यगानन्दाभिन्नपरमानन्दस्वरूपेणावस्थान परमानन्द सतुष्टिरित्युच्यते। 'मोद प्रमोद आनन्द' इति श्रुते। एवमात्मरतेरात्मतृप्तस्यात्मसतुष्टस्यापि सन्यासिनो विदेहकैवल्यावाप्तये किंचित्कर्तव्य स्यादिति तत्राह---नेति। तादृशब्रह्मात्मनिष्ठस्य कृतार्थतापदमारूढस्य कदाचित्कुत्रचित्कचिदपि कार्यमकार्य कर्तव्यमकर्तव्य वा कर्म न विद्यते, 'न तस्य कार्य करण च विद्यते',

'कर्तृत्वमद्य मे नष्ट कर्तव्य वाऽपि न क्वचित्'

इत्यादिश्रुते ॥ १७ ॥

तादृशस्य नैष्कर्म्यपदमारूढत्वेन कर्तव्यकर्माभावेऽपि तत्करणे कश्चिदर्थो भविष्यतीति तत्राह—

नैव तस्य कृतेनार्थो नाकृतेनेह कश्चन।
न चास्य सर्वभूतेषु कश्चिदर्थव्यपाश्रयः ॥ १८ ॥

नैवेति। कर्माकर्तृतापदमारूढस्य तस्य ब्रह्मात्मविद सन्यासिन कृतेन स्वाश्रमोचितेन कर्मणा तद्विपरीतेन वा अर्थ प्रयोजन नैव विद्यते।

'नैव तस्य कृतेनार्थो न श्रुतिस्मृतिविभ्रमै।
निर्मन्दर इवाम्भोधि स तिष्ठति यथा स्थित'

इति श्रुते। कर्मकरणत प्रयोजनाभावेऽपि प्रत्यवायानुत्पत्तये स्वरूपाच्युतये वा कर्म कर्तव्य स्यादिति तत्राह—न कश्चनेति। अकृतेन कर्माकरणेन कश्चन कश्चिदपि कर्माकरणप्रभव प्रत्यवायो न चास्ति। नैष्कर्म्यलक्षणब्रह्मात्म-

निष्ठाऽच्युतस्य निरहभावस्य सन्यासिनो विधिनिषेधातीतत्वात् ‘वाचामतीतविषयो विषयाशादशोज्झित’ इति श्रुते । एव विधिनिषेधातीतत्वे ऽपि स्वप्राप्यत्वेन मोक्षरूपो यो ऽर्थ त प्रति देवमनुष्यभूतकृतविघ्नशान्तये शरभविनायकदुर्गाऽऽदिदेवतोद्देशेन किंचित्कर्म कर्तव्य स्यादित्यत आह—न चेति । अस्य ब्रह्मात्मनिष्ठस्य ब्रह्मादिस्तम्बान्तभूतेषु स्वाविद्याद्वयतत्कार्यमोक्षे ऽर्थे प्राप्यत्वादिदोषरहिते नित्याप्ते मिथ्याभूतदेवमनुष्यभूतविघ्नशान्तये कश्चिदपि व्यपाश्रय आश्रयणीयत्वेन न चास्ति। सम्यग्ज्ञानोदयमात्रेण स्वाज्ञाननिवृत्तिसमकालमेवाविद्याद्वयतत्कार्यनिवृत्तिलक्षणस्य मोक्षस्य प्राप्तत्वात् तदा स्वव्यतिरेकेण देवमनुष्यभूततत्कृतविघ्नतन्निवर्तकशरभविनायकदुर्गाऽऽदीनामभावान्न किंचिद्व्यपाश्रयता स्यादित्यर्थ । मुक्तस्यैवमस्तु, मुमुक्षोर्मोक्षविघ्नशान्तये किंचिद्व्यपाश्रयता स्यादिति चेन्न, देवादीना तद्विघ्नकरणासमर्थत्वात् ‘तस्य ह देवाश्च नाभूत्या ईशते’ इति श्रुते । एवभूतस्याधिकारिणो न किंचित्कर्तव्यमस्तीति फलितो ऽर्थ ॥ १८ ॥

यस्मादेव ब्रह्मात्मनिष्ठस्य

‘नैष्कर्म्येण न तस्यार्थस्तस्यार्थो ऽस्ति न कर्मभि ।
न समाधानजाप्याभ्या यस्य निर्वासन मन ॥’

इति श्रुत्यनुरोधेन कस्यचिदपि कर्तव्यस्याभाव प्रदर्शित । तस्मात्त्व सर्वत - सप्लुतोदकस्थानीयब्रह्मात्मज्ञानहेतुचित्तशुद्ध्यभावात्तदर्थं त्वया कर्मैव कर्तव्यमित्याज्ञापयति—

तस्मादसक्तः सततं कार्यं कर्म समाचर ।
असक्तो ह्याचरन्कर्म परमाप्नोति पूरुषः ॥ १९ ॥

तस्मादिति । यस्मादकिंचित्कर्तव्यतालक्षणब्रह्मात्मनिष्ठाविकलो ऽसि चित्तशुद्ध्यभावात् कर्मफलासक्तचेतसामनर्थपरपराया अनिवार्यत्वाच्च, तस्मात्तादृशानर्थनिवृत्तिहेतोरुच्चावचकर्मफलेष्वसक्तस्तदभिलाषविकल सन् श्रौत स्मार्तानुगृहीत स्वाश्रमोचित नित्य नैमित्तिक च कर्म मया कार्य कर्तव्यमिति समाचर सम्यगनुष्ठान कुरु । यावज्जीवमनुष्ठेय किमिति तत्राह—सततमिति । चित्तशुद्धिपर्यन्तमित्यर्थ । एव निष्कामकर्मानुष्ठानत कि स्यादिति तत्राह---परमिति । हि यस्मात्कर्मफलेषु असक्त पूरुष पुरुषो निष्कामकर्मानुष्ठाता स्वाश्रमोचित कर्म समाचरन्सन् चित्तशुद्धिसजातज्ञानद्वारा ऽविद्याद्वयतत्कार्यपरत्वेन विभानात् पर ब्रह्मात्मस्वरूपावस्थानलक्षण मोक्षमाप्नोति, 'ब्रह्मविदाप्नोति परम्[1]' इति श्रुते ॥ १९ ॥

कथ पुनर्निष्कामकर्मानुष्ठानान्मोक्षप्राप्तिरित्यत्र शिष्टाचार प्रमाणयति—

कर्मणैव हि संसिद्धिमास्थिता जनकादयः ।
लोकसंग्रहमेवापि संपश्यन्कर्तुमर्हसि ॥ २० ॥

कर्मणेति । ईश्वराराधनलक्षणेन चित्तशुद्धिपर्यवसायिना स्वाश्रमोचितेन निष्कामकर्मणैव पूर्वे त्वादृशा विद्वास क्षत्त्रिया ससिद्धि प्रत्यगभिन्नब्रह्मस्वरूपावस्थानलक्षणा मुक्तिम् आस्थिता प्राप्तुमुद्यता । के ते ? स्वयमनुष्ठाय जनैरपि निष्कामकर्म कारयतीति जनक, औरसानामिव प्रजाना परिपालकत्वाद्वा जनक, 'जनको जनक इति वा उ जना धावन्ति[2]' इति श्रुते । यद्वा स्वाज्ञानोत्थे जगति स्वज्ञानतो नष्टे ऽर्थं क पुमान्

शिष्यते इति तद्भावापन्नो जनक । एवरूपो जनक आदिर्येषा ते जनकादय । आदिशब्देन अश्वपतिप्रभृतयो गृह्यन्ते । तेषा प्रसिद्धिद्योतको हिशब्द । ते जनकादय सप्राप्तसम्यग्दर्शना उत तत्पदमारोढुमिच्छव ? सप्राप्तसम्यग्दर्शना यदि ते क्षत्त्रियाणा कर्मसन्यासाभावप्रमाणत कर्मसामान्यमसन्यस्य मिथ्या प्रारब्धायत्ता इव लोकस्योन्मार्गनिवृत्तये कर्म कुर्वन्त सन्त ससिद्धिमास्थिता मुक्ति प्राप्ता । यदि ते सम्यग्ज्ञानपदमारोढुमिच्छवस्तदा निष्काम-कर्मानुष्ठानजनितचित्तशुद्धिहेतुकसम्यग्ज्ञानद्वारा क्रमेण ससिद्धिमास्थिता, इदानीं चित्तशुद्धिसाधने प्रवृत्ता इत्यर्थ । कर्मयाथात्म्यमजानद्भि जन-कादिभि कृतमिति तद्याथात्म्यविदामथापि करणीय किमिति तत्राह— कर्तुमर्हसीति । कर्मयाथात्म्य ते न जानन्त्यहमेव जानामीति यदि मन्यसे कृतकृत्याना जनकादीनामिव तादृश ज्ञान न तवास्ति, प्रारब्धकर्मायत्तत्वात्, यदि स्यात् तथा ऽपि लोकस्य स्वेच्छाऽऽचारनिवारण लोकसग्रह, तमेवापि प्रयोजन पश्यन् जनकादय इव कर्मकर्तुमर्हसि, न त्यक्तुमित्यर्थ ॥ २० ॥

कर्मयाथात्म्यविदा लोकसग्रहार्थ किंचिदपि कर्म न करणीयमित्यत्र श्रुताध्ययनसपन्नत्वेन यद्यप्यभिमतस्त्व तथा ऽपि लोकस्योन्मार्गनिरसनादीश्वर-प्रसादेन झटिति सम्यग्ज्ञानमुदेति इति निश्चित्य नित्यकर्म करोषि चेत् त्वामनुसृत्य सर्वे ऽपि प्रवर्तन्त इत्याह—

यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः ।
स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ॥ २१ ॥

यदिति । श्रुताध्ययनतदर्थानुष्ठातृत्वेन दिगन्तविश्रान्तकीर्त्ति श्रेष्ठ विद्वान् यद्यच्छ्रुतिस्मृतिविहित तत्प्रतिषिद्ध वा कर्माचरति, तत्तदेव विहित प्रतिषिद्ध वा सामान्यजनो ऽपीतर कर्माचरति। अज्ञस्य विवेक्यनुकरण

कथमिति तत्राह—अनुवर्तत इति । स प्रसिद्धो विद्वान् यत्कर्मकाण्डमुपासनाकाण्ड ज्ञानकाण्ड वा प्रमाण कुरुते, अज्ञजनो ऽपि तदेवानुवर्तते , स्वतो विवेकाभावात्तदाचरणावलोकनतस्तत्राभिनिवेशपूर्वक प्रवर्तत इत्यर्थ ॥२१॥

लोकमर्यादास्थापनहेतुकर्माचरणे यदि ते विचिकित्सा स्यात् , तदा तत्र कर्तव्याकर्तव्यसबन्धास्पृष्टमपि सदाचारे प्रवृत्त सर्वात्मभूत परमेश्वर मा दृष्टान्तत्वेन कि न पश्यसीत्याह—न म इति त्रिभि ।

न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किंचन ।
नानवाप्तमवाप्तव्यं वर्त एव च कर्मणि ॥ २२ ॥

न म इति । हे पार्थ ! वागगोचरनिराकारपरब्रह्मस्वरूपो ऽहमेवेति सर्ववेदान्तप्रसिद्धत्वेन ज्ञानिभि भावनीयस्य परमेश्वरस्य मे मम त्रिषु लोकेषु तदुपलक्षितेष्वनन्तकोटिब्रह्माण्डेषु किचनाण्वपि न कर्तव्य कर्मास्ति, स्वेतरकलनाऽभावात् , ‘ निरस्ताविद्यातमोमोहो ऽहमेव ’ इति श्रुते । अनवाप्तावाप्तय त्वया ऽपि किचित्कर्तव्य स्यादिति तत्राह—नेति । अनवाप्त सदवाप्तव्य प्रापणीय न मे वस्तुजातमस्ति, अवाप्तसमस्तकामत्वात् , ‘ आत्मकाम आप्तकामो निष्कामो जीर्णकाम ’ इत्यादिश्रुते । तव आप्तकामत्वेन कर्मणो ऽकिचित्करत्वात त्वया ऽपि कर्म नानुष्ठेयमिति तत्राह—वर्त इति । कर्मकरणाकरणाभ्यामभ्युदयप्रत्यवायाभावे ऽपि त्वादृशलोकस्योन्मार्गनिरसनाय स्वनि श्वासभूतश्रुतिस्मृतिचोदिते नित्यादिकर्मणि प्राकृतलोकवद्वर्त एव च, ‘ एष सेतुर्विधरण एषा लोकानामसभेदाय[1] ’ इति श्रुते । अवधारणचकाराभ्यामेव कर्मणि वर्तमान मा न पश्यसि किमिति द्योत्यते ॥ २२ ॥

ईश्वरप्रसादतो झटिति सम्यग्ज्ञानार्थं खलु लोकसंग्रहाय कर्मानुष्ठानम्। तव सम्यग्ज्ञानप्राप्त्येश्वरत्वात् त्वया लोकसंग्रहार्थं कर्म न कर्तव्यमिति तत्राह—

यदि ह्यहं न वर्तेय जातु कर्मण्यतन्द्रितः।
मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः ॥ २३ ॥

यदि हीति। हे पार्थ! सम्यग्ज्ञानप्राप्य ईश्वरो ऽप्यहमतन्द्रित अप्रमत्त सन् जातु कदाचित् श्रौतस्मार्तकर्मणि न वर्तेय यदि, तदा मदनुष्ठानानुकारिण त्रैवर्णिका भविष्यन्तीति मनुष्या सर्वेश्वरस्य मम वर्त्म मार्ग सर्वश सर्वप्रकारैरनुवर्तन्ने अनुकरिष्यन्तीति निश्चयद्योतको हिशब्द ॥ २३ ॥

सर्वेश्वरस्य तव वर्त्मानुवर्तन मनुष्याणामुचितमेव, तत्र तेषा का हानिरिति तत्राह —

उत्सीदेयुरिमे लोका न कुर्यां कर्म चेदहम्।
संकरस्य च कर्ता स्यामुपहन्यामिमाः प्रजाः ॥ २४ ॥

उत्सीदेयुरिति। सर्वज्ञ ईश्वरो ऽह नित्यादि कर्म न कुर्यां चेदपीश्वरस्य मम तत्करणाकरणाभ्यामभ्युदयप्रत्यवायाभावे ऽपि 'यान्यस्माक सुचरितानि, तानि त्वयोपास्यानि, नो इतराणि[1]' इत्यादिमन्त्रिश्वासभूतश्रुत्यर्थबहिर्मुखाणामनुग्रहाय जगच्चक्रनिर्वाहक नित्यादि कर्म न कुर्यां चेदह त इमे परमेश्वरानुष्ठानमवलोक्य तथाकारिणो लोका उत्सीदेयु पतिता भवेयु मद्भावविधुरत्वात्। नथा ऽपि त्वया सर्वेश्वरेण कर्म न कर्तव्यमिति तत्राह—

सकरस्येति । कर्म यदि न कुर्या सकरस्य तत्तद्वर्णानुष्ठेयधर्मलोपस्य चशब्दात् तत्तदाश्रमोचितधर्मानुष्ठानाभावस्य अहमेव कर्ता स्याम् । तेन तव किमिति तत्राह—उपहन्यामिति । प्रत्यगभिन्नब्रह्माज्ञानतो जायन्त इति सर्वा प्रजा, ता अहमेवोपहन्या स्वाविद्याविजृम्भिते जननमरणात्मके ससारे प्रवर्तको ऽहमेव स्याम् । एव प्रजोपहत्या तव कि स्यादिति चेत्, मम लोकाना स्वपदप्राप्तिहेतुत्वेनोपायोपेयभूतनिष्ठाद्वयप्रवर्तकत्वात् तद्वैपरीत्येन प्रजोपहति-रनुपपन्नेत्यर्थ ॥ २४ ॥

यस्मात्सर्वज्ञ परमेश्वरो ऽप्यह लोकसग्रहार्थ कर्मणि प्रवृत्त, तस्मात् मयेव त्वया ऽन्येन वा ऽप्यज्ञानुकम्पया कर्म कार्यमित्याह—

सक्ताः कर्मण्यविद्वांसो यथा कुर्वन्ति भारत ।
कुर्याद्विद्वांस्तथा ऽसक्तश्चिकीर्षुर्लोकसंग्रहम् ॥ २५ ॥

सक्ता इति । हे भारत! यथा येन प्रकारेण कर्मठा किंचिद्विकल कर्म फलोपधायक न भवतीति भिया नित्यादिकर्मणि सक्ता तत्कर्मफला-भिलाषयुक्ता सन्त कर्म कुर्वन्ति । के ते? कर्मब्रह्मयाथात्म्य न विदन्तीत्य-विद्वास । अविद्वानिव कर्मकरणे बद्ध स्यादिति तत्राह—असक्त इति । तथा कर्मब्रह्मयाथात्म्य वेत्तीति विद्वानपि स्वकर्तव्येषु नित्यादिकर्मसु कर्तृ-त्वाभिमानवैकल्येन तत्फलेष्वसक्त फलाभिसधिविधुरो भूत्वा लोकमर्यादा-स्थापनमात्रप्रयोजनत्वेन लोकसग्रह चिकीर्षु सन् कर्तव्यमिति कर्म कुर्यात् ॥ २५ ॥

स्वफलमिच्छता बन्धकारिषु बहुलतरायाससाध्येषु कर्मसु कर्मठा प्रवृत्ता सन्तो मुधा क्लिश्यन्तीति कृपया तान्प्रति सर्वकर्मसन्यासलक्षणब्रह्मा-त्मैक्यज्ञानमेवोपदेष्टव्यमिति तत्राह—

न बुद्धिभेदं जनयेदज्ञानां कर्मसङ्गिनाम् ।
जोषयेत्सर्वकर्माणि विद्वान्युक्तः समाचरन् ॥ २६ ॥

नेति । श्रुताध्ययनसपन्नै अस्माभि कर्तव्य कर्म भोक्तव्य तत्फलमिति कर्मतत्फलानुषङ्गिना कर्मब्रह्मयाथात्म्याज्ञाना कर्मतत्फलविषयकबुद्धिभेद कर्मविषयकश्रद्धाचालन विद्वान् ज्ञानी कर्मब्रह्मयाथात्म्योपदेशतो न जनयेत्, यदि तेषु कृपा स्यात् तदा कर्मब्रह्मयाथात्म्योपदेश विना स्वय निष्कामकर्मणि युक्तो भूत्वा तत्र दृढाभिनिवेशवानिव कर्माणि समाचरन् सन् अज्ञजनैरीश्वराराधनलक्षणनिष्कामकर्मनिष्ठोपदेशत चित्तशुद्धिपर्यवसायीनि सर्वकर्माणि जोषयेत्कारयेदित्यर्थ । अन्यथा चेत् स्वय कृतार्थत्वबुद्ध्या विद्वान नित्यादिकर्माकुर्वन् कर्मब्रह्मतत्त्वज्ञानखड्गतो ऽज्ञजनबुद्धिभेदनात् तेषामनन्तकोटिजन्मरूढमूला ऽपि कर्मश्रद्धा निवर्तते । विदुषा केवलकृपयोपदिष्ट ज्ञानमपि चित्तशुद्ध्यभावात् यथावन्नोदेति, तस्मादुभयभ्रश स्यादिति मत्वा स्वस्य कर्तव्याभावे ऽपि तदनुकम्पया स्वय कुर्वन् तैरपि यथावत्कारयेदिति भाव ॥ २६ ॥

अविदुषेव विदुषा ऽपि कर्म कर्तव्य चेत्तयो को विशेष इत्यत आह—प्रकृतेरिति द्वाभ्याम् ।

प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः ।
अहंकारविमूढात्मा कर्ता ऽहमिति मन्यते ॥ २७ ॥

प्रकृतेरिति। ज्ञानकर्मेन्द्रियेन्द्रियार्थेष्वात्माध्यासरूपेणाहकारेण विमूढ आवृत आत्मा ऽन्त करण यस्य सो ऽयमहकारविमूढात्मा कार्यकरणसघाताभिमानी केवलकर्मठ सत्त्वादिगुणसाम्यावस्थाया प्रकृतेरव्यक्तात्मि-

काया विजृम्भितै सत्त्वादिभिस्त्रिभिर्गुणैस्तत्कार्यैरिन्द्रियैश्च सर्वश सर्वप्रकारै क्रियमाणानि लौकिकवैदिककर्माणि, तेषामहमेव कर्तेति मन्यत ॥ २७ ॥

अविद्वन्निष्ठ कर्तृत्वात्मक विशेषमुक्त्वा तद्वैपरीत्येन विदुषो विशेषमाचष्टे—

तत्त्ववित्तु महाबाहो गुणकर्मविभागयोः ।
गुणा गुणेषु वर्तन्त इति मत्वा न सज्जते ॥ २८ ॥

तत्त्वविदिति । नाह सत्त्वादित्रिगुणवान् निर्गुणत्वात , नाह कर्म न मे कर्माविक्रियत्वेनाहङ्कारममकाराभावादिति गुणकर्मविभागौ, तयो गुणकर्मविभागयो तत्त्व याथाऽऽत्म्य स्वाविद्याविजृम्भितत्वेन मिथ्यात्वज्ञान तद्विपरीतत्वेन गुणकर्मविभागास्पृष्ट ब्रह्मैवाहम् अहमेव ब्रह्मेति प्रत्यगभिन्न ब्रह्म च वेत्तीति तत्त्ववित् । अतत्त्वविद्विलक्षणत्वद्योतक तुशब्द । हे महाबाहो! एवभूतो ब्रह्मनिष्ठ सन्यासी गुणा गुणकार्याणि इन्द्रियाणि गुणेषु तत्कार्येषु शब्दादिविषयेषु स्वभावतो वर्तन्ते ब्रह्मात्मन सकलविकारास्पृष्टत्वेन तदास्पदत्वेन च स्वभिन्नेन्द्रियेन्द्रियार्थवर्गाभावात् न मे प्रवृत्ति निवृत्तिर्वा कदाचित् कुत्रचिदप्यस्तीति मत्वा कर्तृत्वाद्यभिमानवैकल्येन न सज्जते, आकाशवदसङ्गत्वात्, 'असङ्गो न हि सज्जते[1]' इति श्रुते ॥ २८ ॥

'न बुद्धिभेदं जनयेत्' इति श्लोकोक्तमर्थमुपसहरति—

प्रकृतेर्गुणसंमूढाः सज्जन्ते गुणकर्मसु ।
तानकृत्स्नविदो मन्दान्कृत्स्नविन्न विचालयेत् ॥ २९ ॥

प्रकृतेरिति । ये ऽनात्मविदो गुणसाम्यावस्थाया प्रकृतेरुद्रिक्तै सत्त्वादिभिस्त्रिभिर्गुणै समूढा सम्यक् गाढमावृता सन्तो गुणकर्मसु इन्द्रियेन्द्रियार्थेष्वात्मत्वात्मीयत्वाभिमानदोषत सज्जन्ते ससक्ता भवन्ति । कर्मफलाभिलाषावृतदृष्टीना' कर्मतत्फलातिरिक्तज्ञानाभावात् सत्कुलप्रसूतैरस्माभि कर्मैव कर्तव्यम्, तत्फलमवश्य भोक्तव्यमिति येषा ब्रह्मात्मभावो दुर्लभ यस्मिन्ननुवृत्ते त्रिविधपरिच्छेदशून्यविभवे प्रत्यगभिन्ने ब्रह्मणि तदज्ञदृष्टिहेतुमायया क्रियत इति कृत्स्नमविद्याद्वयतत्कार्यजात व्यावृत्तमभिधीयते, अनुवृत्तरज्ज्वादिसत्ताऽतिरेकेण तद्व्यावृत्तसर्पाभाववदनुवृत्तब्रह्मातिरेकेण व्यावृत्तकृत्स्नाभावात । कृत्स्न प्रत्यगभिन्न ब्रह्म तद्विपरीतमकृत्स्न तद्विदन्तीत्यकृत्स्नविद तानकृत्स्नविद परिच्छिन्नदृष्टीनत एव मन्दप्रज्ञान् तद्विपरीतब्रह्मात्मभावारूढ कृत्स्नवित् सर्वज्ञो विद्वान् न विचालयत्, तद्बुद्धिभेद न कुर्यादित्यर्थ ॥२९॥

अकृत्स्नविद्बुद्धिचालनाभावाय कृत्स्नविदा ऽपि स्वचित्तद्वयव्यापृति यावत्तावच्छ्रौतस्मार्तानुगृहीतस्वाश्रमोचित नित्यादि कर्म कर्तव्यम् । न त्व कृत्स्नवित् सर्वत्रात्मत्वात्मीयत्वाभिमानदर्शनात् 'बहुविदचित्तो भवति' इति श्रुत्यनुरोधेन कृत्स्नवित्पदारोहाय त्वया मदुक्तप्रकारेण स्वाश्रमोचित कर्मैव कर्तव्यमिति निर्दिशति—

मयि सर्वाणि कर्माणि संन्यस्याध्यात्मचेतसा ।
निराशीर्निर्ममो भूत्वा युध्यस्व विगतज्वरः ॥ ३० ॥

मयीति । प्रत्यगभिन्नब्रह्मरूपे वासुदेवे मयि ब्रह्मात्मानमधिकृत्येद कर्म तत्फलजात भवतीत्यध्यात्म तस्मिन्नध्यात्मे तदाराधनरूपनिष्कामकर्मणि नाह कर्मकर्ता न तत्फलभोक्ता सर्व वासुदेव एवेति तद्भावापन्न चेत, तेनाध्यात्मचेतसा विहिताविहितानि सर्वाणि कर्माणि सन्यस्य ततो यु यस्व ।

आशीर्युक्तस्य कथ त्वयि सर्वकर्मसन्यासो भवेदिति तत्राह—निराशीरिति। शत्रूणा पराजयपूर्वकमस्माकमेव जयो भवतु इत्याद्याशी कामना यस्मान्निर्गता स त्व निराशी विषयजातसकल्पशून्यत्वात् सन्यास उपपद्यत इत्यर्थ। स्वशरीरतत्सबन्धिना सत्त्वात्तेष्वहकारममकाराविष्टस्य चित्तशुद्धिहेतुयुद्धकर्मप्रवृत्ति कथमिति तत्राह—निर्मम इति। स्वशरीरतत्सबन्धिदारपुत्रबन्धुधनक्षेत्रादिषु निर्गतो ऽहकारो ममकारश्च यस्मात् स त्व निर्ममो भूत्वा पुन स्वदेहतत्सबन्धिषु गतागतेष्वपि विगत परित्यक्त ज्वर शोक सतापो यस्मात् स त्व विगतज्वर सन् युध्यस्व। यत त्व क्षत्रिय, युद्धस्य क्षत्रियधर्मत्वात्, अतो युद्धाख्य कर्म कुर्वित्यर्थ ॥ ३० ॥

एव स्वमतानुवर्तिना क्रममुक्तिमादिशति—

ये मे मतमिदं नित्यमनुतिष्ठन्ति मानवाः।
श्रद्धावन्तोऽनसूयन्तो मुच्यन्ते तेऽपि कर्मभिः ॥३१॥

य इति। ये श्रुत्याचार्योपदिष्टेऽर्थेऽतीव श्रद्धाऽऽस्तिक्यबुद्धि येषा ते श्रद्धावन्त उच्चावचकर्मफलेषु मा न विद्यते नव कामोऽभिलाष येषा ते मानवा, निष्कामकर्मानुष्ठातार त्रैवर्णिका सद्य फलविकलनिष्कामकर्मण्यस्मान् नियोजयतीति परमकारुणिके मय्यनसूयन्त सन्तो मे मम परमेश्वरस्य श्रुतिस्मृतिसेवितमिद मत नित्य चित्तशुद्धिपर्यन्तमनुतिष्ठन्ति, तेऽपि चित्तशुद्धिगम्यज्ञानद्वारा कर्मभि कर्मबन्धै विमुच्यन्ते क्रमेण मुक्ता भवन्तीत्यर्थ ॥ ३१ ॥

स्वमतविपरीतानुसारिणा प्रत्यवाय प्रकटयति—

ये त्वेतदभ्यसूयन्तो नानुतिष्ठन्ति मे मतम्।
सर्वज्ञानविमूढांस्तान्विद्धि नष्टानचेतसः ॥ ३२ ॥

ग्रे त्विति। ये तु तद्विपरीता एतन्मदीय मतमभ्यसूयन्त सन्तो नानुतिष्ठन्ति। तदनुष्ठानाभावाविर्भूतस्वबुद्धिदोषात् निर्दोषे मदीये मते ऽपि दोषमारोप्य यतो नानुवर्तन्ते तूलाविद्याऽऽवृतदृष्टित्वात्, अत अचेतस· सर्वेषु सगुणनिर्गुणात्मकविराड्ढिरण्यगर्भेशसाक्षिज्ञानेषु विक्षेपद्वयकबलितदृष्टित्वात विमूढ चित्त येषा तान् सर्वज्ञानविमूढानत एव नष्टान्विद्धि, नित्यप्रबोधाभावात् ॥ ३२ ॥

केवलराजशासनमपि न केनापि लङ्घयितु शक्यते, यान्विना क्षणमात्रमपि जगच्चक्र न चलति 'भीषा ऽस्माद्वात पवते[1]' इत्यादि श्रुत्यनुरोधेन तादृशा वातादयो ऽपि महाक्रोधवशवदप्राणान्तिकदण्डोद्यतकरराजपरिसरवर्तिभृत्या इव नित्य भीता सन्त अद्यापि यच्छासन शिरसा धृत्वा स्वे स्वे कर्मणि प्रवर्तन्ते। एव चण्डशासने त्वयि सति सर्वे त्वन्मतानुसारण निष्कामा सन्त सर्वेन्द्रियनिग्रहपूर्वक स्वधर्मानुष्ठान विना परधर्मान कस्मात्कुर्वन्तीति तत्राह—

सदृशं चेष्टते स्वस्याः प्रकृतेर्ज्ञानवानपि।
प्रकृतिं यान्ति भूतानि निग्रहः किं करिष्यति ॥ ३३ ॥

सदृशमिति। पूर्वजनिकृतशुभाशुभकर्मसस्कारतो वर्तमानजन्मनि तद्वासनाऽभिव्यक्ते प्रकृतत्वात् प्रकृतिरित्युच्यते। तस्या वासनारूपाया स्वप्रकृते सदृशमनुरूप चेष्टते। एव प्रकृतिगुणदोषानभिज्ञ चेष्टता नाम न तज्ज्ञ इति तत्राह—ज्ञानवानपीति। मिथ्याभूता प्रकृतिरिति ज्ञान यस्य सो ऽपि चेष्टते। अपिशब्दस्वारस्यात प्रकृतिगुणदोषविचारवैकल्यन

मदसत्पदार्थविवेकाकुशलो ऽज्ञो लोक चेष्टत इति किमु वक्तव्यमिति द्योत्यते। भूताना स्वतन्त्रत्वेन स्वप्रकृतिवशता नोचितेति तत्राह—यान्तीति। इन्द्रियद्वयानिग्रहाविर्भूतानन्तकोटिजन्मनिदानवासनारूपप्रकृतिवशमनिच्छ-न्त्यपि तद्वश प्राप्य तया मोमुह्यमानानि सन्ति प्रकृतितो भवन्ति प्रकृतौ तिष्ठन्ति प्रकृतावेव निधन यान्तीति भूतानीत्युच्यन्ते। तानि भूतानि स्वा स्वा प्रकृति यान्ति तेषा स्वाज्ञानकबलितस्वज्ञानत्वेनासमर्थत्वात्। तथा ऽपि तै प्रकृतिर्निग्राह्येति तत्राह—निग्रह इति। तै कृतप्रकृतिनिग्रहोपायभूतेन्द्रिय-निग्रह कि करिष्यति? प्रकृत्युन्मूलनाय मदुक्तनिष्ठाद्वयबहिर्मुखेण त्वया ऽन्येन वा स्वव्यतिरेकेण मिथ्याभूता ऽपि प्रकृतिर्दुर्निग्रहेत्यर्थ। प्रकृत्युन्मूल-नाय त्वया किमुक्तमिति चेदुच्यते। स्वातिरिक्तसत्ताशून्यानन्तकोटिजन्म-वासनाऽऽत्मकप्रकृतिनिग्रहाय खलु सर्वज्ञेन मया सर्वेन्द्रियनिग्रहसहकृतम-दाराधनलक्षणनिष्कामकर्मनिष्ठा नैष्कर्म्यलक्षणप्रत्यगभिन्नब्रह्मनिष्ठा चेत्युपायो-पेयभेदेन निष्ठाद्वय प्रकटितम्। तत्रोपायभूतनिष्कामकर्मनिष्ठाना स्वाधिष्ठेय-प्रकृतेरर्धांशो निगृह्यते। सरूपविलयमश्नुत इत्यर्थ। प्रकृते सरूपविलया-विर्भूतचित्तशुद्धिगम्यसर्वकर्मसन्यासलक्षणब्रह्मात्मज्ञाननिष्ठाना स्वाधिष्ठेयप्रकृति नि शेष निगृह्यते। विरूपविलयमश्नुत इत्यर्थ। मदुक्तनिष्ठाद्वयानुवर्तिषु प्रकृतिनिग्रहोपाय फलवान्। मच्छासनपराङ्मुखत्वेनोपेक्षणीयेषु निग्रह प्रकृतिनिग्रहोपाय कि करिष्यति? तेषा दुर्लभत्वान्न किमपीत्यर्थ ॥ ३३ ॥

सर्वस्य प्रकृतिसदृश प्रवृत्तत्वेन प्रकृतिशून्यपुरुषस्य दुर्लभत्वात् पुरुष-प्रयत्नस्याकिंचित्करत्वेन विधिनिषेधबोधकशास्त्रानर्थक्य स्यादिति तत्राह—

इन्द्रियस्येन्द्रियस्यार्थे रागद्वेषौ व्यवस्थितौ।
तयोर्न वशमागच्छेत्तौ ह्यस्य परिपन्थिनौ ॥ ३४ ॥

इन्द्रियस्येति । इन्द्रियस्येन्द्रियस्येति वीप्सात प्रतीन्द्रियमिति द्योत्यते । तेषामिन्द्रियाणामर्थे शब्दादिविषये अनुकूले राग प्रतिकूले द्वेष रागश्च द्वेषश्च रागद्वेषौ प्रतीन्द्रियार्थमवश्यभावित्वेन व्यवस्थितौ । यस्मादस्य मुमुक्षो श्रेयोमार्गस्य पथि तस्कराविव रागद्वेषौ परिपन्थिनौ तस्मात् श्रुत्याचार्यप्रसादात्तप्रमाणदृष्टि तयो रागद्वेषयो पूर्ववद्वश नागच्छेत् रागद्वेषपुरःसरत्वात् सर्वप्रकृते , तथा सति स्वप्रकृतिं विहाय पुरुषप्रयत्नसाध्यशास्त्रार्थपर्यालोचनया कथमन्यथा भवतीति उच्यते , नद्या नक्रस्तिष्ठतीति श्रवणादर्वाक् श्रुते ऽपि तदनादृत्य कश्चिद्यथा नदीं प्रविष्टो नक्रग्रस्तो नश्यति । तत्र नक्रो ऽस्तीति परोक्तिश्रद्धालु कश्चित् तामस्पृष्ट्वा तत्तारणोपायभूतनौकामारुह्य ता तीर्त्वा तत्पारमासाद्य निर्भयो जीवति, तथा शास्त्रदर्शनादर्वागिष्टानिष्टविषयेषु भवरागद्वेषपाशै सर्वो ऽपि बध्यते । एवमनेकेषु सत्सु कस्यचित्पुरुषधौरेयस्यानन्तकोटिजन्मसुकृतपरिपाकवशाच्छ्रुत्याचार्यवाक्यश्रद्धोदेति । तत परधर्मपरित्यागपूर्वक स्वधर्मानुष्ठाने प्रवृत्तिर्भवति । ततो विद्वानिष्टविषयभवरागद्वेषौ तद्विषयविमुखीकरणत स्ववशीकृत्य नि सपत्न कृतार्थश्चरति । यत एवमत पुरुषप्रयत्नसाध्यविधिनिषेधबोधकशास्त्रार्थस्य सफलत्वात् नानर्थक्यमित्यर्थ· ॥३४॥

क्षत्त्रधर्मस्य पितृभ्रातृहिंसाहेतुत्वेन अननुष्ठेयत्वात् परिव्राडादिधर्मस्य तद्विपरीतत्वेन सुकरत्वात् तयो धर्मत्वाविशेषात् स्वधर्म परित्यज्य परधर्म एव कर्तव्य इति तत्राह—

श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात् ।
स्वधर्मे निधनं श्रेयः परधर्मो भयावहः ॥ ३५ ॥

श्रेयानिति । स्वस्य क्षत्त्रियस्य धर्म स्वधर्म युद्धादि स्वधर्मो विगुणो ऽङ्गविकलो ऽपि श्रेयान् प्रशस्यतर , कस्मात् ' साङ्गोपाङ्गतया स्वनु-

ष्ठितात् परिव्राडादिधर्मादहिंसारूपात् । परधर्मापेक्षया स्वधर्मस्य दुष्टत्वेन तन्नानुष्ठेयमिति तत्राह—-श्रेय इति । स्वधर्मे प्रवृत्तस्य निधनमपि श्रेय स्वर्गादिप्रापकत्वात् । परधर्मानुष्ठातु को दोष इति तत्राह—भयेति । परेषा धर्मे परधर्मे रौरवादिनरकहेतुत्वेन भयमावहतीति भयावह स्यात् निषिद्धत्वेन शिष्टगर्हितत्वात् । स्वधर्मो विगुणो ऽपि श्रेयानित्यर्थ ॥ ३५ ॥

इन्द्रियार्थध्यानगोचरौ रागद्वेषौ श्रेयोमार्गपरिपन्थिनाविति भगवतोक्तमवधार्य तन्मूल ज्ञातुमिच्छन्नर्जुन उवाच—

अर्जुन उवाच—

अथ केन प्रयुक्तो ऽयं पापं चरति पूरुषः ।
अनिच्छन्नपि वार्ष्णेय बलादिव नियोजितः ॥ ३६ ॥

अथेति । अथशब्द प्रश्नारम्भार्थ । हे वार्ष्णेय ! पूरुष पुरुष स्वानर्थहेतुभूतं पाप कर्तुमनिच्छन्नपि राजप्रेरितभृत्यवत् बलान्नियोजित इव केन हेतुना ऽय प्रयुक्त प्रेरित सन् पापमधर्मं चरति ? तत्प्रवृत्तिरिष्टानिष्टविषयोत्थरागद्वेषप्रयुक्तेति चेन्न , श्रुत्याचार्यप्रसादात्तात्मानात्मविवेकतो विषयविमुखतया निगृहीतरागद्वेषस्यापि पुन पापाचारदर्शनात् तयोर्मूलभूत कश्चिदन्य प्रवर्तक स्यादिति प्रश्न । न चानर्थमूलस्य परिहर्तव्यत्वेन तद्वेदनस्याकिंचित्करत्वात् न तत्प्रश्नार्हमिति वाच्यम् , तद्याथाऽऽत्म्यज्ञानाभावे परिहर्तुमशक्यत्वात् तदर्थः प्रश्न उपपद्यत इत्यर्थः ॥ ३६ ॥

अर्जुनप्रश्नानुरूप प्रतिवचन श्रीभगवानुवाच—

श्रीभगवानुवाच—

काम एष क्रोध एष रजोगुणसमुद्भवः ।
महाऽशनो महापाप्मा विद्ध्येनमिह वैरिणम् ॥ ३७ ॥

काम इति । ब्रह्मादिस्तम्बान्तजन्तो सर्वानर्थप्राप्ति यन्निमित्ता स एष काम सर्वप्राणिहृदयाश्रितत्वेन प्रसिद्ध । कामापेक्षया क्रोधस्य प्रबलत्वेन कामादन्य क्रोध स्यादिति तत्राह—एष इति । स एष काम केनचित्प्रतिहतश्चेत् क्रोधत्वेन परिणमते । अतो ऽयमेष काम क्रोध एव, न कामाद्भिन्न क्रोधो ऽस्तीत्यर्थ । क्रोधाभिन्नस्य कामस्य कारण कार्य वा किमिति तत्राह—रज इति । रजोगुणे समुद्भव सभूति यस्य सो ऽय रजोगुणसमुद्भव । रज कार्यमित्यर्थ । यद्वा रजोगुणस्य समुद्भव कारण काम एवेत्यर्थ । कामोत्पत्ते प्रागनन्तर वा रजस प्रादुर्भावाद्रज कार्ये पुरुष कामो हि प्रवर्तयति । कामेन प्रेरितो ऽह पाप कर्माचरं तत्फल भोक्ष्यामीति पामरलोकप्रलाप श्रूयते । तर्हि कामितविषयपूरणत काम शाम्यतीति तत्राह-—महाऽशन इति । महदपर्याप्तमशन यस्य सो ऽय महाऽशन कामस्य दुष्पूरकुक्षित्वप्रसिद्धे । तथा च श्रुति —

‘ न जातु काम कामानामुपभोगेन शाम्यति ।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते ॥ ’

इति । तस्येत्थमीश्वरेण सृष्टत्वात् कामस्य तदनुकारिणो वा को दोष इति तत्राह—महापाप्मेति । महदधिक पापमेव यस्य रूप सो ऽय महापाप्मा । पञ्चमहापातकोपपातकादिप्रवर्तकत्वात् कामप्रेरितस्यापि जन्तो योग्यायोग्यविवेकाकुशलत्वेन नियमेन पापकर्मस्वेव प्रवृत्तिदर्शनात् । यत एवमतो रागद्वेषविजृम्भितससारमूल काम एव । तमेन काम वैरिण विद्धि ॥ ३७ ॥

कामस्य वैरित्वं दृष्टान्तै स्पष्टयति—

धूमेनाव्रियते वह्निर्यथा ऽऽदर्शो मलेन च ।
यथोल्बेनावृतो गर्भस्तथा तेनेदमावृतम् ॥ ३८ ॥

धूमेनेति। यथा प्रकाशको वह्निरप्रकाशकेन स्वव्याप्येन धूमेनाव्रियते। यथा आदर्शो दर्पण आगन्तुकमलेन चाव्रियते। यथोल्बेन जरायुणा गर्भवेष्टनचर्मणा गर्भ समावृत। तेन कबलितत्वात् तथा प्रकारत्रयवत् स्वव्याप्येनाप्रकाशकेन कामेनेद प्रकाशात्मकमपि ज्ञानमावृत कबलित मित्यर्थ ॥ ३८ ॥

इदशब्दार्थज्ञानावरणस्य कामस्य वैरित्व प्रत्याययति—

आवृतं ज्ञानमेतेन ज्ञानिनो नित्यवैरिणा।
कामरूपेण कौन्तेय दुष्पूरेणानलेन च ॥ ३९ ॥

आवृतमिति। हे कौन्तेय! इद ज्ञानमेतेन कामेनावृतमाच्छादितम्। कीदृशेनेत्याकाङ्क्षायामाह—नित्यवैरिणेति। कस्येत्यत आह—ज्ञानिन इति। कामो ऽनर्थकर इति जानातीति ज्ञानी, तस्य नित्यवैरित्व कथमित्यत्र पुरा ऽनेनाह सकटे नियोजित, सो ऽय काम सर्वानर्थहेतुरिति तद्दौरात्म्यस्य ज्ञातत्वात तदाविर्भावात् पुरैव कामस्य नावसरं ददाति। कामस्येयत्ता-ज्ञानिनस्तु कामकार्यावस्थायामनेनाह ससारदु खे पातितो ऽस्मीति वैरित्वे ऽपि तदुत्पत्तिवेलाया तात्कालिकसुखहेतुत्वान्न नित्यवैरित्वम्। ज्ञानिनस्तु तदुत्पत्तिकार्यावस्थयोरपि कामस्यानिष्टत्वात् नित्यवैरित्व सिद्धमित्यर्थ। तस्य रूप किमिति तत्राह—कामेति। कामो ऽभिलाष इच्छैव रूप यस्य तेन कामरूपेण कामितार्थपूरणात् पूर्यत इति तत्राह—दुष्पूरेणेति। दु खेनाप्यस्य कुक्षि न पूर्यत इत्यर्थ। कामस्य दुष्पूरत्व स्फोरयति—अनलेनेति। यत एवमतो हविषा ऽग्नेरिवाल पर्याप्ति न विद्यत इत्यनल। तेनैवविशेषणविशिष्टेन कामेन श्रुत्याचार्यप्रसादलब्धमपि ज्ञानमावृतमित्यर्थ ॥ ३९ ॥

रागद्वेषमूलता कामस्योक्त्वा इदानीं काममूल तज्जयोपाय चाह— इन्द्रियाणीति द्वाभ्याम् ।

इन्द्रियाणि मनो बुद्धिरस्याधिष्ठानमुच्यते ।
एतैर्विमोहयत्येष ज्ञानमावृत्य देहिनम् ॥ ४० ॥

इन्द्रियाणीति । अस्य पूर्वोक्तस्य कामस्य वाक्श्रोत्रादिज्ञानकर्मेन्द्रियाणि कामसकल्पादिवृत्तिमन्मनश्च विषयाध्यवसायात्मिका बुद्धिश्चाधिष्ठान मूलमित्युच्यते, इन्द्रियादीनामस्याश्रयत्वात् । तदाश्रित्य खलु कामो विजृम्भते । स्वार्थत तन्निरोधे कामो ऽकामो भवतीत्यर्थ । स्वाधिष्ठानमाश्रित्य काम कि करोतीति, उच्यते—आवृत्येति । किमावृणोति ? ज्ञानमिति । यो ऽय विवेकावरणत्वेन प्रसिद्ध स एष काम सदसद्विवेककुशल ज्ञानमावृत्य तिष्ठति । तिष्ठतु नाम, किं तेनेति तत्राह—विमोहयतीति । कम् ? देहिन देहाभिमानिनम् । कैर्विमोहयति ? तत्राह—एतैरिति । स्वाधिष्ठानैरेतै. इन्द्रियादिभि. देहिन ससाराटवीं प्रापय्य तत्रैव विविध मोहयति तद्गत स्नेह न मुञ्चतीत्यर्थ ॥ ४० ॥

काममूलं प्रदर्श्य तत्समूलोत्पाटनोपायमाह—

तस्मात्त्वमिन्द्रियाण्यादौ नियम्य भरतर्षभ ।
पाप्मानं प्रजहि ह्येनं ज्ञानविज्ञाननाशनम् ॥ ४१ ॥

तस्मादिति । भरता नाम कौरवा, तेषा श्रेष्ठत्वात हे भरतर्षभ ! यस्मात् स्वरूपज्ञानावारकत्वेन स्वाज्ञानतत्कार्यससारे पातयित्वा विमोहकत्वेन च तव काम एव रिपु , तस्मात् त्वमादौ सर्वानर्थमूलकामनिकृन्तनाय

मनोबुद्धिसहितानीन्द्रियाणि नियम्य काम प्रजहि। स्वरिपुत्वद्योतको हिशब्द । तेन मे को ऽपराध कृतो येन त हन्मीति तत्राह—ज्ञानेति । श्रुत्याचार्योपलब्ध ज्ञानम् । तदेव स्वानुभूतिरूढ चेद्विज्ञानमुच्यते । ज्ञान च विज्ञान च ज्ञानविज्ञाने नि श्रेयसावाप्तिसाधने, तयोर्नाशकरत्वात् ज्ञानविज्ञाननाशन , तम् । अत एवाय पाप्मा स्वाश्रिताना नरकप्रापकत्वेन निर्घृणत्वात् तस्माद्यथोक्तविशेषणविशिष्ट स्वापकारिण निर्दय काम निर्मूलयेत्यर्थ ॥ ४१ ॥

केन हेतुना कामो जेतु शक्य इति तत्राह—इन्द्रियाणीति द्वाभ्याम् ।

इन्द्रियाणि पराण्याहुरिन्द्रियेभ्यः परं मनः ।
मनसस्तु परा बुद्धिर्यो बुद्धेः परतस्तु सः ॥ ४२ ॥

इन्द्रियाणीति । स्वग्राह्यदेहादिविषयेभ्य चक्षुरादीनीन्द्रियाणि पराण्याहु , पण्डिता इति शेष । तद्ग्राहकत्वेन सूक्ष्मत्वात् तथेन्द्रियेभ्य सकल्पविकल्पात्मक मन परमुत्कृष्ट मम चक्षु पट्वित्यादिना चक्षुरादीन्द्रियग्राहकत्वेन तत्प्रवर्तकत्वेन च सूक्ष्मत्वात् । तथा मनसस्तु निश्चयात्मिका बुद्धि परा, मनोगतसकल्पादिवृत्ते निश्चयपूर्वकत्वेन तच्चालकत्वेन तद्विलक्षणत्वेन च सुसूक्ष्मत्वात् । य पुन विषयजाततद्ग्राहकेन्द्रियतद्ग्राहकमनस्तद्ग्राहकबुद्धितद्वृत्तीना भावाभावप्रकाशकत्वेन सर्वान्तरो भवति, स एव खलु 'एतैर्विमोहयत्येष ज्ञानमावृत्य देहिनम' इति देहिशब्दार्थत्वेन प्रसिद्ध प्रत्यगात्मैव परामृश्यत इत्यर्थ ॥ ४२ ॥

इन्द्रियादिनिग्रहपूर्वक निष्कामकर्मानुष्ठानचित्तशुद्धिप्राप्यसर्वकर्मसन्यासलक्षणप्रत्यगभिन्नब्रह्मज्ञानात् समूल कामोन्मूलन भवतीत्युपसहरति—

एवं बुद्धेः परं बुद्ध्वा संस्तभ्यात्मानमात्मना ।
जहि शत्रुं महाबाहो कामरूपं दुरासदम् ॥ ४३ ॥ इति ॥

इति श्रीमद्भगवद्गीतासूपनिष० कर्मयोगो नाम तृतीयोऽध्यायः

एवमिति । इन्द्रियद्वयोत्थकामादिविक्रिया बुद्धेरेव नात्मन आत्मनस्तावदिन्द्रियद्वयप्रकाशकत्वेन तद्भावाभावप्रयुक्तगुणदोषास्पृष्टत्वेन निरतिशयसूक्ष्मत्वेन सर्वप्रत्यक्त्वेन च बुद्ध्यादेः परत्वादित्येवमुक्तप्रकारेण बुद्धेरन्तःकरणात् परं प्रत्यगात्मानं परमात्माभेदेन ब्रह्मैवाहमहमेव ब्रह्मेति बुद्ध्वा तद्भावापन्नात्मना ऽखण्डाकारबुद्धिवृत्त्या सकल्पविकल्पात्मकमात्मानं मनः सस्तभ्य कामसकल्पादिवृत्तिशून्यं कृत्वा दुरासदशत्रुहननदक्षत्वात्तव हे महाबाहो ! मन्निष्ठाद्वयबहिर्मुखजनदुरासदं कुबुद्धिभिः काम्यत इति कामः इच्छाशरीरत्वात् कामरूपं शत्रुं मदाविर्भूतशत्रुगन्धासहनिष्कामकर्मयोगफलीभूतप्रत्यगभिन्नब्रह्मज्ञानखड्गेन जहि । समूलमुन्मूल्य विरूपनाशं कुरु । इतिशब्दः अध्यायपरिसमाप्त्यर्थः ॥ ४३ ॥

उपायोपेयकलितनिष्ठाद्वयपरायणाः ।
यत्कैवल्यपदं यान्ति स हरिर्मे परा गतिः ॥

इति श्रीमद्भगवद्गीतार्थप्रकाशिकायां तृतीयोऽध्यायः

अथ चतुर्थो ऽध्यायः

स्वोक्तनिष्ठाद्वयस्येह प्राचीनत्वप्रसिद्धये ।
प्रोक्त विवस्वते निष्ठाद्वयमित्यब्रवीद्धरि ॥

एवमुपायोपेयभूतकर्मज्ञाननिष्ठयोरुक्तत्वात् अनेनैव सर्ववेदान्तार्थस्य परिसमाप्तत्वेन वक्तव्यान्तराभावात् किमर्थमुत्तरग्रन्थारम्भ इत्येव प्राप्ते तत्रोच्यते । यतो ऽर्जुनप्ररोचनाय निष्ठाद्वयमिदानीमेव भणितमेतदतो न पारमार्थिक कुत्राप्यदर्शनात् इति केचिद्भ्रान्ता प्रतियोगिनो मुसलकिसलयधिषणा स्वाविद्याऽऽवृतदृष्टय सन्तो निर्दोषे भागवतनिष्ठाद्वयं कृत्रिमत्वशङ्काकलङ्कप्रभावत इतो ऽपि पतिता भूत्वा जात्वपि स्वपद गन्तुमयोग्यतापद भजेरन्निति भगवत परमदयालुत्वेन तेष्वपि कृपया तेषामेवाशङ्काऽनुत्पत्तये स्वस्य नित्यत्वसर्वगतत्वसर्वज्ञत्वब्रह्मादिस्तम्बान्तदेशिकत्वप्रकटनाय च पुरा सर्गादाविदमेव निष्ठाद्वय विवस्वते मया प्रोक्तम् । विवस्वच्छिष्यप्रशिष्यादिपरपराभि सर्वत्र व्याप्तमिति गुरुशिष्यपरपरोपन्यासतो वशकथनपूर्वक स्वोक्तनिष्ठाद्वयमनादिसिद्धमिति स्तुवन् श्रीभगवानुवाच—इममिति त्रिभि ।

श्रीभगवानुवाच—

इमं विवस्वते योगं प्रोक्तवानहमव्ययम् ।
विवस्वान्मनवे प्राह मनुरिक्ष्वाकवे ऽब्रवीत् ॥ १ ॥

इममिति । इम मदाराधनलक्षणनिष्कामकर्मयोगप्राप्यसर्वकर्मसन्यास-लक्षणप्रत्यगभिन्नब्रह्मज्ञानयोग पुरा सर्गादावह विवस्वते सूर्याय प्रोक्तवान् । 'योगश्चित्तवृत्तिनिरोध ' इति सूत्रतो योगस्य निरोधवृत्त्यात्मकत्वेनानित्य-त्वात् । एवभूत योग विवस्वानपि कथ गृहीतवानिति तत्राह— अव्ययमिति । कैवल्यप्रापकयोगस्य वृत्तित्वेनानित्यत्वे ऽपि तत्प्राप्यप्रत्यक्परविभागासह-सत्तासामान्यब्रह्मस्वरूपावस्थानलक्षणकैवल्यफलस्य नित्यत्वात् स्वतो वा परतो वा न व्येतीत्यव्ययम् । प्राप्यप्रापकयोरेकत्वेन तस्याव्ययत्वमस्तु नाम, तथा ऽप्येतस्याधिकारिणो ब्राह्मणेषु के ऽपि किं न सन्ति' किमर्थ ताननादृत्य निष्ठाद्वय विवस्वने प्रोक्तमिति, उच्यते । मद्भावारूढत्वेन ते खलु ब्राह्मणत्व-पद गता । नेषा स्वतोभातवेदार्थत्वेन वक्तव्यानवकाशात् । क्षत्त्रियाणा जगत्परिपालनसामर्थ्यसिद्धये निष्ठाद्वयमारुरुक्षु त्रैवर्णिकतपोविघ्ननिकृन्तनाय च नेषामेव वक्तव्यता ऽवशिष्यत इति विवस्वत क्षत्रमूलत्वेन तस्मै प्रोक्तवा-नित्यर्थ । सो ऽय विवस्वान् स्वपुत्राय मनवे प्राह, मनुरादिराजाय स्वपुत्रा-यक्ष्वाकवे ऽब्रवीत् ॥ १ ॥

परपराऽऽगतयोगस्य शिष्टजनसमतिमुदाहरति—

एवं परंपराप्राप्तमिमं राजर्षयो विदुः ।
स कालेनेह महता योगो नष्टः परंतप ॥ २ ॥

एवमिति । हे परतप' एव क्षत्त्रियपरपराप्राप्तमिम निष्कामकर्म-योगोपायप्राप्य ज्ञानयोगमैश्वर्यवन्तो राजानश्च ते सूक्ष्मार्थदर्शनक्षमा ऋष-यश्चेति राजर्षयो विदु, इदानींतना न विदुरित्यत्र हेतुमाह—नष्ट इति । इहास्मिन् लोके स योगो महता दीर्घकालेनाजितेन्द्रियानुपलभ्य नष्ट, सम्प्रदायविच्छेदादित्यर्थ ॥ २ ॥

पूर्वोक्तस्य योगस्याजितेन्द्रियपुरुषकामादिवृत्तिकबलितत्वेन नष्टत्वान्मदर्थमिदानीं नवीनो योगो भगवतोपदिश्यत इति तत्राह—

स एवायं मया तेऽद्य योगः प्रोक्तः पुरातनः।
भक्तोऽसि मे सखा चेति रहस्यं ह्येतदुत्तमम् ॥ ३ ॥

स एवेति। यो ऽय योगो विवस्वते प्रतिपादित चिरतनवेदमूलकत्वात् पुरातन। स एवाय ज्ञानयोगो ऽद्य गुरुशिष्यपरपराऽध्ययनाभावेन तिरोहितो ऽपि पुन प्रकटयितु मे मम भगवतो निष्ठाद्वयात्मकसूक्तिलोलुपता भक्ति, यत तद्वान् त्वमतो भक्तो ऽसीति स्निग्धबन्धुत्वात् सखा चेति च मुख्याधिकारिण प्रति ज्ञानयोगो वक्तव्य इति परमेश्वरेण मया प्रोक्त। कस्मादन्यस्मै न प्रोक्तवानिति तत्राह—रहस्यमिति। हि यस्मात् प्रत्यगभिन्नब्रह्मज्ञानस्यानधिकारिण ऽवक्तव्यत्वात् तदेतज्ज्ञानमतिरहस्यम्, किमतिदुर्लभमिति तत्राह उत्तममिति। रहस्यानामपि रहस्यत्वादुत्तमम्। तस्मादनधिकारिणे त्वया ऽन्येन वा ऽपि न दातव्यम्। न चैतदिति योग कथ विशिष्यत इति वाच्यम्, स्वोक्तयोगज्ञानयो पर्यायत्वविवक्षया योग एव ज्ञानमिति भगवतोक्तत्वात्तद्भेदो लिङ्गनिष्ठो मन्तव्य इत्यर्थ ॥ ३ ॥

अज्ञलोकस्य भगवत्यनीश्वरत्वशङ्कामुन्मूलयितु भगवदुक्तावसभव मन्यमान इवार्जुन उवाच--

अर्जुन उवाच—

अपर भवतो जन्म पर जन्म विवस्वतः।
कथमेतद्विजानीयां त्वमादौ प्रोक्तवानिति ॥ ४ ॥

अपरमिति । वसुदेवगृहे भवतो जन्मापरम्, तवेदानींतनत्वात् । सर्गादौ विवस्वतो जन्म परम्, तस्य प्राचीनत्वात् । इदानींतनस्त्वं प्राचीनाय विवस्वते यस्मादौ ज्ञानयोगं प्रोक्तवान् तमेव योगं मह्यं प्रोक्तवानिति च कथमेतद्विजानीयां ज्ञातुं शक्नुयामित्यर्थः ॥ ४ ॥

उत्पत्तिं च विनाशं च भूतानामागतिं गतिम् ।
वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति ॥'

इति स्मृतिप्रकटितमहिमा सर्वेश्वरः श्रीभगवान् स्वस्मिन्ननीश्वरत्वासर्वज्ञत्व-शङ्कामुन्मूलयन् तदेतन्निष्ठाद्वय विवस्वते रूपान्तरेणोपदिष्टवानित्युवाच

श्रीभगवानुवाच--

बहूनि मे व्यतीतानि जन्मानि तव चार्जुन ।
तान्यहं वेद सर्वाणि न त्वं वेत्थ परंतप ॥ ५ ॥

बहूनीति । हे अर्जुन ! मे मम परमेश्वरस्य तव च बहून्यसंख्या कानि व्यतीतानि व्यतिक्रान्तानि यानि जन्मानि तान्यहं वेद जाने, मम नित्यशुद्धबुद्धापरिच्छिन्नानन्दकवलिताविद्याद्वयतत्कार्यत्वेन निरावृतक्रियाज्ञा-नच्छाशक्तिमत्त्वात् । त्वया सह ममानेकजन्मवत्त्वे तुल्ये ऽपि तवैव व्यतीतानि जन्मानि किमिति न प्रतीयन्त इति तत्राह न त्वमिति । तव तूलाविद्याकवलितक्रियाज्ञानेच्छाशक्तिमत्त्वेन स्वव्यतिरेकेण परान् परिकल्प्य स्वहस्तभूषणगाण्डीवाकर्षणात्यवातप्रेरितज्वलत्पावकोपमशिलीमुखैः सतपनार्थं प्रवृत्तत्वात् हे परंतप ! अहमिव व्यतिक्रान्तानि जन्मानि न त्वं वेत्थ न जानीष इत्यर्थः ॥ ५ ॥

सर्वेश्वरस्य तवानेकजन्महेतुस्वाज्ञानतत्कार्यकर्मत्रयातीतत्वेन तदव-च्छिन्नजीववत्कथं जन्मोचितमिति तत्राह--

अजो ऽपि सन्नव्ययात्मा भूतानामीश्वरो ऽपि सन्।
प्रकृतिं स्वामधिष्ठाय संभवाम्यात्ममायया ॥ ६ ॥

अजो ऽपीति। सर्वेश्वरस्य तव जन्महेत्वभावात् जीववत् कथं जन्मेति यदुक्तं तत्सत्यम्। तथा ऽपि दुष्टनिग्रहशिष्टपरिपालनार्थं संभवामीति योजना। कथंभूतः सन् संभवसीत्याकाङ्क्षायां तूलाविद्याविजृम्भितषड्भावविकाररहितत्वेन कदा ऽपि न जायत इत्यजो ऽपि सन् संभवामीत्यर्थः। संभूतेर्नाशपर्यवसायित्वेनाजत्वमविहाय संभवतो ऽपि तव चरमविक्रिया स्यादित्यत आह—अव्ययेति। जीववत्संभवसत्त्वे चरमविक्रिया स्यादेव, मत्संभवस्य भक्तपूगस्वपदप्राप्तिहेतुत्वेनाप्राकृतत्वेन च स्वायत्तत्वात् सत्तासामान्यरूपेण जात्वपि न व्येतीत्यव्ययः आत्मा स्वरूपं यस्य सो ऽहमव्ययात्मा ऽपि सन्नित्यर्थः। परमार्थतो जन्मनाशाभावे ऽपि मायया देहस्वीकारात् परतन्त्रता स्यादिति तत्राह—ईश्वरो ऽपीति। भूतानामावृतित्रयावृतत्वेन तूलाविद्याकल्पितदेहादावात्मत्वात्मीयत्वाभिमानप्रभावात् परतन्त्रतोचिता, तद्विपरीतत्वेन मम निरङ्कुशस्वतन्त्रत्वात् भूतानां तद्धेतुमायाया अपि ईश्वरो ऽपि सन्नित्यर्थः। किमवष्टभ्य संभवसीति तत्राह—प्रकृतिमिति। यद्वशे चराचरात्मकं जगद्वर्तते, यया मोहितः सर्वो लोकः स्वात्मानमपि मां न जानाति सेयं प्रत्यगभिन्नब्रह्माभेदेन कृतियोग्यत्वात् प्रकृतिः, तां प्रकृतिं त्रिगुणात्मिकां वैष्णवीमधिष्ठायेत्यर्थः। तथा चेत् त्वमिव प्रकृतिरपि स्वतन्त्रा किमिति तत्राह—स्वामिति। स्वां स्वाधीनां गृहपरिचारिणीं दासीमिव स्वातन्त्र्यगन्धशून्यामित्यर्थः। इतश्च तस्याः स्वातन्त्र्याभावे हेतुमाह—आत्मेति। ब्रह्मात्मव्यतिरेकेण स्वतन्त्रत्वेनास्वतन्त्रत्वेन वा या मा सा माया, तया स्वरूपभूतया ऽऽत्ममायया नित्यबुद्धानन्दनिष्कलब्रह्मभावमविहायैव देहवानिव संभवामि। न परमार्थतो लोकवत् संभवामीत्यर्थः ॥ ६ ॥

एवं कदा संभवसीति तत्राह—

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत।
अभ्युत्थानमधर्मस्य तदाऽऽत्मानं सृजाम्यहम् ॥ ७ ॥

यदेति। सर्वकर्मसंन्यासलक्षणब्रह्मात्मज्ञाननिष्ठोऽपि तत्तद्वर्णाश्रमादिविहितस्वाराधनलक्षणनिष्कामकर्मबुद्ध्या ऽनुष्ठेयस्य धर्मस्य ग्लानिर्हानिं तत्तद्वर्णाश्रमादिसांकर्यलक्षणस्याधर्मस्याभ्युत्थानं संभूतिश्च यदा यदा भवति तदा तदा हे भारत! आत्मानमुक्तलक्षणं मायया सृजामि। स्वेच्छाशक्त्या अवतरामीत्यर्थः ॥ ७ ॥

एवं महता प्रयत्नेन किमर्थमवतारं करोषीत्यत्राह—

परित्राणाय साधूनां विनाशाय च दुष्कृताम्।
धर्मसंस्थापनार्थाय संभवामि युगे युगे ॥ ८ ॥

परित्राणायेति। मदाज्ञारूपश्रुतिस्मृत्यनुगृहीतसन्मार्गगन्तृत्वेन साधु कृत्यं स्वपदप्राप्तिसाधनं येषां तेषां साधूनां परित्राणाय परितो रक्षणार्थं मदाज्ञोल्लङ्घनेन दुष्टं कृत्यं साधुजनसंतापकरं येषां तेषां दुष्कृतां विनाशाय च उपायोपेयभूतनिष्ठाद्वयात्मकधर्मसंस्थापनार्थाय च युगे युगे प्रतियुगं संभवामि तत्तत्कार्योचितमवतारं करोमीत्यर्थः। न च जगत्परिपालने प्रवृत्तस्य परमेश्वरस्य दुष्कृतामपि जगदन्तःपातित्वेन तद्धननमननुरूपमिति वाच्यम्, तद्धननस्यापि तत्पालनहेतुत्वात्। स्वपदप्राप्तिहेतुस्वाज्ञारूपनिष्ठाद्वयवैमुख्येन ये दुष्टत्वं प्रतिपन्नाः, तेषां दौष्ट्योत्पाटनेन पुनस्तैः निष्ठाद्वयमनुष्ठाप्य साधून् कृत्वा परिपालयितृत्वात् तद्धननमपि स्वानुरूपमेवेत्यर्थः ॥ ८ ॥

ममेश्वरस्य जन्म मायिकम्, जगत्सर्गस्थितिभङ्गलक्षण यत्कर्म तदपि मायिक न पारमार्थिकमिति जानत स्वपदप्राप्ति प्रकटयति—

जन्म कर्म च मे दिव्यमेवं यो वेत्ति तत्त्वतः।
त्यक्त्वा देहं पुनर्जन्म नैति मामेति सो ऽर्जुन ॥ ९ ॥

जन्मेति। हे अर्जुन' एवमुक्तप्रकारेण य पुमान् प्रत्यगभिन्नब्रह्मणो मे मम वासुदेवस्य जन्म कर्म च, तयोर्जन्मकर्मणो भक्तबृन्दस्वपदप्राप्तिहेतुत्वेन पारमैश्वरत्वेन चाप्राकृतत्वात् दिव्य स्वभजत्प्राणिहृत्सौधालकारानर्घमहारत्नदीपरूपेण देदीप्यमानत्वात्। तथा ऽपि मायामात्र वास्तवमेव जन्म कर्म वा किं न स्यादित्यत्र किंचिदपि प्रत्यक्परविभागादिभिदाऽसहसत्तासामान्यत्रिपान्नारायणस्य तत्त्वतो ऽतत्त्वतो वा जन्मकर्मादि कथ भवेत्तराम्' स्वभावकबलितजीवेशादिविभागहेत्वविद्याद्वयतत्कार्यत्वात् 'यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा' तदेतद्ब्रह्मापूर्वमनपरमनन्तरमबाह्यमयमात्मा ब्रह्म' इत्यादिश्रुतिसहस्रेभ्य तत्त्वतो यो वेत्ति सो ऽय मद्भावापन्नो योगी देहोपलक्षितानृतजडदु खात्मकस्थूलसूक्ष्मदेहादावात्मत्वात्मीयत्वाभिमान त्यक्त्वा न पुनस्तादृशाभिमानास्पद जन्मैति, प्रत्यग्रूपेण मा परमात्मानमेति। सम्यग्ज्ञानोत्कृष्टफलविदेहमुक्तिभाग् भवतीत्यर्थ। 'स यो ह वै तत्परम ब्रह्म वेद ब्रह्मैव भवति' इति श्रुते ॥ ९ ॥

एषा विदेहकैवल्यसृति नेदानीं प्रवृत्ता किं तु पूर्वसिद्धेति प्रतिपादयति—

वीतरागभयक्रोधा मन्मया मामुपाश्रिताः ।
बहवो ज्ञानतपसा पूता मद्भावमागताः ॥ १० ॥

वीनेति । वासुदेव सर्वमिति मद्बुद्ध्या वीता कबलिता स्वेष्ट-विषयाभिलाषो रागश्च स्वभिन्नवस्तुदर्शनज भय च कामापूरणसजात क्रोधश्च येषा त वीतरागभयक्रोधा स्वान्तर्बहिर्विजृम्भितविक्षेपद्वयाभावात् देहादावह-ममाभिमानस्य दुस्त्यजत्वात ते कथ वीतरागपद भजन्तीति तत्राह-मन्मया इति । मद्व्यतिरेकेण देहतदभिमानाभावात् सर्वं मन्मयमेव पश्यन्तीति मन्मया पूर्णाहभावारूढा इत्यर्थ । परिच्छिन्नाहभाव विना तेषा पूर्णाहभाव कथमिति तत्राह— मामुपाश्रिता इति । परिच्छिन्नाहभाव प्रत्यक्त्वेन प्रविलाप्य प्रत्यगभेदेन परमात्मानं मामुपाश्रिता ब्रह्मात्मनिष्ठाकबलितपरिच्छि-न्नाहमतित्वात भावाभावकलाविनिर्मुक्त सर्वसशयभ्नस्त पूर्णाहभाव कृत-कृत्यो भवति ' इति श्रुत । एवभूता परिगणनीया कियन्त इति तत्राह—बहव इति । इत्थभूता कृतकृत्या बहवो ऽनेके श्रीशुकवामदेवप्रभृतयो वर्तन्त इत्यर्थ । तूलाविद्यापरिणामादृशवारूढत्वेन तषामपवित्रत्वात् ते कथं कैवल्यस्पर्शनार्हा इति तत्राह पूता इति । पाविता इत्यर्थ । केनेत्यत आह—ज्ञानतपसेति । अविद्याद्वयतत्कार्यग्रासकप्रत्यगभिन्नब्रह्मज्ञानमेव तप तेनादृशवस्पर्शनदोषत पाविता इत्यर्थ । ते कमागता इति तत्राह-मद्भावमिति । स्वाविद्याद्वयतत्कार्यापवित्रग्रासक मद्भावलक्षण कैवल्यमागता य पूर्वे देवा ऋषयश्च तद्विदु त तन्मया 'अमृता वै बभूवु ' इति श्रुते । ज्ञानतपसेति विशषणात् भगवद्भावलक्षणस्य कैवल्यस्य तद्भावज्ञान विनो-पायान्तरागम्यता द्योत्यते ॥ १० ॥

'तान्यह वेद सर्वाणि न त्व वेत्थ 'इत्यादिना विद्याऽविद्योपाधिकत्वेन जीवेश्वरा प्रकल्प्य तत्रेश्वरस्य वशीकृतविद्याऽविद्यत्वेन जगत्सर्गस्थितिभङ्ग-

हेतुत्वेन सर्वज्ञत्वादिविशेषणविशिष्टत्वेन च नित्यशुद्धबुद्धपरमानन्दता प्रतिपाद्याविद्यावश प्रपन्नस्य जीवस्येश्वरप्रसादलब्धज्ञानेनाज्ञाननिवृत्तित प्रत्यगभिन्नब्रह्मस्वरूपावस्थानलक्षणकैवल्यप्राप्तिरुक्ता। इदानीं तवेश्वरस्य सर्वसमत्वेन सर्वेषु समदयत्वाद्यदि त्व समत्वसिद्धये सर्वेषा त्वद्भावलक्षण कैवल्य ददासि, तदा त्वदुक्तोपायोपेयात्मकनिष्ठाद्वयस्याकिंचित्करता, तस्य, सर्वसाधारणत्वाभावात् निष्ठाद्वयस्य सप्राप्ताकिंचित्करताऽपनुत्तये निष्ठाद्वयानुष्ठातॄणा केषाचित् कैवल्य दत्त्वा केषाचिन्निष्ठाद्वयबहि ष्ठाना यदि तन्न दास्यसि तदा तव विषमदृष्टित्वेन सर्वत्र रागद्वेषादिमत्त्वेन च सर्वसमत्वलक्षणेश्वरता कथमेद्धु पारयतीति प्राप्ते, तत्राच्यते--

ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्।
मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः॥ ११॥

य यथेति। हे पार्थ' य सकामा निष्कामा वा यथा येन प्रकारेण यद्यत्प्रयोजनमुद्दिश्य सर्वेश्वर मा प्रपद्यन्ते तान् तत्तत्फलप्रदानेन भजामि अनुगृह्णामीत्यर्थ। यस्मादेकस्य सकामत्व निष्कामत्व च युगपदनुपपन्नम्, तस्मात् य तावत्सकामा केचित् पशुपुत्रस्वर्गाद्यर्थमिन्द्रादिरूपेण मा प्रपद्यन्त, तै स्वर्गादिसाधनीभूत काम्य कर्मानुष्ठाप्य पुनस्तास्तत्फलप्रदानेन भजामि। य पुनरनन्तकोटिजन्मसुकृतपरिपाकवशात् कर्मफलस्य स्वबन्धहेतुत्वेन तदभिलाष त्यक्त्वा मद्भावज्ञानहेतु चित्तशुद्धिं वाञ्छन्ति, तै मदाराधनलक्षण निष्कामकर्मानुष्ठाप्य तान् चित्तशुद्धिप्रदानेन भजामि। ये पुनर्विशुद्धचित्ता सन्तो ब्रह्मादिस्तम्बान्तदेशिकरूपेण मा प्रपद्यन्ते तान् सर्वकर्मसन्यासलक्षणप्रत्यगभिन्नब्रह्मज्ञानेन भजामि। ये ज्ञानिन सन्यासिन प्रत्यगभेदेन परमात्मान मा प्रपन्ना, तान् प्रत्यक्पर-

चिदैक्याखण्डानन्दलक्षणविदेहकैवल्यप्रदानेन भजामि। एव जीवाना विभागश फलदातु तव वैषम्यादि किं न स्यादित्यत्र सकामनिष्काम-नैष्कर्म्यवतामपि मत्प्रपत्तिरेव स्वस्वभावनाऽनुरूपफलदेति न मे वैषम्याद्यवकाश इति सूचयति—मनुष्या इति। सकामनिष्कामनैष्कर्म्यफलविभाग-प्रकाशको मनुर्मन्त्रो वेद, त मनुमनुसृत्य स्वस्वभावानुरूपफलभाजो भविष्य-न्तीति मनुष्या उच्यन्ते। त इमे मनुष्या सर्वश सर्वप्रकारेण सर्वाभिद्-स्वरूपिण सर्वेश्वरस्य मम वर्त्म मार्ग सकामनिष्कामनैष्कर्म्यलक्षणमनुवर्तन्ते यदि तदा तानह क्रमेण इहामुत्रपशुपुत्रस्वर्गचित्तशुद्धिज्ञानकैवल्यप्रदानेन भजामि। यत सर्वेषा युगपदेकरूपफलदो न भवामि, अत 'ज्ञानयोगेन सा-ख्याना कर्मयोगेण योगिनाम्' 'नियत कुरु कर्म त्व कर्म ज्यायो ह्यकर्मण' इत्यादिना अधिकारितरतमभावमवष्टभ्य पृथगुपदेशान्न मत्प्रकटितनिष्ठाद्वयस्या-किंचित्करताऽवकाश परमपुरुषार्थहेतुत्वान्मत्प्रपत्ते। अधिकारितारतम्यत फलप्रदातृत्वेन न मे सर्वसमत्वव्याघातो न रागद्वेषावकाशो नापीश्वरत्ववैरल्य वा भवेत्। यथा सौर तेज सर्वव्यापकत्वेन सर्वप्रकाशकत्वेन च सममपि महीजलदर्पणादौ मन्दमध्यमोत्तमप्रकाशतामेति, तत्किं सौरतेजोनिष्ठमुत भूतलजलदर्पणादिनिष्ठ वा, सौरतेजस सर्वत्र समव्यापकत्वप्रकाशकत्वावि-शेषान्न तन्निष्ठा विषमता, पारिशेष्यात् भूतलादिनिष्ठमेतद्भानवैषम्यमित्यध्य-वसितव्यम्। तथा ऽह सर्वेश्वर सर्वसमो ऽपि मत्प्रपत्त्युत्थफलभिदा तत्त-दधिकारिचित्तशुद्धितारतम्यनिष्ठा न मन्निष्ठा सर्वसमत्वान्नोक्तदोषावकाश इत्यर्थ, 'सम प्लुषिणा समो मशकेन समो नागेन सम एभिस्त्रिभिर्लोकै समो ऽनेन सर्वेण' इति श्रुत ॥ ११ ॥

सर्वेश्वरस्य तव कवलिताविद्याद्वयतत्कार्यत्वेनाप्रतिहतक्रियाज्ञानेच्छा-शक्तिमत्त्वेन दूरीकृतरागद्वेषादिप्रयुक्तवैषम्यनैर्घृण्यत्वत सर्वप्राणिसमदयत्वेन च

परमपुरुषार्थप्रदानसमर्थत्वादेवभूते त्वयि सति, कस्माद्धेतो सर्वे 'वासुदेव सर्वम्' इति ज्ञानन विदेहकैवल्यरूप त्वा न प्रतिपद्येरन्निति तत्राह —

काङ्क्षन्तः कर्मणां सिद्धिं यजन्त इह देवताः।
क्षिप्रं हि मानुषे लोके सिद्धिर्भवति कर्मजा ॥ १२ ॥

काङ्क्षन्त इति। यथा कर्षकाणा हलवहनादिकर्मणा पशव उपकुर्वन्ति तथैव पशुसदृशबुद्धय कर्मठा ज्योतिष्टोमादिभि कर्मभिर्देवोपकारिण स्वकृतकर्मणा सिद्धि हलवाहकपशुग्रासघासोपमफलनिष्पत्ति काङ्क्षन्त सन्त इहास्मिन् लोके इन्द्रादिदेवता एव यजन्ते पशव पशुस्वामिन इवानुसृत्य कर्मफलपाशबद्धा सन्तो भजन्ति न मा सर्वप्रत्यगभिन्नब्रह्मरूपम्, तेषा तूलाविद्याप्रमादात्तकुत्सितकर्मफलाभिलाषावृतदृष्टित्वात् 'अथ यो ऽन्या देवतामुपास्ते ऽन्यो ऽसावन्यो ऽहमस्मीति न स वेद यथा पशुरेव स देवानाम्' इति श्रुते। एव भिन्नदेवतायाजिनो ज्ञानफल सर्वोत्कृष्टमिति ज्ञात्वा ऽपि तत्रोपेक्षापूर्वक तद्विपरीतत्वेन नश्वर कर्मफलमेव वाञ्छन्ति किमिति, तत्राह — क्षिप्रमिति। वर्णाश्रमादिधर्मानुष्ठानयोग्यत्वेन च प्रसिद्धे मानुषे लोके स्वभेदेनेन्द्रादिदेवता परिकल्प्य भिन्नदेवतायाजिना पुरुषाणा नित्यनैमित्तिककाम्यप्रतिषिद्धविहिताविहितनानाविधकर्मजा सिद्धि क्षिप्र भवति। प्रत्यगभिन्नब्रह्मज्ञानफल कैवल्य चिरकालसाध्यमिति द्योतको हिशब्द, इत्थ भेदधिया ज्ञानस्य दुष्प्रापत्वेन तत्फलीभूतस्य कैवल्यस्यापि तथात्वात्। मानुषे लोके क्षिप्रसिद्धिर्भवतीति विशेषणान्मानुषेतरलोकेष्वपि वर्णाश्रमादिव्यवस्थाऽभावे ऽपि चिरकालत कर्मफलसिद्धिरस्तीति प्रतीयत इत्यर्थ ॥ १२ ॥

उत्तममध्यमाधमवर्णाश्रमादिवैचित्र्य नैष्कर्म्यनिष्कामकाम्यकर्मवैचित्र्य कर्त्रकर्त्राद्यधिकारिभेदवैचित्र्य च विदधत तव वैषम्याद्यसिद्धि कथमिति तत्राह—

चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः।
तस्य कर्तारमपि मां विद्ध्यकर्तारमव्ययम् ॥ १३ ॥

चातुर्वर्ण्यमिति। केवलसत्त्वप्रधाना शमदमादिकर्मकर्तारो ब्राह्मणा, सत्त्वोपसर्जनरज प्रधाना शौर्य तेज इत्यादिकर्मकर्तार क्षत्रिया, तमउपमर्जनरज प्रधाना कृष्यादिकर्मकर्तारो वेश्या रजउपसर्जनतम प्रधाना त्रैवर्णिकशुश्रूषैककर्मकतार शूद्रा इत्येव गुणविभागश कर्मविभागशश्च चत्वारो वर्णा चातुर्वर्ण्य सर्वेश्वरेण मया सृष्टम। तच्चेद चातुर्वर्ण्यं न मनुष्येतरलोकेषु विद्यत। अत एव चातुर्वर्ण्यजुष्टे मानुषे लोके क्षिप्रसिद्धिर्भवतीत्यवाचाम तस्य कर्मफलार्जनप्रदेशत्वात। तर्हि तवेश्वरस्य चातुर्वर्ण्यतद्धर्मकर्तृत्वेन तत्फलभोक्तृत्वेन चास्मत्तुल्यत्वात तद्विकारास्पृष्टेश्वरता कुत इत्यत आह तस्येति। स्वाज्ञारोपितमायया तस्य चातुर्वर्ण्यतद्धर्मस्य कर्तारमपि जीवलोकद्वारा भोक्तारमित्यपेरर्थ। एवरूपेण सन्त मा परमार्थत चातुर्वर्ण्यतद्धर्मादे अकर्तारमभोक्तारमत एवाव्ययमसमारिण विद्धि, मद्व्यतिरेकेण चातुर्वर्ण्यतद्धर्मतत्फलानामभावात। यत तद्भावाभावप्रयुक्ते कर्तृत्वाकर्तृत्वे अतश्चातुर्वर्ण्यादेर्मिथ्यात्वात कर्तृत्वादि न मे ऽस्तीति परमो ऽय सिद्धान्त इत्यर्थ ॥ १३ ॥

एवरूपेण वर्तमान प्रत्यगभिन्नब्रह्मरूपमपि मा तूलाविद्याविलसित कर्मणा यदि कर्तार मन्यसे तदा स्वदृष्टिदोषेण तवापि कर्तृत्वादिदोषपत्ता

जन्ममरणादिसंसारप्रवाहस्याविरलता भवेत्, यद्यविद्याद्वयातीतत्वेन माम-कर्तारमभोक्तारं मन्यसे तदा त्वमपि कर्मबन्धाद्विमोक्ष्यस इत्युपदिशति—

न मां कर्माणि लिम्पन्ति न मे कर्मफले स्पृहा ।
इति मां यो ऽभिजानाति कर्मभिर्न स बध्यते ॥ १४ ॥

न मामिति । सर्वान्तर्यामित्वेन सर्वाधिष्ठानत्वेन सर्वविलक्षणत्वेन च वर्तमानं वासुदेवं मां जगज्जन्मस्थितिभङ्गकर्माणि न लिम्पन्ति देहाद्या-रम्भकत्वेन न स्पृशन्ति सर्वत्राहंकारममकाराभावात् । कर्मलेपाभावे ऽपि तत्फलस्पृहा स्यादित्यत आह—नेति । मे मम परमेश्वरस्य न जगज्जन्मादि-कर्मफलस्पृहा ऽस्ति, अवाप्तसमस्तकामत्वात् । तवेश्वरस्यैवमस्तु जीवस्य किमा-यातमित्यत आह—इतीति । उक्तरीत्या यो मामकर्तृभोक्तृब्रह्मरूपं स्वस्वरूप-त्वेन जानाति, सो ऽप्युच्चावचकर्मकोटिभिस्तत्फलाभिलाषपाशैः न बध्यते । तस्य चेष्टारूपाणि कर्माणि पुनर्देहारम्भकाणि न भवन्तीत्यर्थः । यद्वा तूला-विद्याऽध्यारोपापवाददोषास्पृष्टं तद्भावाभावसाक्षिणं मां तूलाविद्यातत्कार्या-गामिसंचितप्रारब्धकर्माणि न लिम्पन्ति, 'तद्यथा हि पुष्करपर्णे आपो न श्लिष्यन्त एवमेवंविदि पापं कर्म न श्लिष्यते' इति श्रुत्यनुरोधेन निर्लेपत्वात् । सर्वप्रत्यक्त्वेन कर्मत्रयलेपाभावे ऽपि तत्फलस्पृहा स्यादिति तत्राह—नेति । तूलाविद्यातत्कार्यकर्मत्रयफलानां स्वव्यतिरेकेण मिथ्यात्वात् प्रत्य-ग्रूपिणो मम न तत्फलस्पृहा ऽस्ति । एवं जानतः कर्मबन्धाभावमाह—इतीति । एवमस्मत्प्रत्ययालम्बनमात्मानं सर्वसाक्षिणं मां तूलाविद्याध्यारो-पापवाददोषास्पृष्टब्रह्माभेदेन प्रत्यगभिन्नं ब्रह्मास्मीति यो जानाति सो ऽयं विद्वान् अविद्याद्वयतत्कार्यविजृम्भितकर्मकोटिफलाभिलाषपाशैर्न बध्यते, स्वभिन्नाविद्याद्वयतत्कार्याभावादित्यर्थः ॥ १४ ॥

नित्यमुक्तेश्वरस्य तवेव प्रत्यक्परचिदैक्यज्ञजीवस्यापि कर्मफललेपाभावे ममापि तज्ज्ञानमेवास्तु, बन्धहेतुकर्मणा किमित्याशङ्कमानमालक्ष्य शुद्धान्त - करणस्य मुमुक्षोरेव ज्ञानाधिकार , यत तद्विपरीतो ऽसि स्वबन्धुवधप्रयुक्त-शोकमोहबाहुल्यात . अत चित्तशुद्धिपर्यन्त कर्मकर्तृत्वाभिमान फलेच्छा च विहाय 'नाह कर्ता न मे कर्मफले स्पृहा' इति प्राचा रीत्या स्वाश्रमोचित-कर्माणि कुर्वित्याह—

एवं ज्ञात्वा कृतं कर्म पूर्वैरपि मुमुक्षुभिः ।
कुरु कर्मैव तस्मात्त्वं पूर्वैः पूर्वतरं कृतम् ॥ १५ ॥

एवमिति । यस्मात् पूर्वैरतिक्रान्तै मुमुक्षुभि चित्तशुद्धयभावे तदर्थं तत्सत्त्वे ऽपि लोकसग्रहार्थं वा कर्म कर्तव्यमिति श्रुत्याचार्यमुखतो ज्ञात्वा कर्मैव कृतम्, तस्मात्पूर्वैरप्यनुष्ठितत्वहेतो पूर्वतर नाधुनाकृतमर्याद त्वमपि कर्मैव कुरु । त्वमज्ञो वा तत्त्वविद्वा ' यद्यज्ञो ऽहमित्यात्मान मन्यसे तदा कर्मानुष्ठान विना चित्तशुद्धयनुदयात् त्वया तदर्थं कर्म कर्तव्यम् । त्वमपि जनकादिवत तत्त्वविदिति यदि मन्यसे तदा ऽपि लोकसग्रहार्थं कर्मैव कार्यम् । न त्वया क्षत्त्रियेण तूष्णीमासनलक्षणकर्मसन्यास कार्य , ब्राह्मणतराणा कर्म-सन्यासाधिकाराभावात् ॥ १५ ॥

त्वद्वाक्यगौरवात् कर्तव्य चत्कर्म तत्त्वविद्भि सह विचार्य करोमि, न चान्धपरपरामात्रेणेत्यत आह—

किं कर्म किमकर्मेति कवयो ऽप्यत्र मोहिताः ।
तत्ते कर्म प्रवक्ष्यामि यज्ज्ञात्वा मोक्ष्यसे ऽशुभात् ॥ १६ ॥

किमिति । किं कर्म कर्मकरण कीदृशम्, किमकर्म कर्माकरण कीदृशमित्यत्रास्मिन्नर्थे मोहिता । किमविद्वास ? कवय क्रान्तदर्शिनो मेधाविनो ऽपि । तर्हि कर्माकर्मज्ञान कथ मे स्यादिति तत्राह— तत्प्रवक्ष्यामीति । यत्कर्माकर्मस्वरूप ज्ञात्वा ऽनुष्ठानात् अशुभात् ससारान्मोक्ष्यसे तत्कर्माकर्म च ते तुभ्यमह प्रवक्ष्यामि शृण्विति शेष ॥ १६ ॥

देहेन्द्रियादिव्यापारात्मक कर्म तद्विपरीतमकर्मेति लोकप्रसिद्धम्, कवयो ऽप्यत्र मोहिता इति यदुक्त तच्चित्रमित्यत आह—

कर्मणो ह्यपि बोद्धव्यं बोद्धव्यं च विकर्मणः ।
अकर्मणश्च बोद्धव्यं गहना कर्मणो गतिः ॥ १७ ॥

कर्मणो हीति । हि यस्माच्छास्त्रीयदेहेन्द्रियादिव्यापाररूपकर्मणो ऽपि तत्त्व बोद्धव्यमस्ति । अशास्त्रीयदेहेन्द्रियादिव्यापाररूपविकर्मण प्रतिषिद्धरूपस्यापि तत्त्व बोद्धव्यमस्ति । शास्त्रीयाशास्त्रीयव्यापारोपरमलक्षणतूष्णींभावात्मकाकर्मणश्चापि तत्त्व बोद्धव्यमस्ति । न त्वेतत् कर्मादि लोकप्रसिद्धम् । तस्मात्कर्मणो गतिर्याथात्म्य गहना दुर्विज्ञेया । कर्मण इति विकर्माकर्मणोरुपलक्षणार्थम् । तद्याथाऽऽत्म्यविदुपदेश विना न स्वेन ज्ञातु शक्यमित्यर्थ ॥ १७ ॥

'गहना कर्मणो गति' इति पूर्वश्लोकचतुर्थपादार्थ व्यक्तीकर्तु कर्मादीना दुर्विज्ञेयता स्फुटयति—

कर्मण्यकर्म यः पश्येदकर्मणि च कर्म यः ।
स बुद्धिमान्मनुष्येषु स युक्तः कृत्स्नकर्मकृत् ॥ १८ ॥

कर्मणीति । श्रुतिस्मृत्यनुगृहीततत्तत्कर्मनियतफलेच्छात्यागपूर्वक मदाराधनार्थं क्रियत इति देहेन्द्रियादिव्यापारात्मक कर्म तस्मिन् कर्मणि कर्मेद न भवतीत्यकर्म कर्माभाव य पश्येत् पश्यति मदाराधनलक्षणनिष्कामबुद्ध्या ऽनुष्ठितकर्मणो मत्प्रापकज्ञानहेतुत्वेनाज्ञानकल्पितबन्धग्रासकत्वात, तद्विपर्यये अकर्मणि च कर्माकरण प्रत्यवायापादकत्वेन कर्म य पश्यत्पश्यति । प्रवृत्तिनिवृत्त्यो कर्माकर्मत्वेन तत्रेतरेतरदर्शनमनुचितमिति चेन्न तयोरपि कारकाधीनत्वाविशेषादविद्याऽवस्थायामेव क्रियाकारकफलव्यवहारस्य प्रवृत्तत्वात । वस्तुस्पर्शमन्तरेण प्रवृत्तिवन्निवृत्तावपि य कर्म पश्यति स मनुष्येषु बुद्धिमान कर्मबुद्धे साख्यबुद्धिहेतुत्वात्, स युक्त श्रेष्ठ श्रेयोहेतौ शुभकर्मणि प्रवृत्तत्वात्, सर्वत सप्लुतोदकस्थानीयमदाराधनलक्षणनिष्कामकर्मणि स्वल्पोदपानस्थानीयकाम्यकर्मतत्फलानामन्तर्भूतत्वात् स एव कृत्स्नकर्मकृत । सिद्ध्यसिद्ध्यो समो भूत्वा' 'योगस्थ कुरु कर्माणि' इत्यादिना यय कर्मबुद्धि प्रतिपादिता सेयमनेन श्लोकेन प्रपञ्चितेत्यर्थ । न च कथ कर्माकर्म स्यादकर्म वा कर्मेति वाच्यम्, स्वाविद्याद्वयावृतदृष्टेरकर्म प्रत्यगभिन्नब्रह्मण एव तद्विपरीतकर्मवदवभासनात्, तथा त्वकारार्हदेहेन्द्रियादिकर्मणो ऽहप्रत्ययालम्बना कर्मत्वेन विभानात, एव कर्माकर्मणोरितरेतराध्यासे सिद्धे तन्मूलनिकृन्तनाय हि भगवतो वचन कर्मण्यकर्म य पश्येदित्यादि । कर्माकर्मणोरितरेतराधिकरणता स्यादिति चेन्न कर्माकर्मणोर्भावाभावत्वेन मरुशुक्तिरज्ज्वादौ जलरजतसर्पादिवद्विपरीतग्रहणात् कुण्डे बदरादिवितरेतराधिकरणत्वासिद्धे । तथा चेद्भागवत वचन कथमुपपद्यत इति चेन्न, अधिष्ठेयस्याधिष्ठानपर्यवसानात्, यथा यदिद जलरजतसर्पादिवन्नवधृत तदिदानीं मरुशुक्तिरज्ज्वादि रूप पश्येति परोपदिष्टज्ञानविज्ञानाभ्यामधिष्ठानाज्ञाने निवृत्ते तदनुवृत्तमरुशुक्तिरज्ज्वादिरवशिष्यते तथा स्वाज्ञानविजृम्भितकर्मादावधिष्ठानज्ञानना-

शिते तद्विकारास्पृष्टत्वेन तदधिष्ठानमकर्म कूटस्थ ब्रह्मावशिष्यत इति भगवतोपदिश्यते कर्मण्यकर्म य पश्येदित्यादि । कूटस्थब्रह्मान्यस्य मायामात्रत्वात् कर्माकर्मविकर्मणा बोद्धव्यमस्तीति वदत सम्यग्ज्ञानस्यैव विवक्षितत्वात् अन्यथा बुद्धिमत्त्वयुक्तत्वादेरसभवात् । न च विपरीतज्ञानादशुभान्मोक्षणमिष्यते 'कवयो ऽप्यत्र मोहिता' इत्युक्तत्वात, तन्मोहनिरासाय खलु 'तत्ते कर्म प्रवक्ष्यामि' इति प्रतिज्ञाय कर्मण्यकर्मेत्यादि प्रतिपादितम् । देहेन्द्रियादिसघातव्यापारात्मके कर्मणि स्वाज्ञदृष्ट्या विद्यमाने ऽपि तदन्तर्यामित्वेन तद्भावाभावप्रकाशकत्वेन तदध्यारोपापवादास्पदत्वेन तदुभयदोषास्पृष्टत्वेन च विद्यमानप्रत्यगभिन्नब्रह्मणो नैष्कर्म्यरूपत्वात् तदेवाहमहमेव तदिति सर्वव्यापारोपरमणाधिष्ठानमकर्म य पश्येत्, तथैवाकर्मणि प्रत्यगभिन्नब्रह्मणि तूलाविद्यासमुदयमूलाविद्यातत्कार्यरूप कर्म तस्य स्वाज्ञदृष्ट्याभ्यस्तत्वेन वाचाऽऽरम्भणमात्रत्वात परमार्थतो ऽकर्म ब्रह्मातिरिक्त नास्तीति य पश्यत मनुष्येषु स बुद्धिमान्, कर्मबुद्ध्युपेयसर्वकर्मसन्यासलक्षणप्रत्यगभिन्नब्रह्मबुद्धिनिष्ठत्वात्,

'कुर्वन्नपि न कुर्वाणश्चाभोक्ता फलभोग्यपि ।
शरीर्यप्यशरीर्येष परिच्छिन्नो ऽपि सर्वग ॥'

इत्यादिश्रुते । य कर्मादावकर्मादिदर्शी स युक्त अकर्मप्रत्यगभिन्नब्रह्मात्मास्खलितज्ञानेन यदृच्छाप्राप्तभिक्षाऽशनादिकर्मण्यसङ्गत्वेन युक्तत्वात् स्वव्यतिरेकेण क्रियाकारकफलानामभावात्, तथा ऽपि कृत्स्नकर्मकृदिति ब्रह्मात्मविदुपचर्यते । यो ऽय ज्ञानयोग 'यस्त्वात्मरतिरेव स्या' इति श्लोकेनोक्त सो ऽयमनेन श्लोकेनापि प्रपञ्चित इति भाव । एवभावापन्नस्याविषयब्रह्मात्मनिष्ठस्य विधिनिषेधातीतत्वेनानिच्छात प्राप्ताभक्ष्यभक्षणमपि न दोषाय भवति । 'अलेपको ऽहमजरो नीराग शान्तवासन, न साधुना कर्मणा भूयान्नो एवासाधुना कर्मणा कनीयान् न लिप्यते पुण्यपापैश्च

शुद्ध ' इत्यादिश्रुत । तद्विपरीतस्य रागत प्रवृत्तत्वेनाभक्ष्यभक्षणादिकं कर्म दोषाय भवतीति विकर्मण प्रतिषिद्धकर्मणो ऽप्येव तत्त्व बोद्धव्यमित्यभिप्राय ॥ १८ ॥

' कर्मण्यकर्म य पश्येत ' इत्यनेन श्लोकेन यो ऽर्थ प्रकटित, तस्य दुरवग्रहत्वेन तमेवार्थं पुनरपि विस्पष्टमुपन्यस्यति—यस्येत्यादिभि पञ्चभि ।

यस्य सर्वे समारम्भाः कामसंकल्पवर्जिताः ।
ज्ञानाग्निदग्धकर्माणं तमाहुः पण्डितं बुधाः ॥ १९ ॥

यस्येति । यस्य कर्मादावकर्मादिदर्शिनो ब्रह्मात्मनिष्ठस्य यावन्ति कर्माणि समारभ्यन्त इति समारम्भा सर्वे देहेन्द्रियसघातचेष्टारूपा, काम्यन्त इति कामा विषयाभिलाषा सकल्पप्रभवा तद्धेतव सकल्पाश्च, तैर्वर्जिता काससकल्पवर्जिता निष्फलचेष्टामात्रपर्यवसाना भवन्ति इत्थ भूतस्य योगिन प्रवृत्तिनिवृत्ती लोकसग्रहार्थं देहधारणामात्रार्थं वा भवत । नन्वेव स्वेच्छाऽऽचारमपण्डित पण्डिता मन्यरन्निति तत्राह पण्डितमिति । कर्मादावकर्मादिदर्शन ज्ञान तदेवाग्नि तेन ज्ञानाग्निना दग्धानि निर्मूल पदवीं गमितानि शुभाशुभलक्षणकर्माणि यस्य त ज्ञानाग्निदग्धकर्माण त ब्रह्मात्मनिष्ठ बुधा ब्रह्मविद पण्डितमाहु परमार्थात्मदर्शित्वात । न चैवभाव विकलानाम यात्मनिष्ठाबहिर्मुखत्वे ऽपि इतरशास्त्रप्रवीणानामपि पण्डितत्व प्रसिद्धेरयमपि तत्तुल्यस्तदवरो वा भवेदिति वाच्यम । तेषा परमार्थतत्त्व बहिष्कृतत्वेन पण्डिताभासत्वात यथोक्तपण्डितत्व न ते प्राप्तुमर्हन्ति । किं नाम पण्डितत्व विधिनिषधशास्त्रानुसारित्वमुत वा बालोन्मत्तपिशाचवत स्वेच्छाऽनुचरत्वम ' नाद्य देहात्मभावारूढमज्ञमाश्रित्य खलु विधिनिषध शास्त्र प्रवृत्तम् । तद्विपरीतस्य कर्मादावकर्मादिदर्शनसूर्यकिरणकवलितदेहादि

गतात्मत्वात्मीयत्वाभिमानतदाश्रितविधिनिषेधशास्त्रप्रवृत्तिनिवृत्तिध्वान्तत्वात् न विधिनिषेधबोधकशास्त्रानुसारित्व पण्डितत्वम् । न द्वितीय , बालोन्मत्तपिशाचवत्स्वेच्छाचरणस्यापीच्छापूर्वकत्वात् सर्वेच्छोपमर्दकब्रह्मात्मभावारूढस्य स्वव्यतिरेकेणेच्छाया असभवात् न स्वेच्छाऽऽचारवत्त्व पण्डितत्वम् । कि तु प्रत्यगभिन्नब्रह्मस्वरूपेणावस्थानमेव पण्डितत्वमिति फलितोऽर्थ ॥ १९ ॥

एव कर्मादावकर्मादिदर्शिना ब्रह्मात्मनिष्ठेन पूर्ववासनातो लोकसग्रहार्थं यत्कर्म कृत तत्कथमकर्मतापदमर्हतीति तत्राह—

त्यक्त्वा कर्मफलासङ्गं नित्यतृप्तो निराश्रयः ।
कर्मण्यभिप्रवृत्तोऽपि नैव किंचित्करोति सः ॥ २० ॥

त्यक्त्वेति । कर्म करोमीति कर्तृत्वाभिमान कर्मफलेष्वासङ्ग तदभिलाष च त्यक्त्वा य करोति न स करोतीति योजना । कर्मफलाभिनिवेशाभावत तत्फलालाभ कथ तृप्ति स्यादिति तत्राह—नित्यतृप्त इति । अनित्यविषयानन्दवैमुख्याद्धि नित्यबोधानन्द उदेति स्वान्तर्बाह्यविस्मरणपूर्वकम् तेनैव तृप्त नित्यसतुष्टस्य कुत्सितकर्मफललाभत कथ तृप्तिरुदेति ' तदनपेक्ष्य स्वेनैव सतुष्टत्वात प्राज्ञेनात्मना सपरिष्वक्तो न बाह्य किंचन वेद नान्तरम '

' अप्राप्त हि परित्यज्य सप्राप्ते समता गत ।
अदृष्टखेदाखेदो य सतुष्ट इति कथ्यते ॥

इत्यादिश्रुते । तृप्ते साश्रयत्वात् निराश्रया तृप्ति लोके न दृष्टेति तत्राह—निराश्रय इति । केवलविषयजा तृप्ति दृष्टादृष्टफलाश्रया तद्विपरीत ब्रह्मात्मभावमारूढस्य स्वेतराश्रयाभावात् निराश्रया भवति । निराश्रय सन्

यो वर्तते तस्य लोकसंग्रहार्थं देहधारणमात्रार्थं वा प्रवृत्तिरनुपपन्ना। यदि प्रवर्तते तदा कर्तृतापदभागिति तत्राह—प्रवृत्तो ऽपीति। लोकसंग्रह देहधारणारूपोभयविधकर्मणि लोकवदभिप्रवृत्तो ऽपि सो ऽय ब्रह्मात्मनिष्ठो नैव किंचित्करोति। स्वप्रयोजनाभावात् अपिशब्दस्वारस्यात् कर्मकर्तव्या-कर्तव्यनियमाभावो द्योत्यते। ज्ञानाग्निदग्धकर्मतदभिनिवेशतत्फलत्वात् तत्कृत कर्माकर्मपदमेव भजतीत्यर्थ।

आत्मानमञ्जसा वेद्मि क्वाप्यज्ञान पलायितम्।
कर्तृत्वमद्य मे नष्ट कर्तव्य वा ऽपि न क्वचित्॥'

इति श्रुत॥ २०॥

यस्तु निष्प्रपञ्चज्ञानबलेन ससाधन सर्व कर्म सन्यस्य देहधारणमात्र चेष्टो ऽवशिष्यते स कर्मादावकर्मादिदर्शी कृतकृत्यतापदमर्हतीत्याह

निराशीर्यतचित्तात्मा त्यक्तसर्वपरिग्रह।
शारीर केवलं कर्म कुर्वन्नाप्नोति किल्बिषम्॥ २१॥

निराशीरिति। य कर्मादावकर्मादिदर्शी स शारीर कर्म कुर्वन्नपि न लिप्यते। आशीर्युक्तस्य निर्लेपता कथमिति तत्राह निराशीरिति। निर्गता आशी विषयेच्छा यस्मात्सो ऽय निराशी। अन्तर्बाह्यकरणसत्त्वे कथमाशीर्निवर्तेत इति तत्राह--यतेति। चित्तमन्त करण बहि करणमात्मा कार्यकरणसघात तावुभावपि यतौ नियतौ यस्य सो ऽय यतचित्तात्मा। करणद्वयस्य नियतत्वेन निराशीष्ट्वमुपपद्यत इत्यर्थ। शारीर कर्मणि प्रवृत्तस्य परिग्रह विना तदसभवात्परिग्रहवतो यतचित्तात्मता कथमिति तत्राह त्यक्तेति। शरीरस्थितिमात्रप्रयोजक परिग्रह विना अन्य परिग्रहा यस्य

त्यक्त सो ऽय त्यक्तसर्वपरिग्रह । तत्रापि स्पृहाऽभावात् यतचित्तात्मतोपपद्यत इत्यर्थ । शारीर कर्म कुर्वेत तत्फलस्यापि किल्बिषस्यावश्यभावित्वात्तत्फलमाप्नोतीति तत्राह—नाप्नोतीति । शारीर कर्म कीदृशम्‌' शरीरेण यन्निर्वर्त्यं तदेव कर्म शारीरमिति वदसि चत्तर्हि विहितकर्मवत्प्रतिषिद्धकर्मणो ऽपि शरीरनिर्वर्त्यत्वेन तदुभय शरीरेण कुर्वन्नाप्नोति किल्बिषमिति वदतो भगवतो विरुद्धाभिधायित्व भवेत्, प्रतिषिद्धाचरण ऽपि किल्बिषाभावोक्त्या प्रतिषधशास्त्रवैयर्थ्य स्यात, नैतद्युक्त भगवति । तस्मात् शरीरनिर्वर्त्यं शारीरमित्यनुपपन्नम् । केवलशब्दप्रयोगात् शरीरस्थितिमात्रप्रयोजन शारीर कर्मेति वक्तुमुचितम् । तत्राप्यभिमानविकलत्वात् परारोपितप्रातिभासिकशरीरस्थितिमात्रप्रयोजनस्नानभिक्षाऽऽदिकर्म कुर्वन्नपि स्वव्यतिरेकेण परतदारोपप्रातिभासिकशरीरकर्मतत्फलकिल्बिषाद्यभावात पुण्यपापलक्षण किल्बिष नाप्नोति, पुण्यस्यापि बन्धहेतुत्वात् किमह साधु नाकरवम्, किमह पापमकरवमिति' विद्वान्पुण्यपापे विधूय निरञ्जन परम साम्यमुपैति'

प्रियेषु स्वेषु सुकृतमप्रियेषु च दुष्कृतम् ।
विसृज्य ध्यानयोगेन ब्रह्माप्येति सनातनम ॥

इत्यादिश्रुते । एवभूतो यतिर्ज्ञानाग्निदग्धपापपुण्यकर्मतत्फलत्वादप्रतिबन्धेन विमुक्तो भवतीत्यर्थ ॥ २१ ॥

कर्मादावकर्मादिदर्शिन सन्यासिन शरीरस्थितिमात्रप्रयोजन परिग्रहो ऽपि बन्धाय भवतीति तत्राह

यदृच्छालाभसंतुष्टो द्वंद्वातीतो विमत्सरः ।
समः सिद्धावसिद्धौ च कृत्वा ऽपि न निबध्यते ॥ २२ ॥

यदृच्छेति । स्वकीय प्रयत्नमन्तरेण यदृच्छया समागत यो ऽन्नवस्त्रा-दिलाभ सो ऽय यदृच्छालाभ तेनैव सतुष्ट समुत्पन्नालमतित्वात् । द्वन्द्वो-त्थदु खस्य दु सहत्वात् तद्वत सतुष्टि कथमिति तत्राह – द्वन्द्वातीत इति । समाधित कादाचित्कव्युत्थानकाले द्वन्द्वाक्रान्तो ऽप्यविषण्णचित्तत्वात् द्वन्द्वा-तीतो भूत्वा सदा सतुष्टो भवतीत्यर्थ । तादृशमपि केचन निन्दन्ति, ननु मात्सर्योदितचित्तक्षोभत तुष्टेरवकाश कुत इति तत्राह विमत्सर इति । सर्वत्र ब्रह्मात्मदृष्ट्या विगतो मत्सरो यस्य सो ऽय विमत्सर स्वभिन्न निन्दकाभावत कुत्रापि मात्सर्यानवकाशात् । मात्सर्याभावे ऽपि यदृच्छा प्राप्तलाभालाभयो हर्षविषादौ स्यातामिति तत्राह सम इति । यदृच्छा प्राप्तशरीरस्थितिमात्रप्रयोजनभिक्षासिद्ध्यसिद्ध्यो सम अकर्मप्रत्यक्परचिदै क्यज्ञानकवलितविषयत्वादवभृत । कर्मादावकर्मादिदर्शी सन्यासी परारो पितप्रातिभासिकशरीरस्थितिमात्रप्रयोजनभिक्षाऽऽदिकर्म कृत्वा ऽपि स्वदृष्ट्या तत्कर्तृत्वाभावेन ज्ञानाग्निदग्धकर्मत्वात् न निबध्यते ॥ २२ ॥

अकर्मब्रह्मात्मदर्शनसपत्त्या कर्मादावकर्मादिदर्शिन सर्वकर्मसन्यास एवाधिकारो नान्यत्र, प्रारब्धवेगत पूर्ववत्कर्मणि प्रवृत्तस्यापि तन्मूलाज्ञान स्य ज्ञानाग्निदग्धत्वात लोकसग्रहबुद्ध्या तत्कृत स्वाश्रमोचित कर्माकर्मैव भवतीत्युपसहरति —

गतसङ्गस्य मुक्तस्य ज्ञानावस्थितचेतसः ।
यज्ञायाचरतः कर्म समग्र प्रविलीयते ॥ २३ ॥

गतसङ्गस्येति । श्रुतिस्मृत्यनुगृहीतस्वाश्रमोचितदेहेन्द्रियादिचेष्टारूप कर्मतत्फलेषु क्षयिष्णुत्वबन्धहेतुत्वादिदोषदृष्ट्या गतो विगत सङ्गो यस्य तस्य गतसङ्गस्य कर्तव्याकर्तव्यरूपधर्माधर्मविभ्रमात् मुक्तस्य, प्रत्यगभिन्नब्रह्मज्ञान

तत्साधनश्रवणादाववस्थित चेतो यस्य तस्य ज्ञानावस्थितचेतस , 'यज्ञो वै विष्णु ' इति श्रुत्या यज्ञाय,

'नैवेद्यार्थं महाविष्णो स्वादु माधूकर शुचि ।
आनयिष्यामि भगवन् . ॥'

इत्यादिना यज्ञशब्दवाच्यविष्णोराराधनाय कर्माचरत , कर्मादावकर्मादि-दर्शिनो यतेरग्रेण फलेन सम वर्तत इति समग्र कर्म प्रविलीयते, अकर्मैव भवतीत्यर्थ ॥ २३ ॥

'अवश्यमनुभोक्तव्य कृत कर्म शुभाशुभम् ।
नाभुक्त क्षीयते कर्म कल्पकोटिशतैरपि ॥'

इति वचनात् स्वफलमदत्त्वा समग्र कर्म कथ प्रविलीयत इत्याकाङ्क्षाया देहात्मभावारूढाना स्वभेदेनार्पणादिक्रियाकर्तृकारकफलदृष्टीना तथात्वेऽपि तद्व्यतिरिक्तप्रत्यगभिन्नब्रह्मभावारूढाना स्वव्यतिरेकेणार्पणादिकर्मतत्फलाभावात् स्वफलमदत्त्वा समग्र कर्म प्रविलीयत एवेति प्रत्याययति—

ब्रह्मार्पणं ब्रह्म हविर्ब्रह्माग्नौ ब्रह्मणा हुतम् ।
ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना ॥ २४ ॥

ब्रह्मार्पणमिति । कर्मादावकर्मादिदर्शी ब्रह्मात्मनिष्ठ अर्प्यते अनेनेत्यर्पण स्रुगादि , तदपि ब्रह्मैव पश्यति । तथाऽर्प्यमाण घृतादिक हविरपि ब्रह्मैव पश्यति । ब्रह्मैवाग्नि तस्मिन् ब्रह्माग्नौ कर्तृताबुद्धिविकलत्वेन ब्रह्माभिन्नेन कर्त्रा हुत हवनक्रियाऽऽदिक ब्रह्मैव पश्यति । ब्रह्मैव कर्म, तस्मिन् समाधि चित्तैकाग्र्य यस्य तेन ब्रह्मकर्मसमाधिना गन्तव्यमपि ब्रह्मैव पश्यति । ब्रह्मातिरिक्त न किंचित्पश्यति । 'सो ऽहम ', 'आत्मैव सर्वम्', 'ब्रह्मैवेद सर्वम्'

'सत्तामात्र हीद सर्वम्' इत्यादिश्रुत्यनुरोधेन ब्रह्मात्मभावोपमृदितार्पणादि-क्रियाकारकफलभेदमुपेयुष शरीरस्थितिमात्रप्रयोजनस्य कर्मणो ऽकर्मत्वेन समग्र कर्म प्रविलीयते ।

'यो ऽतत्प्रपञ्चमखिल ज्ञानाग्नौ जुहुयाद्यति ।
तस्य शारीरक कर्माकर्मता याति नान्यथा ॥'

इति स्मृते । एवभूतज्ञानस्य यज्ञत्वसपादन स्तुत्यर्थमुपपद्यते ॥ २४ ॥

ब्रह्मार्पणमित्यस्मिन् श्लोके यो ऽय ज्ञानयज्ञ प्रतिपादित तस्यैव सर्वयज्ञेभ्य श्रेष्ठता प्रकटीकर्तुमधिकारिभेदेनानेकयज्ञानुपन्यस्यति—दैवमेवे-त्यादिभिरष्टभि ।

दैवमेवापरे यज्ञं योगिनः पर्युपासते ।
ब्रह्माग्नावपरे यज्ञं यज्ञेनैवोपजुह्वति ॥ २५ ॥

दैवमिति । अपरे योगिन· कर्मठा येनेज्यन्ते देवा इन्द्रादय इति दैवो यज्ञ, तमेव पर्युपासते श्रद्धया कुर्वन्तीत्यर्थ । एवकारेणेन्द्रादिषु ब्रह्म-बुद्धिराहित्यं द्योत्यते, नेषा बलीवर्दोपममतित्वेन कर्मठत्वात् । तद्विपरीता ज्ञानिन किं कुर्वन्तीति तत्राह—ब्रह्मेति । अपरे कर्मादावकर्मादिदर्शिनो ब्रह्मात्मनिष्ठा संन्यासिन स्वाज्ञदृष्ट्यारोपिताविद्याद्वयतत्कार्यजातम् 'नेति नेति' इति निरस्ताशेषसामान्यविशेष प्रत्यक्सुखाभिन्न परमसुख ब्रह्म-शब्दार्थ· । ब्रह्म च तदग्निश्चेति ब्रह्माग्नि·, तस्मिन् ब्रह्माग्नौ स्वाज्ञारोपित-कर्तृत्वादिधर्मवन्त परमार्थत तदतीत त्वपदार्थाभिधान यज्ञमविद्याद्वयतत्कार्य-रहितेन यज्ञस्वरूपाभिधानतत्पदलक्ष्येणैवोपजुह्वति जीवपरैक्यमेव सदा भाव-यन्तीत्यर्थ । यद्वा देहेन्द्रियादिव्यापाररूपं कर्मैव यज्ञ, त ब्रह्मार्पण-

मित्याद्युक्तज्ञानयज्ञेनैवोपजुह्वति । अतद्धोमप्रकरणादतत्कार्यजात तन्मात्रत्वेन प्रविलापयन्तीत्यर्थ ॥ २५ ॥

नैष्ठिकब्रह्मचारिण किं कुर्वन्तीति तत्राह—

श्रोत्रादीनीन्द्रियाण्यन्ये संयमाग्निषु जुह्वति ।
शब्दादीन्विषयानन्य इन्द्रियाग्निषु जुह्वति ॥ २६ ॥

श्रोत्रादीनीति । अन्ये नैष्ठिकब्रह्मचारिण श्रोत्रादिज्ञानेन्द्रियाणि तेषा सयमा एवाग्नय तेषु जुह्वति । श्रोत्रादिबाह्येन्द्रियाणा मनस सयमनस्यै कत्वात् कथ सयमाग्निष्विति बहुवचनमित्याकाङ्क्षाया एकैकेन्द्रियं प्रति सयमो निग्रहो भिद्यत इति बहुवचनमित्यर्थ । इन्द्रियनिग्रहप्रधानास्तिष्ठन्तीति भाव । पञ्चाग्नय किं कुर्वन्तीति तत्राह—शब्दादीनिति । अन्ये पञ्चाग्नयो गृहस्था इन्द्रियाण्येवाग्नय तेषु शब्दादिविषयान् जुह्वति । श्रोत्राद्यक्षै शब्दादिविषयग्रहणकाले ऽपि तत्रासक्ता सन्त इन्द्रियाण्यग्नित्वेन शब्दादीन् हविष्ट्वेन भावयन्तीत्यर्थ ॥ २६ ॥

ध्याननिष्ठा कि कुर्वन्तीति तत्राह—

सर्वाणीन्द्रियकर्माणि प्राणकर्माणि चापरे ।
आत्मसंयमयोगाग्नौ जुह्वति ज्ञानदीपिते ॥ २७ ॥

सर्वाणीति । अपरे ध्याननिष्ठा संन्यासिन श्रोत्रवागादिबुद्धिकर्मेन्द्रियाणा शब्दवचनादीनि कर्माणि पञ्चप्राणपञ्चोपप्राणभेदाना दशप्राणाना बहिर्गमनाधोगमनसंधिबन्धबलकरणोर्ध्वगमनभुक्तान्नसमीकरणोद्गारोन्मीलनक्षुतजृम्भणसर्वव्यापनात्मकानि प्राणकर्माणि च ध्येयविषयज्ञानेन दीपिते काम-

संकल्पादिवृत्तिभावाभावप्रकाशकत्वेनोज्ज्वलिते प्रत्यगात्मनि संयमो योग, स एवाग्नि तस्मिन् प्रत्यगभिन्ने ब्रह्मणि जुह्वति, सर्वव्यापारोपरता भवन्तीत्यर्थ ॥ २७ ॥

यज्ञषट्कमुपन्यस्यति—

द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथाऽपरे ।
स्वाध्यायज्ञानयज्ञाश्च यतयः संशितव्रताः ॥ २८ ॥

द्रव्येति । अपरे धनिका पुण्यतीर्थेषु यज्ञबुद्ध्या ये द्रव्ययज्ञ कुर्वन्ति ते द्रव्ययज्ञा । द्रव्ययज्ञाधिकारिण निरूप्य तपोयज्ञाधिकारिण निरूपयति—तप इति । अपरे तापसा कृच्छ्रचान्द्रायणादिक तपो यज्ञबुद्ध्या ये कुर्वन्ति ते तपोयज्ञा । योगयज्ञाधिकारिणं प्रकटयति—योगेति । तथाऽपरे योगिनो यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधिभि चित्तवृत्तिनिरोध यज्ञबुद्ध्या ये कुर्वन्ति ते योगयज्ञा, 'योगश्चित्तवृत्तिनिरोध' इति योगसूत्रात् । स्वाध्याययज्ञाधिकारिण निरूपयति—स्वाध्यायेति । ऋगाद्यभ्यास स्वाध्याय स एव यज्ञो येषा ते स्वाध्याययज्ञा, 'स्वाध्यायोऽध्येतव्य' इति श्रुते । ज्ञानयज्ञाधिकारिणं निर्दिशति—ज्ञानेति । श्रुत्याचार्योपदेशलब्ध ज्ञान येषा ते ज्ञानयज्ञा । व्रतयज्ञाधिकारिणमादिशति—सशितव्रता इति । अपरे सिद्ध्यर्थं यतन्त इति यतय सिद्धा उच्यन्ते । सशितान्यस्खलितानि व्रतानि यज्ञबुद्ध्या ये सिद्धा कुर्वन्ति ते सशितव्रता यतय सिद्धपद प्राप्ता इत्यर्थ । यद्वा अस्मिञ्श्लोके यज्ञचतुष्टयमेव केचिन्मन्यन्ते । तत्र पूर्वार्धतो यज्ञत्रय ज्ञेयम् । उत्तरार्धेनैको यज्ञ इति । तत्र यज्ञत्रयस्योक्तत्वाच्चतुर्थं यज्ञमाह—अपर इति । अपरे ब्रह्मापरोक्षार्थं यतन्त इति यतय सन्यासिन सम्यक् शित तीक्ष्णीकृत व्रत ब्रह्मचर्याहिंसाऽ-

परिग्रहसत्यवचनादिकं येषा ते सशितव्रता 'ब्रह्मचर्यमहिसा चापरिग्रह च सत्य च यत्नेनेह रक्षत' इत्यादिश्रुत्यनुरोधेनास्खलितस्वाश्रमोचिताचरणव्रतपरायणा सन्त स्वाध्यारोपितातद्यज्ञानाम् 'नेति नेति' इति निरासकत्वात् स्वाध्यायो वेदान्त, तच्छ्रवणमनननिदिध्यासनतो यद्ब्रह्मापरोक्षज्ञान तदेव यज्ञो येषा ते स्वाध्यायज्ञानयज्ञा कृतकृत्या इत्यर्थ।

'वेदान्तविज्ञानसुनिश्चितार्था सन्यासयोगाद्यतय शुद्धसत्त्वा।
ते ब्रह्मलोकेषु परान्तकाले परामृता परिमुच्यन्ति सर्वे॥'

इति श्रुते॥ २८॥

केवलहठयोगिन कि कुर्वन्तीति तत्राह—

अपाने जुह्वति प्राणं प्राणे ऽपानं तथा ऽपरे।
प्राणापानगती रुद्ध्वा प्राणायामपरायणाः॥ २९॥

अपान इति। अपरे हठयोगिन अधोवृत्तावपाने प्राणमूर्ध्ववृत्ति जुह्वति। पूरककाले प्राणमपानेनैकीकुर्वन्तीत्यर्थ। तथा ऊर्ध्ववृत्त्यात्मके प्राणे अधोवृत्त्यात्मकमपान जुह्वति। रेचककाले प्राणेनापान योजयन्तीत्यर्थ। आस्यनासिकाभ्या बहिर्निर्गमन प्राणगति। तद्विपर्ययेणाधोगमनमपानगति। ते प्राणापानगती रुद्ध्वा रेचकपूरकावकृत्वा प्राणायामपरायणा सन्त केवलकुम्भकमेव यज्ञबुद्ध्या कुर्वन्तीत्यर्थ॥ २९॥

आहारसंकोचाभ्यासिन किं कुर्वन्तीति तत्राह—

अपरे नियताहाराः प्राणान्प्राणेषु जुह्वति।
सर्वे ऽप्येते यज्ञविदो यज्ञक्षपितकल्मषाः॥ ३०॥

अपर इति। अपरे केचन योगिन आह्रियत इत्याहारोऽन्नपानादि नियतः परिमितो येषां ते नियताहाराः सन्तः स्वयमेव जीर्यमाणान्प्राणान् इन्द्रियाणि प्राणेषु तत्तदिन्द्रियाधिष्ठानदेवताविशेषेषु जुह्वति प्रविलापयन्तीत्यर्थः। यद्वा प्राणान् स्वेनाजितवायुभेदान् प्राणेषु स्वजितवायुधारणाधारभ्रूमध्यादिस्थलेषु जुह्वति। केवलकुम्भकाभ्यासतो वायुनिरोधं कुर्वन्तीत्यर्थः। अथ वा प्रत्यगभिन्नब्रह्माज्ञानात् स्थूलसूक्ष्मकारणेषु आत्मात्मीयाभिमानिनो विश्वतैजसप्राज्ञाः प्राणा उच्यन्ते। तान् त्वंपदवाच्यान् स्वाज्ञानप्रभवेषु कारणोपाधिषु विराड्ढिरण्यगर्भेश्वरेषु जुह्वति। त्वंपदवाच्यं तत्पदवाच्यावशेषतया भावयन्तीत्यर्थः। आहोस्वित्प्राणोपलक्षिततूलाविद्यातत्कार्योपाधिभावाभावप्रकाशकत्वेन तदध्यारोपापवाददोषास्पृष्टं त्वंपदलक्ष्यं प्राणशब्देनोच्यते। तदेतत्त्वंपदलक्ष्यं प्राणोपलक्षितमूलाविद्यातत्कार्यभावाभावप्रकाशकत्वेन तदध्यारोपापवाददोषास्पृष्टत्वेन च विराड्ढिरण्यगर्भेशादिविभागशून्ये महाप्राणरूपे तत्पदलक्ष्ये ब्रह्मणि जुह्वति। प्रत्यक्परचिदैक्यज्ञाननिष्ठा भवन्ति। प्राणान्प्राणेष्वित्यत्र स्वाज्ञदृष्टिविकल्पितवाच्यार्थवैचित्र्यात् बहुवचनं न स्वतः, तल्लक्ष्ययोरेकत्वात्, 'तत्त्वमसि' 'अहं ब्रह्मास्मि' इत्यादिश्रुतेः। पूर्वोक्तयज्ञानुपसंहरति—सर्व इति। सर्वे द्रव्ययज्ञाद्यनुष्ठातारो यज्ञान् विदन्तीति यज्ञविदः स्वानुष्ठितयज्ञैः क्षपितो नाशितः कल्मषो येषां ते यज्ञक्षपितकल्मषा निष्पापा भवन्तीत्यर्थः ॥ ३० ॥

पूर्वोक्तयज्ञानुष्ठातॄणां फलमाचष्टे—

यज्ञशिष्टामृतभुजो यान्ति ब्रह्म सनातनम्।
नायं लोकोऽस्त्ययज्ञस्य कुतोऽन्यः कुरुसत्तम ॥ ३१ ॥

यज्ञेति । यज्ञाना शिष्ट च तदमृत चेति यज्ञशिष्टामृतम्, तद् भुञ्जत इति यज्ञशिष्टामृतभुज यथोक्तयज्ञान् कृत्वा तच्छिष्टेन कालेन विधि-चोदितान्नाख्यामृतभोक्तार मुमुक्षवश्चेत् चित्तशुद्धिद्वारेण क्रमात् सनातन ब्रह्म यान्ति । पूर्वोक्तयज्ञेष्वेको ऽपि यज्ञो येन नानुष्ठीयते तस्याध पतन प्रकटीकरोति—नाय लोको ऽस्तीति । क्षत्रियेषु कुरव सन्त भीष्मादय, तेषु पाण्डवा सत्तराः, तेष्वर्जुनस्य भगवद्विभूतित्वेन सत्तमत्वात् हे कुरुसत्तम! उक्तयज्ञानामेको ऽपि यज्ञो येन नानुष्ठीयते सो ऽयज्ञ । तस्य सर्वप्राणिसाधारणो ऽय मनुष्यलोको ऽपि नास्ति । तद्विपरीतत्वेनान्यस्व-भावकबलिताविद्याद्वयतत्कार्यत्वेन प्रसिद्धो ब्रह्मात्मलोक क्रमादक्रमाद्वा कुत कथ स्यादित्यर्थ ॥ ३१ ॥

पूर्वोक्तयज्ञाना स्वकपोलकल्पितत्वात न ते प्रमाणभूतवेदानुग्राह्या भवन्तीति तत्राह—

एवं बहुविधा यज्ञाः वितता ब्रह्मणो मुखे ।
कर्मजान्विद्धि तान्सर्वानेवं ज्ञात्वा विमोक्ष्यसे ॥ ३२ ॥

एवमिति । एवमुक्तप्रकारेण बहुविधा देवादियज्ञा ब्रह्मणो वेदस्य मुख द्वारम्, तस्मिन् मुखे वितता, वेदद्वारेण सर्वत्र प्रकाशिता इत्यर्थ । वेदा मन्नि श्वासत्वेन खलु ते प्रमाणपद भजन्ति । तथा सति स्वकपोलक-ल्पिता अपि यज्ञा कथमप्रमाणतापदमर्हन्तीति भाव । मत्स्वकपोलकल्पना-भावत एव द्रव्यादियज्ञान् तूलाविद्याविकारत्वेन मनोवाक्कायकर्मसभूतान् कर्मजाननात्मरूपान्विद्धि । यतो निर्व्यापारो ऽहमात्मा, अतो द्रव्ययज्ञादयो न मद्व्यापारा, निर्व्यापारं प्रत्यगभिन्न ब्रह्मास्मीति ज्ञात्वा ऽपरोक्षीकृत्य स्वा-विद्याप्रतिभातसंसृतिव्याप्तिरूपादशुभान्मोक्ष्यसे विमुक्तो भवसीत्यर्थः ॥ ३२ ॥

ब्रह्मार्पणमित्यादिना प्रतिपादितो यो ऽय ज्ञानयज्ञ तस्य साधन-त्वेनानेकयज्ञा प्रतिपादिता , तेषामुपेयत्वात ज्ञानयज्ञ एव श्रेयानित्याह—

श्रेयान्द्रव्यमयाद्यज्ञाज्ज्ञानयज्ञः परंतप ।
सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते ॥ ३३ ॥

श्रेयानिति । हे परतप! उक्तलक्षणो ज्ञानयज्ञ श्रेयान् प्रशस्यतर । कस्माच्छ्रेयस्त्वमिति तत्राह—द्रव्येति । स्वाविद्यातत्कार्यरूपात् द्रव्यमयात देवादियज्ञात् । यतो द्रव्यादियज्ञाना कर्तृकारकक्रियाफलात्मकत्वेन माया-मात्रत्व तद्विपरीतत्वेन तन्निवर्तकत्वादतो ज्ञानयज्ञस्य श्रेयस्त्व युक्तमित्यर्थ । ज्ञानस्य यद्यप्यस्ति मनोव्यापाराधीनत्व शुद्धसत्त्वपरिणत मनो ज्ञानमिति विवक्षितत्वात्, तथा ऽपि प्रत्यगभिन्नब्रह्मण तदन्यत्रोपलब्ध्यभावेन ज्ञानस्य वृत्तित्वे ऽपि श्रेयस्त्व युक्तमेवेत्यर्थ । उक्ते ऽर्थे हेत्वन्तरमाह—सर्वमिति । हे पार्थ! यत प्रत्यगभिन्नब्रह्मज्ञाने, खिल निष्फलम्, तन्न भवतीत्यखिल फलसहित सर्व कर्म परिसमाप्यते, ब्रह्मात्मनिष्ठस्य स्वव्यतिरेकेण क्रिया-कारकफलाभावात् । अतो ज्ञानस्य श्रेयस्त्वम्, कर्मनियमादिजालशतमपि यत्र पर्यवसित सकलसाधनसमेतमिति नैष्कर्म्यसिद्धिकारैरुक्तत्वात् ॥ ३३ ॥

प्रशस्यतर चेदेव ज्ञान केनोपायेन तत्प्राप्तिरिष्यत इति तत्राह—

तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया ।
उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः ॥ ३४ ॥

तद्विद्धीति । श्रुत्याचार्यप्रसादतो यत् ज्ञानं लभ्यते तस्य स्वाज्ञान-निवर्तकत्वेन कैवल्यहेतुत्वात् तज्ज्ञान कार्यक्षममिति विद्धि । के मे

तज्ज्ञानमुपदिशन्तीति तत्राह—ज्ञानिनस्तत्त्वदर्शिन इति। पदद्वयस्यैकार्थत्वेन न पुनर्वच शङ्कनीयम्, अर्थभेदसभवाच्छब्दभेदवत्। केवलश्रुत्याचार्यमुखत शास्त्रार्थज्ञा स्वानुभवाभावे ऽपि ज्ञानिन उच्यन्ते। तैरुपदिष्ट ज्ञानमनुभवारूढ न भवेत्। ज्ञानित्वसपादनानंन्तर ये स्वानुभवतो ब्रह्मात्मतत्त्व पश्यन्ति ते खलु तत्त्वविदो भवन्ति अनुभवावसानत्वात् भूतवस्तुविषयत्वाच्च ब्रह्मज्ञानस्येति भाष्यकारोक्तित तैरुपदिष्ट ज्ञानमनुभूतिपद प्राप्य कार्यक्षम भवेदित्यर्थ। न च तत्त्वविदिति वक्तव्ये तत्त्वविद इति बहुवचन किमर्थमिति वाच्यम्। ब्रह्मात्मतत्त्वस्यातिसूक्ष्मत्वेन बहुभ्यो बहुधा श्रोतव्यत्वात्, पूजाया वा तत्त्वविद इति बहुवचनसभवात्। यथोक्तविशेषणविशिष्टा तत्त्वविद ते तव स्वानुभूत ज्ञानमुपदेक्ष्यन्ति। तेषा स्वव्यतिरिक्तवस्तुदर्शनाभावेन कृतकृत्यत्वात्। कथ मा ते लक्ष्यीकृत्योपदिशन्तीति तत्राह—सेवयेत्यादिना। सेवया फलाकाङ्क्षाविकलया तदुचितशुश्रूषया नित्यादिसाधनचतुष्टयसपन्ने ब्रह्मचर्यनियमतो गुरुकुलवासकर्शिते त्वयि तेषा दयालुत्वेन कटाक्ष प्रसरेत्, तदानीं तत्पादनिकटे प्रणिपात कर्तव्य। प्रकर्षेण दण्डवत्पतन प्रणिपात। तेन प्रसन्ना गुरव प्रेप्सित ते वत्स किमिति वदेरन्। तेषा सर्वज्ञत्वेन मदीप्सितस्यापि ज्ञातत्वात् तवेप्सितं किमित्युक्तिरनुपपन्नेति तत्राह—परिप्रश्नेनेति। कुतो मे ससार समागत पुन कस्मान्निवर्तत इति परिप्रश्नेन त्वदभिमुखा भूत्वा स्वय सर्वज्ञा अपि 'नापृष्ट कस्यचिद् ब्रूयात' इति श्रुत्यर्थं मानयन्त सन्त ततस्त्वा बोधयेरन्। किमिति? रज्ज्वज्ञानोत्थस्य सर्पस्य रज्जुज्ञानेन निवृत्तिवत् स्वाज्ञानप्रभवस्य ससारस्य स्वज्ञानेन निवृत्ति नान्यथेति वदन्ति। स्वज्ञान कीदृशमिति पुनस्त्वया पृष्टा सन्त स्वानुभूत स्वज्ञानमुपदिशन्ति। तज्ज्ञान कैवल्यसाधन विद्धीत्यर्थ ॥ ३४ ॥

एव गुरूपदेशत स्वाज्ञाननिवृत्तिद्वारा स्वज्ञानावाप्ति प्रकटयति—

यज्ज्ञात्वा न पुनर्मोहमेवं यास्यसि पाण्डव ।
येन भूतान्यशेषेण द्रक्ष्यस्यात्मन्यथो मयि ॥ ३५ ॥

यदिति । शास्त्राचार्यमुखतो यज्ज्ञान ज्ञात्वा ऽनुभूय यथेदानीं स्वव्यतिरेकेण बन्धून् कल्पयित्वा तन्निमित्त मोह गतो ऽसि, न पुनरेव मोह यास्यसि । हे पाण्डव ! येन ज्ञानेनाशेषेण तूलाविद्याविलसितब्रह्मादि-स्तम्बान्तभूतानि तदविद्याभावाभावप्रकाशकप्रत्यगात्मनि तदभेदेन द्रक्ष्यसि, अथो अनन्तर कवलीकृताविद्याद्वयतत्कार्ये वासुदेवे मयि तान्येव प्रत्यगात्मा वशेषितानि भूतानि द्रक्ष्यसि । प्रत्यगभिन्नब्रह्मस्वरूपेणैव सर्वभूतानि द्रक्ष्य-सीति भाव ॥ ३५ ॥

निष्पापानामेवेहास्मिन्नेव जन्मनि गुरूपदिष्टज्ञानमात्रेण ब्रह्मात्म-साक्षात्कार स्यादेव । तद्विपरीतस्य मम त्वदुपदिष्टज्ञानमात्रत कथ वृजिनतरण येन ब्रह्मात्मसाक्षात्कारो भवेदिति तत्राह—

अपि चेदसि पापेभ्यः सर्वेभ्यः पापकृत्तमः ।
सर्वं ज्ञानप्लवेनैव वृजिनं संतरिष्यसि ॥ ३६ ॥

अपीति । सर्वेभ्य पापेभ्य पापकृद्भ्य त्वमतीव पापकृत्तमो ऽसि चेदपि गुरूपदिष्टप्रत्यगभिन्नब्रह्मज्ञानमेव प्लव, तेन ज्ञानप्लवेनैव । एवकारा-दनायासेन तूलांविद्याविजृम्भित सर्वमपार वृजिनार्णव पापसमुद्र तरिष्यसि । मुमुक्षो पुण्यस्यापि बन्धहेतुत्वेन पुण्यपापतन्मिश्रसमुद्र तीर्त्वा तत्पार ब्रह्म साक्षादनुभवसीत्यर्थ । न चार्जुनस्य पापकृत्तमत्वमस्तीति वाच्यम् । तस्य

सद्वृत्तत्वात् पुण्यकर्मणा सह किंचित्पापकारी पापकृत् । पुण्यकर्म विना केवलपापाचार पापकृत्तर । तन्निष्ठावान् पापकृत्तम । एकस्मिन् जन्मनि कस्यापि पापकृत्तमत्वासभवात् ज्ञानमाहात्म्यमेतादृशमिति स्तुत्यर्थं भगवद्वचन-मुपपद्यते । अन्यथा पापकृतो ऽपि भगवद्दर्शन तदुपदेशयोग्यता वा कथमुप-पद्यते ? भगवद्दर्शनस्यानन्तकोटिजन्मसुकृतपरिपाकलभ्यत्वादित्यर्थ ॥ ३६ ॥

ज्ञानेन वृजिनार्णवलङ्घनमात्र न तन्मूलकर्मनाशो भवेदिति भ्रान्ति-मुन्मूलयन् तन्मूलनाश लौकिकदृष्टान्तेन स्पष्टयति---

यथैधांसि समिद्धो ऽग्निर्भस्मसात्कुरुते ऽर्जुन ।
ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा ॥ ३७ ॥

यथेति । हे अर्जुन ! सम्यगिद्धो दीप्तो ऽग्नि यथैधासि काष्ठबृन्दानि भस्मसात्कुरुते भस्मीभाव करोति तथैव प्रत्यगभिन्नब्रह्मज्ञानाग्निरतीतानेकजन्म-कृतानि ज्ञानसहभावीनि च यान्यनारब्धफलानि तान्येव सर्वाणि कर्माणि भस्मसात्कुरते । येन कर्मणा शरीरमारब्ध तस्यारब्धकर्मण प्रवृत्तफलत्वात् भोगेनैव नाश 'तस्य तावदेव चिर यावन्न विमोक्ष्ये ऽथ सपत्स्ये' इति श्रुते । यद्वा सर्वाणि कर्माणीति बहुवचनात् भस्मसात्कुरुत इति वर्तमानप्रयोगात् सर्वशब्दस्य सकोचे मानाभावाच्च आगामिसचितारब्धकर्माणि तत्कार्यपुण्य पापतन्मिश्रकर्माणि च निर्बीजानि यथा भवन्ति तथा ज्ञानाग्नि भस्मसात्कुरुते, सम्यग्दर्शनं सर्वकर्मणा निर्बीजत्वे कारणमिति भाष्यकारोक्ते । न चैव सम्यग्ज्ञानेन स्वाज्ञाननिवृत्तौ सत्या तत्कार्यकर्मत्रयक्षये सति तत्कार्यशरीर-स्यापि नाशसभवात्तदन्यथाऽनुपपत्त्या ऽऽगामिसञ्चितकर्मणोरेव नाशो नारब्ध-स्येति वाच्यम्; सम्यग्ज्ञानसमकालमेवाज्ञाननिवृत्तिस्तदुत्तरक्षणत: सर्वकर्म-

नाशसंभवात् तदन्यथाभाषणे 'ब्रह्म वेद ब्रह्मैव भवति' 'ब्रह्मविदाप्नोति परम्' 'तरति शोकमात्मवित्' 'स एष विमुक्तो विदुष्कृतो ब्रह्म विद्वान् ब्रह्मैवाभिप्रैति य एव निर्बीज वेद निर्बीज एव भवति' 'तमेवं ज्ञात्वा विद्वान् मृत्युमुखात्प्रमुच्यते। तदैव विद्वास इहैवामृता भवन्ति।' 'एतद्यो वेद निहित गुहाया सो ऽविद्याग्रन्थि विकिरतीह सोम्य।'

'भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसशया।
क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे॥'

इत्याद्या प्रत्यगभिन्नब्रह्मसम्यग्ज्ञानसमकालमेव स्वाज्ञानतत्कार्यकर्मत्रयनिवृत्तित कैवल्यफलानुवादिन्य श्रुतय कुप्येरन्। तथा चेत् 'तस्य तावदेव चिरम्' इति प्रारब्धसद्भाववादिश्रुते का गतिरिति तत्रोच्यते—सम्यग्ज्ञानीतरेषु सा श्रुति गतिमर्हत्येव। तद्विपरीतत्वेनाविद्याद्वयतत्कार्योपमर्दकब्रह्मात्मसम्यग्ज्ञानिन पुनः स्वाज्ञानतत्कार्यकर्मानुवर्तनापेक्षया तद्बाधकं सम्यग्ज्ञान नोत्पन्नमिति वक्तुमुचितम्। तादृशसम्यग्ज्ञानिनस्तावत्परारोपितप्रातिभासिकशरीरस्थितिमात्रप्रयोजनारब्धकर्मानुवर्तनं विना स्वदृष्ट्या परतदारोपितकर्मतदनुवर्तनाभावात्, यथा स्वोदयात्पुरैव स्वावारक ध्वान्त कबलीकृत्य निरावृत सूर्य उदेति तथा ब्रह्मात्मसम्यग्ज्ञान स्वोदयात्पुरैव स्वावारकमविद्याद्वयतत्कार्यजात कबलीकृत्य खलु नि सपत्नमुदेति। अरुणोदयवेलाया तमस स्थूलभागनाशवत् ब्रह्मासीति गुरूपदिष्टज्ञानाग्निरागामिकर्मसर्वस्व भस्मसात्कुरुते। श्रुत्याचार्यप्रसादात्तशास्त्रज्ञानिन आगामिकर्मणो ऽश्लेषश्रवणात् अरुणोदयसूर्योदययोरन्तरालावस्थाया तमस सूक्ष्मभागनाशवत् प्रत्यगभिन्न ब्रह्मास्मीति स्वानुभूतिपरामृष्टविज्ञानाग्नि सचितकर्मसर्वस्व भस्मसात्कुरुते। स्वानुभूतिपरामृष्टब्रह्मात्मविज्ञानिन प्रबोधात् स्वप्नकर्मवत् सचितकर्मसर्वस्व नि.शेष विनश्यति। सूर्योदयवेलाया तमसो बीजभागनाशवदकर्म

प्रत्यगभिन्नब्रह्मचरमसाक्षात्कारहेतुसम्यग्ज्ञानाग्निरारब्धकर्मसर्वस्वं भस्मसात्कुरुते सम्यग्ज्ञानकबलितदेहाभिमानस्य स्वापे इन्द्रियवदारब्ध कर्मापि नश्यत्येव । यत्साक्षात्कारानन्तरमतत्प्रवृत्तिनिवृत्त्यभिमानो न स्यात् स एव चरम-साक्षात्कार । तद्धेतु सम्यग्ज्ञान तत्पदमारूढस्य स्वभिन्नदेहत्रयाभिमानाभाव-ध्रौव्यात्कर्मत्रयनाशसकोचो नोपपद्यते । तथा सति 'ज्ञानाग्नि सर्वकर्माणि भस्मसात्कुरुते' इति भगवदुक्ति निरङ्कुशतमा स्यादित्यर्थ । न च सम्यग्ज्ञानिन कर्मत्रयाभावे ऽपि तद्विपरीतस्याज्ञानिन कर्मत्रय परमार्थत स्यादिति वाच्यम् । परमार्थतया तस्याप्यसभवात् । तत्किमात्मनो देहस्य वा? नाद्य, आत्मनस्तावत्कर्मत्रयभावाभावप्रकाशकत्वेन तदध्यारोपापवाद-दोषास्पृष्टत्वेन च तद्विलक्षणत्वात्, यमज्ञ इति वदसि सो ऽय खलु प्रत्यगात्मा, तस्य कर्मत्रय न सभवति । न द्वितीय, देहस्याज्ञान-कल्पितत्वेनासत्त्वादसत कथ कर्मत्रय सभवति? तथा सति कर्मत्रय-व्यवहार कथमिति चेदुच्यते । देहात्मनोस्तत्त्वाज्ञानपुरःसरा कर्मत्रयव्य-वहृतिरज्ञाश्रितेव प्रतिभाति । तस्मात् सा न कस्यापि परमार्थतापद-मर्हतीत्यर्थ ॥ ३७ ॥

वाजिमेधादिकर्मणा पवित्रहेतुत्वेन तैरेव पुरुषार्थे सिद्धे ज्ञानेन साधनीय किमिति तत्राह—

न हि ज्ञानेन सदृशं पवित्रमिह विद्यते ।
तत्स्वयं योगसंसिद्धः कालेनात्मनि विन्दति ॥ ३८ ॥

न हीति । इहास्मिन् लोके प्रत्यगभिन्नब्रह्मज्ञानेन सदृश पवित्र पावनमन्यदश्वमेधादिक न विद्यते । तस्य स्वाज्ञानप्रभवकर्तृकारकक्रिया-फलात्मकत्वेनापवित्रत्वात् । तद्विपरीतत्वेन परमपावन चेत् ज्ञान सर्वेषा कि

नोत्पद्यते ? चित्तशुद्ध्यभावादित्याह—तदिति । दीर्घकालेन निष्कामकर्मानुष्ठानं योगः, तेन संसिद्धः समुत्पन्नचित्तशुद्धिः पुरुषः पराभिन्नप्रत्यगात्मनि प्रत्यक्परैक्यविषयकं यज्ज्ञानं तदनायासेन विन्दति लभत इत्यर्थः ॥ ३८ ॥

मदाराधनलक्षणनिष्कामकर्मानुष्ठानतः समुत्पन्नचित्तशुद्धेः ज्ञानोत्पत्तावन्तरङ्गसाधनमुपदिशति—

श्रद्धावाँल्लभते ज्ञानं तत्परः संयतेन्द्रियः ।
ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति ॥ ३९ ॥

श्रद्धावानिति । श्रुत्याचार्योपदिष्टेऽर्थे श्रद्धा आस्तिक्यबुद्धिः यस्य सोऽयं श्रद्धावान् प्रत्यगभिन्नब्रह्मज्ञानमवश्यं लभते । तादृशश्रद्धा केनोपायेन जायत इति तत्राह—तत्पर इति । गुरुरेव परो यस्य स तत्परः । गुरुसेवापरायणत्वात्तस्य श्रद्धोदेति । इन्द्रियद्वयव्यापृतेस्तत्परत्वं वा कथमिति तत्राह—संयतेन्द्रिय इति । येनेन्द्रियद्वयं संयतं भवति सोऽयं संयतेन्द्रियः, संयतेन्द्रियत्वं तत्परत्वम् । श्रद्धावत्त्वं च ज्ञानोत्पत्तावन्तरङ्गसाधनमित्यर्थः । एवं साधनसाध्यज्ञानलाभे किं फलमिति तत्राह—शान्तिमिति । ब्रह्मज्ञानं लब्ध्वाऽचिरेण तदुत्तरक्षणेनाविद्याद्वयतत्कार्योपरतां सर्वोत्कृष्टत्वेन विदेहकैवल्यरूपिणीं शान्तिमधिगच्छति । ज्ञानसमकालमेव मुक्तो भवतीत्यर्थः ।

'यत्र यत्र मृतो ज्ञानी परमाक्षरवित्सदा ।
परे ब्रह्मणि लीयेत न तस्योत्क्रान्तिरिष्यते ।
तद्ब्रह्माहमिति ज्ञात्वा ब्रह्म संपद्यते ध्रुवम् ॥'

इत्यादिश्रुतेः ॥ ३९ ॥

अज्ञाश्रद्दधानसंशयात्मनामिहामुत्रापि सुखाभावं प्रकटयति—

अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति ।
नायं लोको ऽस्ति न परो न सुखं संशयात्मनः ॥ ४० ॥

अज्ञ इति । श्रुत्याचार्यमुखत शास्त्रार्थं न जानातीत्यज्ञ , स च, श्रुत्याचार्यमुखत शास्त्रार्थज्ञाने जाते ऽपि तत्पुरुषार्थोपयोगीत्यास्तिक्यबुद्ध्यभावादश्रद्दधानश्च, प्रमादत श्रद्धाया जातायामपि तत्फल कैवल्य सिध्येद्वा न वेति सशयपद प्राप्त आत्मा ऽन्त करण यस्य सशयात्मा च, विनश्यति पुरुषार्थात् च्यवत इत्यर्थ । अज्ञाश्रद्दधानयो तुल्य सशयात्मेति तत्राह—नेति । अज्ञाश्रद्दधानयोरामुष्मिकसुखाभावे ऽप्यैहिकसुखसभवात् न तयो तुल्य सशयात्मा, यत सशयात्मनो नाय लोको ऽस्ति धनार्जनतो विवाहाद्यसिद्धे, तथा न परलोक तत्साधनीभूतधर्मानिष्पत्ते । सर्वत्र सशयितृत्वेन न हि तस्यैहिकामुष्मिकसुखगन्धो ऽप्यस्ति । अतस्तेभ्य सशयात्मैव पापिष्ठतम इत्यर्थ ॥ ४० ॥

अध्यायद्वयोक्तनिष्ठाद्वयमुपसहरति—

योगसंन्यस्तकर्माणं ज्ञानसंछिन्नसंशयम् ।
आत्मवन्तं न कर्माणि निबध्नन्ति धनंजय ॥ ४१ ॥

योगेति । हे धनजय ! मदाराधनलक्षणनिष्कामकर्मानुष्ठानजनितचित्तशुद्ध्यनन्तरभावि प्रत्यगभिन्नब्रह्मदर्शन ज्ञानम्, तेन सछिन्न सशयो यस्य त ज्ञानसछिन्नसशयम्, निर्विभागसत्तासामान्यब्रह्मापरोक्षदर्शन योग, तेनैव सन्यस्तानि गलितानि देहेन्द्रियचेष्टारूपाणि कर्माणि यस्य त योगसन्यस्तकर्माणम्, अखण्डसमाधियोगेन स्वरूपाच्युत आत्मा ऽन्त करण

यस्य तमात्मवन्तमप्रमत्त ब्रह्मात्मनिष्ठ परारोपितशरीरधारणमात्रप्रयोजनदेहे-न्द्रियादिव्यापारात्मकानि कर्माणि न निबध्नन्ति, न पुनर्जन्मादिफलमारभन्त इत्यर्थ , 'क्षीयन्ते चास्य कर्माणि' इति श्रुते ॥ ४१ ॥

यस्माद्योगद्वयविषयसशयवान्विनश्यति यस्मात्तद्विपर्ययवान् कर्मभिर्न-निबध्यने तस्मात् स्वपुरुषार्थप्रतिबन्धकसशयश्छेत्तव्यः इति निगमयति—

तस्मादज्ञानसंभूतं हृत्स्थं ज्ञानासिना ऽऽत्मनः ।
छित्त्वैनं संशयं योगमातिष्ठोत्तिष्ठ भारत ॥ ४२ ॥इति॥

इति श्रीमद्भगवद्गीतासु० ज्ञानयोगो नाम चतुर्थो ऽध्याय ।

तस्मादिति । हे भारत ' यस्मात् सशयाविष्टचेतसामिहामुत्रसुख च्युतिरनिवार्या स्यात् तस्मात् प्रत्यगभिन्नब्रह्मज्ञानमेवासि , तेन ज्ञानासिना पापिष्ठमज्ञानसभूत हृदि बुद्धौ स्थितमेनमात्मन स्वस्य सशय छित्त्वा तादृशज्ञानाभावे ऽपि तदुपायभूतनिष्कामकर्मयोगानुष्ठान प्रत्यातिष्ठ यत्न कुरु । तव क्षत्त्रियत्वेनेदानीमेव युद्धायोत्तिष्ठ । इतिशब्द अध्यायपरि-समाप्त्यर्थ ॥

कर्माद्यकर्मादिबोधशान्तकर्मत्रया ह्यजा ।
यस्मिन्पर्यवसन्ना स्यु स हरिर्मे परायणम् ॥

इति श्रीमद्भगवद्गीताऽर्थप्रकाशिकाया चतुर्थो ऽध्याय ।

अथ पञ्चमोऽध्यायः

कर्मत्यागात्कर्मयोग श्रेयाञ्शुद्धे सचेतसि ।
सम्यग्ज्ञानाय सन्यास कर्मणामाह केशव ॥

'कर्मण्यकर्म य पश्येत्' इत्यारभ्य 'योगसन्यस्तकर्माणम्' इत्यन्तै ग्रन्थै सर्वकर्मसन्यासलक्षणा ज्ञाननिष्ठा प्रतिपादिता । पुनर्योगमातिष्ठोत्तिष्ठ' इत्यनेन स्वाश्रमाचारलक्षणा कर्मनिष्ठा चोदिता खलु, तयो परस्परविरोधेन युगपदेकेन पुरुषेणानुष्ठातुमशक्यत्वात्तयोरन्यतरकर्तव्यताया सिद्धाया तयोर्यत्प्रशस्यतर तत्कर्तव्य नेतरदिति तद्विशेष बुभुत्सुरर्जुन उवाच—

अर्जुन उवाच—

संन्यासं कर्मणां कृष्ण पुनर्योगं च शंससि ।
यच्छ्रेय एतयोरेकं तन्मे ब्रूहि सुनिश्चितम् ॥ १ ॥

सन्यासमिति । हे कृष्ण' 'यस्त्वात्मरतिरेव स्यात्तस्य कार्य न विद्यते', कर्मण्यकर्म य पश्येदकर्मणि च कर्म य '. 'ज्ञानाग्निदग्धकर्माण तमाहु पण्डितं बुधा ', 'शारीर केवल कर्म कुर्वन्नाप्नोति किल्बिषम्', सम सिद्धावसिद्धौ च कृत्वाऽपि न निबध्यते', 'ब्रह्मार्पण ब्रह्म हविर्ब्रह्माग्नौ ब्रह्मणा हुतम्', 'सर्वं कर्माखिल पार्थ ज्ञाने परिसमाप्यते', 'ज्ञानाग्नि. सर्वकर्माणि भस्मसात्कुरुते तथा', 'योगसन्यस्तकर्माण ज्ञान-

सञ्छिन्नसंशयम्' इत्यादिभिर्वचनै शास्त्रीयानुष्ठानलक्षणसर्वकर्मणा सन्यास शससि। 'छित्त्वैन सशय योगमातिष्ठोत्तिष्ठ' इति वचनात् पुन कर्मानुष्ठानलक्षणयोग च शससि। एतयो कर्मसन्यासकर्मानुष्ठानयो मध्ये यदेक प्रशस्यतर मया अर्जुनेनानुष्ठातु शक्यमिति सुनिश्चित त्वदभिमत तन्मे ब्रूहि कृपयोपदिशेत्यर्थ ॥ १ ॥

एवमर्जुनकृतस्य प्रश्नस्योत्तर श्रीभगवानुवाच—

श्रीभगवानुवाच—

संन्यासः कर्मयोगश्च निःश्रेयसकरावुभौ ।
तयोस्तु कर्मसंन्यासात्कर्मयोगो विशिष्यते ॥ २ ॥

सन्यास इति। 'यस्त्वात्मरतिरेव स्यात्तस्य कार्यं न विद्यते' इत्यादिना सांख्यबुद्धिनिष्ठाना कर्मभि प्रयोजनाभावात् सर्वकर्मसन्यासो य प्रतिपादित, 'यज्ञार्थात्कर्मणो ऽन्यत्र लोको ऽय कर्मबन्धन। तदर्थं कर्म कौन्तेय मुक्तसङ्ग' समाचर ॥' इत्यादिना मुमुक्षुत्वे ऽपि सांख्यपदमारोढुमशक्ताना तत्पदारोहाय मदाराधनलक्षणनिष्कामकर्मयोगो य प्रतिपादित, तावुभावपि नि श्रेयसकरौ स्याताम्। तयोरुपायोपेयभेदेन नि श्रेयसहेत्वो मध्ये तव सांख्यपदारोहाशक्तत्वेन यथोक्तज्ञानरहितकेवलकर्मसन्यासात् कर्मयोग कर्मानुष्ठान विशिष्यते। सकामाना स्वर्गादिहेतुत्वात्तद्विपरीताना चित्तशुद्धिद्वारा सांख्यपदप्रापकत्वादित्यर्थ ॥ २ ॥

अर्जुनपरोचनाय कर्मयोग स्तौति—

ज्ञेयः स नित्यसंन्यासी यो न द्वेष्टि न काङ्क्षति ।
निर्द्वन्द्वो हि महाबाहो सुखं बन्धात्प्रमुच्यते ॥ ३ ॥

ज्ञेय इति । हे महाबाहो! य कर्मानुष्ठाने प्रवर्तमानो ऽपि न किंचिद्वस्तुजात द्वेष्टि न विषयसुख वा काङ्क्षति । कुत्रापि रागद्वेषाभावात्सो ऽयमीश्वराराधनलक्षणनिष्कामकर्मानुष्ठाता साख्यनिष्ठाऽऽरोहात्पूर्वमपि नित्यसन्यासी सर्वदा सन्यासीति ज्ञेय , विद्वद्भिरिति शेष । हि यस्मात् निर्गतरागद्वेषादिद्वद्वतापदभाग्भवति, तस्मात् सुखमनायासेन सम्यग्ज्ञानद्वारा तूलाविद्याविजृम्भितससारबन्धात् प्रमुच्यते मुक्तो भवतीत्यर्थ ॥ ३ ॥

कर्मसन्यासकर्मयोगयोर्विरुद्धफलकत्वेन समुच्चयानुपपत्त्या भिन्नपुरुषानुष्ठेयत्वात् तुल्यमुक्तिप्रदत्व कथमिति तत्राह—

सांख्ययोगौ पृथग्बालाः प्रवदन्ति न पण्डिताः ।
एकमप्यास्थितः सम्यगुभयोर्विन्दते फलम् ॥ ४ ॥

साख्ययोगाविति । ज्ञाननिष्ठावाचिसाख्यशब्देन तदङ्ग सर्वकर्मसन्यासो गृह्यते । निष्कामकर्मानुष्ठानलक्षण कर्मयोग तावेव साख्ययोगावित्युक्तौ संन्यासस्य ज्ञानपूर्वकत्वात् कर्मयोगस्य सिद्ध्यसिद्धिसमत्वबुद्धिकलितत्वादनुष्ठानत फलतश्च पृथक् भिन्नफलात्मकाविति बाला अविवेकिनो वदन्ति, शास्त्रार्थपरिज्ञानाभावात् । शास्त्रार्थपरिज्ञानिन पण्डितास्तु उपायोपेयभूतयो॰ साख्ययोगयोर्मध्ये सम्यगेकमप्यास्थितो विद्वान् सर्वकर्म मन्यासलक्षणसाख्यबुद्धिफल मोक्ष , समत्वबुद्धिकलितनिष्कामकर्मानुष्ठानलक्षणयोगफलमपि ज्ञानद्वारा मोक्ष , तयो फलवैषम्याभावात् उभयो कर्मसन्यासकर्मानुष्ठानयोरपि नि श्रेयसफलं विन्दत इति प्रवदन्तीत्यर्थः ॥ ४ ॥

उक्तार्थमेव स्पष्टयति—

यत्सांख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते ।
एकं सांख्यं च योगं च यः पश्यति स पश्यति ॥ ५ ॥

यदिति । सर्वकर्मसंन्यासलक्षणज्ञाननिष्ठै साख्यै यन्मोक्षाख्यं स्थानं प्रकर्षेणावाप्यते तदेव स्थान मोक्षाख्यमीश्वराराधनलक्षणनिष्कामकर्मानुष्ठातारो ये ते योगिन, तै योगिभि सर्वकर्मसन्यासलक्षणज्ञानद्वारा गम्यते ज्ञान-पूर्वकसन्याससमत्वबुद्धिविशिष्टयोगयोरेव फलैकत्वादेकमैक्य य पश्यति स एव पश्यति । न च सन्यासकर्मयोगावर्जुनेन पृष्टौ, तस्योत्तर साख्ययोगा-वित्यप्रकृत कथमुक्तमिति वाच्यम् । तावेव साख्ययोगाविति शब्दान्त-रेण प्रतिपादिताविति तत्रैव व्याख्यातत्वात् नाप्रकृतप्रक्रियाऽवकाश-इत्यर्थ । सर्वकर्मसन्यासलक्षणब्रह्मात्मनिष्ठाऽऽत्मक साख्ययोग साक्षान्मोक्ष-साधन निष्कामकर्मानुष्ठानलक्षण कर्मयोगस्तु चित्तशुद्धयनन्तरभाविज्ञानद्वारा मोक्षसाधनमिति सर्ववेदान्तसमतत्वाद्यथोक्तकर्मयोगात् यथोक्तकर्मसन्यास एव श्रेयानित्यर्थ ॥ ५ ॥

अन्वयव्यतिरेकाभ्यामीश्वराराधनलक्षणनिष्कामकर्मयोगस्य पारमार्थि-कसर्वकर्मसन्यासलक्षणसाख्यबुद्ध्युपायत्व स्फुटयति—

संन्यासस्तु महाबाहो दुःखमाप्तुमयोगतः ।
योगयुक्तो मुनिर्ब्रह्म न चिरेणाधिगच्छति ॥ ६ ॥

सन्यासस्त्विति । हे महाबाहो ! चित्तशुद्धिसाधनीभूतनिष्कामकर्मानु-ष्ठानायोगत पारमार्थिकसन्यासस्त्वाप्तु दु खमशक्यमित्यर्थ । व्यतिरेक-मुक्त्वा ऽन्वयमाह—योग इति । ईश्वराराधनलक्षणनिष्कामकर्मानुष्ठान योग, तेन युक्त तदनुष्ठाता मुनि विद्वान् ब्रह्म न चिरेण क्षिप्रमधिगच्छति । प्रकृतपारमार्थिककर्मसन्यासो ब्रह्मोच्यते । 'न्यास इति ब्रह्मा ब्रह्मा हि पर ' इति श्रुतेः । चित्तशुद्धेः प्राक्कालीनकर्मसन्यासात् कर्मानुष्ठान श्रेय इत्यत्र

'प्रमाथिनो बहिश्चित्ता पिशुना कलहोत्सुका ।
सन्यासिनो ऽपि दृश्यन्ते वेदसदूषिताशया ॥'

इति वार्तिककारपठितश्रुंतिरेव प्रमाणमिति भाव ॥ ६ ॥

अविद्याऽवस्थाऽनुष्ठितकर्माणीव विद्याऽवस्थाया सन्यासिभि क्रियमाणानि स्नानादिकर्माण्यपि बन्धकानि स्युरिति तत्राह—

योगयुक्तो विशुद्धात्मा विजितात्मा जितेन्द्रियः ।
सर्वभूतात्मभूतात्मा कुर्वन्नपि न लिप्यते ॥ ७ ॥

योग इति । ईश्वराराधनलक्षणनिष्कामकर्मयोगयुक्त तदनुष्ठाता योगी किंचित्कुर्वन्नपि न लिप्यते । चित्तशुद्ध्यभावात् कथ निर्लेपो भवतीति तत्राह—विशुद्धात्मेति । निष्कामयोगतो विशुद्ध आत्माऽन्त करण यस्य स विशुद्धात्मा कर्मफलसङ्गाभावान्निर्लेप इत्यर्थ । अजितदेहस्य विशुद्धात्मता कथमिति तत्राह—विजितात्मेति । आहारसंकोचतो विजित आत्मा स्थूलदेहो यस्य स विजितात्मा । स्ववशीकृतदेहस्य विशुद्धात्मतोपपद्यत इत्यर्थ । अजितेन्द्रियस्य विजितात्मता वा कथमिति तत्राह —जितेन्द्रिय इति । चित्तशुद्ध्यनन्तर भाविसर्वकर्मसन्यासतो विषयपराङ्मुखतया जितानि स्ववशीकृतानि इन्द्रियाणि यस्य सो ऽय जितेन्द्रिय, जितेन्द्रियस्य विजितात्मत्वादित्यर्थ । ब्रह्मात्मैक्यज्ञानाभावे कथमिन्द्रियाणि जेतु शक्यन्त इति तत्राह—सर्वेति । सर्वेषु ब्रह्मादिस्तम्बान्तभूतेषु तदन्तर्यामित्वेन तत्सत्तास्फूर्तिसुखप्रदत्वेन तद्भावाभावप्रकाशकत्वेन तदध्यारोपापवाददोषास्पृष्टत्वेन च भूत प्रसिद्धपरमात्माभिन्नप्रत्यगात्मज्ञान यस्य सो ऽय सर्वभूतात्मभूतात्मा ब्रह्मात्मैक्यज्ञाननिष्ठः सन्यासी कुत्रापि कर्तृत्वाद्यभिमानरहित. सन् परारो-

पितप्रातिभासिकदेहस्थितिमात्रप्रयोजकं स्नानभिक्षादि कर्म कुर्वन्नपि न लिप्यते । 'कुर्वन्नपि न कुर्वाण' इत्यादिश्रुते । स्वदृष्ट्या कर्मतल्लेपाभावात् मिथ्याभूतकर्मफलपाशै कथ बध्यत इत्यर्थ ॥ ७ ॥

'कुर्वन्नपि न लिप्यते' इति यदुक्त तदेव विशदयति— नैवेति द्वाभ्याम् ।

नैव किंचित्करोमीति युक्तो मन्येत तत्त्ववित् ।
पश्यञ्शृण्वन्स्पृशञ्जिघ्रन्नश्नन्गच्छन्स्वपञ्श्वसन् ॥ ८ ॥
प्रलपन्विसृजन्गृह्णन्नुन्मिषन्निमिषन्नपि ।
इन्द्रियाणीन्द्रियार्थेषु वर्तन्त इति धारयन् ॥ ९ ॥

नैवेति । निष्कामकर्मानुष्ठातृत्वेन युक्त समाहितचित्तत्वेन प्रत्यगभिन्न ब्रह्मतत्त्व वेत्तीति तत्त्ववित् सन्यासी दशेन्द्रियदशप्राणान्त करणचतुष्टयत तत्तच्चेष्टायोग्यकाले रूपाणि पश्यन् शब्दान् शृण्वन् शीतोष्णादीन्स्पृशन् गन्धान् जिघ्रन् अन्नरसानश्नन् पन्थान गच्छन् पुरीतति सर्वेन्द्रियोपरमलक्षणा निद्रा स्वपन् उच्छ्वासनिश्वासभेदेन श्वसन् उच्चावचानि वचनानि प्रलपन् मूत्रादिक विसृजन् वस्तुजात गृह्णन् उन्मिषन्निमिषन् उन्मेषनिमेषणादिक कुर्वन्नप्येवमिन्द्रियाणीन्द्रियार्थेषु स्वभावतो वर्तन्त इति धारयन् सर्वा प्रवृत्तिरिन्द्रियाणामेव नाह किंचिदपि कर्म करोमि इति मन्येत मन्यत इत्यर्थः । न च 'कुर्वन्नपि न लिप्यते' इति विरुद्धमुच्यत इति वाच्यम् । कर्मठविलक्षणत्वात् इन्द्रियाणि स्वार्थेषु स्वभावत प्रवृत्तान्यपि तदज्ञानात् तत्तादात्म्यमेत्य अहमेव सर्व करोमीति यो ऽभिमन्यते तस्यैवोच्चावचकर्मलेप. स्यात् तद्विपरीतस्य ब्रह्मात्मनिष्ठस्येन्द्रियेन्द्रियार्थात्मात्मी-

याभिमानविकलत्वेन कर्मलेपाभावात् न किंचिद्विरुद्धमित्यर्थ । यथा मृगतृष्णिकातत्त्वज्ञ तृषितो ऽपि जलबुद्ध्या ता पातु न प्रवर्तते तथैव सर्वत्राकर्म प्रत्यगभिन्न ब्रह्म पश्यत सर्वकर्मसन्यास एवाधिकारध्रौव्यात् सो ऽय विद्वान् कदाचिदपि न कर्मसु प्रवर्तते निवर्तते वेति भाव । 'मिथ्यामनोजृम्भितकर्मजाले न मे प्रवृत्तिर्न च मे निवृत्ति ' इति नैष्कर्म्यसिद्धिकारैरुक्तत्वात् ॥ ८, ९ ॥

य स्वय कर्मठो ऽपि ज्ञानीव कर्माचरति सो ऽपि न लिप्यत इत्याह—

ब्रह्मण्याधाय कर्माणि सङ्गं त्यक्त्वा करोति यः ।
लिप्यते न स पापेन पद्मपत्रमिवाम्भसा ॥ १० ॥

ब्रह्मणीति । स्वाम्यर्थ भृत्यवत् य कर्मठ परमेश्वराराधनार्थमेव सर्वं कर्म करोमीति ब्रह्मणि मन समाधाय मोक्षफले ऽपि सङ्ग त्यक्त्वा सर्वाणि कर्माणि करोति सो ऽयमम्भसा पद्मपत्रमिव पुण्यपापतन्मिश्रकर्मणा ज्ञानीव न लिप्यते । मत्प्रसादलब्धज्ञानतो निर्लेपो भवतीत्यर्थ ॥ १० ॥

निष्कामकर्मानुष्ठातु कर्मबन्धनाभावे शिष्टाचार प्रमाणयति—

कायेन मनसा वाचा केवलैरिन्द्रियैरपि ।
योगिनः कर्म कुर्वन्ति सङ्गं त्यक्त्वा ऽऽत्मशुद्धये ॥ ११ ॥

कायेनेति । निष्कामकर्मानुष्ठातारो ये योगिन ते सर्वे केवलेन कायेन युक्ताहारविहारत स्वाधीनेन केवलेन मनसा कर्मफलसंकल्पकामाकुण्ठितेन केवलया वाचा परमेश्वरभजन विना नान्यप्रलपनासक्तया स्वार्थ-

पराङ्मुखत्वेन केवलै ज्ञानकर्मेन्द्रियैरपि, आत्मा ऽऽन्त करणम्, तच्छुद्धये नानाविधकर्मफलसङ्ग त्यक्त्वा नित्यनैमित्तिकादि कर्म कुर्वन्ति ॥ ११ ॥

येनैव कर्मणा कश्चिद्बध्यते तेनैव कर्मणा कश्चिन्मुच्यत इत्यत्र कर्मफलसङ्गासङ्गनिष्ठौ बन्धमोक्षावित्याह—

युक्तः कर्मफलं त्यक्त्वा शान्तिमाप्नोति नैष्ठिकीम् ।
अयुक्तः कामकारेण फले सक्तो निबध्यते ॥ १२ ॥

युक्त इति । ईश्वराराधनार्थमिद कर्म न मे तत्फलभोगायेति धिया युक्त समाहितो योगी कर्मफलसङ्ग त्यक्त्वा नित्यादि कर्म कुर्वन् तदुदिता चित्तशुद्धि प्राप्य ज्ञानद्वारा नैष्कर्म्यप्रभवत्वात् नैष्ठिकीमविद्याद्वयतत्कार्यशान्ति कैवल्यमुक्तिमाप्नोति ।

'तपसा प्राप्यते सत्त्व सत्त्वात्सप्राप्यते मन ।
मनसा प्राप्यते ह्यात्मा चात्मापत्त्या निवर्तते ॥'

इति श्रुते । अन्वयमुक्त्वा व्यतिरेकमाह—अयुक्त इति । कामस्य कर्मफलाभिलाषस्य करण कामकार., तेन कामकारेण स्वच्छन्दत सर्वोत्तमेन मया कर्तव्य कर्म भोक्तव्य तत्फलमिति निश्चित्य तत्साधनीभूतकर्मानुष्ठानेन तत्फलमवश्य साधयामीति कुबुद्धिमानयुक्त मम पशुपुत्रस्वर्गादिफलायेद कर्म करोमीति तत्फले ऽतीव सक्तो निबध्यते, यथा पशु तृणेच्छया बध्यते तथा ऽय कर्मठ फल्गुकर्मफलेच्छया बध्यते । यत एवमत त्व युक्तो भव सदेत्यर्थ ॥ १२ ॥

चित्तशुद्धिविकलस्यैव तावत्केवलकर्मसन्यासात्कर्मयोगो विशिष्यत इत्युक्त्वा विशुद्धचित्तस्य सर्वसन्यास एव श्रेष्ठ इत्युपदिशति—

सर्वकर्माणि मनसा संन्यस्यास्ते सुखं वशी ।
नवद्वारे पुरे देहे नैव कुर्वन्न कारयन् ॥ १३ ॥

सर्वेति । वशीकृतकरणग्रामत्वात् वशी ज्ञानी कृतकृत्य इत्यर्थ । कृतकृत्यत्वे ऽपि स्वरूपाच्युतये किंचित्कर्म कर्तव्य स्यादिति तत्राह—सन्यस्येति । नित्यनैमित्तिककाम्यप्रतिषिद्धात्मकानि सर्वाणि कर्माणि सन्यस्य नि शेष परित्यज्य खलु ज्ञानी कृतकृत्यपद गत । कृतकृत्यत्व नाम कालत्रये ऽप्यच्युतब्रह्मात्मभावारूढत्वम्, तद्वत स्वरूपच्युतेरसभवात् । केन सन्यसितव्यानि कर्माणीति तत्राह—मनसेति । कर्मादावकर्मादिदर्शनयोग्येनेत्यर्थ । न च मनसा सन्यस्येति विशेषणात् मानसानामेव सर्वकर्मणा सन्यासो न वाक्कायाधीनकर्मणामिति वाच्यम् । वाक्कायव्यापाराणा मानसव्यापाराधीनत्वात् मनोव्यापाराभावे वाक्कायव्यापाराणामुपरमात 'मनसैवानुद्रष्टव्यम्' 'नेह नाना ऽस्ति किंचन' इत्यादिश्रुते । किं च सर्व कर्माणीत्यत्र मनोवाक्कायकर्मणामुपलक्षणार्थत्वात् तत्र सकोचे मानाभावात् सर्वाणि मानसवाचिककायिककर्माणि संन्यस्येत्यर्थ । स्वेन सर्वकर्माणि सन्यस्तान्यपि लोकसग्रहार्थं कर्म कर्तव्यमिति तत्राह—नेति । अविद्याऽवस्थायामेव हि कर्माणि चोद्यन्त न विद्याऽवस्थायाम्, विदुषो ऽविद्याद्वयतत्कार्यग्रासब्रह्मात्मनिष्ठत्वात् तादृशस्य स्वभिन्नलोकतत्सग्रहनिमित्तभेदधिषणाऽभावात् किंचिदपि कर्म नैव कुर्वन्नित्यर्थ । वान्ताशनमूत्रपुरीषादिवत् सर्वकर्माणि सन्यस्य पुनस्तत्प्रवृत्तेरयुक्तत्वात् तथा ऽपि कृतार्थत्वबुद्ध्या स्वय कर्माकुर्वन्नकृतार्थैं कर्माणि कारयितव्यानीति तत्राह—नेति । परैरपि कर्माणि न कारयन्नुदास्त इत्यर्थ । अह कृतार्थो ऽयमकृतार्थ इति धीरविदुष्युपपद्यते न विदुषि तस्य स्वव्यतिरेकेण कृतार्थाकृतार्थभिदामूलाज्ञानाभावात् । तथा च श्रुति.—

'आशीर्युक्तानि कर्माणि हिंसायुक्तानि यानि च ।
लोकसंग्रहयुक्तानि नैव कुर्यान्न कारयेत् ॥
प्रतिग्रहं न गृह्णीयान्नैव चान्यं प्रदापयेत् ।
प्रेरयेद्वा तथा भिक्षुः स्वप्ने ऽपि न कदाचन ॥'

इति । एवं भगवदुक्तसर्वकर्मसंन्यासस्य मरिष्यतो विना जीवतः पुरुषस्यासंभवात् सर्वकर्मसंन्यासच्छलेन मरणमेव स्यादिति तत्राह—आस्त इति । ज्ञानपूर्वकसर्वकर्मसंन्यासात्प्राग्जीवन्मृतो ऽपि श्रुत्याचार्यप्रसादोत्थविवेकवैराग्यसंजीविस्पर्शनमात्रेण सुप्तोत्थित इव जीवन् स्वमरणहेतुं कर्म निर्मूलं संन्यस्यास्ते वर्तत एवेत्यर्थः । एवंभूतो विद्वान् क्वासनमर्हतीत्यपेक्षायां तदधिकरणं निर्दिशति—देह इति । 'सप्त वै शीर्षण्याः प्राणा द्वाववाञ्चौ' इति श्रोत्रादिमूत्रद्वारान्तनवद्वारोपेते अनेकद्वारतत्पालोपेतपुरसदृशे स्थूलदेहे किमज्ञ इव तत्रात्मात्मीयाभिमानेनास्ते, तत्राह—सुखमिति । आध्यात्मिकादितापत्रयप्रयुक्तनानाविधदुःखविधुरः सन् ब्रह्मात्मैक्यसुखस्वरूपेण देहादावात्मत्वात्मीयत्वाभिमानमपि संन्यस्य सुखमास्ते षड्भावविकाराणामाध्यात्मिकादिदुःखानां च देहनिष्ठत्वात् ज्ञानिनस्तावत् सच्चिदानन्दावृतिशून्यत्वेन देहत्रयविलक्षणत्वात् सर्वकर्मसंन्यासे ऽपि ज्ञानी सर्वत्र सर्वदा ऽऽस्त इत्युक्तिः निरङ्कुशा स्यादित्यर्थः ॥ १३ ॥

'एष ह्येव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषते, एष ह्येवासाधु कर्म कारयति तं यमेभ्यो लोकेभ्यो ऽधो निनीषते' इत्यादिश्रुतिप्रकटितनिरङ्कुशस्वतन्त्रेण परमेश्वरेणास्वतन्त्रो जीवः शुभाशुभफलप्रदकर्मसु प्रवर्त्यते निवर्त्यते वा स्वातन्त्र्येण न स्वयं कर्म कर्तुं त्युक्तुं वा

पारयति, तथा सतीश्वरस्यैव जीवकोटिभि शुभाशुभकर्मकारयितृत्वेन राग-द्वेषप्रयुक्तपुण्यपापसबन्धादनीश्वरत्वमनिवार्यमित्यत आह—नेति द्वाभ्याम्।

न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुः।
न कर्मफलसंयोगं स्वभावस्तु प्रवर्तते ॥ १४ ॥

नेति। प्रत्यगभेदेन स्वे महिम्नि भवतीत्युत्तम पुरुष प्रभु परमात्मा। अनाद्यविद्यावासनाऽनुरोधेन प्रवृत्तिशील लोकमुद्दिश्य कुर्विति कर्तृत्व न सृजति। कर्तृहेतुताऽभावे ऽपि कर्महेतुता स्यादिति तत्राह—नेति। शास्त्रीयाशास्त्रीयनित्यादिकर्माणि रथशकटप्रासादादीनि ईप्सिततमान्यन्यानि च कर्माणि न सृजति। कर्तृकर्महेतुताऽभावेपि कर्मफलसयोगहेतुता स्यादित्यत आह—नेति। शास्त्रीयादिकर्म कर्तु विचित्ररथशकटप्रासादादि कर्म कर्तु लोकस्य तत्फलसयोग च न सृजति कर्तृकर्मतत्फलसयोगाश्च नोत्पादयतीत्यर्थ। तर्हि कथ लोक कुर्वन् कारयश्च प्रवर्तत इति तत्राह—स्वभाव इति। अविद्याद्वयलक्षणप्रकृते स्वभावस्तु स्वाज्ञाना प्रवर्तकत्वादिरूपेण प्रवर्तते। प्रवृत्तिनिवृत्त्यो स्वाज्ञस्वज्ञस्वभावनिष्ठत्वेनेश्वरस्य स्वेतरवस्तुशून्यत्वेन रागद्वेषतदुत्थपापपुण्यतत्सबन्धवैरल्यादीश्वरत्व निरङ्कुशमित्यर्थ। 'एष ह्येव' इति श्रुते का गतिरिति चेदुच्यते। स्वाविद्यानिष्ठकर्तृत्वादिक स्वस्मिन्नारोप्य मोमुह्यमानजीवबृन्दानुकम्पया हे जीवबृन्द! न त्व कर्तृ कारयितृ वा। तूलाविद्यापरवशत्वेनास्वतन्त्रत्वादीश्वरस्य कर्तृत्व कारयितृत्वमुपपद्यते, स्ववशीकृताविद्याद्वयत्वात् स्वबन्धमोचने यतस्त्वमनीश्वरमत तन्निरासाय सर्वकर्तार सर्वकारयितार परमेश्वर भज, तद्भजनेन विशुद्धचित्त सत्तद्भावज्ञान प्राप्य तद्रूप भवसि। तज्ज्ञाने जाते कर्तृत्वादिकं त्वय्यपि सेद्धुं न पारयति। कदा ऽपि कर्तृत्वादिदोषास्पृष्टे प्रत्य-

गभिन्ने परमेश्वरे तत्कथ सभवति? तस्मान्मायामात्र कर्तृत्वादिकम्, न परमार्थतो ऽस्तीति बोधयितुम् 'एष ह्येव' इति दयावती कौषीतकी श्रुति प्रवृत्ता। नेश्वरे कारयितृत्वादिप्रतिपादनार्थमित्यर्थ ॥ १४ ॥

अस्त्वेवमीश्वरे न्यस्तभारस्यानुग्रहार्थं तत्कृत पाप पुण्य वेश्वर स्वीकरोतीति तत्राह—

नादत्ते कस्यचित्पापं न चैव सुकृतं विभुः।
अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः ॥ १५ ॥

नेति। सर्वव्यापकत्वाद्विभु परमेश्वर सर्वत्र प्रयोजको ऽपि सन् कस्यचिद्भक्तस्य पाप सुकृत वा नादत्ते न चैव स्वीकरोति, आप्तकामत्वे सत्यनादिमायया तत्तत्प्राणिपूर्वकर्मानुसारेण प्रवर्तकत्वात्। ननु भक्ताननुगृह्णात्यभक्तान्निगृह्णातीति सर्वत्र प्रसिद्ध्या ऽस्य विषमबुद्धित्वेन कथमाप्तकामतेति तत्राह—अज्ञानेनेति। सर्वत्र भेदविषयास्पदेन स्वाज्ञानेनावृतमाच्छादितं कबलितमित्यर्थ। किमित्यपेक्षायामाह—ज्ञानमिति। 'स यश्चाय पुरुषे, यश्चासावादित्ये, स एक[1]।' 'सत्यमात्मा ब्रह्मैव ब्रह्मात्मैव, अत्र ह्येव न विचिकित्स्यम्।' 'सम प्लुषिणा समो मशकेन समो नागेन सम एभिस्त्रिभिर्लोकै समो ऽनेन सर्वेण[2]' इत्यादिश्रुतिप्रसिद्धप्रत्यगभिन्नब्रह्मज्ञान निरावृतमप्यज्ञानेनावृतवद्भातीत्यर्थ। तेन मिथ्याभूतेन स्वज्ञानावरणेन गाढ समावृता सन्तो जन्तव परमेश्वर स्वभक्ताननुगृह्णात्यभक्तान्निगृह्णातीत्येवमादि सर्वसाम्यपरमाद्वैतत्वेन प्रसिद्धे वासुदेवे मयि वैषम्यादि परिकल्प्य

तदनुरोधेनात्मनि करोमि कारयामि इत्यादि च कल्पयित्वा मुह्यन्ति महामोहनिद्रामनुभवन्तीत्यर्थ ॥ १५ ॥

सर्वेषा जन्तूनामज्ञानावृतत्वेन ससारानिवृत्त्या तन्निवर्तकशास्त्रवैय्यर्थ्यं स्यादिति तत्राह—

ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः ।
तेषामादित्यवज्ज्ञानं प्रकाशयति तत्परम् ॥ १६ ॥

ज्ञानेनेति । जन्तव पूर्वोक्तरीत्या येनाज्ञानेनावृता सन्तो मुह्यन्ति तदज्ञान येषा जन्तूना प्रत्यगभिन्नब्रह्मज्ञानेन नाशित भवति । यद्वच्चक्षुष्मतामादित्य स्वोदयसमकालमेव समस्तज्ञेयावरणमुद्धाट्य ज्ञेयजात प्रकाशयति तद्वत्तेषा जन्तूना मदाराधनलक्षणनिष्कामकर्मानुष्ठानजनितचित्तशुद्धिगम्यप्रत्यगभिन्नब्रह्मज्ञान स्वोदयसमकालमेव स्वाज्ञान निर्मूल्य तत्पर स्वेतरभिदाऽसहसत्तासामान्यब्रह्मस्वरूप प्रकाशयति । तस्मात् स्वाज्ञानप्रभवससारनिवर्तकनिष्ठाद्वयगोचरस्य शास्त्रस्य न वैय्यर्थ्यमित्यर्थ ॥ १६ ॥

एवंभूतब्रह्मात्मैक्यज्ञानिना परमफलं प्रकटयति—

तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणाः ।
गच्छन्त्यपुनरावृत्तिं ज्ञाननिर्धूतकल्मषाः ॥ १७ ॥

तदिति । येषा तज्ज्ञानेनातज्ज्ञान नाशित ते कीदृशा इति तत्राह—तद्बुद्धय इति । तस्मिन् प्रत्यक्तत्त्वाभिन्ने परतत्त्वे स्वान्तर्बाह्यविलसितविषयजातविमुखीकरणतो ऽसकृदनुष्ठितश्रवणमनननिदिध्यासनाविर्भूताखण्डाकारवृत्त्यात्मिका बुद्धिर्येषा ते तद्बुद्धयः । बोद्धृबोद्धव्यजीवपरयोर्भेदाद-

खण्डाकारात्मिका तद्बुद्धि कथमुदेतीत्यत आह—तदात्मान इति । बोद्धृ-बोद्धव्यरूपजीवपरकल्पनाया स्वाज्ञानविजृम्भितत्वेन मिथ्यात्वात् तत्परत्वेन विभातपरमात्माभेदेन प्रत्यगात्मा येषा ते तदात्मान देहादावात्मत्वात्मीयत्वा-भिमानमुत्पाद्य तद्विपरीतब्रह्मात्मना ऽवस्थातुमशक्यत्वात्तदात्मत्व कथमिति तत्राह—तन्निष्ठा इति । स्वभावकबलिताविद्याद्वयतत्कार्यजाते तस्मिन्नेव ब्रह्मणि पर्यवसानत्वेन निष्ठा तात्पर्यं येषा ते तन्निष्ठा । पुरुषार्थान्तरापेक्षात प्रतिपन्नान्तरायाणा तन्निष्ठता कथ संभवतीत्यपेक्षायामाह—तत्परायणा इति । मुमुक्षुत्वदशायामेव पुरुषार्थान्तरबुद्धे प्रहाणत तत्कृतान्तरायाभाव-ध्रौव्यात् तदेव परमयन परायण कैवल्य येषा ते तत्परायणा । कर्मत्रयकल्म-षवता तत्परायणत्व कथमिति तत्राह—ज्ञानेति । सम्यग्ज्ञानोदकेन निर्धूत क्षालित कर्मत्रयकल्मषो येषा ते ज्ञाननिर्धूतकल्मषा कर्मत्रयातीतब्रह्मनिष्ठा सन्यासिन इत्यर्थ । ते कि फल प्राप्नुवन्तीत्यत्राह—अपुनरिति । पुनरा-वृत्तिहेत्वज्ञानाभावादपुनरावृत्तिलक्षणा विदेहमुक्ति गच्छन्ति । सत्तासामान्य-रूपा भवन्तीत्यर्थः ॥ १७ ॥

कीदृग्भूता सन्यासिनो विदेहमुक्ति गच्छन्तीत्यत्र समदर्शिन इत्याह---

विद्याविनयसंपन्ने ब्राह्मणे गवि हस्तिनि ।
शुनि चैव श्वपाके च पण्डिताः समदर्शिनः ॥ १८ ॥

विद्येति । विद्या स्वात्मविद्या च विनय शमादिश्च, ताभ्या सपन्ने शुद्धसत्त्वप्रधाने सर्वोत्तमे ब्राह्मणे रज प्रधानत्वेन सर्वसस्काररहिताया मध्यमाया गवि च तम प्रधानत्वेनाधमे हस्तिनि च स्मर्तु द्रष्टु वक्तु स्प्रष्टु-मयोग्यत्वेनाधमाधमे शुनि चैव श्वपाके च सत्त्वादिप्रधानब्राह्मणादिदेहेषु

उत्तमादिभाव गतेष्वपि तद्गतगुणदोषास्पृष्टत्वेन सर्वसम प्रत्यगभिन्न ब्रह्म द्रष्टु शील येषा ते समदर्शिनो ज्ञानिन इत्यर्थ. । युक्तायुक्तविवेकविकलत्वात् तेषा पाण्डित्यं दुर्लभमिति तत्राह—पण्डिता इति । सर्वकर्मसन्यासेन साक युक्तायुक्तविवेकास्पदविषमबुद्धे सन्यस्तत्वादेव वैषम्यविपरीतसाम्यदर्शनमेव हि पाण्डित्यम् । तस्मात् पण्डिता सन्यासिन एवापुनरावृत्तिलक्षण कैवल्य गच्छन्तीत्यर्थ ॥ १८ ॥

'पण्डिता समदर्शिन' इति यदुक्त तत्तुच्छम् । उत्तममध्यमाधमाधमाधमसमदर्शनप्रभवदोषाक्रान्तविवेकत्वात्कथ ते पाण्डित्यमर्हन्तीत्यपेक्षाया ब्राह्मणादिश्वपचान्तगतविषमभावस्य तत्तदुपाधिनिष्ठत्वेनोपाधीना मायिकत्वेन च मिथ्यात्वात्तत्तदुपाध्यवच्छिन्नसत्ताया घटशरावाद्यवच्छिन्नव्योमवदेकरूपत्वेन समत्वात् साम्यब्रह्मणो निर्दोषत्वेन प्रसिद्धत्वादेवभूतसाम्यब्रह्मदर्शिना पाण्डित्य निरङ्कुशमित्याह—

इहैव तैर्जितः सर्गो येषां साम्ये स्थितं मनः ।
निर्दोषं हि समं ब्रह्म तस्माद्ब्रह्मणि ते स्थिताः ॥ १९ ॥

इहेति । सर्वान्तर्यामित्वेन सर्वाधिष्ठानत्वेन सर्वविलक्षणत्वेन च समभावमापन्ने साम्ये ब्रह्मणि येषा समदर्शनपण्डिताना मन स्थित साम्यब्रह्मभावापन्न तै. समदर्शनपण्डितै इह वर्तमाने देह एव सृज्यत इति सर्ग. जन्मादि ससारो जितो मिथ्याऽऽत्मदृष्ट्या निरस्तो भवति । हि यस्मादुक्त लक्षणं साम्य ब्रह्म निर्दोष तस्मात्ते सर्वदोषरहितसाम्यब्रह्मात्मदर्शनपण्डिता प्रत्यग्दृष्ट्या कवलितविषमभावे परब्रह्मणि तद्भावमापद्य स्थिता , अत एव निर्दुष्टाः पण्डिता इत्यर्थः ॥ १९ ॥

साम्यब्रह्मभावापन्नपण्डितलक्षणमाह—

न प्रहृष्येत्प्रियं प्राप्य नोद्विजेत्प्राप्य चाप्रियम् ।
स्थिरबुद्धिरसंमूढो ब्रह्मविद्ब्रह्मणि स्थितः ॥ २० ॥

नेति । बुद्धेरस्थिरविषयगताया स्थिरतावैरल्यात् तद्गत स्थिरता कथमिति तत्राह—स्थिरेति । सर्वभूतेषूपाधितारतम्यतो विषमेष्वपि तद्विकारास्पृष्टत्वेन साम्य निर्दोष प्रत्यगभिन्न ब्रह्माहमस्मीति स्थिरा बुद्धिर्यस्य सो ऽय स्थिरबुद्धि , अखण्डाकारबुद्धिवृत्तिकबलितचलविषयगतबुद्धिवृत्तित्वात् स्वाज्ञानावृतस्य ब्रह्मात्मविषयकस्थिरबुद्धिता वा कथमिति तत्राह—असमूढ इति । स्वाज्ञानेन समूढ आवृतो न भवतीत्यसमूढो निरावृत इत्यर्थ । स्वज्ञानप्रलयकालाग्निप्रचण्डज्वालया स्वावारकाज्ञानसान्द्रपटस्य भस्मीकृतत्वात् स्वभेदेन घटवदसाक्षात्कृतब्रह्मतत्त्वस्यासमूढता कथमिति तत्राह—ब्रह्मविदिति । स्वभेदेन ब्रह्मविच्चेत् समूढो भवेत् । तद्विपरीतत्वेनायमसमूढ सन् स्वाभेदेन ब्रह्मतत्त्व वेत्तीति ब्रह्मवित् । स कुत्रासनमर्हतीति तत्राह—ब्रह्मणीति । प्रत्यगभिन्ने ब्रह्मणि स्थित तद्भावमापन्न इत्यर्थ । प्रियाप्रिययो सतोस्तद्गतहर्षविषादयो दुस्त्यजत्वेन कथ योगी ब्रह्मभावमेतीति तत्राह—नेति । एवभूतो ज्ञाननिष्ठ सन्यासी प्रियमिष्ट स्वादुभक्षण प्राप्य न प्रहृष्येदप्रियमनिष्टमस्वादुभक्षण प्राप्य प्रदातार नोद्विजेत् देहाभिमानिनामेव प्रियाप्रिये हर्षविषादौ प्रयच्छत , तद्विपरीतकेवलात्मदर्शिन प्रियाप्रियप्राप्तिहेतुदेहाभिमानाभावाद्विद्वान्निरङ्कुश ब्रह्मभावमाप्नोतीत्यर्थ ॥ २० ॥

बाह्येष्टानिष्टविषयेषु यावद्यावद्रागद्वेषावरण विशीर्यते तावत्तावन्निरावृतप्रत्यगभिन्नब्रह्मसुखाविर्भावो ऽतिरिच्यत इत्याह—

बाह्यस्पर्शेष्वसक्तात्मा विन्दत्यात्मनि यत्सुखम् ।
स ब्रह्मयोगयुक्तात्मा सुखमक्षय्यमश्नुते ॥ २१ ॥

बाह्येति । इन्द्रियापेक्षया बाह्याश्च स्पृश्यन्त इति स्पर्शा. शब्दादिविषयाश्च तेषु बाह्यस्पर्शेषु सक्ति न करोतीत्यसक्त पराङ्मुख आत्मा ऽन्तःकरण यस्य सो ऽयमसक्तात्मा शब्दादिविषयपराङ्मुख सन् आत्मन्यन्त -करणे तद्भाभावाभावप्रकाशकप्रत्यगभिन्नपरमात्मभावापन्ने यदपरिच्छिन्नं सुख विन्दति लभते,

‘समाधिनिर्धूतमलस्य चेतसो निवेशितस्यात्मनि यत्सुख भवेत् ।
न शक्यते वर्णयितु गिरा तदा स्वय तदन्त करणेन गृह्यते ॥’

इति श्रुते । यो यत्सुखं प्राप्य कदाचिदपि न बाह्यमान्तर वा जानाति सो ऽय ब्रह्मात्मनिष्ठ सन्यासी तत्सुखस्वरूपप्रत्यगभिन्नब्रह्मणि योगो निर्विकल्पसमाधि तेन युक्त तद्भावापन्न आत्मा ऽन्त करण यस्य स ब्रह्मयोगयुक्तात्मा सन्नक्षय्यमपरिच्छिन्न प्रत्यक्परचिदैक्यसुखमश्नुते शब्दादिविषयसुखस्य क्षणिकत्वेनाक्षयसुखार्थिनेष्टानिष्टविषयकरागद्वेषावरणोद्घाटनाय स्वार्थेभ्य इन्द्रियाणि निग्रहीतव्यानीत्यर्थ ॥ २१ ॥

यतो बाह्यान्तरिन्द्रियद्वयविजृम्भितविषयद्वयविमुखस्याक्षयसुखावाप्तिर्दर्शिता वैषयिकसुखानामाद्यन्तवत्त्वेन प्रसिद्धत्वादत तेषु रमण न कार्यमित्याह—

ये हि संस्पर्शजा भोगा दुःखयोनय एव ते ।
आद्यन्तवन्तः कौन्तेय न तेषु रमते बुधः ॥ २२

ये हीति । हे कौन्तेय ! हि यस्मात्कारणात् इन्द्रियेन्द्रियार्थसंस्पर्शतो जाता ये शब्दस्पर्शादिभोगा विषया तेषा भोगकाले ऽपि परस्परस्पर्धाऽसूयादिव्यासत्वादपारदु खत्वमेव योनि कारण येषा ते दु खयोनय ते भवन्ति, तदासक्तचेतसांमिहामुत्र च दु खपरपराया अनिवार्यत्वेन दु खयोनय एव । एवकारत स्वान्तर्बाह्यविजृम्भितेन्द्रियद्वयेन विषययुग्मपरायणलक्षणसंसारदशायामपि न सुखगन्धो ऽस्तीति द्योत्यते । न केवल दु खयोनयो विषयभोगा कि त्वाद्यन्तवन्तश्च इन्द्रियेन्द्रियार्थसंयोगो भोगानामादि तद्वियोगो ऽन्तश्च तद्वन्त । मध्यमक्षणभावित्वेन क्षणभङ्गुरत्वात् बुद्धिपूर्वकारिणा सदोपेक्षणीया भोगा इत्याह—नेति । ब्रह्मात्मरत्यावरणभोगेष्ववगतपरमार्थतत्त्वो बुधो न रमते । शवालिङ्गनादपि जुगुप्सत इत्यर्थ ॥ २२ ॥

बुधत्वप्रापकज्ञानप्रतिबन्धककामक्रोधादिवेगस्य सोढुमशक्यत्वेन बुधत्वानुपपत्त्या तत्प्राप्यकैवल्यस्य दुष्प्रापत्वाद्यत एवमत कैवल्यहेतुबुधत्वप्रतियोगिकामक्रोधवेग कुण्ठनीय इत्याह—–

शक्नोतीहैव यः सोढुं प्राक्शरीरविमोक्षणात् ।
कामक्रोधोद्भवं वेगं स युक्तः स सुखी नरः ॥ २३ ॥

शक्नोतीति । इन्द्रियद्वयगोचरेष्टविषयस्मरणश्रवणदर्शनादितृष्णैव काम , तद्विपरीतत्वेनानिष्टविषयदर्शनश्रवणाद्यसहिष्णुतैव क्रोध , ताभ्या कामक्रोधाभ्यामुद्भवो यस्य वेगस्य तं कामक्रोधोद्भव वेग मनोनेत्राद्युत्कटक्षोभकारणम् । कामेन वेगितो मातरमप्यभिलषति । तथैव क्रोधवेगित पितर हन्तुमारभते । एव कामादिवेगस्य दुर्निवारता प्रसिद्धा । अत स्वशरीरविमोक्षणात् पतनात् प्रागिहैव कामक्रोधोद्भववेगसमय एव यः सोढु शक्नोति सो ऽय बुध. प्रत्य-

गभिन्ने ब्रह्मणि युक्तः स्वज्ञानकवलितस्वाज्ञानतत्कार्यकामक्रोधोद्भववेगत्वात् स एवापरिमितसुखी, नेतरः कामक्रोधादिवेगवेगित इत्यर्थः ॥ २३ ॥

ध. कामक्रोधवेगसहिष्णुः ज्ञानी सो ऽप्यन्तर्मुखः सन्मोक्षमेतीत्याह—

यो ऽन्तःसुखो ऽन्तरारामस्तथा ऽन्तर्ज्योतिरेव यः ।
स योगी ब्रह्मनिर्वाणं ब्रह्मभूतो ऽधिगच्छति ॥ २४ ॥

य इति । स्वभाव्यकामादिवृत्तिकलितविषयसुखवैमुख्येनान्तः प्रत्यगात्मन्येव सुखं यस्य स यो ऽयमन्तःसुखः स्वानन्दकवलितवैषयिकसुखत्वात्, तथा तूलाविषागचित्तवनिताऽऽदिरतिं विना ऽन्तः प्रत्यगात्मन्येव रमणं यस्य स यो ऽयमन्तरारामः स्वात्मरतिकवलितललनाऽऽदिरतित्वात् तथा बाह्यनृत्तगीतश्रवणदर्शनं विना ऽन्तः प्रत्यगात्मन्येव ज्योतिर्दृष्टिः दर्शनं यस्य स यो ऽयमन्तर्ज्योतिः प्रत्यग्दृष्टिकवलितपराग्दृष्टित्वात्, अन्तःसुखान्तरारामान्तर्ज्योतिषामन्तर्मुखः कः इत्यपेक्षायां यो ऽन्तःसुखः सो ऽन्तरारामो यो ऽन्तरारामः सो ऽन्तर्ज्योतिर्यो ऽन्तर्ज्योतिः सो ऽन्तर्मुखो योगी प्रत्यगभिन्नत्वेन भूतः सिद्धः ब्रह्माहमस्मीति ब्रह्मभूतः सन् जीवन्नेव ब्रह्मात्मरूपेणावस्थानं ब्रह्मनिर्वाणं निरतिशयानन्दलक्षणं विदेहकैवल्यमधिगच्छति, कृतकृत्यो भवतीत्यर्थः ॥ २४ ॥

लोके तावत्के ऽपि ब्रह्मनिर्वाणं न लभन्ते तदुचितसाधनवैकल्यादित्यपेक्षायामुपात्तदुरितक्षयद्वारा चित्तशुद्धिहेतुनिष्कामकर्मानुष्ठानपरिपाकतः सन्न्यस्य वेदान्तश्रवणादिसिद्धज्ञानविज्ञानादिसाधनपौष्कल्यवता मुक्तिरयत्नसिद्धा स्यादित्यत्राह—

लभन्ते ब्रह्मनिर्वाणमृषयः क्षीणकल्मषाः ।
छिन्नद्वैधा यतात्मानः सर्वभूतहिते रताः ॥ २५ ॥

लभन्त इति । ज्ञानप्रतिबन्धकस्य कल्मषस्य जागरूकत्वेन कथ विद्वासो ब्रह्मनिर्वाणमर्हन्तीति तत्राह—क्षीणेति । सम्यग्ज्ञानप्रतिबन्धक कल्मषं येषा ब्रह्माहमस्मीति चिरभावनया क्षीण ते क्षीणकल्मषा । तत्र सशयवता कल्मष-निवृत्ति· कथमिति तत्राह—छिन्नेति । वेदान्तश्रवणासिभि· छिन्नं द्वैधं संशय येषा ते च्छिन्नद्वैधा । अनियतात्मना सशयनिवृत्ति कथमिति तत्राह—यतेति । यतो नियत आत्मा कार्यकरणसघातो येषा ते यता-त्मान । सर्वभूताहितकारिणा यतात्मता कुत इति तत्राह— सर्वेति । स्वात्मत्वेन सर्वेषा ब्रह्मादिस्तम्बान्ताना भूताना यद्धित तदेवाचारन्तीति सर्व-भूतहिते रता । एव विशेषणविशिष्टा क इति तत्राह—ऋषय इति । सर्वत्र निर्भया सन्तः ऋषन्त्यटन्तीति सम्यग्दर्शनसपन्ना ऋषय संन्यासिनो ब्रह्मा-त्मनिष्ठा इत्यर्थ । ते किं लभन्त इति तत्राह—ब्रह्मेति । त एव ब्रह्म-निर्वाण कैवल्य लभन्त इत्यर्थ ॥ २५ ॥

उक्तविशेषणविशिष्टत्वेन कामक्रोधवेगकुण्ठनकारिणामृषीणामपि देह-पतनानन्तरमेव कैवल्यावाप्ति नार्वागित्येव प्राप्ते तत्रोच्यते—

कामक्रोधवियुक्तानां यतीनां यतचेतसाम् ।
अभितो ब्रह्मनिर्वाणं वर्तते विदितात्मनाम् ॥ २६ ॥

कामेति । यतीना परमहंसपरिव्राजकशिखामणीनाम् अभित उभ-यथा ऽपि स्वशरीरे स्थिते मृते वा स्वेतरातत्प्रपञ्चारोपापवादविभ्रमातीतत्वेन प्रसिद्ध ब्रह्मनिर्वाण विदेहकैवल्य वर्तते नेतरेषामित्यर्थ । अनियतचेतसा यतित्वानुपपत्त्या तत्प्राप्यब्रह्मनिर्वाण कथमिति तत्राह—यतेति । स्वेतर-

विषयतो यत निगृहीत चेतो येषा तेषा यतचेतसा यतित्व निरङ्कुश-मित्यर्थ । कामक्रोधयो सतो· यतचेतस्त्व कुत इति तत्राह—कामेति । रागमूल कामश्च द्वेषमूल क्रोधश्च कामक्रोधौ, ताभ्या वियुक्ताना जीर्णकाम-क्रोधाना न यतचेतस्त्वव्याघात इत्यर्थ । केवलकामक्रोधवेगसहिष्णूना ज्ञानाभावे ऽपि मुक्ति स्यादिति तत्राह—विदितात्मनामिति । ब्रह्मैवाहमह-मेव ब्रह्मेति प्रत्यगभेदेन परमात्मा यैर्विदित नेषा विदितात्मना विदितात्मता-सुदृढसेतुकुण्ठितकामक्रोधवेगानामेव ब्रह्मनिर्वाणावाप्ति, अन्यथा केवलकाम-क्रोधवेगसहिष्णूना मुक्तिलाभे पाषाणादीनामनुत्पन्नकामक्रोधवेगानामपि मुक्तिर्वक्तव्या स्यात्, तस्माद्विदितात्मना यतीनामेवाभितो ब्रह्मनिर्वाणावाप्ति-र्निरङ्कुशेत्यर्थ ॥ २६ ॥

एव विशेषणविशिष्टाना सद्योमुक्ति प्रतिपाद्याथ तादृशाधि-कारविधुराणा मुमुक्षूणा सद्योमुक्तिप्रापकसम्यग्ज्ञानान्तरङ्गसाधनीभूत ध्यान-योगमाह—स्पर्शानिति द्वाभ्याम् ।

स्पर्शान्कृत्वा बहिर्बाह्यांश्चक्षुश्चैवान्तरे भ्रुवोः ।
प्राणापानौ समौ कृत्वा नासाऽभ्यन्तरचारिणौ ॥ २७ ॥
यतेन्द्रियमनोबुद्धिर्मुनिर्मोक्षपरायणः ।
विगतेच्छाभयक्रोधो यः सदा मुक्त एव सः ॥ २८ ॥

स्पर्शानिति । बाह्या अपि स्पर्शा शब्दादिविषया स्वान्तश्चिन्तिता सन्तो ऽन्त· प्रविशन्ति, अन्तश्चिन्तापरित्यागेन बाह्यस्पर्शान् बहिरेव कृत्वा ऽथ चक्षुर्युग्मनिमीलनान्मनो निद्रातमसि विलीयते, तथोन्मीलने च यथापूर्व बहि प्रचरेत्, उभयविधान्तरायनिकृन्तनायार्धोन्मीलनेन भ्रुवोरन्तरे मनो-वृत्तिकलित चक्षुश्च कृत्वा, भ्रुवोर्मध्ये चक्षुषी निधायेत्यर्थ । उच्छ्वासनि श्वास-

रूपेण नासाबिलयोरभ्यन्तरचारिणौ प्राणापानौ भवत । यथा प्राणो बहिर्न गच्छत्यपानो ऽन्तर्न विशति तथा मन्दोच्छ्वासनिश्वासाभ्या प्राणापानौ समौ निर्व्यापारौ कृत्वा अनेनैवोपायेन यता सयता इन्द्रियमनोबुद्धय यस्य सो ऽय यतेन्द्रियमनोबुद्धि, अह ब्रह्म ब्रह्माहमिति मननशीलो मुनि, अविद्याद्वयतत्कार्यग्रासो यो मोक्ष स एव परमयन पर्यवसान यस्य सो ऽय मोक्षपरायण, विगता इच्छाभयक्रोधा यस्य सो ऽय विगतेच्छाभयक्रोध, एव यो वर्तते सो ऽय यति नित्य सदा स्वदेहे परदृष्ट्या स्थिते मृते वा मुक्त एव भवतीत्यर्थ ॥ २७, २८ ॥

एवं समाहितचित्तेन यज्ज्ञेय ज्ञानानन्तर यत्प्राप्य तद्वदन्नुपसहरति—

भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरम् ।
सुहृदं सर्वभूतानां ज्ञात्वा मां शान्तिमृच्छति ॥२९॥ इति ॥

इति श्रीमद्भगवद्गीता० कर्मसंन्यासयोगो नाम पञ्चमो ऽध्याय ॥

भोक्तारमिति । कर्तृरूपेण देवतारूपेण च यज्ञाना तपसा च भोक्तार सर्वलोकाना महान्तमीश्वर सर्वेषा ब्रह्मादिस्तम्बान्तभूताना सेवामनपेक्ष्य निर्हेतुजातकटाक्षभूषणपरमदयालुत्वेन सुहृद सर्वभूतगुहाशय सर्वकर्मफलप्रदातार सर्वान्तर्यामित्वेन सर्वसाक्षित्वेन सर्वाधिष्ठानत्वेन स्वभावतो निरधिष्ठानसत्तासामान्यब्रह्मरूपत्वेन च वर्तमान मा नारायण प्रत्यगभेदेन ज्ञात्वा ऽविद्याद्वयतत्कार्यशान्ति विदेहमुक्तिम् ऋच्छत्याप्नोति । इतिशब्द अध्यायपरिसमाप्त्यर्थः ॥ २९ ॥

सर्वकर्मत्यज साम्यब्रह्मदर्शनपण्डिता ।
यान्ति यद्ब्रह्मनिर्वाण स मे कैवल्यकारणम् ॥

इति श्रीमद्भगवद्गीतार्थप्रकाशिकाया पञ्चमो ऽध्याय ॥

षष्ठो ऽध्यायः

समभावपरामृष्टयोगारूढस्य लक्षणम् ।
तत्साधनाना सर्वस्व चाह पार्थाय माधव ॥

पञ्चमाध्यायान्ते 'स्पर्शान्कृत्वा बहि' इति श्लोकद्वयेन ध्यानयोगो य सूत्रित तद्वृत्त्यर्थं षष्ठाध्याय आरभ्यते । तत्र शुद्धान्तकरणानामकामिनामेवाधिकारात् तद्विपरीताना कामिना तत्पदारोहाय तद्बहिरङ्गसाधन तै कर्तव्यमिति निष्कामकर्मानुष्ठातार स्तुवन् श्रीभगवानुवाच - अनाश्रित इति द्वाभ्याम् ।

श्रीभगवानुवाच—

अनाश्रितः कर्मफलं कार्यं कर्म करोति यः ।
स संन्यासी च योगी च न निरग्निर्न चाक्रियः ॥ १ ॥

अनाश्रित इति । य कर्मण्यधिकृत कामी श्रौतस्मार्तविहितकर्मफलमनाश्रित सन् स्वेन कार्यं कर्तव्य काम्यकर्म विपरीत नित्यादिकर्म करोति स निष्कामकर्मानुष्ठाता न निरग्नि अग्निसाध्ययज्ञादिकर्मणामपरित्यागात्, न चाक्रिय क्रियासाध्यपूर्तादिकर्मापरित्यागात् साग्नि सक्रिय सन्नपि काम्यकर्मानुष्ठातृभ्यो वरिष्ठ इति सन्यासी च योगी च भवतीति उपचर्यत इत्यर्थ. ॥ १ ॥

वेदशास्त्रपुराणेषु सर्वत्र निरग्नेरक्रियस्यैव सन्यासित्वयोगित्वयो प्रसिद्धत्वेन साग्ने सक्रियस्य कामिन सन्यासित्वयोगित्वे कथमित्यत्र मुख्य-सन्यासित्वाभावे ऽपि गौणसन्यासित्वादिसभवादिति परिहरति—

यं संन्यासमिति प्राहुर्योगं तं विद्धि पाण्डव ।
न ह्यसंन्यस्तसंकल्पो योगी भवति कश्चन ॥ २ ॥

यमिति । हे पाण्डव! वेदशास्त्रपुराणानि भगवति वासुदेवे मयि य सर्वकर्मफलसमर्पण सन्यासमिति प्राहु त निष्कामकर्मानुष्ठानलक्षण योग विद्धि । सन्यासयोगयो साम्यस्य दुर्लभत्वादिति तत्राह — न हीति । हि यस्मात् असन्यस्तकर्मफलविषयकसकल्प कश्चन कश्चिदपि कर्मठो न योगी चित्तसमाधानवान् न भवति, तद्विषयकसकल्पस्य चित्तविक्षेपहेतुत्वात् । तस्मात् सर्वकर्मफलसकल्पस्य सन्यस्तत्वसाम्येन काम्यकर्मानुष्ठातृभ्यो वैशिष्ट्यात् गौण्या वृत्त्या निष्कामकर्मयोगी सन्यासी च योगी च भवतीत्युच्यत इत्यर्थ. ॥ २ ॥

एव निष्कामकर्मयोग स्तुत्वा तस्यावधिमाह—

आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते ।
योगारूढस्य तस्यैव शमः कारणमुच्यते ॥ ३ ॥

आरुरुक्षोरिति । ध्यानयोगे ऽवस्थातुमसमर्थस्यापि ध्यानयोगमारोढुमिच्छो आरुरुक्षो मुनेर्मुमुक्षो, कामिनश्चित्तशुद्ध्यभावात् तदर्थ निष्कामकर्मानुष्ठान योगारूढपदप्राप्त्यै कारण साधनमुच्यते । चित्तशुद्धिपर्यन्तमित्यर्थ । एव साधनपरिपाकवशादुत्पन्नचित्तशुद्धे तस्यैव योगारूढस्य सर्वकर्मसन्यासलक्षण शम सर्वत्रोपरम कारण साधनमुच्यते ।

'यावत्कर्मोपरमते तावच्चित्त विशुध्यति ।
नि शेषकर्मसन्यासाद्योगारूढो भवेन्मुनि ॥'

इति स्मृते ॥ ३ ॥

कदा योगारूढो भवतीत्युच्यते—

यदा हि नेन्द्रियार्थेषु न कर्मस्वनुषज्यते ।
सर्वसंकल्पसंन्यासी योगारूढस्तदोच्यते ॥ ४ ॥

यदेति । यदा यस्मिन्काले ज्ञानकर्मेन्द्रियार्थेषु शब्दादिविषयेषु नित्यनैमित्तिककाम्यप्रतिषिद्धकर्मसु च भोक्तव्यत्वेन कर्तव्यत्वेन च नानुषज्यते न मन्यते, आसक्ति न करोतीत्यर्थ । तदा इहामुत्रार्थविलसितकामहेतुसकल्पान् सन्यसितु शीलमस्येति सर्वसकल्पसन्यासी ध्यानयोगारूढ इत्युच्यते । सर्वसकल्पसन्यासीत्युक्त्या कामस्य सकल्पमूलत्वेन कर्मण काममूलत्वेन च सर्वसकल्पसन्यासमात्रात् तत्कार्यसर्वकामतत्कार्यसर्वकर्मसन्यासो द्योत्यते ।

'काम जानामि ते मूलं संकल्पात्किल जायसे ।
यद्यद्धि कुरुते जन्तुस्तत्तत्कामस्य चेष्टितम् ॥
सकल्पाद्वै भवेत्काम कामात्कर्म भवेद्यत ।
अत सकल्पसत्यागात्तत्कार्यं त्यक्तमेव हि ॥'

इत्यादिस्मृते ॥ ४ ॥

यत सर्वसकल्पसंत्यागमात्रेण मोक्ष तदभावे बन्धो भवत्यत सर्वसकल्पसन्यासेनात्मानमुद्धरेदित्याह—

उद्धरेदात्मनाऽऽत्मानं नात्मानमवसादयेत् ।
आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः ॥ ५ ॥

उद्धरेदिति । आत्मना सर्वसंकल्पभावाभावप्रकाशकप्रत्यग्भावारूढनिर्विकल्पकमनसा सर्वसंकल्पकामकर्मसागरमध्यगतमात्मानं मनः संकल्पादिसंसारादुद्धरेत् । पुनर्यथोक्तलक्षणमात्मानं मनो नावसादयेत् नाधो नयेत् । संसारसागरमध्यगमात्मानं तदीयो बन्धुः संसारादुद्धरिष्यतीति तत्राह—

आत्मैवेति । हि यस्मात्संकल्पादिजुष्टस्यात्मनो मनसः तत्संकल्पोत्थसंसारमोचने स्वयमात्मैव निर्मूलीकृतसंकल्पवृत्तिमन्मनः एव बन्धुः । एवकारात्स्वव्यतिरेकेणात्मनो बन्धुर्नास्तीति द्योत्यते । स्वान्यबन्धवभावे ऽपि स्वातिरिक्तः शत्रुः स्यादिति तत्राह—आत्मैवेति । प्रत्यग्भावारूढस्यात्मनो मनसः पराग्भावारूढ आत्मा मन एव रिपुः । तस्मात्स्वेनैव स्वात्मोद्धर्तव्य इत्यर्थः ॥ ५ ॥

एकस्यैवात्मनो बन्धुत्वं रिपुत्वं च मिथोविरुद्धमित्याशङ्क्य वस्तुत एकत्वे ऽपि पराक्प्रत्यग्भावालम्बनकृतस्य भेदस्य सत्त्वात् बन्धुत्वं रिपुत्वं चाविरोधेनोपपन्नमित्याह—

बन्धुरात्मा ऽऽत्मनस्तस्य येनात्मैवात्मना जितः ।
अनात्मनस्तु शत्रुत्वे वर्तेतात्मैव शत्रुवत् ॥ ६ ॥

बन्धुरिति । तस्यात्मनः कार्यकरणसंघातानुग्राहकमनसः स्वव्यापारपराङ्मुख आत्मा ऽन्तःकरणमेव बन्धुः । बन्धुत्वमेव स्फोरयति—येनेति । येनात्मना प्रत्यग्भावारूढेनान्तःकरणेनात्मैव कार्यकरणानुग्राहकमन एव जितः अतद्व्याप्टतितो व्यावृत्य स्वभावे नियोजितः स्ववशीकृत इत्यर्थः । अनात्मनस्त्ववशीकृतमनसस्तु विषयाकारपरिणतान्तःकरणरूप आत्मैव प्रसिद्धशत्रुवत् शत्रुभावे वर्तेत वर्तते । वशीकृतमनसो निर्विक्षेपत्वेन समाधिसंभवात् तद्विपर्ययस्य तदसंभवाच्च बन्धुत्वादिकं संभवतीत्यर्थः ॥ ६ ॥

कथ पुन सयतान्त करणस्य बन्धुरात्मेति उच्यते—

जितात्मनः प्रशान्तस्य परमात्मा समाहितः।
शीतोष्णसुखदुःखेषु तथा मानापमानयोः॥ ७॥

जितात्मन इति। कार्यकरणसघातानुग्राहकमनोरूप आत्मा येन ब्रह्माकारपरिणतमनसा जितो वशीकृत', तस्य जितात्मन' प्रशान्तस्योपशान्तसकल्पादिवृत्तिमन्मनोरूपस्यात्मन प्रत्यग्भावारूढस्याविद्याद्वयतत्कार्यजातात्परत्वेन तत्सर्वमतति व्याप्नोतीति परमात्मा स्वेन रूपेण समाहित अभिव्यक्तो भवतीत्यर्थ। पूर्वार्धेन जितात्मवन्त सर्वकर्मसन्यासलक्षणज्ञानाधिकारिण निरूप्य तथोत्तरार्धेन योगाङ्गान्युपदिशति—शीतेति। जलवातादिप्रभव शीतमातपाग्न्यादिप्रभवमुष्ण चेष्टविषयज सुख चानिष्टविषयज दु ख च शीतोष्णसुखदु खानि, तेषु शीतोष्णसुखदु खेषु सभाया स्वस्य सर्वोत्तमत्वेन तत्रत्यै प्रशसन पूजन वा मान तद्वैपरीत्येन निन्दन परिभवो वा अपमान तयो, शीतोष्णसुखदु खेषु तुलाविद्याविजृम्भितेषु तथा मानापमानयोश्च समत्वमेव योगारूढत्वे हेतुरित्यर्थ॥ ७॥

एव समाहितचित्त कथ व्यवहरतीत्यत्र तद्वार्ति वदन् योगारूढ लक्षणमुपसंहरति—

ज्ञानविज्ञानतृप्तात्मा कूटस्थो विजितेन्द्रियः।
युक्त इत्युच्यते योगी समलोष्टाश्मकाञ्चनः॥ ८॥

ज्ञानेति। प्रत्यगभिन्नब्रह्मभावेन युक्तो योगी योगारूढ इत्युच्यते। काञ्चनादिष्वासक्तचेतसो युक्तात्मता कथमिति तत्राह—समेति। समानि

लोष्टाश्मकाञ्चनानि यस्य सो ऽय समलोष्टाश्मकाञ्चन मृत्पाषाणसुवर्णादिषु हेयोपादेयवैकल्येन समत्वाद्युक्तात्मतोपपद्यत इत्यर्थ । अविजितेन्द्रियस्य समत्व कुत इति तत्राह—विजितेति । ज्ञानकर्मेन्द्रियाणि स्वार्थकलनायोगतो येन विजितानि सो ऽय विजितेन्द्रिय । प्रत्यग्भावारूढमन कबलितेन्द्रियव्यापृतित्वात् न समत्वव्याघात इत्यर्थ । तुलाविद्याकृतविकारानुकारिणो विजितेन्द्रियता कथमिति तत्राह्—कूटस्थ इति । घटशरावादिविकारानुगतमिव भासमानमपि तद्विकारास्पृष्टत्वेन तदवच्छिन्नाकाशं कूटमित्युच्यते । कूटवन्निर्विकार तिष्ठतीति कूटस्थ । स्वेतरविकारतदनुकरणाभावात् विजितेन्द्रियता निरङ्कुशेत्यर्थ । केनाप्यतृप्तात्मन कौटस्थ्य कथमिति तत्राह—ज्ञानेति । निष्कामकर्मानुष्ठानजनितचित्तशुद्धे परम्,

'उपक्रमोपसहारावभ्यासो ऽपूर्वता फलम् ।
अर्थवादोपपत्ती च लिङ्ग तात्पर्यनिर्णये ॥'

इति स्मृत्यनुरोधेन षड्विधलिङ्गपरामर्शतो वेदान्तशास्त्रपरिज्ञानमेव ज्ञानम्, तदेवापरोक्षानुभूतिरूढं चेत् विज्ञानम्, ताभ्या तृप्त आत्मा ऽन्त करण यस्य सो ऽय ज्ञानविज्ञानतृप्तात्मा न बाह्यविषयेण । तादृशकौटस्थ्यसभवादेव विशेषणविशिष्टो योगारूढ इत्यर्थ ॥ ८ ॥

पूर्वोक्तयोगारूढताप्राप्तावन्तरङ्गसाधनमुपदिशति—

सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबन्धुषु ।
साधुष्वपि च पापेषु समबुद्धिर्विशिष्यते ॥ ९ ॥

सुहृदिति । पूर्वार्धमेक पदम् । प्रत्युपकारनैरपेक्ष्येणोपकर्ता सुहृत् । स्नेहपाशत उपकर्ता मित्रम् । सदा रन्ध्रान्वेषणपूर्वकमपकार्यरि । स्वकार्याभा-

वत सर्वत्रोपेक्षावानुदासीन । परस्परक्रौर्येण मिथो विवदमानयो अपक्षपाती मध्यस्थ । स्वापकारित्वेन निग्रहीतव्यो द्वेष्य । स्वापत्काले यथाबल स्वापन्मोचको बन्धु । तेषु सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबन्धुषु शास्त्रार्थानु-कारिषु साधुष्वपि शास्त्रार्थप्रतिषिद्धकारिषु पापेषु च स्वात्तौपाधिकगुणवैचि-त्र्यादुच्चनीचभाव गतेष्वपि तदधिष्ठानचैतन्यस्य निरूपाधिकत्वेन निर्गुण-त्वादिति भावनया समरागद्वेषमूलविषमभावविरला बुद्धि यस्य सो ऽय समबुद्धि योगी योगारूढ साधकेभ्यो विशिष्यते । तत्साधनेभ्यो ऽन्तरङ्गसाधनानुष्ठातृत्वादित्यर्थ ॥ ९ ॥

एवभूतसमत्वबुद्ध्युपेययोगलक्षणमाह—योगीति त्रयोविशत्या श्लोकै ।

योगी युञ्जीत सततमात्मानं रहसि स्थितः ।
एकाकी यतचित्तात्मा निराशीरपरिग्रहः ॥ १० ॥

योगीति । योगारूढपदेच्छुत्वाद्योगी स्वात्मानमन्त करण युञ्जीत प्रत्य ग्भावापन्न मन परमात्मन्यकीकृत्य स्थिरीकुर्यादित्यर्थ । किमेव यामपर्यन्त-मनुसंधेयमिति तत्राह—सततमिति । यथा यथा मनश्चैत्त्याभिमुख न भेवत्तथा तथा यावज्जीवमनुसधेयमित्यर्थ । तथा ऽपि किं विद्वद्गोष्ठ्यामनु संधेयमिति तत्राह—रहसीति । गिरिगुहाऽऽदावेकान्ते रहस्येवानुसधेय मित्यर्थ । आरुरुक्षोर्जनसबाधस्य विक्षेपहेतुत्वात् किं दारपुत्रादिभि मिलि त्वा ऽनुसंधेयमिति तत्राह—एकाकीति । दारपुत्रधनादिक सन्यस्य स्वदेह मात्रावशिष्टो यश्चरति तेनैकाकिना मनो निग्रहीतव्यमित्यर्थ ।

'एकाकी नि स्पृहस्तिष्ठेन्न हि केन सहालपेत् ।
आत्मनैव सहायेन सुखार्थी विचरेदिह ॥

सदिग्ध सर्वभूताना वर्णाश्रमविवर्जित ।
अन्धवज्जडवच्चापि मूकवच्च महीं चरेत् ॥'

इत्यादिश्रुते । एवमेकाकिनो ऽपि करणद्वयस्य सत्त्वेन विषयव्यापृतेरवैरल्यान्मनोनिग्रहावसर कुत इति तत्राह— यतेति । अन्त करण चित्त बहि करणमात्मा तावुभावपि येन यतौ सो ऽय यतचित्तात्मा करणद्वयसत्त्वे ऽपि विषयग्रहणस्योपरमात् तेन मनो निग्रहीतुं शक्यमित्यर्थ । निगृहीतकरणग्रामस्यापि स्वप्राप्यमोक्षाशी सभवात तेन विक्षिप्तचित्तेन तत्कथ निगृह्यत इति तत्राह—निराशीरिति । निर्गता बन्धमोक्षविषया आशीस्तृष्णा यस्मात्सो ऽय निराशी 'स्वसकल्पवशात् बद्धो नि सकल्पाद्विमुच्यते' इति श्रुत्या बन्धमोक्षयो संकल्पभावाभावनिष्ठत्वात् तद्धेत्वविद्याद्वयतत्कार्यातीतब्रह्मनिष्ठस्य मनोनिष्ठबन्धमोक्षाशावैरल्यादित्यर्थ । परिग्रहवतो निराशीस्त्व कथमिति तत्राह—अपरिग्रह इति । शरीरस्थितिमात्रहेतुपरिग्रहेतर परिग्रहो न यस्यास्ति सो ऽयमपरिग्रह । एकाकीत्यादिविशेषणसामर्थ्यात् सर्वकर्मसन्यासिन एवोक्तलक्षणध्यानाधिकारो द्योत्यत इत्यर्थ ॥ १० ॥

आदावासननियममाह—शुचाविति द्वाभ्याम् ।

शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः ।
नात्युच्छ्रितं नातिनीचं चैलाजिनकुशोत्तरम् ॥ ११ ॥
तत्रैकाग्रं मनः कृत्वा यतचित्तेन्द्रियक्रियः ।
उपविश्यासने युञ्ज्याद्योगमात्मविशुद्धये ॥ १२ ॥

शुचाविति । स्वभावत सस्कारतो वा शुचौ देशे स्वात्मन स्वस्य स्थिरमचलमग्निमान्द्यादिरोगानुत्पत्तये नात्युच्छ्रित नातिनीचमादौ कुशास्ततो

व्याघ्राजिनं कृष्णाजिन वा ततश्चैलमिति यत्तच्चैलाजिनकुशोत्तरमासन प्रतिष्ठाप्य तत्रासने उपविश्यैकाग्र विक्षेपराहित्येन प्रत्यग्भावारूढ मन कृत्वा यता नियता स्वान्तर्बाह्यविलसितचित्तेन्द्रियाणा क्रिया यस्य सो ऽय यत-चित्तेन्द्रियक्रिय सन्नात्मनो ऽन्तःकरणस्य शुद्धये ब्रह्मात्मनोर्योगमैक्यानुसधान युञ्ज्यादभ्यस्येदित्यर्थ ॥ ११, १२ ॥

योगाधिकारिण चित्तैकाग्र्योपायं शरीरधारणामाह— सममिति द्वाभ्याम् ।

समं कायशिरोग्रीवं धारयन्नचलं स्थिरः ।
संप्रेक्ष्य नासिकाऽग्रं स्वं दिशश्चानवलोकयन् ॥ १३ ॥

सममिति । कायश्च शिरश्च ग्रीवा च कायशिरोग्रीवम् । सिद्धा-सनस्थकायस्यापादमस्तकं सममवक्रमचल धारयन् स्थिरो दृढप्रयत्नो भूत्वा अर्धोन्मीलितचक्षुर्भ्यां स्वनासिकाऽग्र सप्रेक्ष्य दश दिशश्चानवलोकयन्यथो-क्तासन आसीनेत्यर्थ ॥ १३ ॥

प्रमादवृत्तिजुष्टस्यैकत्रावस्थान कुत इति तत्राह--

प्रशान्तात्मा विगतभीर्ब्रह्मचारिव्रते स्थितः ।
मनः संयम्य मच्चित्तो युक्त आसीत मत्परः ॥ १४ ॥

प्रशान्तात्मेति । प्रमादवृत्तिशान्त आत्मा ऽन्त करण यस्य सो ऽय प्रशान्तात्मा । प्रशान्तमनस एकत्रासनमुपपद्यत इत्यर्थ । 'द्वितीयाद्वै भय भवति' इति श्रुत्या द्वैतस्य विद्यमानत्वेन तज्जभयस्यानिवार्यत्वात् प्रशान्तम नस्त्व कुत इति तत्राह—विगतेति । परमाद्वैतदर्शनतो विगता भी यस्य सो ऽयं विगतभी· निर्भयब्रह्मदृष्टिकवलितभीतित्वात् 'यदा ह्येवैष एतस्मिन्न

दृश्ये ऽनात्म्ये ऽनिरुक्ते ऽनिलयने ऽभय प्रतिष्ठा विन्दते । अथ सो ऽभय गतो भवति' इति श्रुते । ब्रह्मचर्यव्रतपराङ्मुखस्याभयप्रतिष्ठा कुत इति तत्राह—ब्रह्मचारीति । ब्रह्मभावेन चरतीति ब्रह्मचारी, तस्य ब्रह्मचारिणो व्रत तद्भावाच्युतिपुरःसर शरीरस्थितिमात्रनिर्वाहकभिक्षाशनादि, तस्मिन् ब्रह्मचारिव्रते स्थित तस्यैवाभयप्रतिष्ठाऽधिकारात् असयतमनसो ब्रह्मचर्यासन कथमिति तत्राह—सयम्येति । ब्रह्मचर्यव्रतादन्यत्र मन सयम्य प्रत्याहृत्य ब्रह्मचारिगम्ये परमेश्वरे मयि चित्तमन्तःकरण यस्य सो ऽय मच्चित्त तादृशस्य ब्रह्मचर्यव्रतस्थितिरुपपद्यते । पुरुषार्थान्तरेच्छोस्त्वच्चित्तत्व कथमिति तत्राह—मत्पर इति । अह प्रत्यगभेदेन वासुदेव एव पर परमपुरुषार्थो यस्य सो ऽय मत्पर एवभूतो योगी युक्त समाहित सन्नासीत यथोक्तासनमुपविशेदित्यर्थ ॥ १४ ॥

एवमभ्यासफलमाह—

युञ्जन्नेवं सदा ऽऽत्मानं योगी नियतमानसः ।
शान्तिं निर्वाणपरमां मत्संस्थामधिगच्छति ॥ १५ ॥

युञ्जन्निति । एव प्रागुक्तप्रकारेण नियत मानस यस्य सो ऽय नियतमानसो योगी स्वात्मान कार्यकरणसघातानुग्राहकमन्तःकरण युञ्जन् सन् प्रत्यगभिन्नब्रह्मस्वरूपावस्थानलक्षण ब्रह्मनिर्वाणमेव यस्या सर्वकर्मसन्यासलक्षणाया शान्ते परमा निष्ठा ता निर्वाणपरमाम् अविद्याद्वयतत्कार्यशान्ति मत्सस्था मद्रूपावस्थानलक्षणत्वेन मदधीनामधिगच्छति प्राप्नोतीत्यर्थ ॥ १५ ॥

एवमभ्यासिन. आहारविहारादिनियममाह—नेति द्वाभ्याम् ।

नात्यश्नतस्तु योगोऽस्ति न चैकान्तमनश्नतः।
न चातिस्वप्नशीलस्य जाग्रतो नैव चार्जुन ॥ १६ ॥

हे अर्जुन। अत्यश्नत अधिक भुञ्जानस्य एकान्तमत्यन्तमनश्नत अभुञ्जानस्यापि योगो धारणा न चास्ति, अतिस्वप्नशीलस्यातिजाग्रत पुरुषस्यापि योग समाधिर्नास्त्येवेत्यर्थ ॥ १६ ॥

व्यतिरेकमुक्त्वा ऽन्वयमाह – युक्त इति ।

युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु।
युक्तस्वप्नावबोधस्य योगो भवति दुःखहा ॥ १७ ॥

'अर्धं सव्यञ्जनान्नेन तोयेनैक प्रपूरयेत ।
वायो सचरणार्थाय चतुर्थमवशेषयेत ॥
पुरीषमूत्रोत्सर्गार्थं भिक्षाऽर्थं विहरेत्क्वचित् ।
शिष्ट योगासने तिष्ठेत् सिद्धचर्थी यतिसत्तम ॥'

इत्यादिस्मृत्यनुरोधेन आह्रियत इत्याहारो ऽन्नादि, विहार पदक्रम, तौ युक्तौ नियतौ यस्य तस्य युक्ताहारविहारस्य श्रुतिस्मृत्यनुगृहीतस्वाश्रमोचितदेहेन्द्रियादिव्यापारकर्मसु युक्ता नियता चेष्टा यस्य तस्य युक्तचेष्टस्य,

'यामषट्कं जागरस्य काल स्वप्नस्य चापर ।
एव जाग्रत्स्वपन्योगी नीरोगी सिद्धिभाग्भवेत् ॥'

इति स्मृत्यनुरोधेन युक्तौ स्वप्नावबोधौ यस्य तस्य योगिनो योग ससारदुःखहा भवति ॥ १७ ॥

एवं नियत सन् कदा युक्तो भवतीत्यत आह—

यदा विनियतं चित्तमात्मन्येवावतिष्ठते ।
निःस्पृहः सर्वकामेभ्यो युक्त इत्युच्यते तदा ॥ १८ ॥

यदेति । यदा यस्मिन्काले स्वचित्त बाह्यान्तर्व्यापारात् विनियतं निगृहीत सत् तद्विपरीतब्रह्मात्मन्येवावतिष्ठते तदा दृष्टादृष्टसर्वकामेभ्यो नि स्पृहो भवति स एव युक्तो ब्रह्मनिष्ठ इत्युच्यते ॥ १८ ॥

ब्रह्मात्मनिष्ठचित्तोपमामाह—-

यथा दीपो निवातस्थो नेङ्गते सोपमा स्मृता ।
योगिनो यतचित्तस्य युञ्जतो योगमात्मनः ॥ १९ ॥

यथेति । यतचित्तस्य सयतान्त करणस्यात्मन स्वस्य योगिन प्रत्यग्रूपस्य परमात्मना योगमैक्य युञ्जतो भावयत चित्त प्रत्यगभिन्नब्रह्मभावापन्नमन्त करण यथा निवातस्थो दीपो नेङ्गते न चलति तथैव कदाचिदपि न चलतीत्यर्थ । स्वव्यतिरेकेण मन सकल्पकामकर्मवातप्रचाराभावादेव चित्तवृत्तिप्रचारदर्शनचतुरै चित्तदीपयो. योपमीयते सोपमा स्मृता चिन्तितेत्यर्थ ॥ १९ ॥

'य सन्यासमिति प्राहुर्योग त विद्धि' इत्यादौ निष्कामकर्मैव योगशब्देनोक्तम् । इदानीं तु 'युक्ताहारविहारस्य योगो भवति दु खहा' इत्यादौ तु प्रत्यगभेदेन ब्रह्मानुसधानसमाधिरेव योगशब्देनोक्त । तत्र मुख्ययोग क' इत्यपेक्षाया यथोक्तकर्मयोगस्य चित्तशुद्धिद्वारा ज्ञानप्राप्तावुपायत्वादुपेयभूतसमाधियोगस्य मत्प्राप्तावन्तरङ्गत्वात् अयमेव मुख्ययोग इत्याह—यत्रेति त्रिभि ।

यत्रोपरमते चित्तं निरुद्धं योगसेवया ।
यत्र चैवात्मनाऽऽत्मानं पश्यन्नात्मनि तुष्यति ॥ २० ॥

यत्रेति । एवमभ्यासबलादेकाग्रीभूत योगिनश्चित्त योगसेवया निरुद्ध सद्यत्र यस्मिन्नसप्रज्ञातसमाधावुपरमते उपरति गच्छति । उपायोपेयभेदेन समाधिरपि द्विविध सप्रज्ञातो ऽसप्रज्ञातश्चेति । तत्र धिय सत्त्वपरिणतिरखण्डाकारवृत्तिर्ध्येयैकगोचरत्वेन कथचिज्ज्ञायते यदा तदा सप्रज्ञातसमाधिरुच्यते । यदोक्तलक्षणा ऽखण्डाकारवृत्तिरपि ज्ञेयैकतानत्वेन दृश्यत्वेन वा कथचिदपि न ज्ञायते तदानीमसप्रज्ञातसमाधिरित्युच्यते ।

'ब्रह्माकारमनोवृत्तिप्रवाहो ऽहंकृति विना ।
सप्रज्ञातसमाधि स्याद् ध्यानाभ्यासप्रकर्षत ॥
प्रशान्तवृत्तिक चित्त परमानन्ददीपकम् ।
असप्रज्ञातनामा ऽय समाधिर्योगिना प्रिय ॥'

इति श्रुते । यत्रासप्रज्ञातसमाधावेव चात्मना ब्रह्मीभूतान्त करणेन तत्पदलक्ष्य परमात्मान त्वपदलक्ष्ये प्रत्यगात्मन्यप्रतिबद्धापरोक्षतया पश्यस्तुष्यति अखण्डानन्दभरितो भवति तदा मत्स्वरूपो भवतीत्यर्थ । 'जीवात्मपरमात्मैक्यावस्था त्रिपुटिरहिता परमानन्दस्वरूपा शुद्धचैतन्यात्मिका समाधि' इति श्रुते ॥ २० ॥

आत्मनि तुष्यतीति यदुक्त तद्विवृणोति—

सुखमात्यन्तिकं यत्तद्बुद्धिग्राह्यमतीन्द्रियम् ।
वेत्ति यत्र न चैवायं स्थितश्चलति तत्त्वतः ॥ २१ ॥

सुखमिति । अथ ध्यानयोगारूढो योगी अन्तं नाशमतीत्य वर्तत इत्यात्यन्तिकम्, अनन्तत्वात् अतीन्द्रियमिन्द्रियतद्विषयतत्सबन्धातीतत्वात् । तथा ऽपीन्द्रियनैरपेक्ष्येण प्रत्यग्भावकबलितबुद्धिग्राह्यमपरिमितसुख यदवशिष्यते तदीदृश सुखमात्मत्वेन वेत्त्यनुभवति । यत्रैवभावापन्नासप्रज्ञातसमाधौ स्थित सन् प्रत्यगभिन्नब्रह्मतत्त्वान्नैव चलति न च्यवते । तुलाविद्याविलसिताव-स्थात्रयमतीत्य वर्तत इत्यर्थ । 'प्राप्ते ज्ञानेन विज्ञाने ज्ञेये परमात्मनि हृदि सस्थिते देहे लब्धशान्तिपद गते तदा प्रभा मनोबुद्धिशून्य भवति' इति श्रुते ॥ २१ ॥

स्वात्मलाभमुपेयुषस्तादृशयोगिचित्तस्य चलनाभाव विशिनष्टि —

यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः ।
यस्मिन्स्थितो न दुःखेन गुरुणा ऽपि विचाल्यते ॥ २२ ॥

यमिति । स्वज्ञानमहाराजबलेन स्वापहारित्वेन प्रसिद्ध स्वाज्ञान-तस्कर निर्मूल्य तन्मुषित स्वात्मलाभ य पुनर्लब्ध्वा ततो ऽधिकतरमपर लाभ न मन्यते,

'ब्रह्मात्मलाभादपर विद्यते न जगत्त्रये ।
येन विस्मृत्य निखिल स्वाराज्ये सुखमश्नुते ॥'

इति स्मृते । नष्टद्रव्यलाभादपर तुष्टिहेतु किमन्यदस्ति' तस्यैव निरति-शयानन्दत्वेन स्वेतरविस्मारकत्वात् । एव परमसुखपरवशत्वेन यस्मिन्नसप्रज्ञात-समाधौ स्थितो योगी गुरुणा दु खेन शीतोष्णसुखदु खादिना आध्यात्मिका-दिना वा शस्त्रपातेन वा ऽपि न विचाल्यते । स्वेतरगुरुलघुसुखदु खाभावेन स्वस्वरूपान्न कदाचिदपि प्रच्यवत इत्यर्थः ॥ २२ ॥

यत्रोपरमत इत्यारभ्य यो ऽयमसंप्रज्ञातसमाधियोग प्रतिपादित तमेव योगमुपसहरति—

तं विद्याद्दुःखसंयोगवियोगं योगसंज्ञितम् ।
स निश्चयेन योक्तव्यो योगो ऽनिर्विण्णचेतसा ॥ २३ ॥

तमिति । आध्यात्मिकादिनानाविधदु खै संयोगो दु खसंयोग:, तेन दु खसंयोगेन वियोगो दु खसयोगवियोग पूर्वश्लोकत्रयोक्तब्रह्मात्मैक्याखण्डानन्दस्वरूपावस्थानलक्षण , तमसप्रज्ञातसमाधियोगसज्ञित कदाचित्कुत्रचित् क्वचिदपि विकल्पासहसत्तासामान्यस्वरूपमेवासप्रज्ञातसमाधियोगशब्दार्थं विद्यादित्यर्थ । एवमसप्रज्ञातसमाधिपदमारोढु प्रवृत्तस्य तत्सिद्ध्यनुदये ऽप्यविक्षिप्तचेतसा तदभ्यास एव कर्तव्य इत्याह—स इति । एतज्जन्मनि जन्मान्तरे वा स समाधियोग सिध्यतीति निश्चयेनाध्यवसायेनानिर्विण्णमप्रक्षुभित चेतो यस्य तेनानिर्विण्णचेतसा अप्रमादाभ्यासिना सो ऽयमसप्रज्ञातसमाधियोगोपाय सप्रज्ञातसमाधियोगो योक्तव्य कर्तव्य इत्यर्थ ॥ २३ ॥

स योगः केन प्रकारेण कर्तव्य इति तत्राह—संकल्पेति द्वाभ्याम् ।

संकल्पप्रभवान्कामांस्त्यक्त्वा सर्वानशेषतः ।
मनसैवेन्द्रियग्रामं विनियम्य समन्ततः ॥ २४ ॥

सकल्पेति । प्रत्यगभेदेन ब्रह्मानुसधानविरोधी सकल्प एव प्रभवो हेतु येषा तान् सकल्पप्रभवान् विषयलम्पटै काम्यन्त इति सर्वान् विषयगोचरान् कामानशेषत त्यक्त्वा निर्मूलीकृत्य प्रत्यग्भावापन्नमनसैवेन्द्रियग्रामं समन्तत स्वार्थेभ्यो विनियम्य उपरमेदित्युत्तरेणान्वयः ॥ २४ ॥

किं युगपदुपरमणं कर्तव्यमिति तत्राह—

शनैः शनैरुपरमेद् बुद्ध्या धृतिगृहीतया ।
आत्मसंस्थं मनः कृत्वा न किंचिदपि चिन्तयेत् ॥ २५ ॥

शनैरिति । स्वाज्ञानकालमारभ्य स्वज्ञानावधि पवृत्तस्यातद्व्यापारस्य सहसोन्मूलयितुमशक्यत्वेन शनैः शनैः क्रमेणैवोपरमेत् । कि कृत्वोपरमेदिति तत्राह—कृत्वेति । स्वस्या पर सनिहितत्वेन बुध्यत इति बुद्धि, तया बुद्धया, धृति विशुद्धसत्त्ववृत्ति, ता गृहीत्वा ऽवलम्ब्य तिष्ठतीति धृतिगृहीता, तया धृतिगृहीतया बुद्ध्या ब्रह्मात्मसंस्थ मन कृत्वैवोपरमेत् । ततश्चिन्तनीय किमिति तत्राह—नेति । प्रत्यगभिन्नब्रह्मातिरेकेण न किंचिद्व-स्तुजात चिन्तयेत्, तत पर चिन्तनीयस्य मृग्यत्वादित्यर्थ । 'पर ब्रह्माहम-स्मीति स्मरणस्य मनो न हि' इत्यादिश्रुते ॥ २५ ॥

एव ब्रह्मात्मभावेन तूष्णीभावापन्नमन्त करण गुणत्रयविजृम्भित-विषयतृष्णया बहिर्निर्गत चेत्पुन कि कर्तव्यमिति तत्राह—

यतो यतो निश्चरति मनश्चञ्चलमस्थिरम् ।
ततस्ततो नियम्यैतदात्मन्येव वशं नयेत् ॥ २६ ॥

यत इति । आरुरुक्ष्ववस्थाया साधको मुनि स्वभावत चलम् अत एवास्थिर मन प्रत्यग्भाव विहाय रजोगुणाद्युद्रेकेण यतो यतो विषयनि-मित्तात् बहिर्निश्चरति ततस्ततो विषयनिमित्तादेतन्मनो नियम्य प्रत्यगात्मन्येव वश नयेत् प्रत्याहरण कुर्यादित्यर्थ । यद्वा, आरूढावस्थायाम् आरूढो मुनिस्तु स्वमनो निर्बीजरूपमपि पूर्ववासनया प्रत्यगभिन्नब्रह्मभावोन्मुक्तमिव

चञ्चलवदस्थिरवद्यतो यत स्वकल्पितात् शब्दादिविषयनिमित्तान्निश्चरतीव प्रतिभाति, स्वेन साकं स्वकल्पितशब्दादीनां प्रत्यगभिन्नब्रह्मातिरेकेणाभावप्रमाणत स्वाध्यस्तत्वेन, ततस्तत कामसंकल्पादिविजृम्भितमिथ्याभूतनामरूपात्मकमहामोहादेतन्मनो नियम्य पृथक्कृत्य सर्वत्राततीति व्याप्नोतीत्यात्मा, तस्मिन् प्रत्यगभिन्ने परमात्मन्येव यत्र कुत्र वा वर्तमानविश्वाधिष्ठानचैतन्ये वा वशमैक्य नयेत् कुर्यादित्यर्थ ।

'यत्र यत्र मनो याति यमिनो विषयेच्छया ।
तत्र तत्र न किं ब्रह्म ततस्तद् ब्रह्म निष्ठितम् ॥'

इत्यादिस्मृते ॥ २६ ॥

एव पुन पुनरभ्यासपाटवेनारुरुक्षोरारूढस्य वा स्वकल्पितत्वेन गुणत्रयमहामोहे तनुता गते सति इदानीं मन्मनो ब्रह्मभाव गतमिदानीं तृष्णया बहिर्निर्गतमिति भ्रान्तौ ब्रह्मातिरेकेण मनो नास्तीति प्रबोधतो निर्मूलितायां सत्यां तत्परत्वेन विभात निरतिशय सुख स्वयमेवाविर्भवतीत्युपदिशति—

प्रशान्तमनसं ह्येनं योगिनं सुखमुत्तमम् ।
उपैति शान्तरजसं ब्रह्मभूतमकल्मषम् ॥ २७ ॥

प्रशान्तेति । एव संप्रज्ञातसमाध्यभ्यासबलाविर्भूतासंप्रज्ञातसमाधियोगिन ब्रह्मात्मनिष्ठ स्वयमेव उत्तम प्रत्यगभिन्ननिरतिशयब्रह्मसुखमुपैति ।

'कामिनीकामुक ह्यमनिच्छन्त बलादपि ।
यथा तथा ऽऽवृणोत्येषा योगिनं ब्रह्मनिर्वृति ॥'

इति नैष्कर्म्यसिद्धिकारा आहु । योगिनो ऽपि योगमायाप्रभवसिद्धिप्रयुक्त-कल्मषयुक्तस्य निष्कल्मषब्रह्मसुखावाप्ति कुत इति तत्राह—कल्मषमिति । निष्कल्मषब्रह्मदृष्टिशुद्धोदक्षालितयोगमायातत्कार्यकल्मषत्वाद्यथैन्द्रजालिकरचिता माया स्वस्वामिनमविकुर्वती सती परानेव विमोहयति, तथा योगमायाप्रभवा सिद्धिरपि योगिनमविकुर्वती सत्ययोगिनो विकरोतीत्यर्थ । यत एवमतो योगी निष्कल्मष त ब्रह्मसुखमुपैति । स्वाज्ञानेन भवतीति भूत सर्वम् । तस्य सत्त्वेनाकल्मषत्व कुत इति तत्राह—ब्रह्मभूतमिति । ब्रह्माहमहमेव ब्रह्मेति ब्रह्मात्मत्वेन सिद्धो ब्रह्मभूत, स निष्कल्मषतापदमर्हत्येवेत्यर्थ । स्वज्ञानकबलितस्वाज्ञानभूतसर्वत्वात् 'सर्व खल्विद ब्रह्म' 'ब्रह्मैवेद सर्वम्' इत्यादिश्रुते । सत्त्वादिगुणत्रयसत्त्वात् तद्वतो ब्रह्मभूतता कथमिति तत्राह—शान्तरजसमिति । रजोग्रहण तम सत्त्वोपलक्षणार्थम् । निर्गुणब्रह्मात्मज्ञान-तरणिकिरणकबलितगुणत्रयतत्कार्यध्वान्तत्वात्तस्य ब्रह्मभूततोपपद्यत इत्यर्थ । मानसे ऽशान्ते तद्धेतुगुणत्रयशान्ति कथमिति तत्राह—प्रशान्तमनसमिति । प्रत्यगभिन्नब्रह्मज्ञानखड्गत कामसकल्पादिमस्तकच्छेदेन शान्त मन यस्य त प्रशान्तमनसमेनमुक्तविशेषणविशिष्ट योगिन ब्रह्मसुखमुपैति । हिशब्दात् ब्रह्मसुखाविर्भावप्रतिबन्धाभावो द्योत्यते ॥ २७ ॥

योगिन ब्रह्मात्मसुखमुपैतीति यदुक्त तदेव स्पष्टयति—

युञ्जन्नेवं सदा ऽऽत्मानं योगी विगतकल्मषः ।
सुखेन ब्रह्मसंस्पर्शमत्यन्तं सुखमश्नुते ॥ २८ ॥

युञ्जन्निति । विगत कल्मषो यस्मात् विगतकल्मषो योगी प्रक्षीणा-शेषपापपुण्यकल्मषत्वात् 'तस्य सुकृतदुष्कृते धूनुते' इति श्रुते । एवमुक्त-प्रकारेणासप्रज्ञातसमाधियोगे मनो युञ्जन् योजयन्सन् सुखेनानायासेन

प्रत्यगभिन्नब्रह्मण सस्पर्श स्वाविद्याद्वयतत्कार्यनिवर्तकब्रह्मात्मसाक्षात्कार , त ब्रह्मसस्पर्श वैषयिकसुखस्य क्षणिकत्वात अन्त ब्रह्मसुखस्य तदतीतत्वेन वर्तमानत्वादत्यन्त सर्वोत्कृष्टानन्तसुखमश्नुते, अपरिमितानन्दसमुद्रो भवतीत्यर्थ ॥ २८ ॥

सातिशयाविद्याद्वयदु खनिवृत्तिद्वारा निरतिशयानन्दाविर्भावलक्षणो मोक्ष सिध्यतीत्याह—

सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि ।
ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः ॥ २९ ॥

सर्वेति । सप्रज्ञातसमाधियोगेन युक्त आत्मा ऽन्त करण यस्य सो ऽय योगयुक्तात्मा योगी स्वाविद्याद्वयविजृम्भितानन्तकोटिपिण्डाण्डोपेतब्रह्माण्डपटलाढ्याविद्यापादे सर्वत्र सर्वदा निम्नोन्नतत्वेन विषमभाव गते ऽपि तस्य त्रिपाद्ब्रह्माव्यतिरिक्तत्वेन सम त्रिपाद्ब्रह्माहमस्मीति दर्शन ज्ञान यस्य सोऽय समदर्शनो भूत्वा स्वमात्मान सर्वभूतस्थ सर्वेषा भूताना प्रत्यग्रूपत्वेन ब्रह्मादिस्तम्बान्तहृदयाम्बुजमध्यस्थ पुनर्विनिमयेन ब्रह्मादिस्तम्बान्तभूतानि स्वस्मिन्प्रत्यगभिन्ने परमात्मनि चाभेदेनेक्षते । तदा ऽसप्रज्ञातसमाधियोगी भवति । निष्कामकर्मयोगानुष्ठानजनितचित्तशुद्धिगम्यप्रत्यगभिन्नब्रह्मज्ञानप्राप्ये मयि सर्व वसत्यह सर्वत्र वसामीति प्रबोधबलेनाविद्याद्वयनिवृत्तितो निरतिशयानन्दलक्षणो मोक्षो भवतीत्यर्थ ॥ २९ ॥

एवमात्मैकत्वदर्शनस्य फलमाह—

यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति ।
तस्याहं न प्रणश्यामि स च मे न प्रणश्यति ॥ ३० ॥

य इति । यो ब्रह्मात्मनिष्ठो मुनि सर्वत्र चेतनाचेतनात्मके जगति वासुदेव मा पश्यति, पुनश्चेतनाचेतनात्मक सर्वं जगच्च वासुदेवे मयि पश्यति, तस्य ब्रह्मात्मनिष्ठस्याह वासुदेवो न प्रणश्यामि स्वरूपतिरोधान न करोमि । स च ब्रह्मात्मनिष्ठो ज्ञांनी मे वासुदेवस्य न प्रणश्यति कदा ऽपि मद्भाव न जहाति । तादृश महाऽनुभाव कृपादृष्ट्या ऽवलोक्यानुगृह्णामीत्यर्थ ॥३०॥

भूयो ब्रह्मज्ञानफलं स्तौति—

सर्वभूतस्थितं यो मां भजत्येकत्वमास्थितः ।
सर्वथा वर्तमानो ऽपि स योगी मयि वर्तते ॥ ३१ ॥

सर्वेति । यो ब्रह्मात्मनिष्ठो योगी सर्वभूतान्तर्यामित्वेन सर्वप्रत्यक्त्वेन सर्वाधिष्ठानत्वेन स्वेतरसर्वशून्यत्वेन च स्थित मा ब्रह्माहमहमेव ब्रह्मेत्येकत्व-मैक्यमास्थित सन् भवति, स सर्वथा सर्वप्रकारेण परारोपितप्रातिभा-सिकदेहस्थितिमात्रप्रयोजनयथोचितचेष्टाभि वर्तमानो ऽपि मदभेदेन वासुदेवे मयि वर्तते मद्भावापन्नस्य सर्वथा वर्तमानो ऽपीति यथेच्छाचरणोक्तिरौप-चारिकी, मद्भावकबलितचित्तद्वयस्य प्रवृत्तिनिवृत्तिव्यापारलेशस्याप्यनवका-शादित्यर्थ ॥ ३१ ॥

नानाप्रकारेण मा भजतां मध्ये सर्वभूतानुकम्पी श्रेष्ठ इत्याह—

आत्मौपम्येन सर्वत्र समं पश्यति यो ऽर्जुन ।
सुखं वा.यदि वा दुःखं स योगी परमो मतः ॥ ३२ ॥

आत्मेति । हे पार्थ ! योगपदमारोढु य प्रवृत्तो योगी स्वयमात्मैवो-पमा तद्भाव औपम्यम्, तेनात्मौपम्येन यथा मम सुखमिष्टमनिष्ट दु.खम्, तथा

सर्वप्राणिनामिति सर्वत्र सर्वभूतेषु य समं पश्यति सर्वेषां सुखमेव वाञ्छति न कस्यचिद्दु ख स योगी परम सर्वोत्कृष्टत्वेन मे मत समत इत्यर्थ ॥ ३२ ॥

भगवदुक्तसाम्ययोग विस्पष्ट ज्ञातुमिच्छन्नर्जुन उवाच—यो ऽयमिति द्वाभ्याम् ।

अर्जुन उवाच—

यो ऽयं योगस्त्वया प्रोक्तः साम्येन मधुसूदन ।
एतस्याहं न पश्यामि चञ्चलत्वात्स्थितिं स्थिराम् ॥ ३३ ॥

यो ऽयमिति । हे मधुसूदन ! त्वया साम्येन यो ऽयमात्मौपम्येन सर्वप्राणिसमभावयोग प्रोक्त, तस्य साम्ययोगस्य स्थिरा दीर्घकाला स्थितिं न पश्यामि । कस्मात् ? मनसश्चञ्चलत्वात् ॥ ३३ ॥

मनश्चाञ्चल्यमेव स्पष्टयति—

चञ्चलं हि मनः कृष्ण प्रमाथि बलवद् दृढम् ।
तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम् ॥ ३४ ॥

चञ्चलमिति । हे कृष्ण ! स्वभावेन मन शोधितपारदवत् चञ्चल हि । चलतु मन, किं तवेति तत्राह—प्रमाथीति । साम्यब्रह्मज्ञान-स्पर्शान्नाशमुपैमीति भिया तत्पदानारोहाय देहेन्द्रियादीन् प्रमथ्नाति क्षोभ करोतीति प्रमाथीत्युच्यते । मनसो दुर्बलत्वात येन केनाप्युपायेन जेतुं शक्यमिति तत्राह—बलवदिति । ब्रह्मातिरेकेण मनो नास्तीति प्रबोधेतरसाधनैर्जेतुमशक्यत्वान्मनसो बलवत्त्वमित्यर्थः । मनसश्चलत्वेनादृढत्वात् ज्ञानेतर-

साधनेनापि जेतुं शक्यमिति तत्राह—दृढमिति। ज्ञानेतरसाधनाना स्वकल्पितत्वेन तैर्विरोधाभावात् कामसकल्पादिवृत्तिबलोपेतत्वेन दुर्भेदत्वात् दृढत्वम्। तथा ऽपि कुण्डे बदरवत्तन्निग्रहीतु सुशकमिति तत्राह—सुदुष्करमिति। यथा खेचरस्य वायो घटादिषु निरोधनमशक्य तथैकत्र तस्य मनसो निग्रह कर्तु सुदुष्करं मन्ये ॥ ३४ ॥

अर्जुनोक्तमनश्चाञ्चल्यादिकमङ्गीकृत्यैव तन्निग्रहोपायं श्रीभगवानुवाच—असशयमिति द्वाभ्याम्।

श्रीभगवानुवाच।

असंशयं महाबाहो मनो दुर्निग्रहं चलम्।
अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते ॥ ३५ ॥

असंशयमिति। हे महाबाहो! मनसश्चञ्चलत्वेन निरोद्धुमशक्यमिति यदुक्त तदसशयम्। तथा चेत्तन्निग्रहोपाय कथमिति तत्राह—अभ्यासेनेति। हे कौन्तेय! अभ्यासो नाम ब्रह्मात्मातिरेकेण मनो नास्तीति चिरानुसंधानम्। तेनाभ्यासेन मनो गृह्यते निगृह्यते निरोद्धु शक्यते। तुशब्दो नि सशयार्थ। वैराग्यातिरिक्तकेवलाभ्यासेनैव मनसो निग्रहीतुं शक्यत्वेन वैराग्यस्याकिंचित्करता ऽनिवार्येति तत्राह—वैराग्येणेति। वैराग्य नाम दृष्टादृष्टविषयनिचयदोषदर्शनम्। तेन वैराग्येण च गृह्यते। वैराग्यस्याप्यभ्यासयोगोपायत्वान्नाकिंचित्करतेति भाव ॥ ३५ ॥

अन्वयव्यतिरेकाभ्या मनोनिग्रहायत्ता योगसिद्धिरिति विशिनष्टि—

असंयतात्मना योगो दुष्प्राप इति मे मतिः।
वश्यात्मना तु यतता शक्यो ऽवाप्तुमुपायतः ॥ ३६ ॥

असंयतेति। स्वातिरिक्तविषयलोलुपत्वेनासंयत आत्मा मनो यस्य तेनासयतात्मना पुरुषकीटेन साम्यबुद्धियोगो दुष्प्राप इति मे मम मति निश्चय इत्यर्थ । केन सुप्राप इति तत्राह—वश्यात्मनेति। विषयदोषदर्शन वैराग्येण स्वातिरेकेण मनो नास्तीत्यभ्यासेन वश्यत्व विधेयत्वमापादित आत्मा ऽन्त करण यस्य तेन वश्यात्मना पुरुषधौरेयेण तु, पूर्वोक्तवैराग्यसहकृताभ्यासोपायतो भूयो भूयो यतता प्रयत्न कुर्वता समत्वबुद्धियोग प्राप्तु शक्य ॥ ३६ ॥

इहामुत्रफलप्रापकाणि सर्वकर्माणि सन्यस्य ध्यानयोगाभ्यास कुर्वत तत्फलमप्यप्रासम्य स्वारब्धकर्मक्षयत स्वचेतसि चलिते कर्मसन्यासात् कर्मफलासिद्धे सम्यग्ज्ञानाभावात् योगफलासिद्धेश्च तत उभयभ्रष्टो भूत्वा योगी का गतिं गच्छतीति तद्गतिं विविदिषुरर्जुन उवाच—अयतिरिति त्रिभि ।

अर्जुन उवाच ।

अयतिः श्रद्धयोपेतो योगाच्चलितमानसः ।
अप्राप्य योगसंसिद्धिं कां गतिं कृष्ण गच्छति ॥ ३७ ॥

अयतिरिति । हे कृष्ण! ध्यानयोगश्रद्धयोपेतो योगी प्रारब्धक्षयलक्षणमरणकाले स्वाधीनताऽभावादयति योगाभ्यासाप्रयत्नवान्, अत एव योगाच्चलितमानसो भ्रष्टस्मृति सन्योगी योगफलसिद्धि कैवल्यमप्राप्य का गतिं गच्छति ॥ ३७ ॥

प्रश्नाभिप्राय प्रकटयति—

कच्चिन्नोभयविभ्रष्टश्छिन्नाभ्रमिव नश्यति ।
अप्रतिष्ठो महाबाहो विमूढो ब्रह्मणः पथि ॥ ३८ ॥

कच्चिदिति । हे महाबाहो ! योगाभ्यासव्याजेन समस्तकर्मणा सन्यस्तत्वात् न पुनरनुष्ठानाच्च तत्फलस्वर्गादेर्दुर्लभत्वाद्योगफलानिष्पत्त्या मोक्षस्यापि तथात्वादुभयभ्रष्टो योगी ब्रह्मप्रापकज्ञानमार्गे ब्रह्मण पथि स्वाविद्याऽऽवृतदृष्टित्वेन विमूढो भूत्वा वायुना तिलश शकलीकृतत्वेन च्छिन्नाभ्रमिव नश्यति कच्चित् । कच्चिच्छब्द किंशब्दार्थे । नश्यति किं न वेति प्रश्नार्थ ॥ ३८ ॥

मद्गतसशयच्छेत्ता त्वदन्यो नास्तीत्याह—

एतन्मे संशयं कृष्ण च्छेत्तुमर्हस्यशेषतः ।
त्वदन्यः संशयस्यास्य च्छेत्ता न ह्युपपद्यते ॥ ३९ ॥

एतदिति । हे कृष्ण ! हि यस्मात् अस्य सशयस्य च्छेत्ता निवर्तक त्वदन्यो नोपपद्यते तस्मात्त्वमेव मे सशयमशेषत छेत्तुमर्हसि ॥ ३९ ॥

योगभ्रष्टस्य नाशशङ्कामुन्मूलयन् प्रश्नोत्तर श्रीभगवानुवाच —

श्रीभगवानुवाच ।

पार्थ नैवेह नामुत्र विनाशस्तस्य विद्यते ।
न हि कल्याणकृत्कश्चिद्दुर्गतिं तात गच्छति ॥ ४० ॥

पार्थेति । हे पार्थ ! हि यस्मात् परमकल्याणरूपकैवल्यप्राप्तिहेतुश्रवणमननादिकल्याणसाधनकृत् कश्चित्पुरुषो योगफलप्राप्त्यन्तराये ऽपि कुत्सितयोनिप्राप्तिलक्षणा दुर्गतिं न गच्छति । तस्मात्तस्य योगभ्रष्टस्येहास्मिन् लोके शिष्टगर्हणलक्षणो विनाशो न विद्यते, श्रद्धाभक्तिपुर सर सन्मार्गगामित्वात् । हे तात ! अमुत्र परलोके ऽपि पूर्वजन्मतो हीनजन्मप्राप्तिलक्षणो नाशो न

विद्यते, निगृहीतेन्द्रियग्रामत्वात् पुत्ररूपेणात्मानं तनोतीति पिता तात उच्यते। 'पितेव पुत्र पुत्रवच्छिष्य' इति वचनात् शिष्योऽपि तात उच्यते। शिष्यलालनार्थं तातेति सबुद्धिरित्यर्थ ॥ ४० ॥

इहामुत्र च विनाशरहितो यदि योगभ्रष्ट, तदा क लोक प्राप्य पुनरावर्तेत इति तत्राह—

प्राप्य पुण्यकृतां लोकानुषित्वा शाश्वतीः समाः।
शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते ॥ ४१ ॥

प्राप्येति। अल्पकालाभ्यस्तयोगभ्रष्ट सकृत् स्वानुष्ठितयोगप्रभावात् अश्वमेधादिपुण्यकृता लोकान् प्राप्य तत्रत्यं सुखमनुभवन् तत्रैव शाश्वती समा सवत्सरानुषित्वा तद्भोगक्षयत शुचीना सन्मार्गगामिना श्रीमतामैश्वर्यशालिना गेहे अभिजायते, सर्वै श्लाघनीय जन्म प्राप्नोतीत्यर्थ ॥ ४१ ॥

चिरकालाभ्यस्तयोगभ्रष्टस्येतोऽप्याधिक्यद्योतनार्थं पक्षान्तरमाह—

अथ वा योगिनामेव कुले भवति धीमताम्।
एतद्धि दुर्लभतरं लोके जन्म यदीदृशम् ॥ ४२ ॥

अथ वेति। अथ वा श्रीमता कुलादन्यस्मिन् इत्यर्थ । केषा कुल इति तत्राह—योगिनामिति। प्रत्यगभिन्नब्रह्मविषयकधीमतामत एवाविद्याद्वयतत्कार्यदरिद्रयोगिनामेव कुले चिरकालाभ्यस्तयोगभ्रष्टो भवति। ब्रह्मचर्यपुर:सरं गुरुकुलवास करोतीत्यर्थ । न त्वनारूढयोगिनामाश्रमे तादृशं जन्म सर्वै किमप्राप्यमिति तत्राह—दुर्लभमिति। एवविधाना कुले यदीदृश

जन्म भवति तदेतत् जन्म लोके दुर्लभतरं कर्मठत्वे सति धनिनां कुले जन्म दुर्लभम् । दरिद्रयोगिना कुले तु जन्म दुर्लभतरम् । प्रमादकारणाभावे सत्युपमृदिताविद्याद्वयतत्कार्यात्मककैवल्यहेतुत्वादित्यर्थ ॥ ४२ ॥

अथ वेति द्वितीयपक्षे दरिद्रयोगिकुले यज्जन्मोक्त तस्य कैवल्यहेतुत्व प्रकटयति—

तत्र तं बुद्धिसंयोगं लभते पौर्वदेहिकम् ।
यतते च ततो भूयः संसिद्धौ कुरुनन्दन ॥ ४३ ॥

तत्रेति । हे कुरुनन्दन! तत्र ब्रह्मज्ञानिजनशुश्रूषाऽधिकारजन्मनि पूर्वदेहानुष्ठितो यो योग तं पौर्वदेहिक प्रत्यक्परैक्यभावारूढाखण्डाकार-बुद्धिसयोग लभते । तत पूर्वजन्मकृतश्रवणादिसस्कारात् भूयः पुनरधिकतर ससिद्धौ ब्रह्मस्वरूपावस्थानलक्षणाया मुक्तौ यतते यत्न करोतीत्यर्थ ॥ ४३ ॥

पूर्वाभ्यासबलादयत्नाद्योगप्रवृत्ति स्यादित्याह—

पूर्वाभ्यासेन तेनैव ह्रियते ह्यवशो ऽपि सः ।
जिज्ञासुरपि योगस्य शब्दब्रह्मातिवर्तते ॥ ४४ ॥

पूर्वेति । स योगभ्रष्ट पूर्वजन्मकृतो ऽभ्यासस्तेन पूर्वाभ्यासेन बलवता अवशो ऽपि ज्ञानेच्छारहितो ऽपि पूर्वजन्माभ्यस्तध्यानादियोग प्रति ह्रियत आकृष्टो भवति । योगाभ्याससहकृताधर्मो बलवत्तरो यदि तदा तेन योगजसंस्कारो ऽप्यभिभूयते भोगमात्रतो बलवत्तराधर्मक्षये सति पुनर्योग-जसंस्कार स्वयमेव कार्यमारभते । दीर्घकालतिरोहितयोगस्य नाशो नास्त्येव । यत एवमतो योगाभ्यास श्रेष्ठ इत्यत्र हेत्वन्तरमाह——जिज्ञासुरिति । श्रवणा-

दिद्वारा योगस्वरूपं जिज्ञासुरपि योगभ्रष्ट शब्दब्रह्म वेदस्तदुक्तकर्मफल पशुपुत्रस्वर्गादिकमतिवर्तते वेदोक्तकर्मफलमतिक्रम्य ब्रह्मज्ञानयत्नवान् भवतीत्यर्थ । जिज्ञासुरपि शब्दब्रह्मातिवर्तेत इत्युक्त्या बुद्धिपूर्वक योगाभ्यासं कुर्वञ्शब्दब्रह्मातिवर्तेत इति किमु वक्तव्यमिति द्योत्यत इति भाव ॥ ४४ ॥

काक्वर्थं विशदयति—

प्रयत्नाद्यतमानस्तु योगी संशुद्धकिल्बिषः ।
अनेकजन्मसंसिद्धस्ततो याति परां गतिम् ॥ ४५ ॥

प्रयत्नादिति । आदौ क्षणमात्र शनै शनै क्षणोत्तराभिवृद्ध्या पुन पुन प्रयत्नाधिकं यतमानो ध्याननिष्ठो योगी तु स्वकृतध्यानाभ्यासबलेन सशुद्ध पुण्यपापतन्मिश्ररूप किल्बिष यस्य सो ऽय सशुद्धकिल्बिष सन् अनेकेषु जन्मसु किंचित्किंचित्सपादितवेदान्तश्रवणादिसंस्कारजनितप्रत्यगभिन्नब्रह्मज्ञानससिद्धो भूत्वा ततस्तादृशापरोक्षज्ञानानन्तर परमामुत्कृष्टा गति मुक्ति याति प्राप्नोतीत्यर्थ ॥ ४५ ॥

एवभूतयोगस्य मोक्षहेतुत्वेन योगिन सर्वाधिकत्वमाह—

तपस्विभ्यो ऽधिको योगी ज्ञानिभ्यो ऽपि मतो ऽधिकः ।
कर्मिभ्यश्चाधिको योगी तस्माद्योगी भवार्जुन ॥ ४६ ॥

तपस्विभ्य इति । हे अर्जुन ! कृच्छ्रचान्द्रायणादिरूप तप , तस्मिन् निष्ठा येषा ते तपस्विन·, तेभ्यः तपस्विभ्य· योग्यधिक इति मत· । योग्यपेक्षया ज्ञान्यधिक इति तत्राह—ज्ञानीति । केवलशास्त्रार्थपरिज्ञानं येषा ते ज्ञानिन तेभ्यो ऽपि योग्यधिक । निष्कामकर्मानुष्ठातारो योग्यधिका

इति तत्राह—कर्मिभ्य इति। ईश्वरार्पणबुद्ध्या चित्तशुद्धिपर्यवसायि निष्कामकर्मानुष्ठान ये कुर्वन्ति ते कर्मिण तेभ्य कर्मिभ्यश्चापि प्रत्यगभिन्नब्रह्मापरोक्षसम्यग्ज्ञानारूढो योगी अधिक इति मतो निश्चित। यस्मादेवं तस्मात् त्वमसप्रज्ञातसमाधिलक्षणध्यानयोगी भव ॥ ४६ ॥

विराडाद्युपासका बहवो वर्तन्ते तेषा मध्ये कतम श्रेयानिति तत्राह—

योगिनामपि सर्वेषां मद्गतेनान्तरात्मना।
श्रद्धावान्भजते यो मां स मे युक्ततमो मतः॥ ४७॥ इति।

इति श्रीमद्भगवद्गीतासु० अध्यात्मयोगो नाम षष्ठो ऽध्यायः॥

योगिनामिति। यो ऽय श्रुत्याचार्यवाक्यश्रद्धावान् योगी मद्गतेन मद्भावारूढेनान्तरात्मना मनसा भक्तिप्राप्त्युपायसकलत्वेन स्वभावसिद्धनिष्कलत्वेन वा किंचिदपि विकल्पासहसत्तासामान्यब्रह्मरूप मा त्रिपादहमहमेव त्रिपादिति सततमेवप्रकारेण भजते सो ऽय ब्रह्मात्मनिष्ठो योगी विराडाद्युपासकाना मध्ये मे मम वासुदेवस्य युक्ततमो मत स्वस्वरूपत्वेन समत। इतिशब्द अध्यायपरिसमाप्त्यर्थ ॥ ४७ ॥

येन कृष्णेन कृष्णाय गीताशास्त्राद्यषट्कत।
निरूपितस्त्वपदार्थो नम प्रत्यक्परात्मने॥

इति श्रीमद्भगवद्गीतार्थप्रकाशिकाया षष्ठो ऽध्याय ॥

सप्तमोऽध्यायः

स्वगीतामध्यषट्केन वाच्यलक्ष्यविभागतः ।
ऐश्वर्यान्निष्कलं भावं भगवानाह तत्पदम् ॥
'ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः ।
ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा ॥'

इति स्मृतिप्रकटितपारमैश्वर्यादिविशेषणविशिष्टो भगवानाद्यषट्केन

'त्वं पदार्थविवेकाय सन्यासः सर्वकर्मणाम् ।
स्मृत्या विधीयते यस्मात्तत्त्यागी पतितो भवेत् ॥'

इति स्मृत्यनुरोधेन जीवानां स्वपदप्राप्तिविघ्ननिहननायोपायोपेयात्मकनिष्ठाद्वयात्मकं त्वंपदार्थमुपन्यस्यार्जुनेनापृष्टमपि 'श्रद्धावान्भजते यो माम्' इति षष्ठाध्यायान्तप्रदर्शितप्रश्नबीजं स्वयमेवोपलभ्य तत्पदार्थं विवेचयितुं मध्यमषट्कमुवाच —

श्रीभगवानुवाच—

मय्यासक्तमनाः पार्थ योगं युञ्जन्मदाश्रयः ।
असंशयं समग्रं मां यथा ज्ञास्यसि तच्छृणु ॥ १ ॥

मयीति । हे पार्थ ! तत्पदार्थत्वेन सकलजगदधिष्ठाने वक्ष्यमाणलक्षणे सर्वेश्वरे मयि आसक्तं संलग्नं मनो यस्य स त्वं मय्यासक्तमना यदि

तदा मय्येव योग मन समाधान युञ्जन्सन् अहमेवाश्रयो यस्य स त्वं मदाश्रयो भूत्वा समस्तविभूतिबलशक्त्यैश्वर्यादिसपन्न तत्पदवाच्य नित्यबुद्धानन्दशुद्धचैतन्यरूपेण तत्पदलक्ष्य वा यथा येन प्रकारेणासशय विस्पष्टं मा ज्ञास्यसि तन्मत्स्वरूपविंषयकविज्ञान शृणु ॥ १ ॥

वक्ष्यमाणं ज्ञान स्तौति—

ज्ञानं ते ऽहं सविज्ञानमिदं वक्ष्याम्यशेषतः ।
यज्ज्ञात्वा नेह भूयो ऽन्यज्ज्ञातव्यमवशिष्यते ॥ २ ॥

ज्ञानमिति । यन्मयोच्यमान ज्ञात्वेह श्रेयोमार्गे तव भूय पुनरन्यत् ज्ञातव्य नावशिष्यते, तेनैव कृतार्थो भविष्यसीत्यर्थ । श्रुत्याचार्यमुखतो यथाविधि ज्ञात ज्ञानम्, तदेव पुनरनुभवारूढ विज्ञानम्, तत्सहितमिद तत्पदलक्ष्यगोचर मत्स्वरूपज्ञान ते तुभ्य वक्ष्यामि ॥ २ ॥

त्वद्विषयकज्ञान किमतिदुर्लभमिति तत्राह—

मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये ।
यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः ॥ ३ ॥

मनुष्याणामिति । मनुष्येतरजीवकोटीना प्रायश श्रेयोमार्गप्रवृत्तिरेव नास्तीति द्योतयितु मनुष्याणामित्युक्तम् । मनु प्रणव परमात्मा, त मनु श्रुत्याचार्यप्रसादलब्धप्रत्यगभिन्नब्रह्मज्ञानेन ज्ञातारो भविष्यन्तीति मनुष्या उच्यन्ते । तेषां मनुष्याणा सहस्रेष्वनेकेषु मध्ये कश्चिदेवानन्तकोटिजन्मसु कृतपरिपाकवशात् चित्तशुद्धिद्वारा ज्ञानसिद्धये यतति । एव सिद्ध्यर्थं यतता यत्न कुर्वता सहस्रेषु कश्चिदेव भूरिपुण्यप्रभावत शास्त्राचार्यप्रसादसिद्ध-

ज्ञानो भवति । एष सिद्धज्ञानाना सहस्रेषु कश्चिदेव मत्प्रसादेन ब्रह्माहमहमेव ब्रह्मेति तत्त्वतो मा वेत्ति । एवमुक्तरीत्या मज्ज्ञानमतिदुर्लभमपि केवलकृपया तुभ्यमभिधास्यामीत्यर्थ ॥ ३ ॥

एव श्रोतारमभिमुखीकृत्य प्रकृतिद्वयावष्टम्भेन सृष्ट्यादिकर्तृत्वेन च तत्पदवाच्यार्थं निरूपयितु परापरभेदेन व्यवस्थित प्रकृतिद्वय प्रत्याययति—

भूमिरापो ऽनलो वायुः खं मनो बुद्धिरेव च ।
अहंकार इतीयं मे भिन्ना प्रकृतिरष्टधा ॥ ४ ॥

भूमिरिति । भूमिरापो ऽनलो वायु खमित्यपञ्चीकृतपञ्चमहाभूतानि गृह्यन्ते । मन शब्देन तत्कारण वैक्षेपाहकारो गृह्यते । बुद्धिशब्देन तत्कारण-मावरणात्मक महत्तत्त्वमुच्यते । अहकारशब्देन तत्कारणमव्यक्त गृहीत भवति । एवमष्टधा प्रकृति मायाशक्तिर्भिन्ना,

'महाभूतान्यहकारो बुद्धिरव्यक्तमेव च ।
इन्द्रियाणि दशैक च पञ्च चेन्द्रियगोचरा ॥'

इति त्रयोदशाध्याये वक्ष्यमाणचतुर्विंशतितत्त्वात्मिका प्रकृतिरप्यष्टधाभिन्न प्रकृत्यन्तर्भूतैवेत्यर्थ ॥ ४ ॥

अपरा प्रकृतिमुपसहरन्परा प्रकृतिमाह—

अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम् ।
जीवभूतां महाबाहो ययेदं धार्यते जगत् ॥ ५ ॥

अपरेति । हे महाबाहो ' या प्रकृतिर्मायाशक्तिरष्टधा भिन्नेति प्रति-पादिता सेयमपरा निकृष्टा परार्थत्वेन जडत्वात् । अचेतनसर्गमेकीकर्तुमष्टधा

प्रकृतिपरिणाममुक्त्वा पुनश्चेतनसर्गमेकीकर्तु जीवस्यापि प्रकृतित्व प्रतिपादयति—इतस्त्वन्यामिति। इतो जडात्मकप्रकृतेरन्या विलक्षणा प्रकृति ममानपायिन्यस्ति ययेद परिदृश्यमान जगत् तत्तत्प्राणिकर्मानुरोधेन धार्यते ता पूर्वोक्तप्रकृतेरन्या जीवभूता क्षेत्रज्ञस्वरूपा मे मम परमेश्वरस्य परा प्रकृतिं विद्धि। चेतनाचेतनयोरेकीकरणाय जीवस्यापि प्रकृतित्वमुक्तमिति भाव ॥५॥

एव प्रकृतिद्वयमुक्त्वा तद्द्वारा स्वस्य जगत्सृष्ट्यादिकारणतामाह—

एतद्योनीनि भूतानि सर्वाणीत्युपधारय।
अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा ॥ ६ ॥

एतदिति। एते क्षेत्रक्षेत्रज्ञरूपे प्रकृती योनी कारणभूते येषा तानि एतद्योनीनि। एव प्रकृतिद्वयतश्चेतनाचेतनात्मकानि सर्वाणि भवन्तीति भूतानीत्युपधारय निश्चिन्वित्यर्थ। तत्रैका ऽनृतजडदु खात्मिका स्थूलसूक्ष्मकारणदेहरूपेण परिणमते। मदशत्वेन चेतनात्मिका ऽपरा प्रकृतिस्तु सर्वत्र भोक्तृत्वेन जडप्रकृतितत्कार्यमनुप्रविश्य तत्सर्व धारयति। उभयो प्रकृत्योः मत्त सभूतत्वेन ते च मदीये प्रकृती। अतो ऽहमेव सप्रकृतिकस्य कृत्स्नस्य जगत प्रकृत्यवच्छिन्नचैतन्यात् भवत्याविर्भवतीति प्रभवश्च, नित्यनैमित्तिकप्राकृतात्यन्तभेदेन चतुर्धा प्रलीयत इति प्रलय तिरोभावश्च, तथा तयोराविर्भावतिरोभावयो प्रकृतिद्वयद्वारा अहमेव परमकारणमित्यर्थ ॥ ६ ॥

प्रकृतिद्वयद्वारा अहमेव परमकारणमिति यदुक्त तद्विचार्यम्, प्रकृतिद्वयस्य तावत् जगत्तद्धारणरूपत्वेन च कारणत्वसभवात स्वेतरवस्त्वन्तरशून्यत्वादीश्वरस्य जगत्कारणता कथमित्यपेक्षायामपराया प्रकृते अचेतनत्वेन जडत्वात् परायाश्चेतनत्वे ऽपि किंचिज्ज्ञत्वादेव जडत्वकिंचिज्ज्ञत्व-

स्वरूपप्रकृतिद्वयस्य कार्यकारणताऽनुपपत्त्या स्वज्ञदृष्ट्या स्वेतरवस्त्वन्तरशून्य-सर्वज्ञेश्वरस्य स्वरूपेण कार्यकारणताऽभावे ऽपि स्वाज्ञदृष्ट्या कार्यत्व कारणत्व चोपपद्यतेतरामित्याचष्टे—

मत्तः परतरं नान्यत्किंचिदस्ति धनंजय।
मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव ॥ ७ ॥

मत्त इति। हे धनजय' मत्त सर्वज्ञेश्वरात् परतरमन्यत् कार्यकारणान्तर न किचिदस्ति। यस्मादेव दीर्घसूत्रे मणिगणा इव सूत्रादिस्वरूपे मयि मिथ कार्यकारणात्मक जगत्सर्व प्रोत ग्रथितमनुस्यूतम्। तस्मादहमेव कार्यकारणरूपेणावस्थित इत्यर्थ ॥ ७ ॥

जगदाविर्भावतिरोभावहेतुता तवास्तु, न तत्स्थितिहेतुता स्यात्, रसादिष्वबादीना प्रोतत्वेन विद्यमानत्वात् कथ त्वय्येव सर्व प्रोतमित्युक्त तत्राह—रसो ऽहमिति पञ्चभि।

रसो ऽहमप्सु कौन्तेय प्रभा ऽस्मि शशिसूर्ययोः।
प्रणवः सर्ववेदेषु शब्दः खे पौरुषं नृषु ॥ ८ ॥

रस इति। हे कौन्तेय' अप्सु रसो ऽहम्, रसरूपे मय्याप प्रोता, रसरूपया विभूत्या ऽप्सु स्थितो ऽस्मीत्यर्थ, रसाश्रयत्वादपाम्। एव सर्वत्र द्रष्टव्यम्। शशिसूर्ययो प्रभा ऽस्मि, सर्वप्रकाशकत्वेन प्रभारूपेण मयि शशिसूर्ययो प्रोतत्वात्। तथा सर्ववेदेषु सारभूत प्रणवो ऽस्मि, प्रणवार्थरूपे मयि सर्ववेदाना प्रोतत्वात्। तथा खे आकाशे सारभूत शब्दो ऽस्मि, शब्द तन्मात्रे मयि खस्य प्रोतत्वात। तथा नृषु पुरुषेषु पौरुष पुभावो ऽस्मि, पौरुषे सर्वोद्यमरूपे मयि पुरुषाणा प्रोतत्वात् ॥ ८ ॥

गन्धतेजोजीवनतपास्यहमेवेत्याह—

पुण्यो गन्धः पृथिव्यां च तेजश्चास्मि विभावसौ ।
जीवनं सर्वभूतेषु तपश्चास्मि तपस्विषु ॥ ९ ॥

पुण्य इति । पृथिव्या पुण्यः सहजो गन्ध गन्धतन्मात्रमहमस्मि, गन्धतन्मात्रे मयि पृथिव्या प्रोतत्वात् । तथा विभावसावग्नौ तेजो दीप्तिश्चाहम्, दीप्तिस्वरूपे मयि विभावसोः प्रोतत्वात् । तथा सर्वाणि भूतानि येन जीवन्ति सर्वेषु भूतेषु तज्जीवनमहम्, जीवनशब्देन प्राणादिधारणमायुरुच्यते, जीवनभूते मयि ब्रह्मादिस्तम्बान्तभूताना प्रोतत्वात् । तथा तपस्विषु वानप्रस्थादिषु द्वन्द्वसहनरूप कृच्छ्रचान्द्रायणादिरूप सदसद्विवेकरूप वा तपो ऽस्मि, नानाविधतप स्वरूपे मयि तपस्विना प्रोतत्वात् ॥ ९ ॥

बीजबुद्धितेजास्यहमेवेत्याह—

बीजं मां सर्वभूतानां विद्धि पार्थ सनातनम् ।
बुद्धिर्बुद्धिमतामस्मि तेजस्तेजस्विनामहम् ॥ १० ॥

बीजमिति । हे पार्थ! चेतनाचेतनात्मकाना सर्वभूताना सनातन चिरतन बीज मा विद्धि । सजातीयकार्योत्पादनसमर्थत्वेनोत्तरोत्तरकार्यानुस्यूतत्वमेव बीजस्य सनातनत्वम्, चिरतनबीजभूते मयि सर्वभूताना प्रोतत्वात् । तथा बुद्धिमता व्यवसायिना प्रत्यक्परैक्याभिव्यञ्जिका बुद्धिर्ज्ञानमहमस्मि, बुद्धिस्वरूपे मयि बुद्धिमज्जन्तूना प्रोतत्वात् । तथा तेजस्विना सर्वोत्कृष्ट तेज प्रागल्भ्यमहमस्मि, सर्वसामर्थ्यरूपे मयि समर्थाना प्रोतत्वात् ॥ १० ॥

बलकामावप्यहमेवेत्याह—

बलं बलवतां चाहं कामरागविवर्जितम् ।
धर्माविरुद्धो भूतेषु कामोऽस्मि भरतर्षभ ॥ ११ ॥

बलमिति । हे भरतर्षभ ! बलवतां बलिष्ठानां बलं सत्त्वमहमस्मि । बलं कीदृशमिति तत्राह—कामेति अप्राप्तविषयकस्पृहा रजःकार्यं कामश्च कामितार्थे प्राप्तेऽपि पुनरधिकस्पृहा तमःकार्यं रागश्च, ताभ्यां विवर्जितं शरीरस्थितिमात्रहेतुसामर्थ्यं सत्त्वकार्यं बलमहम्मीत्यर्थः । बलस्वरूपे मयि बलवतां प्रोतत्वात् । तथाभूतेषु दारेषु यथोक्तकाले धर्मशास्त्राविरुद्धः पुत्रोत्पत्तिमात्रहेतुकः कामोऽस्मि । यद्वा सर्वभूतेषु तत्तदाश्रमोक्तधर्मशास्त्राविरुद्धः शरीरस्थितिमात्रप्रयोजकाभिलाषः कामोऽस्मि ॥ ११ ॥

स्वाधिष्ठेयप्रकृतेस्त्रिगुणात्मकत्वेन प्राणिनामपि त्रैविध्यात्तेषां कारणमहमेवेत्याह—

ये चैव सात्त्विका भावा राजसास्तामसाश्च ये ।
मत्त एवेति तान्विद्धि न त्वहं तेषु ते मयि ॥ १२ ॥

ये चेति । ये चैव सात्त्विका भावाः शमदमादिगुणसंपन्नाः प्राणिनः सन्ति, ये च राजसा भावा हर्षौदार्यादिगुणिनः प्राणिनः सन्ति, ये तामसा भावाः शोकमोहादिसंपन्नाः प्राणिनः सन्ति, ये च मिश्रगुणिप्राणिनः सन्ति तान् प्राणिनः सर्वान् स्वस्वकर्मानुरोधेन मत्त एव जातान् विद्धि । यथा पितुः पुत्राधीनता तथा तवापि त्वज्जन्यभावाधीनत्वाद-क्रियत्वं कुत इति तत्राह—नेति । अनुवृत्तत्वेन मम भावानां व्यावृत्त

च तेषु सर्पादिस्थानीयेषु रज्ज्वादिस्थानीयो ऽह वासुदेवो न वर्ते । तद्भाव-गुणदोषास्पृष्टत्वात् जीववत्तदधीनो न भवामीत्यर्थ । कथ पुनर्भावाना व्यावृत्तत्वं स्वतन्त्रत्वादिति तत्राह—ते मयीति । सर्वत्रानुवृत्ते प्रत्यगभिन्ने ब्रह्मरूपे मयि व्यावृत्ता नाना भावा स्वातन्त्र्यविरला सन्तो वर्तन्ते । सर्वेषा भावाना मत्सत्ताऽतिरिक्तसत्ताऽभावात् ॥ १२ ॥

एव सर्वकल्पनाऽन्तर्यामित्वेन तद्भावाभावप्रकाशकत्वेन तदध्यारोपाप-वादास्पदत्वेन तत्सबन्धास्पृष्टत्वेन च प्रसिद्ध सर्वस्वतन्त्र सर्वेश्वर नित्यशुद्ध-बुद्धपरमानन्दस्वभाव त्वा किमर्थ सर्वे न जानन्तीति तत्राह—

त्रिभिर्गुणमयैर्भावैरेभिः सर्वमिदं जगत् ।
मोहितं नाभिजानाति मामेभ्यः परमव्ययम् ॥ १३ ॥

त्रिभिरिति । त्रिभि गुणमयै सत्त्वादित्रिगुणविकारै कामक्रोधराग-द्वेषादिभावैः एभि सर्वमिद चेतनाचेतनात्मक जगदावृत सन्मोहितम् । यत एवमत एभ्य सत्त्वादिगुणतत्कार्येभ्य पर व्यतिरिक्त षड्भावविकार-रहितत्वादव्यय सर्वात्मान नित्यशुद्धबुद्धपरमानन्दब्रह्मरूप मा न जानाति कृत्स्नस्य जगतो मन्मायामोहितत्वात् ॥ १३ ॥

जगतो मायामोहितत्वेन मायाशक्ते दुरतिक्रमत्वेन च यस्य कस्य वा जन्तोस्त्वद्भावापत्ते वैरल्यात् तत्प्रतिपादकशास्त्रस्याप्यकिंचित्कर-ता ऽनिवार्यतापदमेवार्हतीति तत्राह—

दैवी ह्येषा गुणमयी मम माया दुरत्यया ।
मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ॥ १४ ॥

दैवीति । देवस्य मे विष्णो सत्तातिरिक्तसत्ताशून्या दैवी । त्वमिव किं सा ऽपि स्वतन्त्रेति तत्राह—एषेति । त्वकारयोग्यत्वात्तुच्छैषा मत्परतन्त्रा । तस्या स्वातन्त्र्याभावद्योतको हिशब्द । सा किं त्वमिव निर्गुणेति तत्राह—गुणमयीति । गुणत्रयोद्रेकवैधुर्यलक्षणगुणसाम्यरूपा ऽपि भाव्यनर्थस्वकार्यद्वारा त्रिगुणात्मिकेत्यर्थ । सा कस्य स्वाधीनेति तत्राह—ममेति । प्रत्यगभिन्नब्रह्मरूपस्य दासीव परिचारिणीत्यर्थ । तस्या नाम किमिति तत्राह—मायेति । प्रत्यगभिन्नब्रह्मस्वरूपातिरेकेण या मा प्रमादृष्टिनिर्मूलत्वात् सा मायेत्युच्यते । न चाहमज्ञ इत्यनुभवात् कथ मायाया मिथ्यात्वमिति वाच्यम्, तस्या स्वविचारावधित्वात् । यथा प्रदीपानुगृहीतदृष्टेश्चिरकालस्थाय्यपि गुहासतमसो न दृश्यते, तथा परमेश्वराराधनलक्षणनिष्कामकर्मानुष्ठानजनितचित्तशुद्धिगम्यप्रत्यगभिन्नब्रह्मसम्यग्ज्ञानप्रचण्डमार्तण्डानुगृहीतदृष्टे स्वाज्ञानकालमारभ्यानुभूता ऽपि न दृश्यते, मिथ्याभूतत्वादित्यर्थ ।

‘अविद्यमानैवाविद्या वस्तुतत्त्वविचारिणाम् ।
अविचारेण मूढाना वज्रादपि दृढा यत ॥’

इति वार्तिककारोक्ते । तथा चेत्तिरस्कर्तुं शक्येति तत्राह— दुरत्ययेति । मद्भावविधुरै पुरुषै दु खेनात्ययो ऽतिक्रमण यस्या सा दुरत्यया, दुष्प्रतरेयमित्यर्थ । तथाविधा माया के ऽपि न तरेयुरिति तत्राह —तरन्तीति । ये महाऽनुभावा मायाविन मायातत्कार्यसबन्धास्पृष्ट सर्वप्रत्यगभिन्नब्रह्मरूप मा प्रपद्यन्ते ते मद्भक्ता एवैता त्रिगुणात्मिका मद्भावपराङ्मुखमहामोहकारिणीं तरन्त्यतिक्रामन्ति । मामेवेत्यवधारणतो मत्प्रापकसम्यग्ज्ञानेतरसाधनकोटिभि माया दुरत्ययेति द्योत्यते । यत एवमतो मत्प्रापकोपायोपेयभूतनिष्ठाद्वय प्रतिपादकशास्त्रस्य सफलत्वात् नाकिंचित्करताऽवकाश इति भाव. ॥ १४ ॥

त्वत्प्रपत्तेर्मायाऽतिक्रमणहेतुत्वेन तेन दुस्तरामपि माया तीर्त्वा त्वा सर्वे कि न प्रतिपद्यन्त इति तत्राह—

न मां दुष्कृतिनो मूढाः प्रपद्यन्ते नराधमाः ।
मायया ऽपहृतज्ञाना आसुरं भावमाश्रिताः ॥ १५ ॥

नेति । दुष्टजनश्लाघनीया कृति येषा ते दुष्कृतिन पापकर्माचरणपरायणत्वात् । न ते मा प्रपद्यन्त इति योजना । कथ ते त्वत्प्रापकहेतु पुण्यकर्म हित्वा पापकर्मैव कुर्वन्तीति तत्राह—मूढा इति । मूलाविद्यादृढपटेन कर्तव्याकर्तव्यज्ञानदृष्टे गाढमावृतत्वात् । कथमेवमावृतमिति तत्राह—अपहृतेति । किं ज्ञान कया ? मायया मदीयया अपहृत शास्त्रजन्यज्ञान येषा ते अपहृतज्ञाना मद्भक्तिविमुखाना शास्त्रजन्यज्ञानस्याकिंचित्करत्वात् । त्वद्भावाभावे ऽपि शास्त्रजन्यज्ञानिनो नरोत्तमा स्युरिति तत्राह—नराधमा इति । मद्भावारूढेतरप्राणिगम्यरौरवादिनरकोपमससारे स्वविज्ञातशास्त्रज्ञान विस्मृत्याधमजनवद्रमन्त इति नराधमा । मद्भाववैमुख्येन निकृष्टत्वात् त्वद्भाव विना क भाव ते भजन्तीति तत्राह—आसुरमिति । 'दम्भो दर्पो ऽतिमानश्च क्रोध पारुष्यमेव च' इत्यादिवक्ष्यमाणलक्षणम् आसुर भावमाश्रिता सन्त स्वात्मभूतमपि मा न प्रपद्यन्ते, न भजन्तीत्यर्थ ॥ १५ ॥

के त्वा प्रपद्यन्त इत्यत्र पूर्वोक्तविपरीता सुकृतिन इत्याह—

चतुर्विधा भजन्ते मां जनाः सुकृतिनो ऽर्जुन ।
आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ ॥ १६ ॥

चतुर्विधा इति । हे अर्जुन ! अनेककोटिजन्मसुकृतपरिपाकवशादीश्वराराधनलक्षणनिष्कामकर्मानुष्ठानात्मिका शोभना कृति येषा ते सुकृतिन

परमेश्वर मा भजन्ते । के त इति तत्राह—जना इति । भगवद्भजनतो ऽस्माक जन्मादि नास्तीति दृढनिश्चयवन्तो ये ते जना उच्यन्ते । ते कतिविधा इति तत्राह—चतुर्विधा इति । चतुर्णा नाम निर्दिशति—आर्त इत्यादिना । यो राजचोरव्याघ्ररोगकृत्याग्रहादिना ऽभिभवमापन्नस्तन्निवृत्तये मा भजति सो ऽयमार्त इत्युच्यते । तत्र कश्चिद्राजादिकृतार्तिमोचने मामनादृत्य क्षुद्रदेवता भजति, न मद्भक्त स भवति । यो मत्तत्त्व श्रुत्याचार्यमुखेण ज्ञातुमिच्छति स जिज्ञासुरुच्यते । य इहामुत्र च स्वभोगसाधनीभूतस्रक्चन्दनादिस्वर्गादिवाञ्छया मा भजति सो ऽर्थार्थीत्युच्यते । य सर्वप्रत्यगभेदेन ब्रह्मरूप मा जानाति स च ज्ञानीत्युच्यते । हे भरतर्षभ ! एव स्वकृतसुकृततारतम्यभेदेन चतुर्विधा मद्भक्ता मा भजन्तीत्यर्थ ॥ १६ ॥

एवप्रकारेण त्वा भजता मध्ये क श्रेष्ठ इति तत्राह—

तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते ।
प्रियो हि ज्ञानिनो ऽत्यर्थमहं स च मम प्रियः ॥ १७ ॥

तेषामिति । तेषाम आर्तादिचतुर्णा मध्ये तत्त्वतो मा जानातीति ज्ञानी विशिष्यते, सदा प्रत्यगभेदेन मन्निष्ठत्वात् । चतुर्णा भक्तत्वसाम्ये ऽपि ज्ञानिन कथ वैशिष्ट्यमिति तत्राह—नित्ययुक्त इति । नित्यस्वरूपे मयि वासुदेवो ऽहमहमेव वासुदेव इति युक्त, यद्वा नित्य मय्येव युक्त सर्वत्रात्मीयाभिमानाभावेन चित्तविक्षेपाभावात् । अस्त्वेव ज्ञानिनो नित्ययुक्तत्वम्, आर्तादीना त्वद्भक्ते समत्वेन ज्ञानिनि को विशेष इति तत्राह—एकभक्तिरिति । अविद्याद्वयविजृम्भितनि सारससारमण्डले तदन्तर्यामित्वेन तद्भावाभावप्रकाशकत्वेन तत्सत्तास्फूर्त्यानन्ददत्वेन तदध्यारोपापवाददोषास्पृष्टत्वेन च सारभूतात्स्वस्मादत्यन्ताभिन्न परमात्मा यो ऽवशिष्यते स एवाह-

महमेव स इति भक्तिर्भजन परमप्रेमलक्षण यस्य सो ऽयमेकभक्ति ज्ञान्येव विशिष्यते । आर्तादीना त्रयाणामेवमेकभक्त्यभावात् पुनस्तस्यैवाधिक्ये हेतु दर्शयति—प्रियो हीति । मदेकभक्ते ज्ञानिनो ऽत्यर्थ तत्कृतसेवामनपेक्ष्य वासुदेवो ऽह प्रिय तदात्मभूतत्वात् । ज्ञानिन आत्मभूतत्वेन प्रियत्वे ऽपि तस्य त्वत्प्रीतिविषयत्व कुत इति तत्राह— स चेति । स च ज्ञानी वासुदेवस्य मम प्रिय. । मद्भावारूढत्वेन मत्स्वरूपत्वात् । हि यस्मादेव तस्मात् ज्ञानी सर्वोत्तम इत्यर्थ ॥ १७ ॥

अस्त्वेव ज्ञानिन तव च मिथ प्रेमास्पदत्वम्, तदितरे त्रयस्त्वद्भक्ता अपि किं त्वामप्राप्य ससरन्तीति तत्राह—

उदाराः सर्व एवैते ज्ञानी त्वात्मैव मे मतम् ।
आस्थितः स हि युक्तात्मा मामेवानुत्तमां गतिम्॥ १८॥

उदारा इति । आर्तादय सर्वे त्रयो ऽप्युदारा मम प्रिया एव, क्रमादेते मा प्रपद्यन्त इत्यर्थ । आर्तादीनामुदारत्वे ऽपि ज्ञानिन स्वात्मत्वेन तदतिरेकित्व स्फुटयति—ज्ञानीति । प्रत्यगभेदेन मद्भावारूढो ज्ञानी तु मदात्मैवेति सर्वेश्वरस्य मे मम मत निश्चय । अवधारणार्थ विशदयति—-आस्थित इति । यस्मात् ज्ञानी मदेकभक्तित्वेन युक्तात्मा सन्ननुत्तमा सर्वोत्तमा गति मुक्तालिगम्य मामेवास्थितो मद्भाव प्रपन्नो भवति, मद्व्यतिरिक्तभावानामभावात् । तस्मात् त्रिभ्यो मद्भावारूढत्वेन ज्ञान्यधिक इति भाव ॥१८॥

एवभूतो ज्ञानी दुर्लभ इत्याह—

बहूनां जन्मनामन्ते ज्ञानवान्मां प्रपद्यते ।
वासुदेवः सर्वमिति स महाऽऽत्मा सुदुर्लभः ॥ १९ ॥

बहूनामिति । बहूना प्रत्यगभिन्नब्रह्मज्ञानहेतुपुण्यकर्मानुष्ठानजनितचित्तशुद्ध्याश्रयाणामनन्तकोटिजन्मनामन्ते चरमजन्मनि सर्वकर्मसन्यासलक्षणप्रत्यगभिन्नब्रह्मज्ञानवान्मा ब्रह्मात्मरूप वासुदेव प्रपद्यते । केनोपायेनेति तत्राह—वासुदेव सर्वमिति । 'ब्रह्मैवेद सर्वम्' 'आत्मैवेद सर्वम्' 'सत्तामात्र हीद सर्वम्[1]' 'नारायण एवेद सर्वम्'

'स्वय ब्रह्मा स्वय विष्णु स्वयमिन्द्र स्वय शिव ।
स्वय विश्वमिद सर्व स्वस्मादन्यन्न किचन ॥
न तदस्ति न यत्राह न तदस्ति न तन्मयम् ।
किमन्यदभिवाञ्छामि सर्व सच्चिन्मय ततम् ॥'

इत्यादिश्रुत्यनुरोधेन यत सर्व चराचरात्मक जगद्वासुदेव ममापि सर्वान्तर्यामित्वादतो ऽहमपि वासुदेव एवेत्यनेनोपायेनाय ज्ञानी मा प्रपद्यते, अपरिच्छिन्नदृष्टित्वात् । तादृश महाऽनुभाव ज्ञानिन स्तौति-- स इति । स ब्रह्मात्मभावारूढत्वेन महानात्मा ऽन्त करण यस्य स महाऽऽत्मा ब्रह्मात्मनिष्ठो मुनि मनुष्याणा सहस्रेष्वित्यत्र चतुर्थपर्यायारूढत्वेन सुदुर्लभ तत्समो ऽन्यो नास्तीत्यर्थ ॥ १९ ॥

सर्वेषाम 'वासुदेव सर्वम्' इति ब्रह्मात्मैक्यरूपैकभक्ति कुतो नोदेतीत्यत्र हेतु 'न मा दुष्कृतिन' इति श्लोकेनोक्तमपि पुनर्हेत्वन्तरमाह—कामैरिति चतुर्भि ।

कामैस्तैस्तैर्हृतज्ञानाः प्रपद्यन्ते ऽन्यदेवताः ।
तं तं नियममास्थाय प्रकृत्या नियताः स्वया ॥ २० ॥

[1] नृ ३ ९

कामैरिति । ये मदतिरिक्तबुद्ध्या क्षुद्रदेवतायाजिन पुरुषा दार-पुत्रवित्तपशुस्वर्गादिगोचरा ये ये कामा तैस्तै कामै हृतमपहृत शास्त्राचार्य-प्रसादजन्यमपि ज्ञान येषा ते हृतज्ञानास्तूलाविद्याकबलितविवेका भूत्वा स्वया स्वात्मीयया प्रकृत्या पूर्वजन्मवासनारूपया नियता नियोजिता सन्त तत्तत्कामानुगुण जपोपवासादिक त त नियम यथाविध्यास्थाय मदन्य-बुद्ध्या क्षुद्रदेवता प्रपद्यन्ते क्षुद्रदेवतारूपेणापि ने मामेव भजन्ति मद्व्यतिरिक्तोपास्याभावादित्यर्थ ॥ २० ॥

मद्व्यतिरेकेण क्षुद्रदेवतायाजिनामपि तत्तद्देवताविषये श्रद्धाभक्ती जनयित्वा तत्तत्कामपूरणमहमेव करोमीत्याह—

यो यो यां यां तनुं भक्तः श्रद्धया ऽर्चितुमिच्छति ।
तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम् ॥ २१ ॥

यो य इति । तेषा मदन्यदेवतायाजिना मध्ये यो यो यस्या यस्या देवताया भक्तः मदभिन्ना या या तनु मूर्ति श्रद्धया भक्त्या चार्चितु पूजयितुमिच्छति तस्य तस्य तत्तद्देवताभक्तस्य कामिन तामेव तत्तद्देवता-विषयामचला निश्चला श्रद्धामास्तिक्यबुद्धि भक्ति च विदधामि प्रयच्छा-मीत्यर्थ ॥ २१ ॥

तत किमित्यत आह—

स तया श्रद्धया युक्तस्तस्या राधनमीहते ।
लभते च ततः कामान्मयैव विहितान्हि तान् ॥ २२ ॥

स तयेति । यो ऽय क्षुद्रदेवतोपासक स मद्व्यतिरिक्तान्यदेवता-याजी मद्दत्तया तया श्रद्धया युक्त सन् तस्या देवतायास्तन्वा राधनमीहते

उत्कटेच्छया करोतीत्यर्थ । ततो मदभिन्नदेवतारूपतस्तात्कालिकहितान् तत्तद्देवतान्तर्यामिणा मयैव विहितान् निर्मितान् कामान् लभते । चशब्द-स्तल्लाभस्यान्तवत्त्वद्योतनार्थ । सर्वज्ञस्य मम तत्तत्प्राणिचित्तशुद्ध्यनुसारेण कर्मकाण्डादिकाण्डत्रयविहितफलदातृत्वेन प्रसिद्धत्वात् 'कर्माध्यक्ष सर्वभूता-धिवास' 'एको बहूना यो विदधाति कामान्' इत्यादिश्रुते ॥ २२ ॥

सर्वासा देवताना त्वत्तनुत्वात्तदाराधनस्यापि त्वदाराधनत्वात्त्वैव सर्व-कर्माध्यक्षत्वेन सर्वेषा फलदातृत्वाच्च साक्षात्त्वद्भक्तानामन्यदेवताभक्ताना च को विशेष इति तत्राह—

अन्तवत्तु फलं तेषां तद्भवत्यल्पमेधसाम् ।
देवान्देवयजो यान्ति मद्भक्ता यान्ति मामपि ॥ २३ ॥

अन्तवदिति । अस्मत्प्रत्ययालम्बनभूतप्रत्यगात्मन सकाशादिय देवता भिन्नेति परिच्छिन्नदृष्टित्वादल्पा मेधा प्रज्ञा येषा तेषामल्पमेधसा तत्तच्चित्तानु-रोधेन तत्तद्देवतारूप स्वीकृत्य सर्वेश्वरेण मया दत्तमपि तत्तत्फल पशुपुत्र-स्वर्गाद्यन्तवत् विनाशवदेवेत्यर्थ, तुशब्दस्यावधारणार्थत्वात् । अन्तवत्त्वमेव स्पष्टयति—देवानिति । देवानग्न्यादीन्यजन्तीति देवयज, ते देवानन्तवतो यान्ति । त्वद्भक्ता क यान्तीति तत्राह—मामिति । मद्भक्तास्तु सर्वप्रत्यगभिन्न मामेव यान्ति प्रत्यग्भावकबलितपराग्भावत्वान्नित्यशुद्धबुद्धमुक्तस्वरूपा भवन्ती-त्यर्थ ॥ २३ ॥

क्षुद्रदेवताऽपेक्षया परमदयालुत्वेन निर्हेतुजातकटाक्षतो भक्तबृन्दाना-मनितरसाधारणकैवल्यफलप्रदातृत्वेन च सर्वसमर्थे त्वयि सति सर्वप्रकारेण त्वा विहाय त्वद्विपरीतविशेषणविशिष्टक्षुद्रदेवतामेव कथ भजन्तीति तत्राह—

अव्यक्तं व्यक्तिमापन्नं मन्यन्ते मामबुद्धयः ।
परं भावमजानन्तो ममाव्ययमनुत्तमम् ॥ २४ ॥

अव्यक्तमिति । येषा ब्रह्मात्मसस्था बुद्धिर्न विद्यते ते अबुद्धयो मन्दप्रज्ञा श्रुत्याचार्यप्रसादलेशशून्यत्वात्, अव्यय षड्भावविकारास्पृष्ट-त्वात्, अनुत्तम सर्वोत्कृष्टनिरतिशयानन्दरूपत्वात्, परमविद्याद्वयतत्कार्यपरत्वेन विभानात्, अव्यक्त तूलाविद्याविलसितमनोवाचामगोचरत्वात् । सर्वविकारा-सहसत्तासामान्यब्रह्मरूपस्य ममेदृश नित्यशुद्धबुद्धपरमानन्दस्वरूपत्वेन प्रसिद्ध निष्कल भाव भक्तवृन्दस्वपदप्राप्त्युपायभूताप्राकृतदिव्यमङ्गलविग्रह सकल भावमप्यजानन्त सन्तो ऽविद्याद्वयतत्कार्यजातपाञ्चभौतिकीं व्यक्ति मूर्ति मा मन्यन्ते । तद्दोषेणैव मामनादृत्य क्षुद्रदेवतोपासनमेव कुर्वन्तीत्यर्थ ॥ २४ ॥

एवभावारूढाना स्वाज्ञाने हेतुमाह—

नाहं प्रकाशः सर्वस्य योगमायासमावृतः ।
मूढो ऽयं नाभिजानाति लोको मामजमव्ययम् ॥ २५ ॥

नाहमिति । स्वयप्रकाशरूपो ऽप्यह मद्भावविधुराणामप्रकाशो भवामि । प्रकाशो ऽप्यप्रकाशो भवामीति कथमुच्यते ? तत्राह—योगमाया-समावृत इति । योग प्रत्यगभिन्नब्रह्मगोचरज्ञान तस्य माया योगमाया मदीया-प्रकृतिरघटितघटनापटीयसी, तया योगमायया समावृत इव मद्भावविकलस्या-भक्तलोकस्यानभिव्यक्तप्रकाशो भवामि । न प्रकाशो भवामीत्यर्थ । न च योगमायया त्वमपि लोकवदावृतो यदि तदा लोकस्येव तवापि स्वरूप-ज्ञानतिरोधान • भवेदिति वाच्यम् । मम मायित्वात् 'माया तु प्रकृति विद्यान्मायिन तु महेश्वरम्[1]' इति श्रुते । मायातत्त्वं जानतो मायाविनो

न हि माया स्वविज्ञानमावारयितु पारयति। मायिन परमेश्वरस्य मम निरावृतक्रियाज्ञानेच्छाशक्तिमत्त्वात् स्वाज्ञदृष्ट्या मायाया सत्त्वे ऽपि स्वदृष्ट्या मायाया मायात्वात् माया नास्त्येवेत्यर्थ । लोकस्यापि तथा ऽस्त्वित्यत आह—मूढ इति। मूलाज्ञानारूढो मूढो ऽय लोक स्वाज्ञानावृतदृष्टित्वान्मा वासुदेव नाभिजानाति किमिति तत्राह—अजमव्ययमिति। षड्भावविकाररहितत्वेनाविद्याद्वयातीतमिति न जानातीत्यर्थ ॥ २५ ॥

यथा त्वा लोको न जनाति तथा त्वमपि लोक न जानासीत्यत आह—

वेदाहं समतीतानि वर्तमानानि चार्जुन।
भविष्याणि च भूतानि मां तु वेद न कश्चन॥ २६ ॥

वेदेति। हे अर्जुन! परमेश्वरो ऽह समतीतानि अतिक्रान्तानि वर्तमानानि भविष्याणि च चेतनाचेतनात्मकानि सर्वभूतानि वेद जाने। निरावृतत्वेनाकुण्ठितक्रियाज्ञानेच्छाशक्तिमत्त्वात्। कश्चन जन्तु प्रत्यगभिन्नब्रह्मरूप मा तु न वेद न जानाति। मज्ज्ञानप्रतिबन्धकतूलाविद्याऽऽवृतक्रियाज्ञानेच्छाशक्तिमत्त्वात् मद्भावारूढो मद्रूपेण सर्वं वेदेति तुशब्दार्थ ॥ २६ ॥

अविद्याद्वयातीतत्वेन सर्ववेदान्तप्रसिद्धप्रत्यगभिन्नब्रह्मज्ञानप्रतिबन्धकमाह—

इच्छाद्वेषसमुत्थेन द्वंद्वमोहेन भारत।
सर्वभूतानि संमोहं सर्गे यान्ति परंतप॥ २७ ॥

इच्छेति। हे भारत! इष्टवस्तुविषयकस्पृहैवेच्छा, अनिष्टवस्तुविषयकक्रोधो द्वेष। इच्छा च द्वेषश्चेच्छाद्वेषौ, ताभ्या समुत्तिष्ठतीति इच्छाद्वेषस-

मुत्थ , इच्छाद्वेषसमुत्थेन मिथो विरुद्धस्वभावेन शीतोष्णसुखदु.खादिद्वद्व-प्रयुक्तविवेकभ्रशात्मकमहामोहेनाब्रह्मस्तम्बात्मकानि सर्वभूतानि, सृज्यन्त इति सर्ग , तस्मिन् सर्गे स्थूलादिशरीरपरिग्रहे तदानुकूल्येनाह स्थूल कृश काणो बधिर सुखी दु खी किचिज्जानामि न जानामीत्यादिदृढाभिमानरूप समोह यान्ति । अतस्तेषा मज्ज्ञानाभावहेत्विच्छाद्वेषाग्वृतदृष्टित्वेन मनुष्य-कीटत्वात् ते मा कथ जानीयुरित्यर्थ ।

'इच्छाद्वेषसमुत्थेन द्वद्वमोहेन जन्तव ।
धराविवरमग्नाना कीटाना समता गता ॥'

इत्यादिश्रुते ॥ २७ ॥

एव सर्वभूतानि समोहमेत्य धराविवरनिमग्नकीटोपमा सन्त त्वा न भजन्ति यदि, तदा त्वद्भजनप्रतिपादकवेदशास्त्रपुराणानि वैतथ्यपद भजे-युरित्यपेक्षायामेवमनेकेषु सत्स्वपि केषाचित्पुरुषधौरेयाणामनन्तकोटिजन्म-सुकृतपरिपाकवशान्मद्भावापन्नभक्तससर्गो भवेत् । तेन मदाराधनलक्षण-निष्कामकर्मानुष्ठानजनितचित्तशुद्धिद्वारा साधनचतुष्टयसपन्ना सन्तो ऽथ वेदान्तश्रवणाद्यनुष्ठानेन मा भजन्ति हि । तेषामेवभूताना विद्यमानत्वात् मद्भजनप्रतिपादकवेदशास्त्रपुराणानि न वैतथ्यपदमर्हन्तीत्याह—

येषां त्वन्तगतं पापं जनानां पुण्यकर्मणाम् ।
ते द्वंद्वमोहनिर्मुक्ता भजन्ते मां दृढव्रताः ॥ २८ ॥

येषामिति । येषा मद्भक्तसङ्गसुकृतलब्धस्वान्त करणशुद्धिहेतुनिष्काम-कर्मानुष्ठातॄणा वेदान्तश्रवणादिप्रतिबन्धकपापमन्तमवसान गत नि शेषतो विनष्टमित्यर्थ । ते तु महानुभावा मद्भक्ताग्रगण्या शीतोष्णसुखदु खादि-

द्वंद्वमोहविनिर्मुक्ता भूत्वा सर्वकर्मसन्यासलक्षणप्रत्यगभिन्नब्रह्मनिष्ठाया दृढव्रता सन्त मा वासुदेव प्रत्यगभेदेन भजन्ते ॥ २८ ॥

एव मद्भजनेन ज्ञातव्य मा ज्ञात्वा मद्भक्ता कृतार्था भवन्तीत्याह-—

जरामरणमोक्षाय मामाश्रित्य यतन्ति ये ।
ते ब्रह्म तद्विदुः कृत्स्नमध्यात्मं कर्म चाखिलम् ॥ २९ ॥

जरेति । इहामुत्रफलभोगनैरपेक्ष्येण ये मद्भक्ता जरामरणयोर्मोक्षाय निवृत्त्यर्थं सर्वेश्वर वासुदेव मामाश्रित्य मज्ज्ञानबहिरङ्गसाधननिष्कामकर्मानुष्ठान चित्तशुद्धिपर्यन्त कृत्वा सर्वकर्मसन्यासपूर्वक मज्ज्ञानान्तरङ्गसाधनवेदान्तश्रवणमनननिदिध्यासनमप्रमादेन यतन्ति निर्वर्तयन्तीत्यर्थ । तेन सकलजगतामभिन्ननिमित्तोपादानकारण प्रत्यगभिन्न ब्रह्मरूप मा त एव विदु मद्व्यतिरेकेण वस्त्वन्तराभावात् । कृत्स्न समस्तमध्यात्म सर्वप्राणिहृदयारूढप्रत्यगात्मस्वरूपमविद्याद्वयतत्कार्यरूपमखिल कर्म च मद्रूपेणैव विदुरित्यर्थ ॥

एवविधाना मद्भक्ताना जात्वपि न योगभ्रशो ऽस्तीत्याह—

साधिभूताधिदैवं मां साधियज्ञं च ये विदुः ।
प्रयाणकाले ऽपि च मां ते विदुर्युक्तचेतसः ॥३०॥ इति ॥

इति श्रीमद्भगवद्गीतासु० ज्ञानविज्ञानयोगो नाम सप्तमो ऽध्याय. ॥

साधिभूतेति । अधिभूतादिशब्दार्थं भगवानुत्तराध्याये वक्ष्यतीति न व्याख्यातम् । ये अध्यात्मकर्माधिभूताधिदैवाधियज्ञविदो मद्भक्ता अधिभूत चाधिदैव चाधिभूताधिदैवम् । तेन सह वर्तत इति साधिभूताधि-

दैवम्, अधियज्ञेन सह वर्तत इति साधियज्ञ च मा परमेश्वरं विदु, ते अध्यात्मादिपञ्चब्रह्मविदो मयि वासुदेवे युक्तमेकीभूत चेतो येषा ते युक्त-चेतस सन्त प्राणप्रयाणकाले ऽपि प्रत्यगभेदेन मा विदु, तदानीं व्याकुलतया मा न विस्मरन्ति। यत एवमतो मद्भक्ताना न योगभ्रशशङ्का सेद्धु पारयति।•इतिशब्द अध्यायपरिसमाप्त्यर्थ ॥ ३० ॥

यदभिन्ननिमित्तैककारण जगता नृणाम्।
चरमे जन्मनि प्राप्य ज्ञान तन्मे प्रसीदतु ॥

इति श्रीमद्भगवद्गीताऽर्थप्रकाशिकाया सप्तमो ऽध्याय ॥

अष्टमो ऽध्यायः

पार्थप्रश्नानुरोधेन ब्रह्माध्यात्मादिभेदत ।
सप्तपर्यायसर्वस्वमष्टमेनाह माधव ॥

सप्तमाध्यायान्ते ते ब्रह्म तद्विदु कृत्स्नम्' इत्यादिना भगवदुपदिष्टप्रश्नबीजमुपलभ्य ब्रह्माध्यात्मादिसप्तविधार्थं जिज्ञासुरर्जुन उवाच— किमिति द्वाभ्याम् ।

अर्जुन उवाच—

किं तद्ब्रह्म किमध्यात्मं किं कर्म पुरुषोत्तम ।
अधिभूतं च किं प्रोक्तमधिदैवं किमुच्यते ॥ १ ॥
अधियज्ञः कथं को ऽत्र देहे ऽस्मिन्मधुसूदन ।
प्रयाणकाले च कथं ज्ञेयो ऽसि नियतात्मभिः ॥ २ ॥

किमिति । क्षराक्षरादिविभागास्पृष्टसत्तासामान्यरूपत्वात् हे पुरुषोत्तम' 'ते ब्रह्म तद्विदु ' इत्यत्र यद्ब्रह्म मुमुक्षुभि वेदितव्य तत्किं सकल निष्कल वा, ब्रह्मशब्दस्योभयार्थसभवात् । कृत्स्नमध्यात्ममित्यत्रात्मान देहमधिकृत्य भवतीत्यध्यात्मम् । तत्किं श्रोत्रादिकरणग्राम तत्प्रत्यगात्मा वा, तयोरध्यात्मत्वाविशेषात् । कर्म चाखिलमित्यत्र किं तत्कर्म कृष्यादिर्यज्ञादिर्वा, 'विज्ञान यज्ञ तनुते, कर्माणि तनुते ऽपि च' इत्यत्र द्वैविध्यदर्शनात् ।

साधिभूताधिदैवमित्यत्र भूतान्यधिकृत्य भवतीत्यधिभूतम्। तत्कि पृथिव्यादि-कार्यैकदेश तत्समग्र वा तयोरप्यधिभूतत्वाविशेषात्। दैवमधिकृत्य भवतीत्यधि-दैवम्। तत्किमुच्यते? देवताऽन्तरज्ञान तदन्तर्यामि चैतन्य वा, तयोरपि देवता-त्वस्य तुल्यत्वात्। हे मधुसदन! साधियज्ञ चेत्यत्र यज्ञमधिकृत्य भवतीति अधियज्ञ क विज्ञानात्मा परमात्मा वा? स कथ केन प्रकारेण चिन्त्य? किं तादात्म्येनात्यन्ताभेदेन वा? येन केन वा स चिन्त्यो भवतु, सो ऽस्मिन्देहे कि वर्तते तद्बहिर्वा? देहे वर्तमानो ऽपि को ऽसौ बुद्ध्यादि तद्व्यतिरिक्तो वा? अधियज्ञ कथ को ऽत्र इति न प्रश्नभेद, प्रकारभेद-सभवात्। प्रयाणकाले ऽपि चेत्यत्र नियत आत्मा ऽन्त करण येषा तै नियतात्मभि त्वद्भक्तै कथ केन प्रकारेण सगुणत्वेन निर्गुणत्वेन वा ज्ञेयो ऽसि? तत्सर्व वदेत्यर्थ ॥ १, २ ॥

अर्जुनकृतप्रश्नक्रमेण प्रतिवचन सर्वज्ञो भगवानुवाच—

श्रीभगवानुवाच—

अक्षरं ब्रह्म परमं स्वभावो ऽध्यात्ममुच्यते।
भूतभावोद्भवकरो विसर्गः कर्मसंज्ञितः ॥ ३ ॥

अक्षरमिति। किं तद्ब्रह्मेत्याद्यप्रश्नस्योत्तरमाह—अक्षरमिति। 'ओ-मित्येतदक्षरमिद सर्वम्[1]' इत्यादिश्रुत्यनुरोधेन कालत्रये ऽपि स्वरूपाद्यन्न क्षरति तदक्षरम्। तस्यैवाविद्याद्वयतत्कार्यजातात्परत्वेन बृहणात् निरतिशया-नन्दस्वरूपत्वेन. यत्प्रसिद्ध तदेव निष्कल परम ब्रह्मोच्यते सकलस्यापि निष्कलोपायत्वात् उपायोपेययोरेकत्वाच्च ब्रह्मैकमेव, 'एकमेवाद्वय ब्रह्म'

[1] मा. आ. १

इत्यादिश्रुते । किमध्यात्ममिति द्वितीयप्रश्नस्योत्तर विशदयति—स्वभाव इति । पूर्वोक्तपरमाक्षरब्रह्मण 'तत्सृष्ट्वा तदेवानुप्राविशत्[1]' 'स एतमेव सीमान विदार्यैतया द्वारा प्रापद्यत[2]' 'अनेन जीवेनात्मना ऽनुप्रविश्य नामरूपे व्याकरवाणि[3]' इत्यादिश्रुत्यनुरोधेन प्रतिदेहमात्मानमधिकृत्य प्रत्यगात्मतया प्रवृत्तस्य स्वस्य भाव स्वभावो ऽध्यात्ममुच्यते । परमात्मस्वभावप्रत्यगतिरेकेण करणग्रामासभवात् प्रत्यगात्मैवाध्यात्ममित्यर्थ । कि कर्मेति तृतीयप्रश्नस्योत्तरमाचष्टे-- भूतानीति । भूताना जरायुजादीना भाव उत्पत्ति,

'अग्नौ प्रास्ता ऽऽहुति सम्यगादित्यमुपतिष्ठते ।
आदित्याज्जायते वृष्टिर्वृष्टेरन्न तत प्रजा ॥'

इत्युद्भवश्च, तौ भावोद्भवौ करोतीति भूतभावोद्भवकरो भूतवस्तूत्पत्तिकरो यो विसर्गो देवतोद्देशेन चरुपुरोडाशादिस्वद्रव्यपरित्याग स एव यज्ञ कर्मसज्ञित निष्कामबुद्धया ऽनुष्ठितयज्ञादिकर्मण चित्तशुद्धिगम्यज्ञानद्वारा परमपुरुषार्थहेतुत्वात् तदपेक्षया तद्विपरीतकृष्यादिकाम्यकर्मणा कुत्सितफलप्रदत्वादत एव बीजभूतयज्ञकर्मतृप्तदेवताप्रसादोत्थवृष्ट्यादिक्रमेण स्थावरजङ्गमात्मकभूतानि जायन्ते । तत ससरन्तीत्यर्थ· ॥ ३ ॥

अधिभूत किमिति प्रश्नोत्तरमुपादत्ते—

अधिभूतं क्षरो भावः पुरुषश्चाधिदैवतम् ।
अधियज्ञो ऽहमेवात्र देहे देहभृतां वर ॥ ४ ॥

[1] तै २ ६
[2] ऐ. ३. १२
[3] छ ३. १.

अधिभूतमिति । देवस्य प्रत्यगात्मनो दहराकाशालयत्वात् तदुपलब्धियोग्यो देह उच्यते । त बिभ्रतीति देहभृत , तेषा वरिष्ठत्वात् हे देहभृता वर ' क्षरतीति क्षरो नश्वरो भावो देहादि यावद्भूतजातमधिकृत्य भवतीत्यधिभूत पृथिव्यादि समग्र कार्यजातमधिभूतशब्देनोच्यते । पृथिव्यादिकार्यैकदेशस्य समग्रे ऽन्तर्भावात् । अधिदैव किमिति प्रश्नोत्तर विशिनष्टि—पुरुष इति । सर्वप्राणिपुरीतति शेत इति पुरुष । यद्वा सूर्यादिकरणग्रामान्तर्गतेन करणग्रामानुग्राहकेणानेन स्थूलसूक्ष्मात्मक जगत्पूर्णमिति पुरुष सर्वप्राणिबृन्द सूर्यादिकरणग्रामाधिपबृन्द चाधिकृत्य भवतीत्यधिदैवम् । सर्वलिङ्गशरीरानुग्राहको हिरण्यगर्भ सूत्रात्मा अधिदैवम्, न देवताऽन्तरमित्यर्थ ।

> ' हिरण्यगर्भ समवर्तताग्रे भूतस्य जात पतिरेक आसीत् । '
> ' आदिकर्ता स भूताना ब्रह्माग्रे समवर्तत ।
> स वै शरीरी प्रथम स वै पुरुष उच्यते ॥ '

इत्यादिश्रुतिस्मृतिभ्य । ' अधियज्ञ कथ को ऽत्र देहे ऽस्मिन् ' इति प्रश्नोत्तर प्रकटयति—अहमिति । अग्निष्टोमादियज्ञजातमधिकृत्य भवतीत्यधियज्ञ । सर्वयज्ञाभिमानिनी विष्ण्वाख्या देवता, ' यज्ञो वै विष्णु ' इति श्रुते । स विष्णुरहमेवात्र व्यवहारभूमौ देहे विज्ञानात्माऽत्यन्ताभेदेन बुद्ध्यादिव्यतिरिक्त परमात्मा ऽहमेवेत्यर्थ । सर्वेश्वरस्य मम सर्वयज्ञप्रवर्तकत्वेनाध्यात्मादिज्ञानास्पदत्वेन सर्वकर्माध्यक्षत्वेन परमार्थत सर्वकलनाऽसहनित्यशुद्धबुद्धपरमानन्दसत्तासामान्यब्रह्मरूपत्वेन च प्रसिद्धत्वात् ॥ ४ ॥

प्रयाणकाले च कथ ज्ञेयो ऽसीत्यर्जुनप्रश्नप्रतिवचनरूपेण तत्कालस्मरणोपाय तत्फल चाह—

अन्तकाले च मामेव स्मरन्मुक्त्वा कलेबरम् ।
यः प्रयाति स मद्भावं याति नास्त्यत्र संशयः ॥ ५ ॥

अन्तकाल इति । यो मद्भक्त अन्तकाले चरमश्वासवेलाया मामेवान्तर्यामिस्वरूपत्वेन स्मरन् करणग्रामास्पदकलेबर देह मुक्त्वा अर्चिरादिमार्गेण प्रयाति स अपुनरावृत्तिलक्षण मद्भाव क्रमेण याति । तत्रास्मिन्नर्थे सशयो न कर्तव्य इत्यर्थ । न चान्तकाले मामेवेत्यवधारणात् अध्यात्मादिविशिष्टमेव स्मर्तव्यमिति वाच्यम् । विशिष्टस्मरणस्य चित्तविक्षोभहेतुत्वेन प्रधानस्मरणासभवात् । यत एवमतो विशिष्टस्मरण विहायाहमेव प्रधानतया स्मर्तव्य इत्यर्थ । यद्वा मद्भावारूढो योगी स्वाज्ञानतत्कार्यजातान्तकालास्पदे चरमजन्मनि विष्णवाख्य व्यापनशील त्रिविधपरिच्छेदशून्य ब्रह्माहमस्मीति मामेव स्मरन् कलेबर तदुपलक्षिताहममाभिमान मुक्त्वा पुनस्तदभिमानास्मरण प्रयाति तद्धेत्वज्ञानाभावात् सोऽय मद्भक्त प्रत्यगभिन्नब्रह्मस्वरूपावस्थानलक्षण मम विष्णोर्भाव परमपद विदेहकैवल्य याति । याति न वेत्यत्रास्मिन्नर्थे सशयो न कर्तव्य, सम्यग्ज्ञानस्य कैवल्यफलत्वात्, 'तमेव विद्वानमृत इह भवति । नान्य पन्था अयनाय विद्यते' इति श्रुत ॥ ५ ॥

न केवल मा स्मरन् मद्भाव यातीति नियम, किं तु य भाव स्मरति तमेवैतीत्याह—

यं यं वा ऽपि स्मरन्भावं त्यजत्यन्ते कलेबरम् ।
तं तमेवैति कौन्तेय सदा तद्भावभावितः ॥ ६ ॥

य यमिति । हे कौन्तेय' अन्तकाले प्राणवियोगकाले देही य य भावं देवताविशेषं तदन्यद्वा स्मरन् कलेबर त्यजति तं तमेव स्मृत

भावमेवैति । न तदन्य तदानीं प्राणोत्क्रमणयातनापरवशस्य तद्भावना कथं सेद्धुमर्हतीति तत्राह—सदेति । तस्य स्मर्यमाणवस्तुनो भाव तद्भाव, तदनुचिन्तनम् । तेन तद्भावेन भावितो भाव येन स तद्भावभावित । एव भावयतो ऽन्तकाले प्राणोत्क्रमणयातनापरवशस्यापि तद्भावस्मरणवशाद्भवतीत्यर्थ ॥ ६ ॥

यस्मात्सततभावना प्रतिनियतफलप्राप्तिनिमित्तचरमश्वासकालस्मृतिहेतुः तस्मात्सदा मामनुस्मरेत्याह—

तस्मात्सर्वेषु कालेषु मामनुस्मर युध्य च ।
मय्यर्पितमनोबुद्धिर्मामेवैष्यस्यसंशयः ॥ ७ ॥

तस्मादिति । यस्मादेव तस्मात्कारणात् त्व वासुदेवे मय्यर्पित सकल्पादिवृत्तिशून्य मनो विषयाकारपरिणतिविनिर्मुक्त ब्रह्माकारपरिणता बुद्धिश्च यस्य स त्व मय्यर्पितमनोबुद्धि सन् सर्वेषु कालेषु सुप्तेरुत्थाय पुन सुप्त्यन्त प्रत्यगभिन्न ब्रह्मैवाहमस्मीति मामनुस्मर । यत एव सर्वदा स्मरणं चित्तशुद्धि विना न घटते, अतश्चित्तशुद्ध्यर्थं युध्य च युध्यस्वेत्यर्थ । एव स्वधर्मानुष्ठानेन शुद्धान्त करणो भूत्वा मत्स्मृतिमनवरतमेत्य प्रत्यगानन्दाभिन्नपरमानन्द मामेवैष्यसि । सकलनिगममौलिसमतत्वेन प्रसिद्धे नि सशये ऽर्थे सशयो न कार्य इत्यर्थ ॥ ७ ॥

एव सर्वदा स्मरणस्य बहिरङ्गसाधन युध्य चेति स्वाश्रमोचितनिष्कामकर्मानुष्ठानमुक्त्वा तदन्तरङ्गसाधनमभ्यासयोगमादिशति—

अभ्यासयोगयुक्तेन चेतसा नान्यगामिना ।
परमं पुरुषं दिव्यं याति पार्थानुचिन्तयन् ॥ ८ ॥

अभ्यासेति। हे पार्थ! सुमुक्षुकोटिचिन्त्ये मयि ब्रह्मैवाहमहमेव ब्रह्मेति सततानुस्मरणमभ्यास, स एव योग, तेन युक्तम्, तेनाभ्यासयोगयुक्तेन मदनन्यविषय गन्तु शील यस्य तेनानन्यगामिना ब्रह्मात्माकारेण सर्वं चेतयति भावयतीति चेत, तेन चेतसा परम निरतिशयानन्दरूपत्वात्, दिव्य देदीप्यमानरूपत्वेन सूर्यादिभासामवभासकत्वात्, पुरुषं पुरि शयनात् सर्वत्र पूर्णत्वाद्वा 'सत्यमात्मा ब्रह्मैव ब्रह्मात्मैवात्र ह्येव न विचिकित्स्यम्[1]' इत्यादिश्रुत्यनुरोधेन मामुक्तलक्षण, चिन्तयन्मामेव याति ॥ ८ ॥

एवं ध्यायत प्राप्यमाह—कविमिति द्वाभ्याम्।

कविं पुराणमनुशासितार-
मणोरणीयांसमनुस्मरेद्यः।
सर्वस्य धातारमचिन्त्यरूप-
मादित्यवर्णं तमसः परस्तात् ॥ ९ ॥

कविमिति। क ब्रह्मादिस्तम्बान्तं प्राणिजातं स्वाभेदेन विन्दते जानातीति कवि क्रान्तदर्शी स्वाभेदेन सर्वज्ञत्वात् 'कविर्मनीषी परिभू स्वयभू[2]' इत्यादिश्रुते। इदानींतनस्य कवित्व कुत इति तत्राह—पुराणमिति। इदानींतनस्य कवेरसर्वज्ञत्वे ऽपि पुरा ऽपि नवत्वेन प्रसिद्धस्य स्वातिरिक्ताद्यन्तशून्यत्वेन क्रान्तदर्शित्वात् 'अजो नित्य शाश्वतो ऽय पुराण[3]' इति श्रुते। पुराणपुरुषस्य निष्कलत्वेन नियन्तृत्वासभवात् जगन्नियन्ता तदन्यो भवितुमर्हतीति तत्राह—अनुशासितेति। पुराणपुरुष

स्वीयनिष्कलभावमविहायैव मूलाविद्याबीजाशमधिष्ठाय स्वयमेव जगद्भूत्वा जीवरूपेणानुप्रविश्य मलिनोपाधियोगतो ऽनीश्वरत्व प्रपद्य तदुपाधिगुणदोषास्पृष्टेश्वररूपेणाज्ञबृन्दमुन्मार्गप्रवृत्तिनिवृत्तये सदा ऽनुशास्ति नियोजयतीत्यनुशासिता 'य सर्वेभ्यो भूतेभ्यो ऽन्तरो यमयति[1]' 'एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठत[2]।'

'भयादस्याग्निस्तपति भयात्तपति सूर्य ।
भयादिन्द्रश्च वायुश्च मृत्युर्धावति पञ्चम[3] ॥'

'ईश्वर सर्वभूताना हृद्देशे ऽर्जुन तिष्ठति । भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया' इत्यादिश्रुतिस्मृतिसहस्रेभ्यो य प्रतिपादितो नियन्ता सर्वेश्वर स परस्मात् पुराणपुरुषादभिन्न 'एकमेवाद्वितीय ब्रह्म[4]' 'नेह नानास्ति किंचन[5]' इत्यादिश्रुते । 'पृथिव्या ज्यायानन्तरिक्षाज्ज्यायान्दिवो ज्यायान्[6]' इत्यादिश्रुत्या सर्वनियन्तु परमेश्वरस्य स्वनियम्यत्वेन प्रसिद्धपृथिव्यादिज्यायसामपि ज्यायस्त्वात्, बुद्ध्यादेरणुत्वात् तन्नियामकता कथमिति तत्राह—अणीयानिति । अणुरूपात् बुद्ध्यादेरप्यणीयस्त्वेन तन्नियन्तृत्वमुपपद्यत इत्यर्थ । 'अणीयान्व्रीहेर्वा यवाद्वा सर्षपाद्वा श्यामाकाद्वा श्यामाकतण्डुलाद्वैष म आत्मा ऽन्तर्हृदये[7]' 'अणोरणीयान्महतो महीयान्[8]'

[1] बृ ३ ७ १४
[2] बृ ३ ८ ९
[3] क ६ ३
[4] छा ६ २ १
[5] बृ ४ ४ १९
[6] छा ३ १४ ३
[7] छा ३ १४ ३
[8] क० २, २०.

इत्यादिश्रुते । अणुमहद्रूपेण विद्यमानस्य जगतो नियन्तृत्वे ऽपि तत्पालकत्व कथमिति तत्राह—धातेति । सर्वस्य चेतनाचेतनात्मकस्य जगत तत्तत्प्राणिकृतकर्मफलप्रदातृत्वेन पोषयितृत्वात् 'धाता विधाता भुवनस्य गोप्ता विष्णु ' इति श्रुते । धातृत्वेन चिन्तनीयस्य मनोवाग्विषयता स्यादिति तत्राह—अचिन्त्यरूपमिति । तूलाविद्याविजृम्भितेन्द्रियवृत्त्यगोचरत्वेन प्रसिद्धस्यास्य रूपस्य चिन्तितुमशक्यत्वात् 'मनोवागगोचर ब्रह्म' इति श्रुते । ब्रह्मणो ऽचिन्त्यरूपत्वे स्वपरप्रकाशकत्व कथमिति तत्राह—आदित्येति । आदित्यवत् स्वपरवस्तुप्रकाशकत्वात् आदित्यवर्ण । यद्वा आदित्यादिभासामपि भासको वर्णो विपुलप्रकाशो यस्य सो ऽयमादित्यवर्ण ।

'न तत्र सूर्यो भाति न चन्द्रतारक
नेमा विद्युतो भान्ति कुतो ऽयमग्नि ।
तमेव भान्तमनुभाति सर्वं
तस्य भासा सर्वमिद विभाति[1] ॥'

इत्यादिश्रुते । तादृशं ब्रह्म क्वासनमर्हतीति तत्राह—तमस परस्तादिति । स्वाविद्यापदतत्कार्यजातात्तमस परस्तात्त्रिपाद्ब्रह्मस्वरूपत्वेन विभानात् 'तम परे देव एकीभवति परस्तान्न सन्नासन्न सदसदित्येव निर्वाणानुशासनम्' इति श्रुते । एव कविं पुराण इत्यादिविशेषणविशिष्ट यो ऽनुस्मरेदयमहमस्मीति ध्यायति स तमुपैतीत्युत्तरेणान्वय ॥ ९ ॥

एव ध्यातुर्यथोक्तफलाप्तये काल निर्दिशति—

प्रयाणकाले मनसा ऽचलेन
भक्त्या युक्तो योगबलेन चैव ।

[1] क ५. १५.

भ्रुवोर्मध्ये प्राणमावेश्य सम्य-
क्स तं परं पुरुषमुपैति दिव्यम् ॥ १० ॥

प्रयाणकाल इति । प्रयाणकाले प्राणोत्क्रान्तिवेलाया यो ध्यायी कविमित्यादिविशेषणविशिष्ट तमनुस्मरेत्, सो ऽय ध्यायी तमेवोपैतीति योजना । कीदृग्रूपेण परमात्मा ध्येय इति तत्राह—पुरुष इति । पुरि शयनात् स्वेन रूपेणाविद्यापदतत्कार्यपूरणाद्वा पुरुष त्रिविधपरिच्छेद-शून्यत्वात् 'सत्यज्ञानानन्तानन्दपरिपूर्णम्' इति श्रुते । परमात्मा स्व-रूपेणाविद्यापदपूरकश्चेत् पूर्यपूरकयोरभेदेन पूर्यनिष्ठो विकार पूरके स्यादिति तत्राह—पर इति । स्वपूर्याविद्यापदतत्कार्यात्परत्वेन विभानात् 'तत्पर परमात्मा' इति श्रुते । परमात्मन तत्परत्वे स्वप्रकाश्याविद्यापदाभावेन प्रकाशकत्वानुपपत्त्या ऽप्रकाशो भवेदिति तत्राह—दिव्यमिति । स्वभिन्न-प्रकाश्याविद्यापदाभावे ऽपि त्रिपात्स्वरूपेण सर्वदा देदीप्यमानरूपत्वात् दिव्य 'दिव्यो ह्यमूर्त पुरुष स बाह्याभ्यन्तरो ह्यज[1]' इति श्रुते । एव विशेषणविशिष्ट परमात्मा कि बाह्यकरणकलापेन ध्येय इति तत्राह—मनसेति । बाह्यकरणमनपेक्ष्यैव केवलमनसा ध्यातु शक्यत्वात् 'मनसैवानु-द्रष्टव्यम्' इति श्रुते । मनस कामसकल्पादिवृत्तिमत्त्वेन चञ्चलत्वप्रसिद्धे तेन परमात्मा कथ स्मर्तव्य इति तत्राह—अचलेनेति । ब्रह्मात्मैक्यानुसधाने प्रवर्तित मनो विषयसकल्पतो बहिर्निर्गतमपि भूयो भूयस्तत्सकल्पादिवृत्ति-निराकरणेन तदनुसधाने निश्चलतामर्हतीत्यर्थ ।

'असकल्पनशस्त्रेण च्छिन्न चित्तमिद यदा ।
सर्वं सर्वगतं शान्तं ब्रह्म संपद्यते तदा ॥'

[1] मु २ १. १.

इति श्रुते । तादृश मन केन निश्चल भवेदिति तत्राह—भक्त्येति । ब्रह्मैवाहमहमेव ब्रह्मेति ब्रह्मात्मैक्यानुसधानरूप भजन भक्ति, 'स्वस्वरूपानुसधान भक्तिरित्यभिधीयते' इति श्रुते । तादृशी भक्ति केन जायत इति तत्राह—योगेति । ब्रह्मात्मैक्याकारपरिणताखण्डाकारवृत्तियोग, तस्य बल तदतिरिक्तपरिणामराहित्यम्, तेन योगबलेन चैव. युक्त स योगी सिद्धासनस्थ सन्दृढभावनया ग्रन्थित्रयोपेतानि षट् चक्राणि विभिद्य सुषुम्णानाड्यन्तर्गतचित्रानाडीद्वारा भ्रुवोर्मध्ये प्राण प्राणोपलक्षितकरणग्राममावेश्य सहस्रारचक्रस्थ कविं पुराणमित्यादिविशेषणविशिष्टं तुर्यतुर्यमुपेत्य विदेहमुक्तो भवतीत्यर्थ ॥ १० ॥

एव साङ्गफलमभ्यासयोगमुक्त्वेदानीं वक्ष्यमाणोपायभूतप्रणवालम्बनत्वेन प्रसिद्धस्य ब्रह्मणो वेदविद्वदनत्व मुक्तगम्यत्व ब्रह्मचारिभिरुपास्यत्व चाह—

यदक्षरं वेदविदो वदन्ति
विशन्ति यद्यतयो वीतरागाः ।
यदिच्छन्तो ब्रह्मचर्यं चरन्ति
तत्ते पदं संग्रहेण प्रवक्ष्ये ॥ ११ ॥

यदिति । केनाप्यविषये प्रत्यगभिन्नब्रह्मणि वेदार्थविदा मुक्ति कथ प्रवर्तत इत्यपेक्षाया ब्रह्मात्मनिष्ठाविषयतामत्यक्त्वैव प्रवृत्तेत्याह—वदन्तीति । 'अन्यत्र धर्मात्[1]' इत्युपक्रम्य 'ब्रह्म प्राप्तो विरजो ऽभूद्विमृत्यु[2]' इत्यन्तेन 'एतद्वै सत्यकाम पर चापर च ब्रह्म यदोकार[3]' इत्युप-

[1] क २ १४
[2] क ६ १८
[3] प्र ५ २.

क्रम्य 'परात्परं पुरिशय पुरुषमीक्षते[1]' इत्यन्तेन 'ओमित्येतदक्षरमिद सर्वम्[2]' इत्युपक्रम्य 'आत्मना ऽऽत्मान य एव वेद' इत्यन्तेन 'एतस्य वा अक्षरस्य प्रशासने गार्गि' इत्युपक्रम्य 'अस्थूलमनण्वह्रस्वम्[3]' इत्याद्यन्तेन च वेदविदो वेदार्थविदो ब्रह्मात्मनिष्ठा मुनयो महासत्तास्वरूपतो न क्षरतीत्यक्षर यद्ब्रह्म वदन्ति तस्य ब्रह्मण सर्वात्मरूपत्वेन सर्वैरपि प्राप्तु शक्यत्वान्मुक्तोपसृप्यत्वव्यपदेशो निरर्थक इति तत्राह—विशन्तीति। कि तत् ' यदक्षर निष्कल ब्रह्म। के तद्विशन्तीति तत्राह—यतय इति। सम्यग्ज्ञाननिष्ठामारुह्य चरमसाक्षात्कारार्थं यतन्त इति यतय सन्यासिन, तेषा चरमसाक्षात्कारानुरागित्वात्। तत्पदार्हता कथमिति तत्राह—वीतरागा इति। स्वेतरवस्तुशून्यधिया चरमसाक्षात्कारे तत्फले वा वीतो रागो येषा ते वीतरागा यत्पद विशन्ति विदेहमुक्ता भवन्तीत्यर्थ। यदेतन्मुक्तोपसृप्य तत्प्राप्तिसाधनानुष्ठान न के ऽपि चरन्तीति तत्राह—चरन्तीति। मुमुक्षवो ब्रह्मचारिणो यदक्षर ज्ञातुमिच्छन्त सन्तो गुरुकुले द्विविधब्रह्मचर्यव्रतमाचरन्ति। बाह्यमान्तर चेति द्विविध हि ब्रह्मचर्यम्। अष्टाङ्गमैथुनास्पृष्टत्व बाह्य ब्रह्मचर्यमुच्यते। ब्रह्माकारमन परिणतिरान्तर ब्रह्मचर्यम्। तज्जीवन्मुक्तैरनुष्ठेयमित्यर्थ।

'दर्शन स्पर्शन केलि कीर्तन गुह्यभाषणम्।
सकल्पो ऽध्यवसायश्च क्रियानिर्वृत्तिरेव च॥
एतन्मैथुनमष्टाङ्ग प्रवदन्ति मनीषिण।
विपरीत ब्रह्मचर्यमनुष्ठेय मुमुक्षुभि॥
ब्रह्मभावे मनश्चारो ब्रह्मचर्य विदुर्बुधा।'

[1] प्र ५ ५
मा आ १
[3] बृ० ३ ८, ९.

इत्यादिश्रुते । तादृश चेद्ब्रह्म कथ मया ज्ञातु शक्यमित्याशङ्कमानमर्जुनमालक्ष्याह—तत्ते पद प्रवक्ष्य इति । तदक्षराख्य ब्रह्म जीवन्मुक्तपूगै पद्यते गम्यत इति पद सर्वप्रत्यगभिन्न मत्स्वरूप विदेहकैवल्यम्, तत्प्रापक यज्ज्ञान तत्ते तुभ्य प्रवक्ष्ये । कि विस्तरेण वदसि ? नेत्याह—सग्रहेणेति । यथा ते तद्विषयको बोधो भवेत् तथा सक्षेपत कथयिष्यामीत्यर्थ ॥ ११ ॥

तत्ते पद सग्रहेण प्रवक्ष्य इति प्रतिज्ञातोपाय व्यनक्ति—सर्वद्वाराणीति द्वाभ्याम् ।

सर्वद्वाराणि संयम्य मनो हृदि निरुध्य च ।
मूर्ध्न्याधायात्मनः प्राणमास्थितो योगधारणाम् ॥१२॥

सर्वद्वाराणीति । सर्वेषा श्रोत्रादीन्द्रियाणा स्वार्थोपलब्धिद्वाराणि बाह्यशब्दादिविषयाग्रहणपूर्वकं संयम्य निगृह्य बाह्यान्त सकल्पत्यागपूर्वकं हृदि मनो निरुध्य तत्रैव वशीकृतेन मनसा मूलाधारमारभ्य ब्रह्मरन्ध्रान्तगामिन्या सुषुम्णानाड्यन्तर्गतकैवल्यनाड्योर्ध्वमाकृष्य प्राणवायुमात्मन स्वस्य मनसा साक मूर्ध्नि ब्रह्मरन्ध्रे सहस्रारचक्रे आधाय स्थिरीकृत्य,

'कास्यघण्टानिनादस्तु यथा लीयति शान्तये ।
ओकारस्तु तथा योज्य शान्तये सर्वमिच्छता ॥'

इति श्रुत्यनुरोधेन मनसा प्रणवोच्चारण योग, तस्य धारणामास्थित प्राप्तवानित्यर्थ ॥ १२ ॥

तत कि कुर्वन् तत्पद यातीत्यपेक्षायामाह—

ओमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन् ।
यः प्रयाति त्यजन्देहं स याति परमां गतिम् १३ ॥

ओमिति । ओमित्येवरूप ब्रह्मवाचकत्वेन प्रसिद्धमेकाक्षर तदर्थ-भूतब्रह्मानुसधानपूर्वक व्याहरन्मनसोच्चारयन् तत परमुच्चारणव्यापार विहाय ब्रह्म प्रणवार्थस्वरूपकबलितजाग्रज्जाग्रद्विश्वविश्वविराड्विराडादित्रिपञ्चदशकल-नावैभव तुर्यतुर्य ब्रह्माहमस्मीति मामनुस्मरन् सन् देह देहोपलक्षित सर्वत्रात्मा-त्मीयाभिमान निश्शेषत त्यजन् यो मद्भावारूढो योगी स्वाविद्याद्वयतत्कार्य-विजृम्भिताद्देहाभिमानात् प्रयाति विमुक्तो भवति, स ब्रह्मात्मनिष्ठो मुनि परमा पराभूमिप्रतिष्ठितत्वेन प्रसिद्धा मद्रूपिणीं तुर्यतुर्यस्वरूपावस्थानलक्षण-विदेहकैवल्यरूपा गति याति, विदेहमुक्तो भवतीत्यर्थ । यद्वैव सद्योमुक्ति गन्तुमधिकारी न भवेद्यदि तदा सर्वद्वाराणि सयम्येत्याद्युक्तरीत्या ऽऽप्लुतरूपेण ओमित्येकाक्षर ब्रह्मावलम्बनत्वात् ब्रह्म व्याहरन् तदर्थमीश्वर मामनुस्मरन् पाञ्चभौतिक देह त्यजन्य प्रयानि स प्रणवोपासक प्राणवियोगानन्तर-मर्चिरादिमार्गेण ब्रह्मलोक प्राप्य तत्र वेदान्तश्रवणादिजनितज्ञानविज्ञान-सम्यग्ज्ञानानि सपाद्य ब्रह्मणा सह परमामुत्कृष्टा गतिं याति 'ते ब्रह्मलोकेषु परान्तकाले परामृता परिमुच्यन्ति सर्वे' इति श्रुते ॥ १३ ॥

पूर्वोक्तमुक्तिद्वय वायुधारणकुशलानामेव, नेतरेषामिति तत्राह—

अनन्यचेताः सततं यो मां स्मरति नित्यशः ।
तस्याहं सुलभः पार्थ नित्ययुक्तस्य योगिनः ॥ १४ ॥

अनन्येति । हे पार्थ ! मद्व्यतिरिक्तान्यस्य दुर्लभत्वेन यो मद्भक्त ब्रह्मैवाहमहमेव ब्रह्मेत्यनवरतानुसंधानादनन्यभावमापन्न चेतो यस्य सो ऽयमनन्य-चेता सन् प्रत्यगभेदेन मा परमात्मान स्मरति । कि दिनमेकमेव स्मर्तव्य-मिति तत्राह—नित्यश इति । प्रतिदिन यावज्जीव स्मर्तव्यमित्यर्थ । यावज्जीव प्रतिदिन कि घटिकामात्र स्मर्तव्यम् ? तत्राह—सततमिति । सतत

निरन्तरम्, सुप्तेरुत्थाय सुप्त्यन्तमित्यर्थ । 'सुप्तेरुत्थाय सुप्त्यन्त ब्रह्मैक प्रविचिन्त्यताम्' इति श्रुते । एव मा य स्मरति तस्यैव मद्भावारूढत्वेन नित्ययुक्तस्य प्रत्यगभिन्नब्रह्मज्ञानिनो वासुदेवो ऽह सुलभ वायुधारणा विना ऽपि तदात्मत्वेनानायासतो लभ्य इत्यर्थः ॥ १४ ॥

'सकृदेव प्रपन्नाय तवास्मीति च याचते ।
अभय सर्वभूतेभ्यो ददाम्येतद् व्रत मम ॥'

इत्येव परमसुलभत्वेन प्रख्यातबिरुद त्वामनुप्राप्य त्वद्भावारूढा योगिन कि त्वय्येवावतिष्ठन्ते उत धूमादिमार्गतश्चन्द्रलोकादिगन्तृपुरुषवत् पुनरावर्तन्ते ? तथा चेत् कि तव सौलभ्येनेत्याकाङ्क्षायामाह—

मामुपेत्य पुनर्जन्म दुःखालयमशाश्वतम् ।
नाप्नुवन्ति महाऽऽत्मानः संसिद्धिं परमां गताः ॥१५॥

मामिति । यत एवमुक्तलक्षणा मद्भावारूढत्वेन महानात्मा ऽन्त करण येषा ते महाऽऽत्मानो मद्भक्ता स्वाविद्यापदतत्कार्यकलनासहसत्तासामान्यस्वरूपावस्थानलक्षणविदेहकैवल्यरूप मामुपेत्याध्यात्मिकादिदु खानि आलीयन्ते ऽस्मिन्निति दु खालय पुनर्जन्म नाप्नुवन्ति । तत्कि शाश्वतम् ? तत्राह—अशाश्वतमिति । अनवस्थितस्वरूपत्वेन क्षणभङ्गुरत्वात् 'तमेव ज्ञात्वा ऽति मृत्युमेति' 'तरति शोकमात्मवित्' 'गुहाग्रन्थिभ्यो विमुक्तो ऽमृतो भवति' इत्यादिश्रुते । अतस्ते सम्यग्ज्ञानफलात्मकत्वेन परमा सर्वोत्कृष्टा सिद्धि मत्स्वरूपावस्थानलक्षणा मुक्तिं गता प्राप्ता, नान्यथेत्यर्थ ॥ १५ ॥

'न च पुनरावर्तते[1]' इति श्रुत्या ब्रह्मलोकगामिनामप्यपुनरावृत्तिदर्शनात् त्वत्प्राप्तेरपि तत्तुल्यत्वात् तयो को विशेष इत्येव प्राप्ते, तत्रोच्यते—

[1] छा ८ १५ १

आ ब्रह्मभुवनाल्लोकाः पुनरावर्तिनो ऽर्जुन ।
मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते ॥ १६ ॥

आ ब्रह्मेति । हे अर्जुन ! भवन्त्यस्मिन् भूतानीति भुवनम्, ब्रह्मण चतुराननस्य भुवन ब्रह्मलोक तस्मादा ब्रह्मभुवनात् ब्रह्मलोकेन सह सर्वे लोका पुनरावर्तिन ब्रह्मलोकस्यापि कालपरिच्छिन्नत्वेन नश्वरत्वात् तल्लोक-प्राप्तिहेतुपुण्यकर्मानुष्ठानमहिम्ना ब्रह्मलोक प्रविष्टानामपि पुनरावृत्तिदर्शनात् ज्ञानकर्मसमुच्चयानुष्ठानेन केवलयोगाभ्यासेन सन्यस्य ज्ञानाभावे ऽपि,

'स्वशाखोपनिषद्गीता विष्णोर्नामसहस्रकम् ।
श्रीरुद्र प्रणव चैव नित्यमावर्तयेद्यति ॥'

इति स्मृत्यनुरोधेन स्वाश्रमोक्तकर्मानुष्ठानेन च ये ब्रह्मलोक प्रविष्टा ते तत्र चतुराननसंसदि वेदान्तश्रवणादिजनितसम्यग्ज्ञानसपन्ना भूत्वा 'न च पुनरावर्तते' इति श्रुत्यनुरोधेन ब्रह्मणा सह मुक्ति लभन्ते । दीर्घकालेन मुक्ता भवन्तीत्यर्थ । त्वा प्रपन्नानामपि न सद्योमुक्ति स्यादिति तत्राह— नेति । हे कौन्तेय ! सम्यग्ज्ञानोत्कृष्टफल ब्रह्मैवाहमहमेव ब्रह्मेति प्रत्यगभिन्न-ब्रह्मरूप मामुपेत्य वर्तमानाना तु 'ज्ञानसमकालमेव मुक्त कैवल्य याति' इति श्रुत्या सद्योमुक्ति विना पुनर्जन्म धूमादिमार्गप्रविष्टानामिव पुनरावृत्ति-रर्चिरादिमार्गतो ब्रह्मलोक प्रविष्टानामिव क्रममुक्तिर्वा न विद्यते । ज्ञानसम-कालमेवाविद्याद्वयतत्कार्यजातान्मुक्तत्वात् 'एतद्यो वेद निहित गुहाया सो ऽविद्याग्रन्थि विकिरतीह सोम्य ।'

'क्षीर क्षीरे यथा क्षिप्त तैल तैले जल जले ।
सयुक्तमेकता याति तथा ऽऽत्मन्यात्मविन्मुनि ॥

घटे नष्टे यथा व्योम व्योमैव भवति स्वयम् ।
तथैवोपाधिविलये ब्रह्मैव ब्रह्मवित्स्वयम् ॥
दर्शनादर्शने हित्वा स्वय केवलरूपत ।
य आस्ते कपिशार्दूल ब्रह्म न ब्रह्मवित्स्वयम्' ॥

इत्यादिश्रुतिभ्य ॥ १६ ॥

'तपस्विनो दानशीला वीतरागास्तितिक्षव ।
त्रिलोक्या उपरि स्थान लभन्ते शोकवर्जिता ॥'

इति स्मृत्यनुरोधेन भूरादिलोकत्रय प्रविष्टाना पुनरावृत्तिसभवे ऽपि महर्लोकादिलोकचतुष्टयगतानामपुनारावृत्तिध्रौव्यात् ब्रह्मलोकसहिता लोका कथ पुनरावर्तिन इत्यपेक्षाया दिनपक्षमासर्त्वयनसवत्सरादिकालसख्या-परिच्छिन्नत्वादात्मलोकमृते सर्वे लोकाः पुनरावर्तिन एवेत्याह—

सहस्रयुगपर्यन्तमहर्यद्ब्रह्मणो विदुः ।
रात्रिं युगसहस्रान्तां ते ऽहोरात्रविदो जनाः ॥ १७ ॥

सहस्रेति । 'सहस्रयुगपर्यन्तमहर्यद्ब्रह्मणो विदु' इति वचनत सहस्र चतुर्युगाणि पर्यन्तमवसान यस्याह्न तत्सहस्रयुगपर्यन्त यद् ब्रह्मणो विराज चतुराननस्याहरह परिमाण विदु, यथा ऽहस्तथा रात्रि चतु-र्युगसहस्रान्ता विदु । के विदुरिति तत्राह—त इति । एव ब्रह्मण अहोरात्रविभाग शास्त्रदृष्ट्या विदन्ति इत्यहोरात्रविद । येषा सर्वलोकाना-माद्यन्तवत्त्वेन ते लोका जन्मनाशवन्त इति ज्ञान ते जना उच्यन्ते । त एव ब्रह्मणो ऽहोरात्रविभाग विदुरित्यर्थ । न चन्द्रार्कगत्या कालप्रमाण-ज्ञा. । शास्त्रदृष्ट्या कालगणनाप्रकार उच्यते—मनुष्याणा यद्वर्षं तद्देवाना-

महोरात्रम् । एव दिनपक्षमासर्त्वयनसवत्सरभेदेन द्वादशवर्षसहस्रैश्चतुर्युगं भवति । चतुर्युगसहस्राणि ब्रह्मणो दिन भवति । तावता कालेन पुनस्तस्य रात्रिर्भवति । द्वे अहोरात्रे एक दिन भवति । तस्मिन्नेकस्मिन्दिने सप्ता-नामपि लोकानामुदयस्थितिलया जायन्ते । पञ्चदश दिनानि पक्षो भवति । पक्षद्वय मासो भवति । मासद्वयमृतुर्भवति । ऋतुत्रयमयन भवति । अयनद्वय वत्सरो भवति । वत्सरशत ब्रह्ममानेन ब्रह्मण परमायु प्रमाणम् । 'तावत्कालस्तस्य स्थितिरुच्यते' इत्यादिश्रुते । एव ब्रह्मलोकादीना काल-परिच्छिन्नत्वात् पुनरावर्तित्व सिद्धमित्यर्थ ॥ १७ ॥

ब्रह्मणश्चतुराननस्याहनि रात्रौ च यदाविर्भावतिरोभावपदमेति तदुच्यते---

अव्यक्ताद्व्यक्तयः सर्वाः प्रभवन्त्यहरागमे ।
रात्र्यागमे प्रलीयन्ते तत्रैवाव्यक्तसंज्ञके ॥ १८ ॥

अव्यक्तादिति । ब्रह्मण प्रजापते. चतुराननस्य स्वापावस्थैवाव्यक्त-शब्देनोच्यते । तत्स्वापावस्थाया अनभिव्यक्तत्वात् अव्यक्तत्वम् । तस्मा-दव्यक्तात् स्वापावस्थारूपादेव चेतनाचेतनात्मका प्रजाततयो ऽस्मिन् व्यज्यन्ते आविर्भवन्तीति व्यक्तयो मूर्तय प्रभवन्ति अभिव्यक्ता सत्य आवि-र्भवन्तीत्यर्थ । एव व्यक्तय कदा ऽऽविर्भवन्तीति तत्राह—अहरिति । ब्रह्मण प्रजापतेरहरागमे, प्रबोधवेलायामित्यर्थ । पुन कदा व्यक्तय तिरो-भवन्तीति तत्राह—रात्र्यागम इति । तथैव ब्रह्मण परिमेष्ठिनो ऽव्यक्त-मिति सज्ञा यस्य कालस्य सो ऽयमव्यक्तसज्ञक. । तस्मिन् अव्यक्तसज्ञके रात्र्यागमे स्वापकाले या पुरा ऽऽविर्भूतास्ता सर्वा व्यक्तय प्रलीयन्ते तिरोधान प्रयान्तीत्यर्थ. ॥ १८ ॥

ननु ब्रह्मण प्रतिदिन प्रत्यवान्तरकल्प प्राणिपटलस्याभिनवत्वेन पूर्वकल्पकृतपुण्यपापकर्मणा निष्फलत्वादिदानीं प्रकृतकर्मणो ऽपि तथात्वात् बन्धमोक्षवत प्राणिपटलस्याभावादेव व्यवस्थाहेतुकर्मोपासनाज्ञानकाण्डाना साफल्यस्य वैरल्य स्यादित्याशङ्क्य प्रकटितदोषपूगपरिहारार्थं ससारिणा वैराग्यसपादनार्थं च प्रतिकल्प प्राणिपटल त्वेकमेवाविद्याकामकर्मवशादाविर्भावतिरोभावौ पुन पुनरनुभवतीति स्फोरयति—

भूतग्रामः स एवायं भूत्वा भूत्वा प्रलीयते ।
रात्र्यागमे ऽवशः पार्थ प्रभवत्यहरागमे ॥ १९ ॥

भूतग्राम इति । हे पार्थ ! य प्राणिनिचय पूर्वकल्पे स्थित सो ऽय भूतग्राम एव ब्रह्मण पितामहस्याहरागमे भूत्वा भूत्वा पुनस्तद्रात्र्यागमे प्रलीयते । पुनरहरागमे ऽवश अस्वाधीन सन् प्रभवति उत्पद्यते । एव प्रत्यवान्तरकल्पादौ भूतग्रामस्यैकत्वात् नोक्तदोषपटलावकाशो नापि काण्डत्रयवैयर्थ्यमिति भावः ॥ १९ ॥

एव ब्रह्मलोकादीनामनित्यत्व प्रतिपाद्य तद्विपरीतत्वेन ब्रह्मात्मलोकस्य स्वस्य परमार्थनित्यत्व प्रकटयति—पर इति द्वाभ्याम् ।

परस्तस्मात्तु भावो ऽन्यो ऽव्यक्तो ऽव्यक्तात्सनातनः ।
यः स सर्वेषु भूतेषु नश्यत्सु न विनश्यति ॥ २० ॥

पर इति । तस्मात्पूर्वोक्तभूतग्रामबीजभूतादव्यक्तात् परत्वेन विभानात् पर । तत्परत्व कथमित्यत्र तद्विलक्षणत्वादित्याह—अन्य इति । तस्यापि व्यक्तत्वात्तदन्यत्व कुत इति तत्राह—अव्यक्त इति । करणग्रामागोचरत्वादिदानींतनस्य तवाव्यक्तत्व कुत इति तत्राह सनातन इति ।

आदिमध्यान्तशून्यत्वेन प्रसिद्धस्य भूमात्मनो ऽव्यक्तत्वादेव विशेषणविशिष्ट सनातनो यो भावो वर्तते सो ऽय मद्भावो ब्रह्मादिस्तम्बान्तेषु सर्वेषु भूतेषु नश्यत्स्वपि न विनश्यति परमार्थसत्यत्वादित्यर्थ ॥ २० ॥

पूर्वोक्तो यो ऽव्यक्तो भाव तस्याक्षरत्व साधयति-

अव्यक्तो ऽक्षर इत्युक्तस्तमाहुः परमां गतिम् ।
यं प्राप्य न निवर्तन्ते तद्धाम परमं मम ॥ २१ ॥

अव्यक्त इति । 'न चक्षुषा गृह्यते नापि वाचा नान्यैर्देवैस्तपसा कर्मणा वा' इत्यादिश्रुत्या करणग्रामाग्राह्यत्वेन 'अव्यक्तो ऽयमचिन्त्यो ऽयमविकार्यो ऽयमुच्यते' इत्यादिना च यो ऽव्यक्त परमात्मा निर्दिष्ट पुन स एव 'येनाक्षर पुरुष वेद सत्य तथा ऽक्षरात्सभवतीह विश्वम्' इत्यादिश्रुत्या परमाक्षर इत्युक्त । परमाक्षरात् परमा गतिरन्येति तत्राह— परमेति । यो मद्भावो ऽव्यक्तो ऽक्षर इत्युक्त तमेवाव्यक्ताक्षरशब्दार्थ परमात्मान मुक्तपूगप्राप्यत्वेन परमामुत्कृष्टा गति विदेहमुक्तिमाहु, ब्रह्मात्मनिष्ठा इति शेष । 'पुरुषान्न पर किंचित्सा काष्ठा सा परा गति' इति श्रुते । कथ पुनस्ते परगतित्वमित्यत्र सूरिबृन्दप्राप्यत्वात्तदुपपद्यत इत्याह — यमिति । 'स यश्चाय पुरुषे, यश्चासावादित्ये, स एक' 'त्व ब्रह्मासि' 'अह ब्रह्मास्मि' 'आवयोरन्तर न विद्यते' 'त्वमेवाहमहमेव त्वम्' इत्यादिश्रुत्यनुरोधेन सूर्यादौ प्रौढप्रकाशत्वेन यन्निष्कल चैतन्य वर्तते तदेवाहमहमेव ब्रह्मेति ये पश्यन्ति ते सूरयो य प्रत्यगभेदेन प्राप्य न निवर्तन्ते न पुनर्जन्म लभन्ते स्वभेदेन पुनर्जन्मादिहेतुस्वाज्ञानाभावात् तदेव मम विष्णो परममुत्कृष्ट धाम स्वरूपत्वात् । यत एवमतो ऽहमेव सूरीणा परमा गतिरित्यर्थः ।

'तद्विष्णो परम पद सदा पश्यन्ति सूरय । दिवीव चक्षुराततम् ।
तद्विप्रासो विपन्यवो जागृवास समिन्धते । विष्णोर्यत्परम पदम् ।'

इति श्रुते ॥ ११ ॥

सर्वोपेयत्वेन सूरिपटलप्राप्तावुपाय क इत्यपेक्षाया यथोक्ता ऽनन्य-भक्तिरेवाकुण्ठित उपाय इत्याचष्टे—

पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया ।
यस्यान्तःस्थानि भूतानि येन सर्वमिदं ततम् ॥ २२ ॥

पुरुष इति । हे पार्थ! चेतनाचेतनात्मकानि भूतानि यस्य परमकारणस्यान्त स्थानि स्वाविद्याकार्यत्वात् कार्यस्य कारणान्त पातित्वात् । कुण्डे बदरवत् कार्यजात कारणे ऽन्तर्भवतु, कार्यदशाया कारणस्य तदन्तर्भावात् तद्व्यापकत्वं कुत इति तत्राह—ततमिति । कार्यदशायामपि परिदृश्यमानमनृतजडदु खात्मक सर्व कार्यजात जगद्येन परमकारणत्वेन प्रसिद्धसच्चिदानन्दरूपेण पुरुषेण मृदा घटादिकमिव ततं व्याप्तं कबलित-मित्यर्थः । 'वृक्ष इव स्तब्धो दिवि तिष्ठत्येकस्तेनेद पूर्ण पुरुषेण सर्वम्' इति श्रुते । कार्यकारणयोर्व्याप्यव्यापकत्वोक्त्या व्याप्यनिष्ठविकारस्य व्यापक-गतत्वात् व्यापकस्याप्यनृतजडदु खत्व स्यादिति तत्राह—पर इति । य सर्वाधिष्ठान येन सर्व तत स पुरि शयनात् पूर्णत्वाद्वा स्वकार्यव्यापक पुरुष पर अनुवृत्तरज्ज्वादिव्यावृत्तसर्पादिवत् सर्वानुवृत्ते व्यापके कारणात्मनि व्यावृत्तस्य व्याप्यस्य कार्यजातस्यानुवृत्तातिरेकाभावप्रमाणान्मिथ्याभूतव्या-प्यनिष्ठविकार परमार्थसत्ये व्यापके कथ सेद्धु पारयति? यत एवमत सर्वस्मात्पुरुष पर इत्यर्थ । 'अन्यदेव तद्विदितादथो अविदितादधि[1]'

[1] के १ ३.

'सर्वस्य साक्षी तत सर्वस्मादन्यो विलक्षण ' इत्यादिश्रुते । पुरुषस्य विदिताविदितात् परत्वेन तत्प्राप्त्युपायस्य मृग्यत्वात् तदुपलब्धि कथमिति तत्राह—भक्त्येति । किंरूपा सा भक्ति ' मत्तस्त्वमुत्कृष्ट त्वत्तो ऽहमपकृष्ट इति सेव्यसेवकरूपा । तस्या अपि विदितत्वात् तल्लभ्यत्व कुत इति तत्राह— अनन्ययेति । जगदिदमन्यदह जीवो ऽन्य , आवयो कारणमीश्वरो ऽन्य , सेव्यो ऽय सेवको ऽहमित्याद्यन्यभावविकलया अनन्यया स्वव्यतिरिक्तान्य-शून्यो वासुदेवो ऽहमहमेव वासुदेव इत्येवरूपया मद्भावापन्नया युक्तया भक्त्यैव लभ्य । तस्या भक्ते विदिताविदितदोषास्पृष्टत्वात् तयैव लभ्य इत्यर्थ ।

'असाधनमसाध्य यत्त्रिपाद्विभवक मह ।
तत्कथ भेदधीवेद्य विना तद्रूपभावनाम् ॥'

इति नैष्कर्म्यसिद्धिकारवचनात् ॥ २२ ॥

प्रत्यगभिन्नब्रह्मज्ञानात्परमपुरुषप्राप्तिरुक्ता । न च तादृश ज्ञानमर्चि-रादि द्वारमपेक्षते, तस्य स्वफलप्राप्तौ साधनान्तरासहत्वात् 'ब्रह्म वेद ब्रह्मैव भवति' इत्यादिश्रुत्या वेदनान्तरसाधनाभावश्रवणात्तथा ऽपि विद्वानुत्क्रम्य ब्रह्मभावमुपैतीति चेन्न , विदुषो गत्युत्क्रान्तिनिषेधश्रवणात् , 'न तस्य प्राणा उत्क्रामन्त्यत्रैव समवलीयन्ते, ब्रह्मैव सन् ब्रह्माप्येति' इत्यादिश्रुते । तथा सति 'तद्य इत्थ विदुर्ये चेमे ऽरण्ये श्रद्धा तप इत्युपासते ते ऽर्चिषमभि सभवन्त्यर्चिषो ऽहरह्न आपूर्यमाणपक्षमापूर्यमाणपक्षाद्यान् षडुदङ्डेति मासा-स्तान्मासेभ्य सवत्सर सवत्सरादादित्यमादित्याच्चन्द्रमस चन्द्रमसो विद्युत तत्पुरुषो ऽमानव स एनान् ब्रह्म गमयत्येष देवयान पन्था इत्यथ इमे ग्राम इष्टापूर्ते दत्तमित्युपासते ते धूममभि सभवन्ति धूमाद्रात्रि रात्रेरपरपक्षमपर-पक्षाद्यान् षड् दक्षिणेति मासास्तान्नैते सवत्सरमभि प्राप्नुवन्ति मासेभ्य.

पितृलोक पितृलोकादाकाशमाकाशाच्चन्द्रमसमेष सोमो राजा त देवाना-मन्न त देवा भक्षयन्ति तस्मिन् यावत्सपातमुषित्वा ऽथैतमेवाध्वान पुनर्नि-वर्तन्ते' इति देवपितृमार्गसद्भावप्रमाणभूतश्रुते का गतिरित्याकाङ्क्षाया निष्कलप्रत्यगभिन्नब्रह्मचरमसाक्षात्कारहेतुसम्यग्ज्ञानिषु 'मार्गद्वयप्रमाणभूतश्रुति-गतिकुण्ठने ऽपि सकलब्रह्मप्राप्त्युपायशरणेष्विष्टापूर्तादिकर्मानुष्ठायिषु च मार्गद्वयप्रमाणभूता श्रुति गतिमर्हतीति व्याचष्टे—

यत्र काले त्वनावृत्तिमावृत्तिं चैव योगिनः ।
प्रयाता यान्ति तं कालं वक्ष्यामि भरतर्षभ ॥ २३ ॥

यत्रेति । ह भरतर्षभ! यत्र कालाभिमानिदेवताऽनुगृहीतकाले तु प्रयाता मृता योगिनो ऽयोगिनश्चानावृत्तिमपुनर्जन्मावृत्ति पुनर्जन्म च यान्ति त काल कालाभिमानिदेवतासहित वक्ष्यामि । न च कालशब्देन दक्षिणो-त्तरायणकालविशेषो भवेदिति वाच्यम् । दक्षिणोत्तरायणयोर्मृतानामप्युपासना-तारतम्यत फलतारतम्यसभवात् कालशब्देन कालाभिमानिनीभिरातिवाहिक-देवताभि प्रापणीयमार्गो भवितुमर्हतीत्यर्थ ॥ २३ ॥

'अनावृत्तिमावृत्ति प्रयाता यान्ति' इत्यत्र मार्गद्वय निर्दिष्टम् । तत्र यथोक्तज्ञानविकलत्वे ऽपि स्वाश्रमाचारसपन्नाना यतीना हठादियोगिना निष्कामकर्मानुष्ठातॄणा च क्रममुक्तिद्वारमर्चिरादिमार्गमाह—

अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम् ।
तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जनाः ॥ २४ ॥

अग्निरिति । अग्नि कालाभिमानिन्यातिवाहिकी देवता । तथा ज्योतिरर्चिरभिमानिन्यातिवाहिकी देवता । आतिवाहिकीशब्द सर्वत्रानुष-

ज्यते । तथा अहरहरभिमानिनी देवता । शुक्ल शुक्लपक्षाभिमानिनी देवता । षण्मासा उत्तरायणमित्यत्राप्युत्तरायणाभिमानिन्यातिवाहिकी देवतोच्यते । तत्र पूर्वोक्तदेवतोपलक्षिते सुषुम्णामार्गगम्यार्चिरादिमार्गे प्रणवयोगकर्मोपासनाभि सगुणब्रह्मविद ˙ सकलब्रह्मशरणा सन्यासिनो योगिन कर्मिणश्च प्रयाता सन्त निष्कल ब्रह्म क्रमेण गच्छन्ति,

'शत चैका च हृदयस्य नाड्यस्तासा मूर्धानमभि नि सृतैका ।
तयोर्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवन्ति[1] ॥'

इति श्रुते । तत्रोक्तामृतत्वमापेक्षिकमित्यर्थ ॥ २४ ॥

धूमादिमार्गस्य पुनरावृत्तिहेतुत्वेन तन्निरूपणमकिंचित्करमित्यत्र धूमादिमार्गस्य गतागतत्वादर्चिरादिमार्गस्य पुनर्निर्गमनाभावात् धूमादिमार्गापेक्षया ऽर्चिरादिमार्गो महीयानिति स्तोतुं धूमादिमार्गस्यापि वक्तव्यत्वान्नाकिंचित्करतेत्याह—

धूमो रात्रिस्तथा कृष्णः षण्मासा दक्षिणायनम् ।
तत्र चान्द्रमसं ज्योतिर्योगी प्राप्य निवर्तते ॥ २५ ॥

धूम इति । धूमो रात्रि कृष्णपक्ष षण्मासा दक्षिणायनमित्यत्र पूर्ववत्तत्तदभिमानिन्यातिवाहिकी देवतोच्यते । तत्राप्यातिवाहिकीदेवतासहित धूमादिमार्गमालम्ब्य गच्छन्निष्टापूर्तादिकर्मकृद्योगी चन्द्रमसि भव चान्द्रमस ज्योति स्वकृतकर्मफल प्राप्यानुभूय तद्भोगक्षये पुनर्निवर्तते, तद्भोगक्षयस्य सावशेषत्वात्, शेषकर्मणा बीजभूतेन सहाकाशवायुधूमाभ्रमेघवृष्टिद्वारा भूमि प्रविश्य व्रीह्याद्यन्नभावमुपेत्य सस्कारत प्राणिजठर प्रविश्य तत शुक्ल-

[1] क ६ १६

रूपेण रमणीययोनिं पापकर्मप्राचुर्यतो नीचयोनिं वा प्रविश्य यथोक्तकाले जन्म लब्ध्वा पूर्ववासनया पुनरपि शुभाशुभादि कर्म कृत्वा तत्फलमनुभूय घटीयन्त्रवदविश्रान्तो भवति । क्षुद्रकर्मकारी चेत्तदा धूमादिमार्गतो गमनागमनं विना मशकादिरूपेण भूत्वा भूत्वा पदे पदे म्रियते । ततो ऽपि क्रूरकर्मकारी यदि तदा कल्पपर्यन्तस्थायिपाषाणादिभावमुपैति । यत एवमतो विवेकिना धूमादिमार्गो जुगुप्सितव्य इत्यर्थः । 'यथेतमाकाशमाकाशाद्वायुं वायुर्भूत्वा धूमो भवति, धूमो भूत्वा ऽभ्रं भवति, अभ्रं भूत्वा मेघो भवति, मेघो भूत्वा प्रवर्षति, त इह व्रीहियवा ओषधिवनस्पतयस्तिलमाषा इति जायन्ते ऽतो वै खलु दुर्निष्प्रपतरं यो यो ह्यन्नमत्ति यो रेतः सिञ्चति तद्भूय एव भवति । तद्य इह रमणीयचरणा अभ्याशो ह यत्ते रमणीयां योनिमापद्येरन् ब्राह्मणयोनिं वा क्षत्रिययोनिं वा वैश्ययोनिं वा, ऽथ य इह कपूयचरणा अभ्याशो ह यत्ते कपूयां योनिमापद्येरञ्श्वयोनिं वा सूकरयोनिं वा चाण्डालयोनिं वा । अथैतयोः पथोर्न कतरेणचन तानीमानि क्षुद्राण्यसकृदावर्तीनि भूतानि भवन्ति, जायस्व म्रियस्वेत्येतत्तृतीयं स्थानं तेनासौ लोको न सपूर्यते, तस्माज्जुगुप्सेत[1]' इति श्रुतेः ॥ २५ ॥

सकलब्रह्मशरणानां रात्रिकृष्णपक्षदक्षिणायनमरणतो ब्रह्मप्राप्त्यभावे प्राप्ते तत्राग्न्यादिशब्दाः तदभिमानिदेवतावाचका इति वक्तुं मार्गद्वयस्य नित्यत्वं साधयति—

शुक्लकृष्णे गती ह्येते जगतः शाश्वते मते ।
एकया यात्यनावृत्तिमन्यया ऽऽवर्तते पुनः ॥ २६ ॥

[1] छा—५, १०, ५, ८,

शुक्लकृष्णे इति । अर्चिरादिगति शुक्ला प्रकाशप्राचुर्यात्, धूमादिगति कृष्णा तम.प्राचुर्यात् । एते शुक्लकृष्णे गती अर्चिरादिधूमादिमार्गौ योग्ययोगिजुष्टजगत शाश्वते अनादी इति मते निश्चिते । न चानादेरन्तवत्त्व कुत इति वाच्यम् । तद्गतानादित्वस्यापेक्षिकत्वात् स्वाज्ञानकालमारभ्य स्वज्ञानावधि ससारस्य विद्यमानवद्भानात्तदनुरोधेनानयोर्गत्योरप्यनादित्व स्वज्ञाने सति तद्गतानादित्वानन्तत्वयोर्मृषात्वात्, यत एवमत स्वाज्ञदृष्टिमवलम्ब्यैव तयोरेकया सकलब्रह्मशरणो ऽनावृत्ति क्रममुक्ति याति । अन्यया कृष्णया गत्या वेदोक्तेष्टापूर्तादिकर्मकर्ता त्वावर्तते पुनर्जन्म भजतीत्यर्थ ॥२६॥

एवमुक्तप्रकारेण मार्गद्वययाथात्म्य यो जानाति स पूर्ववत्तत्र न मुह्यतीत्याह—

नैते सृती पार्थ जानन्योगी मुह्यति कश्चन ।
तस्मात्सर्वेषु कालेषु योगयुक्तो भवार्जुन ॥ २७ ॥

नैत इति । हे पार्थ ! यस्मादेते ऽर्चिरादिधूमादिसृती क्रममुक्तिससारप्रापकमार्गौ यथावज्जानन् कश्चन कश्चिदपि योगी धूमादिगतिप्रापकससारहेतुस्वर्गादिफले तदपेक्षया सर्वोत्कृष्टार्चिरादिगतिप्राप्यक्रममुक्तौ वा न मुह्यति । किं तु सद्योमुक्तिहेतुसम्यग्ज्ञानसाधने प्रवर्तते । तस्मात्कारणात्त्वमपि मार्गद्वये मोहविधुरो भूत्वा सर्वेषु कालेषु प्रत्यगभिन्नब्रह्मध्यानयोगयुक्तो भव ॥ २७ ॥

उक्तस्वप्रापकध्यानयोग स्तुवन्नुपसहरति—

वेदेषु यज्ञेषु तपःसु चैव
दानेषु यत्पुण्यफलं प्रदिष्टम् ।

अत्येति तत्सर्वमिदं विदित्वा
योगी परं स्थानमुपैति चाद्यम् ॥ २८ ॥ इति ।

इति श्रीमद्भगवद्गीतासूपनिष० अक्षरब्रह्मयोगो नामाष्टमो ऽध्याय ॥

वेदेष्विति । पवित्रपाणित्वादिनियमाधीतेषु वेदेषु तदुदितेषु यज्ञेषु साद्गुण्यतया ऽनुष्ठितेषु कायशोषणादिविविधतप सु देशकालपात्रसमर्पित-सर्वस्वदानेषु च शास्त्रतो यत्पुण्यफल प्रदिष्ट देवयानादिमार्गद्वयगम्यमत्येति । किं कृत्वेत्यत आह--विदित्वेति । पार्थभगवत्प्रश्नप्रतिवचनसिद्धान्तार्थं विदित्वा ऽनुष्ठाय प्रत्यगभिन्नब्रह्मज्ञानयोगी भूत्वा मार्गद्वयादिविभ्रममत्येती-त्यर्थ । तदतिक्रम्य किमुपैतीति तत्राह—स्थानमिति । किं लोकान्तरेषु' तत्राह—परमिति । स्वाविद्याद्वयतत्कार्यविजृम्भितब्रह्मलोकादिसर्वलोकात्परत्वेन यद्विभातं तत्पर स्थान विष्णो' परम पद विदेहकैवल्यमुपैतीत्यर्थ । किमि-दानीं रचित तत्राह—आद्यमिति । यदविद्यापदतत्कार्याध्यारोपापवादवि-कल्पासहं त्रिपात्परब्रह्मतत्त्व सत्तासामान्यमिति विख्यात तदेवाद्य स्थानम् । इतिशब्द अध्यायपरिसमाप्त्यर्थ ॥ २८ ॥

चरमश्वासवेलाया यत्स्मर्तव्य महाऽऽत्मभि ।
तत्तारकब्रह्म मम हृदये जयतु स्वयम् ॥

इति श्रीमद्भगवद्गीताऽर्थप्रकाशिकायामष्टमो ऽध्याय ॥

नवमो ऽध्यायः

अचिन्त्ययोगमायात पारमैश्वर्यवैभवम् ।
अनन्यभक्ते कैवल्यहेतुत्व चाह केशव ॥

अष्टमाध्यायान्ते 'इद विदित्वा योगी पर स्थानमुपैति चाद्यम्' इति यत्स्वरूपमुक्तमिदानी तत्पारमेश्वर रूप तत्प्राप्तिहेतुज्ञानविज्ञान स्वानन्यभक्ते प्रभाव च प्रकटयितु नवमाध्याय श्रीभगवानुवाच—

श्रीभगवानुवाच—

इदं तु ते गुह्यतमं प्रवक्ष्याम्यनसूयवे ।
ज्ञानं विज्ञानसहितं यज्ज्ञात्वा मोक्ष्यसे ऽशुभात् ॥१॥

इदमिति । पूर्वाध्यायादौ यज्ज्ञान मयोक्त तदिद तु ज्ञान तुभ्य वक्ष्यामीति योजना । तुशब्द पूर्वोक्तज्ञानाद्वैशिष्टयद्योतक । कस्मै वक्ष्यसीति तत्राह—तुभ्यमिति । किगुणविशिष्टायेति तत्राह-- अनसूयव इति । भूयो भूय स्वमाहाऽऽत्म्यमेव प्रकटयति भगवान्— परमकारुणिके भगवति वासुदेवे मय्यनसूयवे मदुद्धारणार्थं केवलकृपयोपदिशति भगवानिति श्रद्धालवे तुभ्यमर्जुनाय प्रत्यगभिन्नब्रह्मज्ञान वक्ष्यामि । तज्ज्ञान किविशिष्टमिति तत्राह—विज्ञानसहितमिति । यन्मया प्रकटितस्वरूप ज्ञात्वा अपरोक्षीकृत्य त्वमिदानीमेव स्वाज्ञानविजृम्भितससाररूपादशुभान्मोक्ष्यसे

तज्ज्ञान विशेषानुभूत्या ज्ञायत इति विज्ञान तत्सहित तद्विशिष्टमित्यर्थ । कि तद्गुह्य तत्राह—गुह्यतममिति । कर्मकाण्डविषयकज्ञानमुत श्रुत्याचार्य-प्रसादलभ्य ज्ञान देहातिरिक्तप्रत्यग्ज्ञान वा गुह्यम्, उपासनाकाण्डविषयक-ज्ञान परमात्मपरोक्षज्ञान वा गुह्यतरम्, स्वानुभूतिपरामृष्टप्रत्यक्परैक्यसम्यग्ज्ञान गुह्यतमम्, अनेककोटिजन्मशोभनकर्मपरिपाकतश्चरमजन्मलभ्यत्वात् गुह्यतम-त्वमुपपद्यत इत्यर्थ ॥ १ ॥

श्रोतारमर्जुन वक्ष्यमाणगुह्यतमज्ञानाभिमुखीकरणाय तज्ज्ञान प्रस्तौति—

राजविद्या राजगुह्यं पवित्रमिदमुत्तमम् ।
प्रत्यक्षावगमं धर्म्यं सुसुखं कर्तुमव्ययम् ॥ २ ॥

राजेति । या प्रत्यगभिन्नब्रह्मविद्यामाश्रित्य तदितरविद्यापटल राजते सेय राजविद्या सर्वविद्याऽधिराजत्वात् विद्याऽन्तरेभ्यो विशिष्यते, सैवेह खलु प्रत्यगभिन्नब्रह्मज्ञान सर्वज्ञानेभ्यो विशिष्यत इति प्रसिद्धम् । ज्ञान्य-न्तरेभ्यो ब्रह्मज्ञानी विशिष्ट पूजनीयश्च यस्मिस्तुष्टे तुष्यति सर्वमिति च

'यं य लोकं मनसा संविभाति
विशुद्धसत्त्व कामयते याश्च कामान् ।
त त लोक जयते ताश्च कामा-
स्तस्मादात्मज्ञ ह्यर्चयेद्भूतिकाम ॥
यद्येको ब्रह्मविद् भुङ्क्ते जगत्तर्पयते ऽखिलम् ।
तस्मादन्विष्य सर्वत्र पूजनीयो विदा वर ॥'

इति श्रुतिस्मृतीतिहासपुराणेषु सर्वत्र प्रसिद्धत्वान्न गोप्यतापदमेतदर्हतीति तत्राह—राजगुह्यमिति । यदनधिकारिणे गोपनीय तद्गुह्य मन्त्रतन्त्रादिधर्म-

शास्त्ररहस्य च तदपेक्षया गोपनीयत्वेन गुह्यतमत्वात् उत्तमाधिकारिणे वक्तव्यत्वात् अत एव गुह्याना राजत्वात् राजगुह्यम् । तथा च श्रुति —

'आदौ शमदमप्रायैर्गुणै शिष्य विशोधयेत् ।
पश्चात्सर्वमिद ब्रह्म शुद्धस्त्वमिति बोधयेत् ॥'
'विद्या ह वै ब्राह्मणमाजगाम गोपाय मा शेवधिष्टे ऽहमस्मि ।
असूयकायानृजवे शठाय मा मा ब्रूयाद्वीर्यवती तथा स्याम् ॥'
'यमेवैष विद्याश्रुतमप्रमत्त मेधाविन ब्रह्मचर्योपपन्नम् ।
अस्मा इमामुपसन्नाय सम्यक् परीक्ष्य दद्याद्वैष्णवीमात्मनिष्ठाम् ॥'
'अज्ञस्यार्धप्रबुद्धस्य सर्व ब्रह्मेति यो वदेत् ।
महानरकसाम्राज्ये स तेन विनियोजित ॥'

इत्यादि । स्मृतिश्च 'न बुद्धिभेद जनयेदज्ञाना कर्मसङ्गिनाम् ।' 'तानकृत्स्नविदो मन्दान् कृत्स्नविन्न विचालयेत्' इति । अज्ञाना पतनहेतुत्वात् तत्किमपवित्रमिति तत्राह—पवित्रमिति । शूद्र प्रत्युपदिष्टाध्ययनवत्साधनचतुष्टयसपत्तिविकलत्वेनानधिकारिणा पतनहेतुत्वे ऽपि तद्गतामनन्तकोटिजन्मसचयमूलस्वाज्ञानापवित्रग्रासकत्वात् पवित्र पुण्यकर्म तीर्थयात्राकरणस्यापि पावनहेतुत्वात् किमनेन ज्ञानेनेति तत्राह—उत्तममिति । पुण्यकर्मतीर्थयात्रादीना चित्तशुद्धिपर्यवसायित्वात् । तावन्मात्रेण स्वाज्ञानापवित्रक्षालनासभवाच्चित्तशुद्ध्यनन्तरभाविस्वज्ञानोदयमात्रेण स्वाज्ञानमलादर्शनात स्वफलप्राप्तावुपायान्तरासहत्वाच्च पावनहेतूना ज्ञानमेवोत्तममित्यर्थ । एव केनावगम्यत इति तत्राह—प्रत्यक्षेति । सुखादिवदनुभवप्रत्यक्षेणावगमो ऽवगतिर्यस्य तत्प्रत्यक्षावगमम् । यद्वा, प्रत्यक्षमवगम्यत इत्यवगम स्वाज्ञानतत्कार्यनिवृत्तिलक्षण कैवल्यफल यत्तत्प्रत्यक्षावगम कर्तृकारकक्रियाफलानुवादकधर्मविरुद्धत्वात् । प्रत्यक्षावगमत्वे ऽपि नादर्तव्यमेतदिति तत्राह—धर्म्यमिति । 'सर्वं

कर्माखिल पार्थ ज्ञाने परिसमाप्यते' इत्यादिस्मृत्यनुरोधेन प्रत्यगभिन्नब्रह्म-धारणार्हे धर्मे स्वज्ञाने स्वाज्ञानविजृम्भितकर्तृकारकक्रियाफलानुवादकधर्म-शास्त्रानुकूलप्रवृत्तिनिवृत्तिव्यापृते परिसमाप्तत्वेन स्वप्रतियोगिधर्माभावात् तद्ग्रासरूपस्वधर्मादनपेतत्वाद्धर्म्यम् । अतो मुमुक्षुभिरादर्तव्यमित्यर्थ । कि धर्मानुष्ठानवदायाससाध्यमिति तत्राह—सुसुखमिति । यथा परीक्षकोप-देशमात्रादनर्घ रत्न ज्ञातु सुकर तथा गुरूपदेशमात्रेण ब्रह्मज्ञानसाधनानुष्ठान कर्तु सुसुख सुखसाध्यमित्यर्थ । यथा आयासतारतम्यतो भूयस्त्वमल्पत्व च कर्मफलस्य श्रूयते, तथा ऽऽयासतारतम्यतो ज्ञानफलस्यापि भूयस्त्वमल्पत्व च न्याय्य वक्तुम् । निरायाससाध्यज्ञानफलस्याल्पत्वेन व्यय स्यादित्याशङ्क-मान प्रत्याह—अव्ययमिति । न स्वत परतो वा व्ययो ऽस्तीत्यव्ययम् । बहुलतरायाससाध्यधर्मतत्फलविपरीतत्वादनायासलब्धमपि ज्ञानफलमव्यय-मेवेत्यर्थ । 'अव्ययमनाद्यनन्त तदव्ययम्' 'यद्भूतयोनि परिपश्यन्ति धीरा' 'सत्य ज्ञानमनन्त ब्रह्म' इत्यादिश्रुते । यतो वक्ष्यमाणज्ञानमेव-विशेषणविशिष्टमतस्त्वया श्रद्धाभक्तिपुर सरमनुसधेयमित्यर्थ ॥ २ ॥

ननु वक्ष्यमाणज्ञानस्यातिसुलभत्वेन सर्वे तदवष्टभ्य त्वामेव प्रपद्यन्ते यदि तदा ससारिणा मृग्यत्वात् ससारनिवर्तकशास्त्रस्य वैरल्य स्यादित्य-पेक्षायाम् अशुद्धचित्ताना तत्र श्रद्धाऽनुदयेन ससारकलनाध्रौव्यात् तन्नि-वर्तकशास्त्रस्य नाकिचित्करनेत्याह—

अश्रद्दधानाः पुरुषा धर्मस्यास्य परंतप ।
अप्राप्य मां निवर्तन्ते मृत्युसंसारवर्त्मनि ॥ ३ ॥

अश्रद्धधाना इति । हे परतप ! ब्रह्माहमह ब्रह्मेति ब्रह्मात्मैक्यधारणा-ऽर्हस्यास्यानन्यभक्तिलक्षणसम्यग्ज्ञानधर्मस्य विचारे प्रतिपत्तौ फले च येषा

श्रद्धा आस्तिक्यबुद्धिर्नोदेति ते अश्रद्दधाना श्रद्धाभक्तिध्यानशमादिसाधनविरला इत्यर्थ । तेषा तद्वैरल्य कुत इति तत्राह—पुरुषा इति । स्वाविद्याविजृम्भिता पुरुषा, दु खससारवेषभाषामहामोहावृतदृष्टित्वात्तेषा श्रद्धाऽऽदिसाधनवैरल्य युक्तमित्यर्थः । एवविधा कुत्रासनमर्हन्तीति तत्राह— निवर्तन्त इति । अश्रद्दधानत्वादिविशेषणविशिष्टा जन्तवो मत्प्राप्तावनन्यभक्त्यतिरिक्तसाधनानुष्ठाने प्रवृत्ता अपि सर्वान्तर्यामित्वेन सर्वप्रत्यक्त्वेन सर्वाधिष्ठानत्वेन स्वेतरसर्वासहत्वेन च वर्तमान मामप्राप्य 'जीवापेत वा व किलेद म्रियते न जीवो म्रियते' इति श्रुतिप्रकटितामृतभावमपि जीवजात मृतमिव करोतीति मृत्युस्तूलाविद्याविजृम्भित ससार, तद्वर्त्मनि नितरा वर्तन्ते तत्रैवासनमर्हन्ति । मृत्युकबलिते ससारमार्गे सदा परिभ्रमन्तीत्यर्थ ॥ ३ ॥

वक्ष्यमाणज्ञानश्रद्धाऽश्रद्धावत्स्तुतिनिन्दाभ्या श्रोतारमभिमुखीकृत्य यद्वक्तव्यं तज्ज्ञानं विशिनष्टि—

मया ततमिदं सर्व जगदव्यक्तमूर्तिना ।
मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः ॥ ४ ॥

मयेति । परमकारणभूतेन मया चेतनाचेतनात्मक सर्वमिद जगत्ततम् । किमस्मद्गोचरव्यक्तमूर्तिना त्वया व्याप्तम् ? नेत्याह—अव्यक्तेति । भक्तेच्छोपात्तमूर्तभावस्य करणग्रामगोचरत्वेन व्याप्त्यसभवात् तद्विपरीतत्वेनाव्यक्ता मूर्तिर्यस्य तेनाव्यक्तमूर्तिना परमार्थनित्यनिष्कलसच्चिदानन्दरूपेण मया सर्वमिद कबलितमित्यर्थ । न च निरात्मक भूतजात किंचिद्व्यवहाराय कल्पते । इदमस्तीद भातीद प्रियमिति व्यवहारास्पदत्वेन विद्यमानत्वात् सर्व मदात्मकमेवेति भाव । त्वदात्मकान्यपि भूतानि किं त्वय्येव तिष्ठन्त्युत त्वदन्यत्रेति तत्राह—मत्स्थानीति । परमकारणभूते ऽव्यक्तमूर्तौ मयि

तिष्ठन्तीति मत्स्थानि सर्वभूतानि चेतनाचेतनात्मकानि ब्रह्मादिस्तम्बान्तानि मत्स्थानीत्युच्यन्ते। तेषा मदात्मकत्वेन मदन्यत्र विश्रमाभावात्। यथा मृदात्मका घटशरावादयो मृत्स्था तथा त्वदात्मकानि सर्वभूतानि त्वत्स्थानि भवन्तु। घटशरावादिषु मृदिव त्वन्मयभूतेषु त्वमपि कि तिष्ठसि? नेत्याह— न चेति। कार्यकारणभावमापन्नयो मूर्तद्रव्ययोरितरेतराश्रयतोपपद्यते। न चामूर्तस्य मूर्तेन सश्लेषो ऽस्ति। यथा ऽनुवृत्तव्योम्नो व्यावृत्तघटाद्यश्लेषो दृश्यते, तथा व्योम्नो ऽप्यन्तरतमत्वेन सर्वानुवृत्तस्य मम न केनचित्सश्लेषो युक्त। तस्मात्तेषु भूतेषु न चाहमवस्थित। यत एवमतो ऽनुवृत्तव्यावृत्तयोरितरेतराश्रयता नोपपद्यत एवेत्यर्थ ॥ ४ ॥

अव्यक्ताक्षरस्य तवामूर्तत्वेन व्यावृत्तभूतसश्लेषाभावे ऽपि सर्वानुवृत्ते त्वयि व्यावृत्तभूतजातस्य सश्लेषसभवात् तैरसश्लिष्टत्व कुत इति तत्राह—

न च मत्स्थानि भूतानि पश्य मे योगमैश्वरम्।
भूतभृन्न च भूतस्थो ममात्मा भूतभावनः ॥ ५ ॥

न चेति। न च कुण्डे बदराणीव मत्स्थानि सर्वभूतानि भवन्ति। सर्वानुवृत्ते मयि तेषा व्यावृत्तत्वेन मिथ्यात्वात् वितथावितथयो सश्लेषायोगाद्येन मे तै सश्लेषो भवेत्। ननु मूर्तामूर्तयो सश्लेषाभावे कथ मया ततमिद सर्व मत्स्थमिति विरुद्धमुच्यत इति चेत्तस्य व्यापकत्वाश्रयत्वयोरविरोधान्न विरुद्धमित्याह—पश्य मे योगमिति। मे मम परमेश्वरस्यैश्वर योगमघटितघटनाचातुर्यमवलोकय। मद्योगमायावैभवस्याप्रतर्क्यत्वात् न कश्चिद्विरोधावकाश इत्यर्थ। स्वयोगमायावैभवमेव प्रकटयति—भूतभृदिति। को ऽय भूतभृत्? तत्राह—ममात्मेति। स्वाविद्याऽऽवृतदृष्टीना सोपाधिकवत्स्थितस्य मम परमेश्वरस्य मद्भावकबलितातद्भाववद्योगिपटलानु-

भवसिद्धो निरुपाधिक आत्मा गगनवदसङ्गो ऽपि सन् भूतानि बिभर्ति धारयति पालयतीति भूतभृदित्युच्यते। भूतभृत्त्वे ऽपि भूताविर्भावतिरोभावहेतुता कुत इति तत्राह—भूतभावन इति। स्वव्यावृत्तभूतान्याविर्भावयति तिरोभावयतीतिं च भूतभावन। परमार्थतो नाह भूतेषु वसामि नापि मयि भूतानि वसन्ति मद्व्यतिरेकेण भूतभौतिकजातशून्यत्वादनात्मप्रपञ्चो नास्त्येवेत्यर्थ,

'अनात्मेति प्रसङ्गो वा अनात्मेति मनो ऽपि वा।
अनात्मेति जगद्वा ऽपि नास्त्यनात्मेति निश्चिनु॥
यथैव मृन्मय कुम्भस्तद्वद्देहो ऽपि चिन्मय।
आत्मानात्मविवेको ऽय मुधैव क्रियते ऽबुधै॥'

इत्यादिश्रुते॥ ५॥

अस्त्वेव त्वद्भावारूढाना तेषा कृतकृत्यत्वात्। प्रकृते तावद्यथा देहादिजन्मस्थितिभङ्गकर्मणा जीव श्लिष्यते, तथा त्वमपि भूतग्रामजन्मस्थितिभङ्गकर्मणा श्लिष्यस इत्याकाङ्क्षायाम् 'मया ततमिदम्' इत्यादिश्लोकद्वयेन यो ऽर्थो ऽभिहित तमेतमर्थं दृष्टान्तेन स्पष्टयति—

यथा ऽऽकाशस्थितो नित्यं वायुः सर्वत्रगो महान्।
तथा सर्वाणि भूतानि मत्स्थानीत्युपधारय॥ ६॥

यथेति। यथा सर्वत्र गच्छतीति सर्वत्रगो वायु परिमाणतो महानपि नित्य सदा स्वोत्पत्तिस्थितिलयकाले ऽवकाश विना कस्याप्युत्पत्त्यसभवात् स्वोत्पत्त्याद्यवकाशहेतुत्वेन स्वकारणभूताकाशे तिष्ठतीत्याकाशस्थो ऽपि नाकाशेन वायु सश्लिष्यते वायुना ऽऽकाश वा। निरवयवत्वे-

नाकाशस्य वायुना सश्लोषाभावे ऽपि वायो सावयवत्वेनाकाशेन सश्लेष स्यादिति चेन्न, सावयवयोरिव निरवयवसावयवयो सामानाधिकरण्याभावेन सश्लेषवैरल्यस्य स्फुटत्वादिति पुरस्तादेवोक्तत्वात्। तथा सर्वाण्याकाशादीनि पञ्च महाभूतानि तथा भौतिकजातानि चाकाशस्थानीयविज्ञानात्माभिन्ने परमात्मनि मयि सश्लेषमन्तरेण तिष्ठन्तीति मत्स्थानीत्युपधारयावधारय, निश्चिन्वित्यर्थ ॥ ६ ॥

स्वस्यासङ्गत्वे ऽपि योगमायया जगत्स्थितिहेतुता यथोपपद्यते तथा सृष्टिप्रलयहेतुता ऽप्युपपद्यत इत्याह —

सर्वभूतानि कौन्तेय प्रकृतिं यान्ति मामिकाम्।
कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहम् ॥ ७ ॥

सर्वेति। हे कौन्तेय! कल्पक्षये प्रलयकाले सर्वभूतान्याकाशादि-भूतभौतिकजातानि मामिका मदधीनत्वेनास्वतन्त्रा त्रिगुणात्मिका प्रकृति यान्ति, जडप्रकृतौ विलीयन्त इत्यर्थ। कल्पक्षये भूतानि प्रकृति यान्ति चेत् कल्पादौ भूतानि स्वयमेव प्रकृतित एवोत्पद्येरन्, कि स्वप्रकृत्यतिरिक्त-कारणताकल्पनेनेत्यत आह—विसृजामीति। कल्पादौ सृष्टिकाले पुनस्ता-न्याकाशादीनि भूतभौतिकजातानि विशेषेण सृजामि। भूताना प्रकृति-वशगत्वेन प्रकृतेर्जडत्वेन च तयोराविर्भावतिरोभावकारणमहमेवेत्यर्थ ॥ ७ ॥

प्रकृतेर्जडत्वात् भूताना चेतनत्वे ऽपि प्रकृतिपरतन्त्रत्वादीश्वरस्यापि स्वेतरवस्तुशून्यत्वेन कार्यकारणताऽनुपपत्तेरित्येव प्राप्ते, तत्रोच्यते। परमेश्वर-स्य स्वेतरवस्तुशून्यत्वे ऽपि प्रकृत्यवष्टम्भत कार्यत्व कारणत्व चोपपद्यत इत्याह—

प्रकृतिं स्वामवष्टभ्य विसृजामि पुनः पुनः ।
भूतग्राममिमं कृत्स्नमवशं प्रकृतेर्वशात् ॥ ८ ॥

प्रकृतिमिति ।· स्वेतरवस्त्वन्तरशून्य परमेश्वरो ऽप्यह स्वा स्वाधीना प्रकृतिमवष्टभ्याधिष्ठाय प्रलयकाले मदीयप्रकृतौ प्रलीन स्वाज्ञानतत्कार्यस्वभावरूपा प्रकृतिस्तद्वशात तत्पारतन्त्र्यात् अवशमस्वतन्त्र कृत्स्नमिम चतुर्विध भूतग्राममनादिससारे विशेषेण सृजामि । कदा? पुन पुन प्रतिकल्पमित्यर्थ । वीप्सात ससारस्यानादित्व द्योत्यते ॥ ८ ॥

स्वाज्ञानपरवश भूतग्राम विषम विदधतस्तव तत्तद्धर्मादिसबन्धतो जीववदनीश्वरत्व कि न स्यादित्याकाङ्क्षायामाह-

न च मां तानि कर्माणि निबध्नन्ति धनंजय ।
उदासीनवदासीनमसक्तं तेषु कर्मसु ॥ ९ ॥

न चेति । हे धनजय ! यद्भूतग्रामकृतपुण्यपापवासनाऽनुरोधिविषमसृष्टिनिमित्तकर्मलेपतो जीववदनीश्वरत्व मयि शङ्कसे तानि कर्माणि न च मा निबध्नन्ति । विषम कर्म कुर्वत· तत्प्रयुक्तो बन्ध स्यादिति शङ्कमान प्रत्याह---असक्तमिति । तेषु विषमसृष्टिहेतुषु पुण्यपापकर्मसु करोमीद कर्म ममेदमिति च कर्तृत्वाद्यभिमानविकलत्वादसक्तमसङ्गोदासीनस्वभाव परमेश्वर तानि कर्माणि कथ बध्नीयु ? तत्कथमिति तत्राह-- आसीनमिति । यथा कश्चिदुदासीनो विवदमानयोर्हानि वृद्धि वा प्रपन्नयोरप्युपेक्षको निर्विकारो भवति, तथा कूटस्थरूपेणासीन नित्यशुद्धबुद्धापरिमितानन्द फल्गुफलवन्ति कर्माणि स्प्रष्टुमपि न पारयन्तीत्यर्थ । एव मद्भावारूढस्य यस्य कस्यचित्फलकामनाकर्तृत्वाभिमानाभावो धर्माधर्माश्लेषे कारणमिति भावः ॥ ९ ॥

तवेश्वरस्य जगत्स्रष्टृत्व तत्रोदासीनत्व च तम प्रकाशवद्विरुद्धमित्याशङ्क्याह—

मया ऽध्यक्षेण प्रकृतिः सूयते सचराचरम्।
हेतुना ऽनेन कौन्तेय जगद्विपरिवर्तते ॥ १० ॥

मयेति । हे कौन्तेय ! 'कर्माध्यक्ष सर्वभूताधिवास ' 'यो अस्याध्यक्ष परमे व्योमन्' इत्यादिश्रुतिषु सर्वेषा सर्वकर्मफलदातृत्वेन चेतनाचेतनात्मकविश्वाधिष्ठानत्वेन च प्रसिद्धेन मया अध्यक्षेण निर्विकारतया निमित्तभूतेन स्वाज्ञदृष्ट्या ऽनाद्यनिर्वचनीया प्रकृति सचराचर जगत् सूयते उत्पादयतीत्यनेन मदधिष्ठानहेतुना सचराचरमिद जगत्पश्यामि शृणोमि सुखासुखमनुभवामि किंचिज्जानामि न जानामीत्येवरूपेण विपरिवर्तते, पौन पुन्येन भूत्वा भूत्वा ससारचक्रे परिभ्रमति । लोहव्यापारहेत्वयस्कान्तवन्ममेश्वरस्य सनिधिमात्राधिष्ठातृत्वात् जगत्कर्तृत्व तत्रोदासीनत्व चाविरुद्धम् , वस्तुत उभयाभावादिति भाव ॥ १० ॥

ननु 'एको देव सर्वभूतेषु गूढ सर्वव्यापी सर्वभूतान्तरात्मा' इत्यादिश्रुत्या अद्वैतपरमानन्दस्वरूपेण सर्वात्मभूतमपि त्वा ज्ञात्वा कुतो न भजन्तीत्याकाङ्क्षायामाह—अवजानन्तीति द्वाभ्याम् ।

अवजानन्ति मां मूढा मानुषीं तनुमाश्रितम् ।
परं भावमजानन्तो मम भूतमहेश्वरम् ॥ ११ ॥

अवजानन्तीति । मूलाज्ञानदृढपटावृता देहादावात्मात्मीयाभिमानारूढा मूढा पुरुषाधमा प्रत्यगभिन्नब्रह्मरूपिणो मम स्वाविद्याद्वयतत्कार्यजातात् पर भाव नित्यशुद्धबुद्धमुक्तपरमानन्दस्वभाव सर्वेषामाकाशादिभूताना-

मन्तरतमत्वेन प्रसिद्ध भक्तपूगस्वपदप्राप्तिहेतु सकल भाव च अजानन्त सन्त सर्वेषा ब्रह्मादिस्तम्बान्तभूताना महान्तमीश्वर मा तूलाविद्याविजृम्भिता मानुषीं तनुमाश्रित मत्वा केवलमनुष्यो ऽयमित्यवजानन्त्यवज्ञा परिभव च कुर्वन्ति । मदवज्ञादोषेण मामज्ञात्वा ससरन्तीत्यर्थ ॥ ११ ॥

ईश्वरावज्ञानात्तेषा किं भवतीति तत्राह—

मोघाशा मोघकर्माणो मोघज्ञाना विचेतसः ।
राक्षसीमासुरीं चैव प्रकृतिं मोहिनीं श्रिताः ॥ १२ ॥

मोघेति । मद्भिन्नदेवता क्षिप्रफल दास्यति इत्येव मोघा आशा आशिषो येषा ते मोघाशा भवन्ति, परमार्थफलबहिष्कृतत्वात् । त्वा परिभव कुर्वतामपि नित्यनैमित्तिककर्मानुष्ठानादमोघाशा स्युरिति तत्राह—मोघेति । मदवज्ञा-दोषतो मोघानि नित्यनैमित्तिककर्माणि येषा ते मोघकर्माण मद्भावविकलकर्मणा बन्धहेतुत्वात् । मोघकर्माणो ऽपि शास्त्रार्थपरिज्ञानात् सफलाशा स्युरिति तत्राह—मोघेति । तथा मदवज्ञादोषेण मोघ व्यर्थ शास्त्रार्थपरिज्ञान येषा ते मोघज्ञाना कुतर्कतो विपरीतभावनादोषदुष्टत्वात् कुतर्कबलेन तेषामाशा सफला भवेदिति तत्राह—विचेतस इति । पुरुषार्थान्तरे ऽपि विक्षिप्त चेतो येषा ते विचेतस । मद्भावविकलाना विक्षेपस्य ध्रौव्यात् न केवलमुक्तदोष तेषाम्, किं तु वर्तमानदेहपातानन्तर निकृष्टयोनिप्राप्ति निरङ्कुशेत्याह—श्रिता इति । छिन्द्धि भिन्द्धि पिब खादेति रक्षसामिय राक्षसी परस्व परदारानपहरेत्याद्यसुराणामियमासुरी, तामेवरूपा मोहिनीं महामोहकरीं प्रकृतिं स्वभावमाश्रिता भवन्ति । कदा ऽपि ते मा न भजन्तीत्यर्थ ॥१२॥

के त्वामुक्तलक्षण भजन्तीत्याकाङ्क्षाया श्रद्दधाना मद्भक्ता इत्याह—महाऽऽत्मान इति द्वाभ्याम्—

महाऽऽत्मानस्तु मां पार्थ दैवीं प्रकृतिमाश्रिताः ।
भजन्त्यनन्यमनसो ज्ञात्वा भूतादिमव्ययम् ॥ १३ ॥

महाऽऽत्मान इति । हे पार्थ ! मदाराधनलक्षणनिष्कामकर्मानुष्ठानतो महान्विशुद्ध आत्मा ऽन्त करण येषा ते महाऽऽत्मान । तुशब्दतो महदपरिच्छिन्नब्रह्मात्मभावारोहेच्छा द्योत्यते । साधनचतुष्टयसपन्ना पुरुषा 'अभय सत्त्वसशुद्धि' इत्यादिवक्ष्यमाणलक्षणा देवाना प्रकृति दैवीं प्रकृति शमदमदयाश्रद्धाऽऽदिस्वभावमाश्रिता सन्त अनन्यमनस प्रत्यगनन्यत्वेन विद्यमाने परमपुरुषे मयि मनो येषा ते अनन्यमनसो भूत्वा परमकारणत्वेन महदादिभूतानामादि महासत्तास्वभावत्वादव्यय मा श्रुत्याचार्यदिनकरानुगृहीतवेदान्तज्ञानदृष्ट्या ज्ञात्वा अपरोक्षीकृत्य प्रत्यगभेदेन भजन्ति सेवन्त इत्यर्थ ॥ १३ ॥

एव भजता भजनप्रकारमाह—सततमिति द्वाभ्याम्—

सततं कीर्तयन्तो मां यतन्तश्च दृढव्रताः ।
नमस्यन्तश्च मां भक्त्या नित्ययुक्ता उपासते ॥ १४ ॥

सततमिति । केचिदनन्यभक्त्या साधनचतुष्टयसपत्तौ नित्ययुक्ता सन्यासिन प्रणवमहावाक्यै प्रत्यगभिन्नब्रह्मरूप वासुदेव मा कीर्तयन्त स्तुवन्त सन्त उपासते । केचिदनन्यभक्त्या स्वेन्द्रियद्वयनिग्रहे नित्ययुक्ता वानप्रस्था द्विविध ब्रह्मचर्यमेव दृढ व्रतं येषा ते दृढव्रता भूत्वा सर्वकर्मसन्यासलक्षणप्रत्यगभिन्नब्रह्मनिष्ठामारोढु यतन्तो यत्न कुर्वन्त सर्वभूतगुहाशय माम् उपासते । केचिन्निरतिशयप्रेमलक्षणभक्त्या नित्ययुक्ता परमैकान्तिनो भागवता सर्वस्वरूपिण मा सर्वत्र पश्यन्तो नमस्यन्तश्चोपासते ।

'ईश्वरो जीवरूपेण प्रविष्टो भगवानिति ।
प्रणमेद्दण्डवद्भूमावाश्वचण्डालगोखरम् ॥'

इति श्रुते ॥ १४ ॥

पूर्वोक्ताधिकारिण केन प्रकारेण त्वामुपासत इति तत्राह—

ज्ञानयज्ञेन चाप्यन्ये यजन्तो मामुपासते ।
एकत्वेन पृथक्त्वेन बहुधा विश्वतोमुखम् ॥ १५ ॥

ज्ञानेति । उत्तमाधिकारिण केचिदन्ये सर्वकर्मसन्न्यासलक्षणब्रह्मनिष्ठार्हा सन्न्यासिन प्रत्यग्ब्रह्मणोरेकत्वेन वासुदेवः सर्वमिति सर्वात्मैकत्वदर्शन ज्ञान तदेव यज्ञ तेन ज्ञानयज्ञेन यजन्त अनुसधान कुर्वन्त सन्तो मामद्वैतभावनयोपासते । चापिशब्दाभ्या प्रत्यग्ब्रह्मणोरभेदभावना द्योत्यते । तेषा कुत्रापि द्वैतभान न भातीत्यर्थ । मध्यमाधिकारिण कथमुपासत इति तत्राह—पृथक्त्वेनेति । केचिन्मध्यमाधिकारिणो यो ऽसौ भगवान् विष्णु सो ऽयमादित्यचन्द्रादिरूपेणावस्थित इति पृथक्त्वेनोपासते । मन्दाधिकारिण कथमुपासत इति तत्राह—बहुधेति । केचिन्मन्दाधिकारिणो बहुधा बहुप्रकारेण विश्वतोमुख विराड्भाव प्रतिपद्य चेतनाचेतनेषु भगवानेक एवावस्थित इत्युपासते, 'एको देवो बहुधा सनिविष्ट' इति श्रुते ॥ १५ ॥

एकस्त्व बहुधा कथमुपास्यो भवसीति तत्राह— अहमिति चतुर्भि ।

अहं क्रतुरहं यज्ञः स्वधा ऽहमहमौषधम् ।
मन्त्रो ऽहमहमेवाज्यमहमग्निरहं हुतम् ॥ १६ ॥

अहमिति । अग्निष्टोमादि श्रौत कर्माहमेवेत्याह—क्रतुरिति । स्मृत्युक्त पञ्चयज्ञादिक कर्माहमेवेत्याह—यज्ञ इति । श्राद्धादिक कर्माहमेवेत्याह—स्वधेति । ओषधिभवमन्न भेषज वा ऽहमेवेत्याह—औषधमिति । पितृदेवतोद्देशेन येन हविर्दीयते स याज्यापुरोऽनुवाक्यावहमेवेत्याह—मन्त्र इति । मन्तार त्रायत इति मन्त्र, मनोव्यापाराधीनत्वात् । होमसाधनद्रव्यमहमित्याह—आज्यमिति । आहवनीयादिरहमिति विशिनष्टि—अग्निरिति । हवनक्रिया ऽप्यहमित्यादिशति—हुतमिति । क्रियाकारकफलादिक मदतिरिक्त नास्तीत्यर्थ ॥ १६ ॥

इतश्च सर्वात्मकत्व स्फोरयति—

पिता ऽहमस्य जगतो माता धाता पितामहः ।
वेद्यं पवित्रमोंकार ऋक्साम यजुरेव च ॥ १७ ॥

पितेति । परिदृश्यमानस्य चराचरात्मकस्यास्य जगत कारणमहमित्याह—पिता जनयिता निमित्तकारणम्, माता जनयित्र्युपादानकारणम्, अभिन्ननिमित्तोपादानकारणमहमित्यर्थ । सर्वकर्मफलप्रदाता कर्माध्यक्षो ऽहमेवेत्याह—धातेति । हिरण्यगर्भो ऽप्यहमित्याह—पितामह इति । मुमुक्षुकोटिवेदितव्यमहमित्याह—वेद्यमिति । पापपटलशोधकपुण्यतीर्थादिरहमित्याह—पवित्रमिति । वेद्यब्रह्मवेदनसाधनमहमित्याह—ओकार इति । तत्प्रमाणमप्यहमित्याह—ऋगिति । ऋक्साम यजुरेव च, चकारादथर्वाङ्गिरसो ऽपि गृह्यते ॥ १७ ॥

इतश्च स्वस्य सर्वात्मकत्वे हेत्वन्तरमाचष्टे—

गतिर्भर्ता प्रभुः साक्षी निवासः शरणं सुहृत् ।
प्रभवः प्रलयः स्थानं निधानं बीजमव्ययम् ॥ १८ ॥

गतिरिति । यावदविद्याद्वय तावत्स्वर्गादिकर्मफल गम्यत इति गमको ऽहमित्याह---गतिरिति । स्वकृतकर्मफलप्रदानेन जगत्पोष्टा ऽहमित्याह—भर्तेति । सर्वान्तरत्वेन नियामको ऽहमित्याह—प्रभुरिति । स्वसाक्ष्यपटल-भावाभावेक्षको ऽहमित्याह—साक्षीति । कार्यकरणप्रपञ्चो यत्र निवसति तदधिष्ठानमहमित्याह— निवास इति । प्रपन्नजनाध्यात्मिकादिदु खानि यत्प्रबोधमात्रेण शीर्यन्ते तादृशो ऽहमित्याह—शरणमिति । प्रत्युपकार-नैरपेक्ष्येण सर्वप्राण्युपकर्ता ऽहमेवेत्याह—सुहृदिति । प्रकर्षेण भवत्यनेन सर्वमिति तदुत्पत्तिकारणमहमित्याह—प्रभव इति । प्रलीयते ऽस्मिन् सर्वमिति प्रलयकारणमहमित्याह—प्रलय इति । तिष्ठत्यस्मिन् सर्वमिति सर्वाधिकरणमहमिति दर्शयति—स्थानमिति । कालान्तरोपभोग्यतया निधीयन्ते ऽस्मिन्निति निक्षेपो ऽहमित्यादिशति—निधानमिति । सर्वप्राणिना प्ररोहकारणमहमिति प्रत्याययति—बीजमिति । बीजस्य नश्वरत्वशङ्का शातयति— अव्ययमिति । व्रीह्यादिबीजाना नश्वरत्वे ऽपि सर्वप्ररोहबीजस्य पारमेश्वरस्य सच्चिदानन्दरूपत्वेन कदाचिन्न व्यतीत्यव्ययत्व निरङ्कुश मित्यर्थ ॥ १८ ॥

इतश्च सर्वात्मकत्वं व्याचष्टे—

तपाम्यहमहं वर्षं निगृह्णाम्युत्सृजामि च ।
अमृतं चैव मृत्युश्च सदसच्चाहमर्जुन ॥ १९ ॥

तपामीति । ग्रीष्मकाले सूर्यादिरूपेण जगत्ताप करोमीत्याह—तपामीति । कैश्चिद्रश्मिभि वर्ष निगृह्णामीत्यर्थ । प्रावृट्काले केश्चिद्र-श्मिभि वृष्टि वितरामीत्याह— वर्षमुत्सृजामीति । सर्वप्राणिजीवन देवानामुपभोग्य वा ऽहमित्याचष्टे—अमृतमिति । सर्वप्राणिप्रगोपसहर्ता

ऽहमित्याह—मृत्युश्चेति । चाक्षुषमभिव्यक्तनामरूप विशेषवस्तुजातमह-मित्याह—सदिति । अनभिव्यक्तनामरूपत्वेनाचाक्षुष सामान्यवस्तुजात चाहमित्याह—असच्चेति । एतत्सर्वमहमेवेति मत्वा बहुधा मामेवोपासत इति पूर्वेणान्वय ॥ १९ ॥

'महाऽऽत्मानस्तु मा पार्थ' इत्यादिना प्रत्यक्परयोरेकत्वेन पृथक्त्वेन बहुधा वा तरतमज्ञानयज्ञारूढा ये मामुपासते ते स्वकृतोपासनातारतम्येन सद्योमुक्ति क्रममुक्ति वा प्राप्नुवन्तीति प्रकटयितुम् 'अवजानान्ति मा मूढा' इत्यादिश्लोकद्वयेन क्षिप्रफलप्रतिपित्सया मदतिरिक्तधिया देवताऽन्तरयाजकाना गतागतत्वलक्षणससारगति निगमयति—त्रैविद्या इति द्वाभ्याम् ।

त्रैविद्या मां सोमपाः पूतपापा
यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयन्ते ।
ते पुण्यमासाद्य सुरेन्द्रलोक-
मश्नन्ति दिव्यान्दिवि देवभोगान् ॥ २० ॥

त्रैविद्या इति । ऋग्यजु सामरूपा तिस्रो विद्या येषा ते त्रिविद्या त्रिविद्या एव त्रैविद्या । तिस्रो विद्या अधीयते विदन्तीति वा त्रैविद्या । वेदत्रयोक्तकर्मपरायणा इत्यर्थ । मद्रूप देवताऽन्तरमिति जानन्तो ऽपि परमार्थतो वेदत्रयविहितयज्ञैरिन्द्रादिरूपिण मामेवेष्ट्वा सपूज्य यज्ञशिष्ट सोम पिबन्तीति सोमपा । तेनैव पूतपापा विगतकल्मषा सन्त' स्वर्गति स्वर्ग-लोकगमन प्रति ये प्रार्थयन्ते न कामिन पुण्यफल सुरेन्द्रलोकमासाद्य दिवि स्वर्गे दिव्याननुत्तमान् देवभोगानश्नन्ति भुञ्जते ॥ २० ॥

स्वर्गप्राप्तिरपि भगवत्प्राप्तितुल्येति तत्राह—

ते तं भुक्त्वा स्वर्गलोकं विशालं
क्षीणे पुण्ये मर्त्यलोकं विशन्ति ।
एवं त्रैधर्म्यमनुप्रपन्ना
गतागतं कामकामा लभन्ते ॥ २१ ॥

ते तमिति । ते स्वर्गकामा पशुसदृशबुद्धित्वात् त स्वकाङ्क्षित विपुल स्वर्गलोक तद्गतसुखस्य विपुलत्वात् विशाल तत्सुख भुक्त्वा भोगप्रापक-पुण्ये क्षीणे सति मृतिपर्यवसायित्वात् मर्त्यलोक मनुष्यादिलोक विशन्ति । एवमुक्तरीत्या त्रयाणा वेदत्रयविहिताना हौत्रादिधर्माणा समाहारस्त्रिधर्म तदेव त्रैधर्म्य त्रिवेदोक्तकर्मानुप्रपन्ना आश्रिता भूत्वा कामान् कामयन्त इति कामकामिन कर्मफलाभिलाषावृतदृष्टित्वात् गतागत गमनागमन लभन्ते ।

'प्लवा ह्येता अदृढा यज्ञरूपा अष्टादशोक्तमवर येषु कर्म ।
एतच्छ्रेयो ये ऽभिनन्दन्ति मूढा जरामृत्यु ते पुनरेवापि यन्ति[1] ॥
इष्टापूर्त मन्यमाना वरिष्ठ नान्यच्छ्रेयो वेदयन्ते प्रमूढा ।
नाकस्य पृष्ठे सुकृते ऽनुभूत्वेम लोक हीनतर वा विशन्ति[2] ॥'

इति श्रुते ॥ २१ ॥

फलाभिसधिना योगक्षेमौ स्याता तदभिसधि विना ज्ञानयज्ञेनैकत्व-पृथक्त्वविश्वतोमुखत्वेन निष्कलसकलभावेन त्वामनन्यभक्त्या भजता कथ योगक्षेमौ स्यातामित्यपेक्षायामाह—

[1] मु—१, २, ७
[2] मु—१, १. १०.

अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते ।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ॥ २२ ॥

अनन्या इति । सर्वप्रत्यगभिन्न परमात्मा ऽहमेव न मत्तो ऽन्य परमात्मेति दृढभावनाऽऽरूढत्वात् अनन्या सन्यासिनो मुख्याधिकारिण । तेषा मुख्याधिकारित्व कुत इति तत्राह—जना इति । जन्मादिषड्भावविकारा देहादेरेव नात्मन इति निश्चयात् जना उच्यन्ते । देहात्मभावनावैधुर्य हि मुख्याधिकारित्वम् । एवमुत्तमाधिकारिण सन्यासिनो ये जना परमात्मान मा प्रत्यगभेदेन चिन्तयन्तो ध्यायन्त सन्त पर्युपासते, परिच्छेदत्रयातीत मा सर्वत्र पश्यन्तीत्यर्थ । एव चिन्तयता कि करोषीति तत्राह—वहामीति । कि वहसि ?—योगक्षेममिति । तेषा स्वान्तर्बाह्ये नित्यमभितो मद्ध्यानयुक्ताना मद्भावारुढानाम् । अप्राप्तवस्तुप्रापण योग, प्राप्तवस्तुरक्षण क्षेम, तदुभय वहामि प्रापयामीत्यर्थ । 'प्रियो हि ज्ञानिनो ऽत्यर्थमह स च मम प्रिय । उदारा सर्व एवैते ज्ञानी त्वात्मैव मे मतम्' इत्युक्तत्वादार्तादित्रयाणा योगक्षेम कि त्वं न वहसि ? तत्रोच्यते । सर्वेषा योगक्षेमवाहको मदन्य को ऽस्ति ? कि त्वार्तादयस्त्रय स्वाभिन्नमपि मा स्वभिन्न भावयित्वा योगक्षेममीहन्ते । तत परताननुगृह्णामि । मदनन्यभावमारूढाना ज्ञानिना मद्व्यतिरेकेण योगक्षेमतत्प्रापकेच्छाऽभावात् ते स्वात्मार्थ न किंचिदपीहन्ते । तैरप्रार्थितमपि योगक्षेम वहामीत्यर्थ ॥ २२ ॥

त्वद्व्यतिरेकेण देवताऽन्तरस्य मृग्यत्वेनेन्द्रादिदेवतायाजिना त्वद्भक्तत्वात् त्वत्प्राप्ति विना कथ ते गतागतलक्षणससारचक्रे भ्रमन्तीति तत्राह—

ये ऽप्यन्यदेवताभक्ता यजन्ते श्रद्धया ऽन्विताः ।
ते ऽपि मामेव कौन्तेय यजन्त्यविधिपूर्वकम् ॥ २३ ॥

ये ऽपीति । हे कौन्तेय! ये मदन्यबुद्धयेन्द्रादिदेवताभक्ता अपि श्रद्धया ऽऽस्तिक्यबुद्धया ऽन्विता सन्त इन्द्रादिदेवता एव यजन्ते, त इतर-देवतायाजिनो ऽपि मामेव यजन्तीति सत्यम् । कि त्वविधिपूर्वक यजन्ति । त्रिविधपरिच्छेदशून्यो विष्णुरहमस्मीति धी विधिर्ज्ञान तद्विपरीतमविधि मदज्ञानम्, तत्पूर्वक यतो यजन्त्यत ते गतागतलक्षण ससार लभन्ते । न मा प्रत्यगभिन्नब्रह्मरूपम्, मत्प्राप्ते मज्ज्ञानगम्यत्वादित्यर्थ ॥ २३ ॥

पूर्वश्लोके यो ऽर्थो ऽभिहित तमेव पुनर्विवृणोति—

अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च ।
न तु मामभिजानन्ति तत्त्वेनातश्च्यवन्ति ते ॥ २४ ॥

अहमिति । हि यस्मात् श्रौतस्मार्तविहिताना सर्वेषा यज्ञाना तत्तद्देवतारूपेणाहमेव भोक्ता तत्तद्देवताऽन्तर्यामिरूपेण प्रभवामीति प्रसिद्धया प्रभु स्वामी । चकारद्वयतो भगवदतिरिक्तभोक्तृप्रभ्वभावो द्योत्यते । 'अधियज्ञो ऽहमेवात्र' इत्युक्तत्वात् । मत्स्वामिको हि यज्ञ· भिन्नदेवतायाजिना यज-नस्याविधिपूर्वकत्व कुत इति तत्राह—न त्विति । तुशब्दो ऽविधिपूर्वकय-जनद्योतक । यतो भिन्नदेवतायाजिनस्तयो भोक्तृप्रभ्वोर्भावस्तत्त्व तेन तत्त्वेन यज्ञभोक्तृत्वेन सर्वप्रभुत्वेन च सर्वप्रत्यगभिन्नब्रह्मरूप मा यथावन्नाभि जानन्ति । मदितरदेवतानिष्ठभोक्तृत्वादे मदज्ञानप्रभवत्वात् । अत तस्मा-द्धेतोरितरदेवतायाजिनो मद्रूपज्ञानात् च्यवन्ति । मय्यनर्पितकर्मफलत्वात् कर्मफलादपि च्यवन्ति, तद्भोगक्षये पुनरावर्तन्त इत्यर्थ ॥ २४ ॥

त्वद्भिन्नदेवतायाजिना त्वद्भाववैकल्येन त्वत्त कर्मफलादपि च्युति-दर्शनादन्यदेवतायजनमकिंचित्करमित्याशङ्क्य मद्रूपावस्थानलक्षणमोक्षाभावे ऽप्यनित्यकर्मफलस्यावश्यभावात् नाकिंचित्करतेत्याह—

यान्ति देवव्रता देवान्
पितॄन्यान्ति पितृव्रताः ।
भूतानि यान्ति भूतेज्या
यान्ति मद्याजिनोऽपि माम् ॥ २५ ॥

यान्तीति । इन्द्रादिदेवेषु हविर्भागप्रदानादि व्रत नियमो येषा ते देवव्रता देवानन्तवतो यान्ति । पितृदेवतोद्देशेनाष्टकाऽन्वष्टकाऽऽदिषण्णवतिश्राद्धादि व्रत येषा ते पितृव्रता अन्तवतोऽग्निष्वात्तादिपितॄन्यान्ति । विनायकमातृकाऽऽदिभूतगणोद्देशेन यजन कुर्वन्तीति भूतेज्या विनायकादिभूतानि यान्ति। देवपितृभूतादिषु मामन्तर्यामित्वेन ये यजन्ति मद्याजिन तेऽपि मा क्रमाद्यान्ति । यद्वा सर्वप्रत्यगभेदेन ये मा यजन्ति ते मद्याजिन मामेव जीवन्मुक्तपटलगम्य यान्ति । सद्योमुक्ता भवन्तीत्यर्थ ॥ २५ ॥

बहुलतरायासलभ्यदेवादिप्राप्तिफलमन्तवन्मत्प्राप्तिफलमनन्तमपि कर्तुमतिसुकरमित्युपदिशति—

पत्रं पुष्पं फल तोयं यो मे भक्त्या प्रयच्छति ।
तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः ॥ २६ ॥

पत्रमिति । यो मद्भक्त भक्त्या परमप्रेमलक्षणया पत्र तुलस्यादि, पुष्प कमलादि, फल कदल्यादि, तोय गङ्गोदकादि, तेषु यद्यत्सुलभ तत्तन्मे मह्य प्रयच्छति समर्पयति । प्रत्यगभिन्नपरमात्मा वासुदेवोऽहमिति निष्कामभक्त्या प्रकर्षेण यतो नियत आत्मा ऽन्तःकरण यस्य तस्य प्रयतात्मनो मद्भक्तस्य परमप्रेमलक्षणभक्त्युपहृत मदर्थ गृहीत्वा समर्पित पत्रपुष्पफलादिकमश्नामि स्वीकरोमीत्यर्थ ॥ २६ ॥

मदाराधनस्यातिसुकरत्वे ऽपि अनन्तफलत्वात् त्वया तदवश्य कार्य-
मित्याज्ञापयति—

यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ।
यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम् ॥ २७ ॥

यदिति । हे कौन्तेय ! विहितमविहित वा देहेन्द्रियादिचेष्टारूपा-
त्मक कर्म यत्करोषि, प्राप्त प्राप्त यदश्नासि, श्रौत स्मार्त वा यज्जुहोषि,
ब्राह्मणादिभ्यो हिरण्यान्नादि यद्ददासि, कृच्छ्रचान्द्रायणादि यत्तपस्यसि,
तत्सर्व मदर्पण कुरुष्व समर्पयेत्यर्थ ॥ २७ ॥

त्वदर्पणबुद्ध्या सर्व कुर्वतो मम कि स्यादित्याकाङ्क्षाया कर्मणा
मयि समर्पितत्वात् निर्मुक्तकर्मबन्धनो भूत्वा विदेहमुक्तो भवसीत्याह—

शुभाशुभफलैरेवं मोक्ष्यसे कर्मबन्धनैः ।
संन्यासयोगयुक्तात्मा विमुक्तो मामुपैष्यसि ॥ २८ ॥

शुभेति । एवमुक्तप्रकारेण सर्व मदर्पण करोषि यदि त्व तदा
शुभमिष्ट स्वर्गादि फलम् अशुभमनिष्ट नरकादि फल च शुभाशुभफले
येषा कर्मणा तै शुभाशुभफलै, शुभाशुभफलप्रापककर्माण्येव बन्धनानि
तै कर्मबन्धनै मोक्ष्यसे । तत किमित्यत आह—मामुपैष्यसीति ।
मयि वासुदेवे बाह्यान्तर्विजृम्भितसर्वभावसमर्पण सन्यास स एव योग,
तेन युक्त आत्मा ऽन्तःकरण यस्य तव स त्व सन्यासयोगयुक्तात्मा
सन् इदानीमेव स्वदेहे स्थिते मृते वा विदेहकैवल्यरूप मामेवोपैष्यसि
प्राप्नोषीत्यर्थ ॥ २८ ॥

भक्तेभ्य स्वरूप दास्यसि नाभक्तेभ्य , तस्मात् तवापि रागद्वेषतो वैषम्यमस्तीति तत्राह—

समो ऽहं सर्वभूतेषु न मे द्वेष्यो ऽस्ति न प्रियः ।
ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यहम् ॥

सम इति । वासुदेव परमेश्वरो ऽह सर्वेषु ब्रह्मादिस्तम्बान्तभूतेषु स्वात्तोपाधिवैचित्र्यतो विषमेष्वपि सर्वदा सम नत्तत्प्रत्यक्स्वरूपस्यैकत्वेन समत्वात् । सर्वसमे ऽपि त्वयि द्वेष्य कश्चिदस्तीति तत्राह—नेति । मे मम वासुदेवस्य द्वेष्यो न कश्चिदस्ति । द्वेष्याभावे ऽपि प्रिय कश्चित्स्यादिति तत्राह-—नेति । मदतिरिक्तद्वेष्यप्रियाभावात् । तर्हि त्वद्भजनमकिंचित्करम् । भक्ताभक्तसमत्वात् तद्दोषपरिहाराय यदि भक्ताननुगृह्णाम्यभक्तान्निगृह्णामीति वदसि तदा तव रागद्वेषादिमत्त्वमनिवार्यं स्यादिति तत्राह—ये भजन्तीति । ये मद्भावारूढा मामनन्यभक्त्या भजन्ति । तुशब्दो नैरन्तर्यद्योतक । ते मयि वर्तन्ते तष्वहमपि वर्ते । यथा स्वभावतो ऽग्नि· शीतनिवारको ऽपि स्वसमीपमागतानामेव शीतनिवारको न दूरस्थानाम् । यथा कल्पवृक्षो वाञ्छितार्थप्रदो ऽपि स्वसेवकानामेव तथाविधो न सर्वेषाम् । तथैव भक्तपक्षपातिनो मम नास्ति वैषम्यम् । मद्भक्ते प्रभाव ईदृश । भक्तेषु पक्षपातित्वात् मद्भजनमकिंचित्करमन्वयव्यतिरेकाभ्या निग्रहानुग्रहयो मद्भक्तिनिष्ठत्वान्न मे समत्वहानिरित्यर्थ ॥ २९ ॥

ननु त्वद्भक्ति सदाचारानेव पुनाति न दुराचारानित्याशङ्क्यानन्यभक्ति दुराचारानपि सदाचारान्कृत्वा स्वपदे नियोजयतीत्याह—

अपि चेत्सुदुराचारो भजते मामनन्यभाक् ।
साधुरेव स मन्तव्यः सम्यग्व्यवसितो हि सः ॥ ३० ॥

अपीति । श्रुतिस्मृत्यनुगृहीतस्वाश्रमाचारसपन्न सदाचार , तद्विपरीतो दुराचार , ततो ऽप्युत्कृष्ट सुदुराचार कुत्सिताचाराग्रगण्यो ऽपि ब्रह्माहमहमेव ब्रह्मेति प्रत्यगनन्यत्वेन सर्वेश्वर मा भजतीत्यनन्यभाक् चेद्यो ऽयमेवभूत सम्यक् समीचीन व्यवसित निश्चित यस्य स सम्यग्व्यवसितो भवति । स साधु सदाचार एव मन्तव्य । हिशब्दस्तस्य साधुजनैरपि श्लाघनीयताद्योतक । मयि सम्यग्व्यवसितत्वात् । न चानन्यभाक्त्वमन्तरेण सुदुराचारताऽनिवृत्ते सुदुराचारस्यानन्यभाक्त्वानुपपत्ते तयोरन्योऽन्याश्रयता कि न भवेदिति वाच्यम् । सुदुराचारस्थूलसूक्ष्मबीजाशाना भागवतसङ्गसकलनिष्कलभक्तिनाश्यत्वादनन्तकोटिजन्मसुकृतलब्धभागवतससर्गमात्रत सुदुराचारस्थूलाशो निवर्तते । भागवतसङ्गजनितसुदुराचारस्थूलाशनिवृत्तिजनितसकलब्रह्मशरणलक्षणभक्तित सूक्ष्मभागो निवर्तते । ततो निष्कलब्रह्माहमस्मीति प्रत्यगभिन्नब्रह्मज्ञानलक्षणानन्यभक्तित सुदुराचारबीजभागो ऽपि विलीयते । यत एवमतो ऽनन्यभाक्त्वत सुदुराचारनिवृत्ते कृतकृत्यताप्राप्तेश्च न तयोरन्योन्याश्रयादिदोषावकाश इत्यर्थ ॥ ३० ॥

कथ पुनस्त्वदनन्यभाक्त्वतो दुराचारनिवृत्तिरिति तत्राह—

क्षिप्रं भवति धर्मात्मा शश्वच्छान्तिं निगच्छति ।
कौन्तेय प्रतिजानीहि न मे भक्तः प्रणश्यति ॥ ३१ ॥

क्षिप्रमिति । मदनन्यभावाग्निभस्मीकृते सुदुराचारतूलाद्रौ सति तदानीमनन्यभाङ् मुनि क्षिप्रमव्यवधानेन प्रत्यक्परचिदैक्यधारणार्हो धर्म पूर्णाहभाव आत्मा ऽन्त करण यस्य सो ऽय ब्रह्मात्मनिष्ठो भवति । तत किमित्यत आह—निगच्छतीति । धर्मात्मतापदारोहसमकालमेव शश्वच्छाश्वतीमविद्याद्वयतत्कार्यसुदुराचारघातिनीं मन्निष्ठा शान्ति नितरा गच्छति ।

एव वेदान्तवेद्यचरणेन विस्पष्टार्थाभिधायिना भगवता यदुक्त तत्सत्यमेव । एतमर्थमेते सभासद कुतर्ककर्कशधिषणा न मन्येरन्निति शङ्काव्याकुलितमर्जुनमालक्ष्य हे कौन्तेयेति सबोधयन् प्रोत्साहयति—प्रतिजानीहीति । एव विवदमानाना सभाऽङ्गत्वात् वीणावेणुकाहलमद्दलमृदङ्गभेरीवाद्यादिपुर सर स्वबाहू ऊर्ध्वमुत्क्षिप्य नि शङ्क त्व प्रतिजानीहि प्रतिज्ञा कुरु । किमिति ? मे मम वासुदेवस्यानन्यभावमारूढो भक्तो मद्भजनात् प्रागाचरितसुदुराचारदोषतो न प्रणश्यति । मद्भजनस्य सदाचारत्वेन दुराचारघातित्वात् स विदेहकैवल्यभागिति घोषय । तत सभासदस्त्वत्प्रसादलब्धविवेका सन्त कृतार्थतापदमश्नुवीरन्नित्यर्थ ॥ ३१ ॥

'न मे भक्त प्रणश्यति' इति यदुक्त तत्सत्यमस्तु, तथा ऽपि त्वद्भक्ति सत्कुलप्रसूतानेव कृतार्थान्कुर्यान्नेतरानिति तत्राह—

मां हि पार्थ व्यपाश्रित्य
ये ऽपि स्युः पापयोनयः ।
स्त्रियो वैश्यास्तथा शूद्रा-
स्ते ऽपि यान्ति परां गतिम् ॥ ३२ ॥

मा हीति । हे पार्थ ! पापमेव योनि स्वोत्पत्तौ कारण येषा ते पापयोनय निकृष्टजन्मभाज इत्यर्थ । के ते पापयोनय इति तत्राह — स्त्रिय इति । कृषिवाणिज्यादिकर्मकर्तारो वैश्या वेदाध्ययनाधिकारताहेतूपनयनादिसस्काररहिता स्त्रिय तथाविधा शूद्रा मद्भजनयुक्ताश्चेत् ते ऽपीति अपिशब्दस्वारस्यात् । ततो निकृष्टजन्मानो ऽपि महाभागवतससर्गलब्धभक्त्या सकल निष्कल वा ब्रह्मरूप मा व्यपाश्रित्य ब्रह्मैवाहमहमेव ब्रह्मेत्यन-

न्यभक्ति कृत्वा परा परमपुरुषार्थरूपा गति मुक्ति यान्ति। भगवद्भक्ते जातिकुलवैशिष्ट्यनियमाभावद्योतको हिशब्द ॥ ३२ ॥

यत पापयोन्यो ऽपि मामुपाश्रित्य परा गति यान्ति अत सत्कुलप्रसूता सदाचारसपन्ना परा गति यान्तीति कि वक्तव्यमित्याह—

किं पुनर्ब्राह्मणाः पुण्या भक्ता राजर्षयस्तथा।
अनित्यमसुखं लोकमिमं प्राप्य भजस्व माम् ॥ ३३ ॥

किमिति। स्वाश्रमाचारसपन्नत्वेन पुण्या पुण्यकर्माण शमादिप्रधाना ब्राह्मणा तथा राजानश्च ते ऋषयश्चेति राजर्षयश्च मद्भक्ता परमा गति यान्तीति कि पुनर्वक्तव्यमवशिष्यते? मनुष्येतरपश्वादिदेहयोगतो मद्भजनाधिकारायोगाद्यतो मद्भजनयोग्य मनुष्यदेह प्राप्तो ऽसि। अत त्वया कार्यान्तर हित्वा मद्भजनमेव कर्तव्यमित्यादिशति—भजस्वेति। क भजेयमिति तत्राह—मामिति। प्रत्यगभेदेनेत्यर्थ। कि कृत्वेति तत्राह—प्राप्येति। दुर्लभ मानुष लोक भजनयोग्य प्रतिपद्येत्यर्थ। दुर्लभमनुष्यलोकस्य प्राप्तत्वात् कालान्तरे भजनीयमिति तत्राह—अनित्यमिति। क्षणभङ्गुरत्वात् सुखाभासमप्यसुखमिम लोक प्राप्य त्वया ऽहं भजनीय इति भाव. ॥ ३३ ॥

भजनप्रकार दर्शयन्नुपसहरति—

मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु।
मामेवैष्यसि युक्त्वैवमात्मानं मत्परायणः ॥ ३४ ॥ इति ॥

इति श्रीमद्भगवद्गीतासूपनिष० राजविद्याराजगुह्ययोगो नाम नवमो ऽध्यायः ॥

मन्मना भवेति। हे पार्थ! प्रत्यगभिन्ने मयि वासुदेवे मनो यस्य स त्व मन्मना भव। मदन्यत्र मनो मा कुर्वित्यर्थ। तथा वासुदेवो ऽहमहमेव वासुदेव इति भक्ति भजन यस्य स त्व मद्भक्तो भव। मदितरदेवताभक्ति कदा ऽपि मा कुर्वित्यर्थ। प्रत्यगभेदेन मद्यजन मदनुसधान करोषीति मद्याजी भव। मद्यजनाधिकाराभावे, ऽपि तादृशाधिकारतासिद्धये मा सदा नमस्कुरु। दासो ऽह सो ऽहमिति वेत्यर्थ। 'नमस्त्वैक्य प्रवदेत्' इति श्रुते। एव कृते कि स्यादिति तत्राह—मामेवैष्यसीति। वासुदेवो ऽहमेव परमयन प्राप्य यस्य स त्व मत्परायण सन् मय्येव चित्त युक्त्वा निधाय सर्वप्रत्यगभिन्न परमात्मानमखण्डैकरस मामेवैष्यसि। तदा नित्यशुद्धबुद्धपरमानन्दस्वरूपो भवसि। इतिशब्द अध्यायपरिसमाप्त्यर्थ ॥ ३४ ॥

यद्राजविद्यासवेद्यसत्ताचित्सौख्यवैभवम्।
अनन्यहृन्मुनिप्राप्य तत्कैवल्य वृणोतु माम् ॥

इति श्रीमद्भगवद्गीताऽर्थप्रकाशिकाया नवमो ऽध्याय ॥

दशमो ऽध्यायः

पुरोक्ता अपि सक्षेपात्सप्तमादौ विभूतय ।
सर्वत्र स्वावगतये वितन्यन्ते पुनश्च ता ॥

सप्तमाद्यध्यायत्रयेण मुमुक्षुकोटिभजनीय तत्त्व निरूपितम् 'रसो ऽहमप्सु' इत्यादिना। 'अहं क्रतुरहम्' इत्यादिना च सक्षेपतो विभूतयो ऽपि निरूपिता। तथा ऽपि स्वतत्त्वस्य दुर्विज्ञेयत्वेन विभूतीनामनन्तत्वेन च यावद्विभूतीना वक्तुमशक्यत्वे ऽपि प्राधान्येन येषु येषु भावेषु चिन्त्यो ऽह स्या ते ते भावा वक्तव्या इति सर्वत्र स्वावगतये भूय एव विभूती· प्रपञ्चयिष्यन् स्वानन्यभक्ते· स्वपदप्राप्तिहेतुतां विशदयन् श्रीभगवानुवाच—

श्रीभगवानुवाच—

भूय एव महाबाहो शृणु मे परमं वचः ।
यत्ते ऽहं प्रीयमाणाय वक्ष्यामि हितकाम्यया ॥ १ ॥

भूय इति। हे महाबाहो! मद्वचने प्रीयमाणाय तुभ्य मत्तत्त्वज्ञानमुत्पादयितव्यमिति हितकाम्यया पुरैवोक्तमपि तदर्थस्य दुर्विज्ञेयत्वेन त्वया ऽनवधृतत्वात् भूय एव पुनरपि यदल्प वचो वक्ष्यामि तन्मे परम वच शृणु। मद्वचसो ब्रह्मात्मैकत्वबोधकत्वेन परमत्वमुचितमित्यर्थः ॥ १ ॥

परमवचसस्त्वदन्येनापि वक्तु शक्यत्वेन त्वद्वचने को विशेष इति तत्राह—

न मे विदुः सुरगणाः प्रभवं न महर्षयः।
अहमादिर्हि देवानां महर्षीणां च सर्वशः॥ २॥

नेति। हि यस्मात् सर्वश सर्वप्रकारेणेन्द्रादिदेवाना भृग्वादि-महर्षीणा चादिरभिन्ननिमित्तोपादानकारणमहमस्मि, तस्मात्सुरगणा महर्षयश्च प्रत्यगभिन्नब्रह्मरूपिणो मे मम प्रभव भक्तपूगस्वपदप्राप्त्युपायभूत न विदु। तेषा मद्भावविकलत्वात् मद्भावारूढेनोपदिष्ट ज्ञान मद्भावार्हम्, मद्भावारूढस्य मत्स्वरूपत्वात्, मदनन्याचार्योपदिष्ट ज्ञान गमनागमनाभाव-लक्षणकैवल्याय भवेत्। 'अनन्यप्रोक्ते गतिरत्र नास्ति' इत्यादिश्रुते। अतोऽहमेव तुभ्यमभिधास्यामीत्यर्थ ॥ २ ॥

मत्स्वरूपं मदन्ये न जानन्तीत्युक्तम्। त्वत्स्वरूपं कीदृशं तज्ज्ञान-फल चेत्यत आह—

यो मामजमनादिं च वेत्ति लोकमहेश्वरम्।
असंमूढः स मर्त्येषु सर्वपापैः प्रमुच्यते॥ ३॥

य इति। यस्माद्देवाना महर्षीणा चाहमादि, तस्माल्लोकाना महान्तमीश्वर सर्वनियन्तारमज षड्भावविकारास्पृष्टमनादि च स्वभिन्नकार्य-कारणाभावविभव वासुदेव मा यो वेत्ति, सोऽय मद्भक्तो मर्त्येष्व-समूढो निरावृत सन्मतिपूर्वामतिपूर्वकृतपुण्यपापैर्न लिप्यते प्रकर्षेण मुच्यत इत्यर्थः ॥ ३ ॥

बन्धमोक्षादिव्यवहारसिद्धये मुमुक्षुकोटिस्वपदप्राप्त्युपायभूत सोपाधिक भावमाचष्टे—बुद्धिरिति त्रिभि ।

बुद्धिर्ज्ञानमसंमोहः क्षमा सत्यं दमः शमः ।
सुखं दुःखं भवो ऽभावो भयं चाभयमेव च ॥ ४ ॥

बुद्धिरिति । बुद्धि सदसद्विवेककुशला सदसतो सूक्ष्मसूक्ष्मतरसूक्ष्मतमग्राहकत्वात्, अत एवैव बुद्धिविशिष्ट बुद्धिमन्तमाहु । ज्ञान श्रुत्याचार्यप्रसादजनितशास्त्रार्थगोचरम् । तस्मिन्नतद्भाव समोह, तद्विपरीतो ऽसमोह । क्षमा परकृतमानावमानसहिष्णुता । यथा दृष्ट यथा श्रुत यथा ऽनुभूत तथा तथा शसन सत्यम् । दमो बाह्येन्द्रियनिग्रह । शमो ऽन्तरिन्द्रियनिग्रह । स्वानुकूलविषयलाभज सुखम् । तद्विपरीत दु खम् । यस्यकस्यचिद्वस्तुन उद्भवो हि भव । तद्विपरीतस्त्वभाव । त्रासो भयम् । तद्विपर्ययो ऽभयमेव च । एतत्सर्व मत्त एव भवतीत्युत्तरेणान्वय ॥ ४ ॥

अहिंसाऽऽदयो ऽपि मत्त एव भवन्तीत्याह—

अहिंसा समता तुष्टिस्तपो दानं यशो ऽयशः ।
भवन्ति भावा भूतानां मत्त एव पृथग्विधाः ॥ ५ ॥

अहिंसेति । अहिसा जन्तुमामान्यापीडा । समता शत्रुमित्रादिषु विषमबुद्धिविकलता । तुष्टिर्विषयालमति । इन्द्रियद्वयसयमन तप । दान सर्वस्वत्याग । यश कीर्त्ति इष्टापूर्तादिनिमित्ता । तद्विपरीतमयश । एते बुद्ध्यादयो भावा स्वेनैव भवन्ति, न त्वयेत्यत आह—भवन्तीति । भूताना पृथग्विधा बुद्ध्यादयो भावा स्वस्वकर्मानुसारेण मत्त एवेश्वरात् भवन्ति न स्वतः, कारण विना कार्यानुत्पत्ते. ॥ ५ ॥

सामान्यभावास्त्वत्तो भवन्तु महर्षयः स्वेनैवेति तत्राह—

महर्षयः सप्त पूर्वे चत्वारो मनवस्तथा।
मद्भावा मानसा जाता येषां लोक इमाः प्रजाः॥ ६॥

महर्षय इति। महान्तश्च ते ऋषयश्चेति महर्षय प्रसिद्धा सप्त, तेभ्य पूर्वे सनकादयो ऽन्ये चत्वार, तथा स्वायभुवादयश्च मनव चत्वार, मदीयो वैष्णवो भावो येषा ते मद्भावा चतुराननात्मना मानसा जाता, मनस सकल्पमात्रतो जाता उत्पादिता इत्यर्थ। येषामत्र्यादीना पुत्रपौत्रप्रशिष्यादिरूपा इमा प्रजा ब्राह्मणाद्या इहास्मिन् लोके अद्यापि दृश्यन्ते, ते सर्वे तत्तदात्मना मयैव जाता इत्यर्थ॥ ६॥

सोपाधिक भावमुक्त्वा तज्ज्ञानफल प्रकटयति—

एतां विभूतिं योगं च मम यो वेत्ति तत्त्वतः।
सो ऽविकम्पेन योगेन युज्यते नात्र संशयः॥ ७॥

एतामिति। एता यथोक्तलक्षणामत्र्यादिरूपा मद्विभूतिं मत्सर्वात्मकता योगमघटितघटनाचातुर्यलक्षण पारमैश्वर्य च भक्तपूगस्वपदप्राप्त्युपायभूतमेतत्सर्वं मायामात्रम्, परमार्थत स्वभिन्नविभूतियोगयोरभावादिति तत्त्वतो यो वेत्ति जानाति, सो ऽयमविकम्पेनाप्रचलितेन ब्रह्मात्मैक्यज्ञानयोगेन युज्यते, सकलज्ञानस्य निष्कलज्ञानहेतुत्वात्। अत्रास्मिन्नर्थे सशयो नास्तीत्यर्थ॥७॥

पूर्वोक्तसकलनिष्ठातो निष्कलनिष्ठा भवतीत्याह—अहमिति चतुर्भि।

अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते।
इति मत्वा भजन्ते मां बुधा भावसमन्विताः॥ ८॥

अहमिति। प्रकर्षेण भवत्यस्मादिति प्रभव । सर्वस्य जगत परमकारणमहमेव। सर्वकारणता तवास्तु तत्प्रवृत्तिहेतुता कस्य ? कुतः सर्वं प्रवर्तत इत्यत आह—मत्त इति। मत्त सर्वान्तर्यामिरूपात्सर्वज्ञेश्वरादेव बुद्धिर्ज्ञानमसमोह इत्यादि सर्वं प्रवर्तते। एव जानत फलमाह—भजन्त इति। इत्येवप्रकारेणावगतपरमार्थतत्त्वा बुधा सर्वत्र मद्भावसमन्विता सर्वप्रकृतित्वसर्वेश्वरत्वसर्वज्ञत्वसर्वात्मत्वादिविशेषणविशिष्ट मा प्रत्यगभेदेन मत्वा भजन्ते। मन्निष्ठा भवन्तीत्यर्थ ॥ ८ ॥

त्वन्निष्ठायामुपाय क इत्यपेक्षाया प्रत्यगभिन्नब्रह्मणो ऽन्यत्र चित्तप्रचारविकलत्व मद्भजनपरमसाधनमित्यादिशति—

मच्चित्ता मद्गतप्राणा बोधयन्तः परस्परम्।
कथयन्तश्च मां नित्यं तुष्यन्ति च रमन्ति च ॥ ९ ॥

मच्चित्ता इति। मयि वासुदेवे चित्त येषा ते मच्चित्ता.। चक्षुरादिप्राणाना त्वच्चित्तपरिपन्थित्वात् त्वच्चित्तत्वं कुत इति तत्राह—मद्गतेति। स्वस्वविषयविमुखीकरणतो मद्गता मय्युपसहृता प्राणा चक्षुरादयो येषा ते मद्गतप्राणा। तेषा मच्चित्तत्वमुपपद्यत इत्यर्थ। त्वच्चित्तत्वमेव त्वदुपासन नान्यदिति तत्राह—बोधयन्त इति। ब्रह्मचारिणो मद्भावारूढगुरुमुखादत्याश्चर्यं मद्वैभव श्रुत्वा परस्परमन्योन्य बोधयन्तो भवन्ति। तदपि मदुपासनमित्यर्थ। उपासनान्तरमाह—कथयन्तश्चेति। मच्चित्तादिविशेषणविशिष्टा गुरव स्वशिष्येभ्य प्रत्यगभिन्न मा कथयन्त उपदिशन्तीत्यर्थ। तदपि मदुपासनमेव। तेषा त्वद्भावारूढत्वेन बाह्यविषयविमुखत्वात्तुष्टि कथमिति तत्राह—तुष्यन्तीति। ब्रह्मात्मानन्दतुष्टा भवन्ति। ब्रह्मानन्दे क्षुद्रानन्दानामन्तर्भावान्न बाह्यतृप्तिरपेक्षितेत्यर्थः। तेषा मनोरथाभावेन कथ

रति स्यादिति तत्राह—रमन्ति चेति। कामिनीगणसंगता कामुका इव ब्रह्मात्मन्येव रमन्ति रमन्ते, 'आत्मक्रीड आत्मरति क्रियावान्' इति श्रुते ॥ ९ ॥

एव भजता कि ददासीत्यपेक्षायामविकम्पयोगात्मकोपायबुद्धियोग ददामीत्याह—

तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम्।
ददामि बुद्धियोगं तं येन मामुपयान्ति ते ॥ १० ॥

तेषामिति। ये मच्चित्तत्वादिविशेषणविशिष्टा सन्तो मामुपासते तेषा किचिदपि फलान्तरमनपेक्ष्य सततं यावज्जीव मय्येव युक्ताना प्रीतिपूर्वक मा परमेश्वर प्रत्यगभेदेन भजता मद्भक्ताना येन अविकम्पयोगेन स्वात्मानमात्मत्वेनोपयान्ति, ब्रह्मात्मविषयकाखण्डाकारवृत्ति बुद्धि, सैव योग., त बुद्धियोगमविकम्पयोग ददामि प्रयच्छामीत्यर्थ. ॥ १० ॥

तेषा स्वाज्ञानसभवेन त्वद्दत्तबुद्धियोगस्याकिचित्करत्व स्यादित्यपेक्षाया स्वज्ञानं दत्त्वा स्वाज्ञानमुन्मूलयामीत्याह—

तेषामेवानुकम्पाऽर्थमहमज्ञानजं तमः।
नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता ॥ ११ ॥

तेषामिति। तेषामेव मद्भावारूढाना विदेहकैवल्य ददामीत्यनुकम्पाऽर्थ तेषामात्मा ऽन्त करण तद्भाव आशय श्रुत्याचार्यप्रसादलब्धाखण्डाकारचित्तवृत्तिरूप, तस्मिन्नात्मभावे तिष्ठामीत्यात्मभावस्थो वासुदेवो ऽह मदाराधनलक्षणनिष्कामकर्मानुष्ठानजनितविशुद्धान्तःकरणाधारेण व्याविद्ध-

सकल्पकामरागद्वेषप्रभवब्रह्मचर्यशमदमादिविवेकवर्तिना मद्भावनाऽभिनिवेश-स्नेहेन नित्यैकाग्रध्यानजनितसम्यग्दर्शनभास्वता ज्ञानदीपेन स्वाज्ञानाज्जात मज्ञानजं मिथ्याप्रत्ययलक्षणमहामोहाभिध तमो नाशयामि । मद्दत्तबुद्धियोग-स्यातद्योगप्रासकत्वात् ॥ ११ ॥

निरस्ताशेषविशेष भागवत निरुपाधिक सोपाधिक च भाव तज्ज्ञानफल च श्रुत्वा निरुपाधिकभावस्य भगवत्प्रसादत स्वबुद्धिगोचरत्वे ऽपि सर्वप्राणिबुद्ध्यगोचरत्वात् सर्वप्राणिसाधारण सोपाधिक भागवत भाव मन्दानुकम्पया भगवन्मुखतः स्फुटयितु पर ब्रह्मेत्यादिविशेषणै स्तुवन्नर्जुन उवाच—परमिति सप्तभि ।

अर्जुन उवाच—

परं ब्रह्म परं धाम पवित्रं परमं भवान् ।
पुरुषं शाश्वतं दिव्यमादिदेवमजं विभुम् ॥ १२ ॥

परमिति । स्वाविद्यातत्कार्यात्परत्वेन बृहणात् पर ब्रह्म भवानेव नान्य इत्यर्थ । परब्रह्मत्वं मे कथमिति तत्राह—पर धामेति । परमुत्कृष्ट धाम ज्योतिर्मुक्तप्राप्यत्वात् । किमर्थ मुक्ता मा प्रपद्यन्त इति तत्राह—पवित्र परममिति । सर्वस्मात्परतो विभानात परम स्वाज्ञानापवित्रस्य स्वज्ञान-शुद्धोदक्षालनात्पवित्रमपि भवानेवेत्यर्थ । कथ मामेव ज्ञातवानसीत्यपेक्षायाम् ऋषिगणवाक्यादित्याह—पुरुषमिति । पुरि शयनात्पुरुष तम् । पुरीततो ऽशाश्वतत्वात् तथात्व कुतो न स्यादिति तत्राह—शाश्वतमिति । शश्वद्भव शाश्वत त पुरीतति सबन्धाभावात् । तथा चेत् केन रूपेण कुत्र वर्ते इति तत्राह—दिव्यमिति । दिवि स्वे महिम्नि स्वेन रूपेण भवसीति दिव्यः

त सर्वप्रपञ्चातीतत्वात् । सर्वस्यादि क इत्यपेक्षायामाह— आदिदेवमिति । सर्वकारणत्वादादिश्चासौ स्वेनैव देदीप्यमानत्वाद्देवश्चेत्यादिदेव तमादिदेवम् । जन्माद्यभावादजम् । सर्वव्यापकत्वाद्विभु भवन्तं ज्ञातवानित्यर्थ ॥ १२ ॥

के मामेव तुभ्य वदन्तीति तत्राह—

आहुस्त्वामृषयः सर्वे देवर्षिर्नारदस्तथा ।
असितो देवलो व्यासः स्वयं चैव ब्रवीषि मे ॥ १३ ॥

आहुरिति । यस्मात्पुरुषमित्याद्युक्तविशेषणविशिष्ट त्वा सर्वे वसिष्ठादय ऋषय आहु , तथा देवश्चासौ ऋषिश्चेति देवर्षिः नारद , असितो देवलस्य पिता, तथा देवलो व्यासश्च तदन्ये चाप्याहु , स्वय चापि मे मह्य ब्रवीषि, तस्मात्पर ब्रह्मेत्यादि मदुक्त युक्तमित्यर्थ । ऋषय सर्व इति गृहीताना नारदादीना पृथग्ग्रहण विशिष्टत्वादुपपद्यत इत्यर्थ ॥ १३ ॥

ऋषिभिस्त्वया चोक्तत्वात् त्वद्विभूतावसंभावना निवृत्तेत्याह—

सर्वमेतदृतं मन्ये यन्मां वदसि केशव ।
न हि मे भगवन्व्यक्तिं विदुर्देवा न दानवाः ॥ १४ ॥

सर्वमिति । हे केशव! पुरुष शाश्वतमित्यादिमहर्षिपूगवाक्यत पर ब्रह्मेत्यादि मदुक्तमृत सत्य मन्ये, ' न मे विदु सुरगणा प्रभव न महर्षय ' इति यन्मा प्रति कृपया त्व वदसि तत्सर्वमप्यृत मन्य इत्याह— न हीति । हे भगवन्! देवा ब्रह्मादयो ऽपि ते तव व्यक्तिमस्मदनुग्रहार्थमियमभिव्यक्तिरिति न विदु । तथा दानवा अपि अस्मद्दौरात्म्योत्पाटनेन सन्मार्गे नियोजयितुमिति न विदुरेव । हिशब्दो ऽवधारणार्थः ॥ १४ ॥

यतस्त्वद्रूप देवादीनामपि दुर्विज्ञेयमत त्वमेव जानासीत्याह—

स्वयमेवात्मना ऽऽत्मानं वेत्थ त्वं पुरुषोत्तम ।
भूतभावन भूतेश देवदेव जगत्पते ॥ १५ ॥

स्वयमिति । पुरुषाणा विराडादीनामुत्तमत्वात् पुरुषोत्तम , सर्वभूतैरहमहमित्यात्मत्वेन भावितत्वात् भूतभावन , सर्वभूतनियन्तृत्वात् भूतेश , ब्रह्मादीनामप्युपास्यत्वात् देवदेव , जगता पालकत्वात् जगत्पति , इत्यादिविशेषणै स्वात्मान भगवन्त सबोध्य स्वय त्वमेव सर्वप्रत्यगात्मना ऽभिन्न परमात्मान तावक सकल निष्कल वा गुरूपदेशमन्तरेण वेत्थ जानासि, स्वस्यैव गुरूणामपि गुरुत्वात् ॥ १५ ॥

यस्मात्तव सकल निष्कल वा भावमस्मदाद्यगोचर ब्रह्मादिभिरपि जिज्ञासित च तस्मान्मह्य त्वयैव वक्तव्यमित्याह—

वक्तुमर्हस्यशेषेण दिव्या ह्यात्मविभूतयः ।
याभिर्विभूतिभिर्लोकानिमांस्त्वं व्याप्य तिष्ठसि ॥ १६ ॥

वक्तुमिति । याभिर्विभूतिभिरिमान् लोकान् व्याप्य पूरयित्वा तिष्ठसि, तासामप्राकृतत्वात् आत्मनो विभूतय यास्ता समग्रमशेष वक्तुमर्हसि ॥१६॥

किमर्थं मद्विभूती श्रोतुमिच्छसि ? ध्यानार्थमित्याह—

कथं विद्यामहं योगिंस्त्वां सदा परिचिन्तयन् ।
केषु केषु च भावेषु चिन्त्यो ऽसि भगवन्मया ॥ १७ ॥

कथमिति । योगो नाम षड्गुणैश्वर्यसंपत्ति, तदस्यास्तीति हे योगिन्! बहिर्मुखो ऽहं कथं केन प्रकारेण त्वद्विभूती परिचिन्तयन्सन् अथ त्वा निरुपाधिकस्वरूपं विद्यां जानीयाम्? प्रश्नान्तरं पृच्छति— केष्विति। हे भगवन्! केषु केषु च भावेषु पदार्थेषु चिन्त्यो ऽसि? चेतनाचेतनभेदेनोपाधीनां बहुलत्वाद् बहुवचनम् ॥ १७ ॥

स्वकृतप्रश्नार्थमुपसहरति—

विस्तरेणात्मनो योगं विभूतिं च जनार्दन ।
भूयः कथय तृप्तिर्हि शृण्वतो नास्ति मे ऽमृतम् ॥ १८ ॥

विस्तरेणेति । हे जनार्दन! हि यस्मात् सप्तमनवमाध्याययो-रुक्तमपि त्वन्मुखारविन्दनिःसृतममृतोपमं वचः शृण्वतो मम तृप्तिः अलबुद्धिः नास्ति । तस्मादात्मनः तव योगं सर्वज्ञत्वादिरूपमैश्वर्यं विभूतिं वैभवं च भूयः पुनरपि कथय ॥ १८ ॥

अर्जुनेनैव प्रार्थितो भगवान् तदनुरोधेन प्रतिवचनमुवाच—

श्रीभगवानुवाच—

हन्त ते कथयिष्यामि दिव्या ह्यात्मविभूतयः ।
प्राधान्यतः कुरुश्रेष्ठ नास्त्यन्तो विस्तरस्य मे ॥ १९ ॥

हन्तेति । हि यस्मात् विस्तरस्य परमात्मनो मे मम विभूतीनामन्तो ऽवसानं नास्ति, तस्मात् ब्रह्मात्माऽव्यतिरिक्तत्वेन दिव्या या या स्वात्म-विभूतयः सन्ति तास्ता विभूतीः प्राधान्यतो हन्तेदानीं ते तुभ्यमहं कथयिष्यामि ॥ १९ ॥

स्वरूपतटस्थलक्षणाभ्यामात्मन स्वरूपमादिशति—

अहमात्मा गुडाकेश सर्वभूताशयस्थितः ।
अहमादिश्च मध्यं च भूतानामन्त एव च ॥ २० ॥

अहमिति । हे गुडाकेश! वासुदेवो ऽह परमात्मा सर्वेषा भूतानामाशेरते ऽविद्याकामकर्मप्रभवा प्रज्ञा यस्मिन्निति आशयो हृदयम्, तस्मिन् सर्वभूताशये अन्तर्हृदये तत्रत्यकामादिवृत्तिसहस्रभावाभावप्रकाशकप्रत्यगात्मत्वेन तिष्ठामीति सर्वभूताशयस्थित । 'सत्य ज्ञानमनन्तं ब्रह्म' इति श्रुत्यनुरोधेन स्वरूपलक्षणमुक्त्वा 'यतो वा इमानि भूतानि जायन्ते' इत्यादिश्रुत्यनुरोधिना तटस्थलक्षणेन ध्येयत्वमाह—अहमिति । ब्रह्मादिस्तम्बान्तभूतानामादिश्चोत्पत्तिकारण मध्य च स्थितिकारणम् अन्त एव च प्रलयकारणमहमेवेत्यर्थ ॥ २० ॥

एव स्वरूपतटस्थलक्षणाभ्यामुत्तमाधिकारिणा ध्येयो ऽहमित्युक्त्वा मध्यममन्दाधिकारिणा वक्ष्यमाणादित्यादिविभूतिषु तदधिष्ठानत्वेन तदन्तर्यामित्वेन च ध्येयो ऽहमित्याह—आदित्यानामित्यादि यावदध्यायपरिसमप्ति ।

आदित्यानामहं विष्णुर्ज्योतिषां रविरंशुमान् ।
मरीचिर्मरुतामस्मि नक्षत्राणामहं शशी ॥ २१ ॥

आदित्यानामिति । अदिते गर्भसभूता द्वादशादित्या, तेषा मध्ये विष्णुर्नामादित्यो ऽहम् । यद्वा आदित्यानामिन्द्रादिदेवाना मध्ये विष्णुरुपेन्द्रो वामनो ऽहम्, आदित्यानामित्यादौ निर्धारणे षष्ठी । वामनशकर-

रामवासुदेवाना स्वस्वरूपत्वे ऽपि तत्तदवतारप्रभावातिशयख्यापनार्थ विभूतित्वेन परिगणनमित्यर्थ । ज्योतिषा प्रकाशयितॄणा विपुलप्रकाशो ऽशुमान् मद्विभूतित्वेनोपास्य इत्याह—रविरिति । मरुता वायूना मरीचिर्नाम मरुत् मद्बुद्धयोपास्य इत्याचष्टे—मरीचिरिति । नक्षत्राणां शश्यहमिति निर्दिशति—शशीति ॥ २१ ॥

सामवासवमनोबुद्धयो मद्विभूतित्वेनोपास्या इत्याह—

वेदानां सामवेदो ऽस्मि देवानामस्मि वासवः ।
इन्द्रियाणां मनश्चास्मि भूतानामस्मि चेतना ॥ २२ ॥

वेदानामिति । वैदिकैर्मन्त्रब्राह्मणरूपेण वेदनीयानामृगादीना वेदाना सामवेदो मद्विभूतिरित्याह—सामवेदो ऽस्मीति । 'सामवेदो ब्राह्मणाना प्रसूति ' 'सामानि यो वेद स वेद सर्वम्' इत्यादिश्रुते । रुद्रादित्यरूपेण दीप्यमानानामिन्द्रो ऽस्मीत्याह—वासव इति । 'इन्द्रो वै देवानामधिपतिर्बभूव' इति श्रुते । विषयोपलब्धिद्वाराणामेकादशानामिन्द्रियाणा मनो मद्विभूतिरिति निगमयति—मनश्चास्मीति । मनोऽधीनत्वादिन्द्रियप्रवृत्ते । स्वाविद्यातो भवन्तीति भूतानि तेषा प्रत्यग्भासमाना बुद्धिर्मद्विभूतिरिति व्यनक्ति—चेतनेति । मनआदिसर्वेन्द्रियाणा चेतयति प्रकाशयतीति चेतना बुद्धिरहमस्मि । भूताना चेतनेत्यादिषु सबन्धषष्ठी ॥ २२ ॥

शकरवित्तेशपावकमेरवो मद्विभूतित्वेनोपास्या इत्याह—

रुद्राणां शंकरश्चास्मि वित्तेशो यक्षरक्षसाम् ।
वसूनां पावकश्चास्मि मेरुः शिखरिणामहम् ॥ २३ ॥

रुद्राणामिति । स्वस्वगणानामाध्यात्मिकादिरुजं द्रावयन्तीति रुद्रा । तेषामेकादशाना रुद्राणा मध्ये शकरो नाम रुद्रो ऽस्मीत्याह—शकरश्चास्मीति । सर्वेषा स्वरूपसुख करोतीति शकर । यक्षरक्षसा क्रौर्यसामान्यात्तेषा कुबेरो ऽस्मीत्याह—वित्तेश इति । अष्टाना वसूनामग्निरहमस्मीत्याह—पावकश्चास्मीति । शिखराणि कूटशृङ्गाणि एषा सन्तीति शिखरिण तेषामधिपो ऽस्मीत्याह—मेरुरिति । लोकत्रयाधारत्वात् ॥ २३ ॥

बृहस्पतिस्कन्दसागरा अपि मद्विभूतित्वेनोपास्या इत्याह—

पुरोधसां च मुख्यं मां विद्धि पार्थ बृहस्पतिम् ।
सेनानीनामहं स्कन्दः सरसामस्मि सागरः ॥ २४ ॥

पुरोधसामिति । पुरोधसा मध्ये बृहस्पतेर्मुख्यत्वात् त मा मद्विभूतित्वेन वा विद्धीत्याह—बृहस्पतिमिति । प्रज्ञाबाहुल्यात् । मेनानीना देवसेनापतिरहमित्याह—स्कन्द इति । अकुण्ठितपराक्रमत्वात् । सरसा देवखाताना समुद्रो ऽस्मीत्याह—सागर इति ॥ २४ ॥

भृग्वेकाक्षरजपयज्ञहिमाद्रयो ऽपि मद्विभूतित्वेन सेव्या इत्याचष्टे—

महर्षीणां भृगुरहं गिरामस्म्येकमक्षरम् ।
यज्ञानां जपयज्ञो ऽस्मि स्थावराणां हिमालयः ॥ २५ ॥

महर्षीणामिति । महान्तश्च ते मन्त्रद्रष्टार ऋषयश्चेति महर्षय । तेषा मध्ये भृगुरहमस्मीत्याह—भृगुरिति । गिरा पदात्मिकाना वाचा मध्ये प्रणवो ऽस्मीत्याह—एकमक्षरमिति । ओंकाराख्यस्यैकाक्षरस्य ब्रह्मप्रतीकत्वेन तदभिधानत्वेन प्रधानत्वात् । वाक्कायनिर्वर्त्याना ज्योतिष्टोमादियज्ञाना

मनोनिर्वर्त्ययज्ञो ऽस्मीत्याह—जपयज्ञो ऽस्मीति । तस्याहिंसाऽत्मकत्वेन सर्वयज्ञेभ्य श्रेष्ठत्वात् । स्थिरासनाना हिमवानस्मीत्याह—हिमालय इति ॥ २५ ॥

अश्वत्थनारदचित्ररथकपिला मद्विभूतित्वेनोपासनीया इत्याह—

अश्वत्थः सर्ववृक्षाणां देवर्षीणां च नारदः ।
गन्धर्वाणां चित्ररथः सिद्धानां कपिलो मुनिः ॥ २६ ॥

अश्वत्थ इति । सर्ववृक्षाणा वनस्पतीना मध्ये वृक्षराजो ऽस्मीत्याह—अश्वत्थ इति । त्रिमूर्तिप्रतीकत्वात् । ये देवा मन्त्रदर्शनत ऋषित्व प्राप्ता तेषा देवर्षीणा नारदो ऽस्मीत्याह—नारद इति । भागवतप्रधानत्वात् । गन्धर्वाणा मध्ये तत्प्रवरो ऽस्मीत्याह—चित्ररथ इति । गायकोत्तमत्वात् । जातमात्रेणावगतपरमार्थतत्त्वाना राजा ऽस्मीत्याह—कपिलो मुनिरिति ॥ २६ ॥

उच्चै श्रवऐरावतनराधिपा मद्विभूतित्वेन सेव्या इत्याह—

उच्चैःश्रवसमश्वानां विद्धि माममृतोद्भवम् ।
ऐरावतं गजेन्द्राणां नराणां च नराधिपम् ॥ २७ ॥

उच्चै श्रवसमिति । अश्वाना मध्ये क्षीराब्धावमृतार्थं मथिते सति तस्मादुत्पन्नम् उच्चै श्रवोनामकमश्व मा मद्विभूर्ति विद्धीत्याह—उच्चै -श्रवसमिति । गजेन्द्राणामिरावत्या अपत्यमहमस्मीत्याह—ऐरावतमिति । मद्विभूर्ति विद्धीत्यर्थ । नराणामधिपर्ति मा विद्धीत्याह—नराधिप-मिति ॥ २७ ॥

वज्रकामधुक्कंदर्पवासुकयो मद्विभूतय इत्यादिशति—

आयुधानामहं वज्रं धेनूनामस्मि कामधुक् ।
प्रजनश्चास्मि कंदर्पः सर्पाणामस्मि वासुकिः ॥ २८ ॥

आयुधानामिति । आयुधानामायोधनकरणाना मध्ये दधीचिमुन्यस्थिसभव पविरहमस्मीत्याह—वज्रमिति । क्षीरमात्र दोग्धृणा मध्ये वसिष्ठादे वाञ्छितार्थप्रदा धेनुरहमस्मीत्याह—कामधुगिति । प्रकर्षेण जनयतीति व्युत्पत्त्या प्रजनो जनयिता ऽहमस्मीत्याह—कदर्प इति । सर्पाणा सर्पराजो ऽस्मीत्याह—वासुकिरिति ॥ २८ ॥

अनन्तवरुणार्यमयमा अपि मद्विभूतय इत्याह—

अनन्तश्चास्मि नागानां वरुणो यादसामहम् ।
पितॄणामर्यमा चास्मि यमः संयमतामहम् ॥ २९ ॥

अनन्त इति । नागभेदानामादिशेषो ऽस्मीत्याह—अनन्तश्चास्मीति । धरणीधरत्वात् । यादसा जलाभिमानिदेवताना तत्पतिरहमस्मीत्याह—वरुण इति । पितॄणामर्यमेत्याह—अर्यमा चास्मीति । पितृराजत्वात् । सयमन निग्रह कुर्वता वैवस्वतो ऽस्मीत्याह—यम इति । चण्डशासनत्वात् ॥ २९ ॥

प्रह्लादकालमृगेन्द्रवैनतेया मद्विभूतित्वेन समाराध्या इत्याह—

प्रह्लादश्चास्मि दैत्यानां कालः कलयतामहम् ।
मृगाणां च मृगेन्द्रो ऽहं वैनतेयश्च पक्षिणाम् ॥ ३० ॥

प्रह्लाद इति । दितिपुत्रा दैत्या, तेषा मध्ये कायाधवो ऽस्मीत्याह—प्रह्लादश्चेति । परमभागवतत्वात्, ‘प्रह्लादो ह वै कायाधव’ इति श्रुते । गणयता कालो ऽहमित्याह—कलयतामिति । कलनाया कालपरिसमाप्तत्वात् । मृगाणा मृगराडहमित्याह—मृगेन्द्र इति । विपुलपराक्रमत्वात् । पक्षिणा पक्षिराजो विनताया अपत्यमहमस्मीत्याह—वैनतेय इति । मनोजवत्वात् ॥ ३० ॥

पवनराममकरजाह्नव्यो मद्विभूतित्वेन चिन्त्या इत्याह—

पवनः पवतामस्मि रामः शस्त्रभृतामहम् ।
झषाणां मकरश्चास्मि स्रोतसामस्मि जाह्नवी ॥ ३१ ॥

पवन इति । पवता पावयितॄणा वायुरहमस्मीत्याह—पवन इति । वायुस्पर्शस्य परिशुद्धिहेतुत्वात् । शस्त्रभृता दाशरथिरहमस्मीत्याह—राम इति । सत्यप्रतिज्ञाशालित्वादप्रतिद्वन्द्वपौरुषत्वाच्च । जलचराणा झषाणामधिपो ऽस्मीत्याह—मकरश्चेति । जलचरसत्त्वानामधिकसत्त्वात् । स्रोतसा नदीना गङ्गा ऽस्मीत्याह—जाह्नवीति । सरित्प्रवरत्वात् ॥ ३१ ॥

सृष्टिस्थितिलयाध्यात्मविद्यावादा मद्विभूतित्वेन चिन्त्या इत्याह—

सर्गाणामादिरन्तश्च मध्यं चैवाहमर्जुन ।
अध्यात्मविद्या विद्यानां वादः प्रवदतामहम् ॥ ३२ ॥

सर्गाणामिति । हे अर्जुन! सृज्यन्त इति सर्गा आकाशादिकार्याणि, तेषामादि सभूति मध्य स्थितिरन्त लयश्च अहमेवेत्याह—सर्गाणामिति । न चाहमादिश्च मध्यं चेत्यादावुक्तत्वात्सर्गाणामादिरित्यादि

पुनरुक्ति स्यादिति वाच्यम्, अत्र कार्यविवक्षयोक्तत्वात्। चतु षष्टि-कलाविद्यानामनात्मविषयाणामात्मविद्या ऽहमित्याचष्टे—अध्यात्मविद्येति। मोक्षार्थत्वात्। प्रकर्षेण वदता वादिना सर्बान्धिन्यो वादजल्पवितण्डा इति तिस्र कथा, तासा गुरुशिष्यसवादो ऽहमित्याह—वाद इति। पर-मार्थनिर्णयहेतुत्वात्। यत्र प्रमाणतस्तर्कतश्च स्वपक्ष स्थाप्यते परपक्षो दूष्यते सेह जल्पो नाम कथेत्युच्यते। स्वपक्षमेको यत्र स्थापयति अन्य परपक्ष दूषयति न तु स्वपक्ष स्थापयति सा कथा वितण्डेत्युच्यते। विजि-गीष्वोर्वादिनो जल्पवितण्डाकथे निष्फले भवत। वादस्तु शिष्याचार्ययो ब्रह्मात्मतत्त्वनिर्णयहेतु। अतो मद्विभूतित्व तस्योपपद्यत इत्यर्थ॥ ३२॥

अकारद्वंद्वकालधातारो मद्विभूतित्वेन ज्ञेया इति स्फुटयति—

अक्षराणामकारो ऽस्मि द्वंद्वः सामासिकस्य च।
अहमेवाक्षयः कालो धाता ऽहं विश्वतोमुखः॥ ३३॥

अक्षराणामिति। अक्षराणां वर्णानामाद्यो वर्णो ऽहमस्मीत्याह—अकार इति। सर्ववर्णव्यापकत्वात्। 'अकारो वै सर्वा वाक्, सैषा स्प-र्शोष्मभिर्व्यज्यमाना बह्वी नानारूपा भवति' इत्यादिश्रुते। सामासिकस्य च समाससमूहस्य मध्ये रामश्च कृष्णश्च रामकृष्णौ इति समासो ऽहम-स्मीत्याह—द्वद्व इति। उभयप्राधान्येन श्रेष्ठत्वात्। प्रवाहरूप कालो ऽस्मीत्याह—अक्षय इति। न च काल कलयतामित्युक्तत्वात् पुनरक्षय काल इत्युक्त्या पुनर्वचो मन्तव्यम्, तयोरर्थभेदसभवात्। पुरोक्तकाल-शब्द सवत्सरशतात्मकायुष्यपर, 'शतायु पुरुष शतेन्द्रिय' इति श्रुते। तादृशायुषि क्षीणे सति काल क्षीयते। अत्र तु प्रवाहात्मक काल इति विशेष। सेवाफलदातॄणा मध्ये कर्माध्यक्षो ऽहमित्याह—धाता

ऽहमिति । विश्वतोमुख सर्वकर्मफलदाता परमेश्वर, 'कर्माध्यक्ष सर्वभूताधिवास ' इति श्रुते ॥ ३३ ॥

मृत्यूद्भवकीर्त्यादयो मद्विभूतित्वेन भाव्या इत्याह—

मृत्युः सर्वहरश्चाहमुद्भवश्च भविष्यताम् ।
कीर्त्तिः श्रीर्वाक् च नारीणां स्मृतिर्मेधा धृतिः क्षमा ॥३४॥

मृत्युरिति । मृत्युर्द्विविध धनहर प्राणहरश्चेति । धनस्यापि बहि -प्राणत्वात् । न तथा ऽहम्, नित्यादिप्रलये स्वप्रकृतौ सर्वोपसहारको मृत्युरहमिति व्यनक्ति—सर्वहर इति । भाविकल्याणाना मध्ये प्राणिनामुद्भवकल्याणो ऽहमेवेत्याह—उद्भवश्चेति । यासामाभाससबन्धमात्रतो ऽपि लोक स्वात्मान कृतार्थं मन्यते ता कीर्त्यादिस्त्रियो मद्विभूतित्वेन चिन्तनीया इति विशिनष्टि—कीर्त्तिरिति । नारीणा स्त्रीणा मध्ये कीर्त्याद्या सप्त देवतारूपाः स्त्रियो ऽहम् । कीर्त्तिर्धार्मिको ऽयमिति ख्याति. । श्रीर्लक्ष्मी., शोभा कान्ति, वाक् सर्वत्र विजृम्भिता वाणी, स्मृतिश्चिरानुभूतस्मरणशक्ति, मेधा ग्रहणधारणशक्ति, धृति धैर्य धीरता, क्षमा मानावमानयोरविकृतचित्तता ॥ ३४ ॥

बृहत्सामगायत्रीमार्गशीर्षकुसुमाकरा मद्विभूतय इति वदति—

बृहत्साम तथा साम्नां गायत्री च्छन्दसामहम् ।
मासानां मार्गशीर्षो ऽहमृतूनां कुसुमाकरः ॥ ३५ ॥

बृहदिति । वेदाना सामवेदो ऽस्मीत्युक्तत्वात् बृहत्सामेति पृथग्ग्रहण किमर्थमित्याशङ्क्यावान्तरविशेषख्यापनार्थमित्याह—बृहदिति । 'त्वामिद्धि

हवामहे' इत्यादिनेन्द्रस्य सर्वेश्वरत्वेन स्तूयमानत्वात् । छन्दोविशिष्टाना-मृगादिमन्त्राणा मध्ये गायत्रीमन्त्रो ऽहमित्याह—गायत्रीति । ब्राह्मण्य-हेतुत्वात् । मृगशीर्षेण •युक्ता पौर्णमास्यस्मिन्निति मार्गशीर्षो मासो ऽहमित्याह—मासानांमिति । पक्कसस्याढ्यत्वात् । षण्णामृतूना मध्ये वसन्तो ऽस्मीत्याह—कुसुमाकर इति । रमणीयत्वात् ॥ ३५ ॥

द्यूततेजोजयव्यवसायसत्त्वानि मद्विभूतित्वेन मन्तव्यानीत्याह—

द्यूतं छलयतामस्मि तेजस्तेजस्विनामहम् ।
जयो ऽस्मि व्यवसायो ऽस्मि सत्त्वं सत्त्ववतामहम् ॥ ३६ ॥

द्यूतमिति । छलयता मिथोवञ्चनापराणा सबन्धि द्यूतमहमस्मी-त्याह—द्यूतमिति । सर्वस्वापहारहेतुत्वात् । तेजस्विनामाज्ञाधुरधराणाम-प्रतिहता ऽऽज्ञा ऽहमित्याह—तेज इति । जयशालिना सबन्धी जयोऽ-हमित्याह—जयो ऽस्मीति । व्यवसायिनामुद्यमो ऽस्मीत्याह—व्यवसाय इति । फलपर्यवसायित्वात् । सत्त्ववता धर्मज्ञानवैराग्यादिसत्त्वकार्यमहमि-त्याह—सत्त्वमिति ॥ ३६ ॥

वासुदेवधनजयव्यासकवयो मद्विभूतय इति ज्ञेया इत्याह—

वृष्णीनां वासुदेवो ऽस्मि पाण्डवानां धनंजयः ।
मुनीनामप्यहं व्यासः कवीनामुशना कविः ॥ ३७ ॥

वृष्णीनामिति । वृष्णीना मध्ये वसुदेवस्यापत्यमहमस्मीत्याह—वासुदेव इति । परमार्थतत्त्वोपदेष्टृत्वात् । पाण्डवाना त्वमेवाहमित्याह—धनजय इति । मुनीना वेदार्थमननशीलाना व्यासो ऽप्यहमित्याह—

व्यास इति । कवीना क्रान्तदर्शिना शुक्रो ऽस्मीत्याह—उशना कविरिति । कविशब्दो ऽत्र यौगिको न रूढ ॥ ३७ ॥

दण्डनीतिमौनज्ञानानि मदैश्वर्यत्वेनोपास्यानीत्याह—

दण्डो दमयतामस्मि नीतिरस्मि जिगीषताम् ।
मौनं चैवास्मि गुह्यानां ज्ञानं ज्ञानवतामहम् ॥ ३८ ॥

दण्ड इति । दमयता दुर्मार्गान् सन्मार्गे प्रवर्तयितृणा सबन्धी दण्डो ऽस्मीत्याह—दण्ड इति । उत्पथप्रवृत्तितो निवृत्तिहेतुत्वात् । जिगीषता जेतुमिच्छतां संबन्धिनी नीतिरस्मीत्याह—नीतिरिति । जयोपायप्रकाशकत्वात् । गुह्याना वाङ्नियमनमहमस्मीत्याह—मौनमिति । तदतिरिक्तगोप्याभावात् । ज्ञानवता तुर्याश्रमप्रवृत्तिहेतुवेदान्तश्रवणादिजनितविज्ञानाना चरमसाक्षात्कारहेतु सम्यग्ज्ञान तत्प्रतिफलितप्रत्यक्चैतन्य वा ऽहमस्मीत्याह—ज्ञानमिति ॥ ३८ ॥

सर्वभूतकारण न मत्तो ऽन्यदित्याचष्टे—

यच्चापि सर्वभूतानां बीजं तदहमर्जुन ।
न तदस्ति विना यत्स्यान्मया भूतं चराचरम् ॥ ३९ ॥

यच्चेति । हे अर्जुन ! यदपि सर्वभूताना बीज प्ररोहकारण तदहमस्मीत्याह—यच्चेति । तत्र हेतुमाह—न तदिति । मया परमेश्वरेण विना चराचरात्मक भूतजात यत्स्यादिति मन्यसे तत्सर्वं नास्तीति निश्चिन्वित्यर्थः ॥ ३९ ॥

स्वविभूतीना परिमितत्वशङ्का शातयति—

नान्तो ऽस्ति मम दिव्यानां विभूतीनां परंतप ।
एष तूद्देशतः प्रोक्तो विभूतेर्विस्तरो मया ॥ ४० ॥

नान्त इति । हे परतप ! ममेश्वरस्य दिव्याना विभूतीनामप्राकृतानाम् अन्त इयत्तेति परिमिति परिच्छेदो नास्ति, अनन्तत्वेन साकल्यतो वक्तुमशक्यत्वात् । तर्हि स्वविभूते विस्तर कथ प्रपञ्चित इति तत्राह—एष इति । विभूतेरुद्देशत एष विस्तरस्तु सक्षिप्य मया प्रोक्त ॥ ४० ॥

अनुक्ता अपि विभूती साकल्येन कथयति—यद्यदिति द्वाभ्याम् ।

यद्यद्विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वा ।
तत्तदेवावगच्छ त्वं मम तेजोऽंशसंभवम् ॥ ४१ ॥

यद्यदिति । विभूतिमदैश्वर्ययुक्त यद्यत्सत्त्व प्राणिजातमस्ति, श्रीमत्समृद्धिमत् कान्तिमद्वा यद्यद्वस्तुजातमास्ति, ऊर्जित बलवदुत्साहोपेत वा यद्यज्जन्तुबृन्दमस्ति, तत्तद्वस्तुकदम्ब ममेश्वरस्य तेजोऽशसभवमित्यवगच्छ जानीहीत्यर्थ ॥ ४१ ॥

सर्वत्र परिच्छिन्नदृष्टिं विहाय मद्दृष्टिमेव कुर्वित्युपसहरति—

अथ वा बहुनैतेन किं ज्ञातेन तवार्जुन ।
विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् ॥४२॥ इति ॥

इति श्रीमद्भगवद्गीतासु० विभूतियोगो नाम दशमो ऽध्याय ॥

अथ वेति । हे अर्जुन ! अथ वेति पक्षान्तरोक्तिः । बहुनैतेन सावशेषेण ज्ञातेन किं प्रयोजनं स्यात् तव । तर्हि किं कर्तव्यमिति तत्राह—विष्टभ्येति । अविद्यापदात्मकं कृत्स्नं जगदेकांशेनावष्टभ्याहं त्रिपात्परमात्मा वासुदेवः स्थितो ऽस्मि । 'पादो ऽस्य विश्वा भूतानि, त्रिपादस्यामृतं दिवि' इति श्रुतेः । अविद्यापदस्य त्रिपाद्ब्रह्मातिरेकेणाभावात् सर्वं त्रिपाद्ब्रह्मैवास्मीति निश्चयवान् भवेति प्रकरणार्थः । इतिशब्दस्त्वध्यायपरिसमाप्त्यर्थः ॥ ४२ ॥

यदज्ञानादविद्यावज्जृम्भते रज्जुसर्पवत् ।
यज्ज्ञानाद्विलयं याति तत्कैवल्यं तनोतु मे ॥

इति श्रीमद्भगवद्गीताऽर्थप्रकाशिकायां दशमो ऽध्यायः ॥

एकादशो ऽध्यायः

एकांशेन स्थितो ऽस्मीति यदुक्त तत्प्रसिद्धये ।
एकादशेन पार्थाय विश्वरूपमदर्शयत् ॥

पूर्वाध्यायान्ते 'विष्टभ्याहमिद कृत्स्नम्' इत्यादिनोक्त भागवत सोपाधिकभाव श्रुत्वा ऽथ तत्साक्षात्कर्तुमिच्छन् भगवन्त प्रत्यर्जुन उवाच— मदनुग्रहायेति चतुर्भि ।

अर्जुन उवाच—

मदनुग्रहाय परम गुह्यमध्यात्मसंज्ञितम् ।
यत्त्वयोक्तं वचस्तेन मोहो ऽयं विगतो मम ॥ १ ॥

मदिति । मदनुग्रहाय मय्यनुग्रहार्थं गुह्य गोप्यमपि परमार्थवस्तुप्रतिपादकत्वात् परम परमात्माभिन्नप्रत्यगात्मानमधिकृत्येदमुपायोपेयभूत प्रवृत्तमित्यध्यात्मसज्ञितमाद्यषट्क यत्त्वयोक्तम् 'अशोच्यान्' इत्यादि वच तेन वचसा 'दृष्ट्वेम स्वजन कृष्ण' इत्यारभ्य 'ते ऽवस्थिता प्रमुखे धार्तराष्ट्रा' इत्यन्तेन यो मामावृतवान् सो ऽय मोहो मम विगत विनष्ट स्वात्मन षड्भावविकारवैकल्योक्ते ॥ १ ॥

सप्तमाध्यायादितत्पदार्थनिर्णय सकलनिष्कलगोचर वचो ऽपि श्रुतमित्याह—

भवाप्ययौ हि भूतानां श्रुतौ विस्तरशो मया ।
त्वत्तः कमलपत्राक्ष माहात्म्यमपि चाव्ययम् ॥ २ ॥

भवाप्ययाविति । कमलस्य पत्रे इव प्रसन्ने अक्षिणी यस्य तव स त्व हे कमलपत्राक्ष! 'अह कृत्स्नस्य जगत प्रभव प्रलयस्तथा' 'मत्त परतर नान्यत्किंचिदस्ति धनजय' इत्यादिना ब्रह्मादिस्तम्बान्त-भूताना भव आविर्भावश्चाप्ययस्तिरोभावश्च, तावेव भवाप्ययौ विस्तरशो न सक्षेपतो मया श्रुतौ । कस्मात्सकाशात्? त्वत्त सर्वज्ञेश्वरादेव । कि च महाऽऽत्मनस्तव भावो माहाऽऽत्म्यमपि चाव्ययमक्षयमकुण्ठितचारित्र्य श्रुतम् । अपिचशब्दाभ्या जगदाविर्भावतिरोभावकारणत्वे ऽपि तद्गतदोषास्पृष्टत्व द्योत्यने । 'अव्यक्त व्यक्तिमापन्न मन्यन्ते मामबुद्धय' । 'मया ततमिद सर्व जगदव्यक्तमूर्तिना', 'न च मा तानि कर्माणि निबध्नन्ति धन-जय', 'समो ऽह सर्वभूतेषु' इत्यादिना तव सोपाधिक निरुपाधिक च रूप त्वत्त पुन पुन श्रुतमित्यर्थ ॥ २ ॥

मदुक्ते ऽर्थे विश्वासाभावात् कुतस्तद्दिदृक्षेति तत्राह—

एवमेतद्यथा ऽऽत्थ त्वमात्मानं परमेश्वर ।
द्रष्टुमिच्छामि ते रूपमैश्वरं पुरुषोत्तम ॥ ३ ॥

एवमिति । विराडादीनामीश्वराणामपीश्वरत्वात् हे परमेश्वर! त्व यथा येन प्रकारेण 'विष्टभ्याहमिद कृत्स्नमेकांशेन स्थितो जगत्' 'न मे विदु सुरगणा प्रभव न महर्षय' इत्याद्येवमात्मान सकल निष्कल वा ऽऽत्थ कथयसि मद्गतमोहनिकृन्तनपूर्वक त्वत्प्रसादलब्धविवेकेन त्वदुक्त सर्व यथाऽर्थ

मन्ये । हे पुरुषोत्तम ! चतुर्भुजादिरूपवैलक्षण्यत पारमेश्वरमकुण्ठितक्रिया-ज्ञानेच्छाशक्तिसपन्न ते तव सोपाधिक रूप द्रष्टुमिच्छामि ॥ ३ ॥

तावकमैश्वर रूप मया द्रष्टु शक्य चेद्दर्शयेत्याह—

मन्यसे यदि तच्छक्यं मया द्रष्टुमिति प्रभो ।
योगेश्वर ततो मे त्वं दर्शयात्मानमव्ययम् ॥ ४ ॥

मन्यस इति । स्वाविद्यापदतत्कार्याविर्भावतिरोभावहेतुत्वात् हे प्रभो ! तावक वैराज यद्विश्वरूप तत् मया अर्जुनेन द्रष्टुं शक्यमिति मन्यसे यदि, योगिन एव योगा, तेषामधीश्वरत्वात् हे योगेश्वर ! तदा त्व मे स्वात्मानमव्यय वैराज भावं दर्शय । यतो ऽहं दिदृक्षु , अतस्त्वया दर्शयितव्यमिति भाव ॥ ४ ॥

परमदयालुरर्जुनेनैव प्रार्थित स्वरूप दिदर्शयिषु श्रीभगवानुवाच—पश्येत्यादिभिश्चतुर्भि ।

श्रीभगवानुवाच—

पश्य मे पार्थ रूपाणि शतशो ऽथ सहस्रशः ।
नानाविधानि दिव्यानि नानावर्णाकृतीनि च ॥ ५ ॥

पश्येति । हे पार्थ ! मे मम परमेश्वरस्य शतशो ऽथ सहस्रश अनेकशो रूपाणि पश्य । स्वाविद्यापदव्यापकरूपस्यैकत्वे ऽपि स्वाधिष्ठेयभिदाऽनुयोगवद्भानाद्रूपाणीति बहुवचनम् । तानि किमेकविधानि ? तत्राह—नानेति । नानाविधानि रूपाणि उपाधिवैचित्र्यादनेकप्रकाराणीत्यर्थे । उपाधियोगत किं तानि प्राकृतानीति तत्राह—दिव्यानीति । स्वाधिष्ठे-

योपाधियोगस्य मिथ्यात्वादप्राकृतानीत्यर्थ । त्वद्रूपाणामप्राकृतत्वे नानावर्णाकृतित्व कुत इति तत्राह—नानेति। स्वज्ञदृष्ट्या निरुपाधिकरूपस्य नानावर्णाद्यभावे ऽपि स्वाज्ञदृष्ट्या सोपाधिकरूपस्य विराड्भावेन विश्वरूपत्वात् नीलपीतादिनानावर्णा, तथा नानाविधचेतनाचेतनात्मका आकृतयो येषा रूपाणा तानि नानावर्णाकृतीनि चेति नानावर्णाकृतित्वमुपपद्यत इत्यर्थ ॥ ५ ॥

तत्र यान्यप्राकृतानि रूपाणि मे सन्ति तान्येकदेशेनानुक्रामति—पश्येत्यादिना ।

पश्यादित्यान्वसून्रुद्रानश्विनौ मरुतस्तथा ।
बहून्यदृष्टपूर्वाणि पश्याश्चर्याणि भारत ॥ ६ ॥

पश्येति । हे भारत! ममेश्वरस्य तनौ द्वादशादित्यान् अष्ट वसून् एकादश रुद्रान् द्वावश्विनौ सप्त मरुत· पश्य । नानाविधानि रूपाणि पश्येति यदुक्त तदेव विशदयति—बहूनीति । मनुष्यलोके त्वया अन्येन वा केनचिदप्यदृष्टपूर्वाणि बहूनि रूपाण्यवलोकयेत्यर्थ । नानावर्णाकृतित्व व्यक्तीकरोति—आश्चर्याणीति । पश्यद्भिस्मयास्पदत्वेनाश्चर्याण्यद्भुततमानि मदीयरूपाणि पश्येत्यर्थ ॥ ६ ॥

न केवलमादित्यवस्वाद्येव मद्रूपत्वेन पश्य, किं तु समस्तजगदपि मद्देहस्थ द्रष्टुमर्हसीत्याह—

इहैकस्थ जगत्कृत्स्नं पश्याद्य सचराचरम् ।
मम देहे गुडाकेश यच्चान्यद्द्रष्टुमिच्छसि ॥ ७ ॥

इहेति । हे गुडाकेश! मम देहे इहैकस्मिन्नेव प्रदेशे तिष्ठतीत्येकस्थ चराचरेण सहितत्वात्सचराचर कृत्स्नमिद जगदद्येदानीमेव पश्य 'यद्वा जयेम यदि वा•नो जयेयु ' इत्यादि यच्चान्यद् द्रष्टुमिच्छसि तदपि पश्येत्यर्थ ॥ ७ ॥

'मन्यसे यदि तच्छक्यम्' इति यत्तूक्त तत्र मद्रूपस्य प्राकृतचक्षुषा द्रष्टुमशक्यत्वात् तद्दर्शनक्षम दिव्य चक्षुस्ते ददामीत्याह—

न तु मां शक्ष्यसे द्रष्टुमनेनैव स्वचक्षुषा ।
दिव्यं ददामि ते चक्षुः पश्य मे योगमैश्वरम् ॥ ८ ॥

न त्विति । अनेन प्राकृतेनैव चक्षुषा विश्वरूपधर मा द्रष्टुं न तु शक्ष्यसे । तर्हि कथ त्वा द्रष्टु शक्ष्यामीति तत्राह—पश्येति । येन दिव्यचक्षुषा मा द्रष्टु प्रभवसि, तादृश मद्दर्शनक्षम दिव्य ज्ञानात्मक चक्षु ते तुभ्यमह ददामि । तेन दिव्येन चक्षुषा मे ममैश्वर योग युक्तिमघटितघटनाचातुर्य पश्य ॥ ८ ॥

इम वृत्तान्त धृतराष्ट्राय सजय उवाच—एवमिति षड्भि ।

एवमुक्त्वा ततो राजन्महायोगेश्वरो हरिः ।
दर्शयामास पार्थाय परमं रूपमैश्वरम् ॥ ९ ॥

एवमिति । हे राजन् धृतराष्ट्र! 'पश्य मे पार्थ रूपाणि ' इत्याद्येवमुक्तप्रकारेणोक्त्वा ततस्तदनन्तर महाश्चासौ योगस्याघटितघटनासामर्थ्यस्यास्पदत्वादीश्वरश्चेति महायोगेश्वरो हरि नारायण पार्थाय परम सर्वोत्कृष्टमैश्वर विश्वरूप दर्शयामास दर्शितवानित्यर्थ ॥ ९ ॥

तदेव रूप विशदयति—

अनेकवक्त्रनयनमनेकाद्भुतदर्शनम् ।
अनेकदिव्याभरणं दिव्यानेकोद्यतायुधम् ॥ १० ॥

अनेकेति । अनेकानि वक्त्राणि नयनानि च यस्मिन् विश्वरूपे दृश्यन्ते तदनेकवक्त्रनयनम् । अनेकानि पश्यदाश्चर्यकरत्वात् अद्भुतानि दर्शनानि यस्मिन् तदनेकाद्भुतदर्शनम् । तथा ऽनेकानि दिव्यानि अप्राकृतान्याभरणानि यस्मिन् भान्ति तदनेकदिव्याभरणम् । तथा दिव्यान्यदृष्टपूर्वाण्युद्यतायुधानि शङ्खचक्रगदाशार्ङ्गशूलासिपरशुपरिघादीनि यस्मिन् जाग्रति तद्दिव्यानेकोद्यतायुध पार्थाय भगवान् दर्शयामासेति पूर्वेण सबन्ध ॥ १० ॥

प्रकारान्तरेण पारमेश्वर रूप व्यनक्ति—

दिव्यमाल्याम्बरधरं दिव्यगन्धानुलेपनम् ।
सर्वाश्चर्यमयं देवमनन्तं विश्वतोमुखम् ॥ ११ ॥

दिव्येति । दिव्यानि माल्यानि तुलसीपुष्पाद्यञ्चितानि अम्बराणि वासांसि च येन ध्रियन्ते तं दिव्यमाल्याम्बरधरम् । दिव्यो गन्ध', सो ऽनुलेपन यस्य त दिव्यगन्धानुलेपनम् । सर्वेषामाश्चर्याणामास्पदत्वात् सर्वाश्चर्यमय देव स्वप्रकाशतो देदीप्यमानम् । अनन्तमपरिच्छिन्नम् । विश्वतोमुखं सर्वतोमुख सर्वभूतात्मभूतत्वात् । एवरूप भगवन्तमर्जुनो ददर्शेत्यर्थ ॥ ११ ॥

भगवतो विश्वरूपत्वेन विश्वस्य जडत्वेन चाभारूपत्वाद्यदि तस्य भारूपत्वमुच्येत तदा तस्योपमा कीदृशीत्यत आह—

दिवि सूर्यसहस्रस्य भवेद्युगपदुत्थिता ।
यदि भाः सदृशी सा स्याद्भासस्तस्य महाऽऽत्मनः ॥१२॥

दिवीति । तृतीयस्या दिव्यन्तरिक्षे सूर्याणा सहस्र तस्य युगपदेकस्मिन् काले समुत्थितस्य युगपदेककालावच्छेदेनोत्थिता भा कान्तिर्यदि सदृशी स्यात् । कस्येत्यत आह—तस्येति । महान् त्रिविधपरिच्छेदशून्यश्चासावात्मा चेति महाऽऽत्मा, तस्य महाऽऽत्मनो विश्वरूपस्य भास सदृशी स्यात् भवेत् । यदिशब्दो विश्वरूपस्य भासो वैशिष्टयद्योतक । स्याच्छब्दो नि सशयार्थ । युगपदुदितसूर्यसहस्रप्रभापुञ्जापेक्षया भगवत्प्रभैवातिरिच्यत इति भाव ॥ १२ ॥

न केवलमनन्तकोटिसूर्यभारूप दृष्टवान्, किं तु तदेकदेशे विश्वकलनामनुभूतवानित्याह—

तत्रैकस्थं जगत्कृत्स्नं प्रविभक्तमनेकधा ।
अपश्यद्देवदेवस्य शरीरे पाण्डवस्तदा ॥ १३ ॥

तत्रेति । पाण्डवो ऽर्जुनस्तदा विश्वरूपदर्शनसमये देवदेवस्य विश्वरूपधरस्य भगवत शरीरे तत्र शरीरैकदेशे तिष्ठतीत्येकस्थमनेकधा देवर्षिमनुष्यादिभेदतः प्रविभक्तं चेतनाचेतनात्मकं कृत्स्नं जगदपश्यत् सम्यगनुभूतवानित्यर्थ ॥ १३ ॥

तदपरोक्षानन्तर किं कृतवानित्यपेक्षायामाह—

ततः स विस्मयाविष्टो हृष्टरोमा धनंजयः ।
प्रणम्य शिरसा देवं कृताञ्जलिरभाषत ॥ १४ ॥

तत इति । धनजय ततो विश्वरूपदर्शनानन्तर विस्मयेनाश्चर्येणाविष्टो व्याप्तो भूत्वा हृष्टानि पुलकितानि रोमाणि यस्य सो ऽयं हृष्टरोमा सन् देव देदीप्यमान विष्णु प्रणम्य भक्तिश्रद्धाऽतिशयेन कृताञ्जलि संपुटीकृतहस्तो भूत्वा ऽभाषत उक्तवान् ॥ १४ ॥

भगवदनुग्रहात्तद्विश्वरूप यथा दृष्ट तथा स्वानुभवमाविष्कुर्वन् अर्जुन उवाच—पश्यामीति सप्तभि ।

अर्जुन उवाच—

पश्यामि देवांस्तव देव देहे
सर्वास्तथा भूतविशेषसंघान् ।
ब्रह्माणमीशं कमलासनस्थ-
मृषींश्च सर्वानुरगांश्च दिव्यान् ॥ १५ ॥

पश्यामीति । हे देव! तव विश्वरूपधरस्य देहे देवान् इन्द्रादीन् तथा भूतानामाकाशादीना तद्विशेषाणा भौतिकाना चेतनाचेतनाना संघा, तान् भूतविशेषसघान् तथा सर्वान् वसिष्ठादिमहर्षीन् तथा दिव्यानुरगान् दिवि भवानादिशेषादीन् । देवशब्देन ब्रह्मणो ऽपि गृहीतत्वे ऽपि पृथग्ग्रहणं तेभ्यो वैशिष्ट्यद्योतनार्थम् । ब्रह्माण चतुरानन देवानामीश पृथ्वीकमलमध्यस्थमेरुकर्णिकाऽऽसनस्थत्वात् कमलासनस्थत्व नाभिकमलासनस्थमिति वा युगपत्पश्यामि ॥ १५ ॥

यदेकदेशे सर्वमिद दृष्ट त देव वर्णयति—

अनेकबाहूदरवक्त्रनेत्रं
पश्यामि त्वा सर्वतो ऽनन्तरूपम् ।

नान्तं न मध्यं न पुनस्तवादिं

पश्यामि विश्वेश्वर विश्वरूप ॥ १६ ॥

अनेकेति । हे विश्वरूप ! अनेके बाहव उदराणि वक्त्राणि नेत्राणि च यस्य तमनेकबाहूदरवक्त्रनेत्रम् । सर्वतः सर्वत्रान्तो ऽवसानं न विद्यते इत्यनन्तानि रूपाणि यस्य तमनन्तरूपम् । त्वा त्वा पश्यामि । हे विश्वेश्वर ! तव रूपस्यादि मूल मध्यमन्तमवसान वा न पुन पश्यामि । तवेश्वरस्योत्पत्तिस्थितिभङ्गवैकल्येन त्रिविधपरिच्छेदशून्यत्वात् ॥ १६ ॥

पुन प्रकारान्तरेण प्रत्याययति—

किरीटिनं गदिनं चक्रिणं च

तेजोराशिं सर्वतो दीप्तिमन्तम् ।

पश्यामि त्वा दुर्निरीक्ष्यं समन्ता-

दीप्तानलार्कद्युतिमप्रमेयम् ॥ १७ ॥

किरीटिनमिति । शिरोभूषणत्वेन प्रसिद्धं किरीटमस्यास्तीति किरीटी, त किरीटिनम् । शत्रुघातिनी गदा ऽस्य विद्यत इति गदी त गदिनम् । नक्रेशादिविक्रमघाति चक्रमस्यास्तीति चक्री, तं चक्रिणम् । तेजोराशिं तत्पुञ्जम् । सर्वत समन्तात सच्चिदानन्दरूपिणी दीप्तिर्यस्यास्ति सो ऽय सर्वतो दीप्तिमान्, त सर्वतो दीप्तिमन्तम् । तथा दुर्निरीक्ष्यं त्वत्प्रसाद विना द्रष्टुमशक्यत्वात् । समन्तात्समन्ततो दीप्तानलार्कयो द्युतिरिव द्युतिर्यस्य तव स त्व दीप्तानलार्कद्युति , तम् । प्रत्यक्षादिप्रमाणै प्रमातुमशक्यत्वादप्रमेय त्वा त्वा पश्यामि उपलभ इत्यर्थ ॥ १७ ॥

सकले भगवद्रूपे प्रकृते सत्यप्रकृतमक्षरमित्यादिवचनमित्याशङ्क्य तदीययोगैश्वर्यदर्शनस्य निष्कलतत्वपर्यवसायित्वात् नाप्रकृतदोषावकाश इत्याह—

त्वमक्षरं परमं वेदितव्यं
त्वमस्य विश्वस्य परं निधानम्।
त्वमव्ययः शाश्वतधर्मगोप्ता
सनातनस्त्वं पुरुषो मतो मे ॥ १८ ॥

त्वमिति। कालत्रये ऽपि न क्षरतीत्यक्षरम्। सर्वस्य क्षरत्वेन विभानात् अक्षरत्व कुत इति नत्राह—परममिति। स्वाधिष्ठेयक्षरजातात् परत्वेन विभानादक्षरत्वमुपपद्यते। परमाक्षरस्य स्वेतरवस्तुशून्यत्वेन वेदितव्यता कुत इति तत्राह—वेदितव्यमिति। मुमुक्षुकोटिप्रत्यगभेदेन वेदनीयत्वात् तादृश परमाक्षर मुमुक्षुकोटिवेदनीय त्वमेवासि। परमाक्षरस्य विश्वाश्रयताऽनुपपत्तिमाशङ्क्य स्वज्ञदृष्ट्या तदभावे ऽपि स्वाज्ञदृष्ट्या तत्सभवात्। विश्वाश्रयो ऽपि त्वमेवेत्याह—निधानमिति। सर्वस्यास्य विश्वस्य पर प्रकृष्ट निधीयते ऽस्मिन् सर्वमिति निधानमधिष्ठान त्वमेवासीत्यर्थ। नश्वरविश्वाधिष्ठानत्वे तथात्वं स्यादिति तत्राह—अव्यय इति। व्यावृत्तानुवृत्तयो योगाभावेन स्वत परतो वा न व्येतीत्यव्यय त्वमसि। यत एवमत शश्वद्भव शाश्वतो नित्यो निष्ठाद्वयात्मको धर्म, तस्य गोप्ता पालयिता ऽपि त्वमसीत्यर्थ। धर्मस्येदानींतनत्वेन तद्गोप्तृत्वे तथात्व स्यादिति तत्राह—सनातन इति। धर्मस्यापि सनातनप्रभवत्वेन सनातनत्वात् सनातनश्चिरतन पुरुषस्त्वमेवासीति मे मम मतो निश्चय इत्यर्थ ॥१८॥

भगवन्त निष्कलत्वेन स्तुत्वा पुन सकलत्वेन विशिनष्टि—

अनादिमध्यान्तमनन्तवीर्य-
मनन्तबाहुं शशिसूर्यनेत्रम्

पश्यामि त्वा दीप्तहुताशवक्त्रं
स्वतेजसा विश्वमिदं तपन्तम् ॥ १९ ॥

अनादीति । .आदिमध्यान्ता सभवस्थितिप्रलया यस्य न विद्यन्ते तमनादिमध्यान्तम् । न विद्यते अन्त परिमिति' यत्संबन्धिनो वीर्यस्य पराक्रमस्याघटितघटनाचातुर्यस्य वा तमनन्तवीर्यम् । अनन्ता बाहवो यस्य तमनन्तबाहुम् । शशिसूर्यौ नेत्रे यस्य त चन्द्रादित्यनयनम् । दीप्तश्चासौ हुताशश्च, स एव वक्त्र यस्य त दीप्तहुताशवक्त्रम् । स्वस्यापरिमिततेजसा परिदृश्यमानमिद विश्व तपन्त सतापयन्त त्वा त्वा पश्यामि ॥ १९ ॥

प्रकृतभगवद्रूपस्यापरिच्छिन्नता प्रपञ्चयति—

द्यावापृथिव्योरिदमन्तर हि
व्याप्तं त्वयैकेन दिशश्च सर्वाः ।
दृष्ट्वा ऽद्भुतं रूपमुग्रं तवेदं
लोकत्रयं प्रव्यथितं महाऽऽत्मन् ॥ २० ॥

द्यावापृथिव्योरिति । हे महाऽऽत्मन् अपरिच्छिन्नस्वरूप ! द्यावापृथिव्यो द्युभूलोकयो इदमन्तरमन्तरिक्षलोक एकेन त्वया विराड्रूपेण व्याप्तम् । सर्वा दिशो विदिशश्च व्याप्ता । लोकाना त्रय तवेदमत्यद्भुतमुग्र रूप दृष्ट्वा प्रकर्षेण व्यथित विशेषतो भीत चलितं वा पश्यामीति पूर्वेणान्वय ॥ २० ॥

' यद्वा जयेम ' इत्यादिस्वसशयमुन्मूलयन्त भगवन्त प्रत्याह—

अमी हि त्वा सुरसंघा विशन्ति
केचिद्भीताः प्राञ्जलयो गृणन्ति ।

स्वस्तीत्युक्त्वा महर्षिसिद्धसंघाः
स्तुवन्ति त्वां स्तुतिभिः पुष्कलाभिः ॥ २१ ॥

अमी इति । उभयोर्वाहिन्यो. स्थिता युध्यमाना अमी भूभारापनयनायावतीर्णा सुराणा संघा वस्वादयो मनुष्याकृतिं स्वीकृत्य भीता· सन्त· त्वा त्वा विशन्ति । यद्वा असुरसघाः भूभारभूता दुर्योधनादयः त्वा विशन्तो दृश्यन्ते । तत्र केचित् भीता दूरादेव स्थित्वा प्राञ्जलय सन्त त्वा गृणन्ति रक्ष रक्षेत्युच्चैर्घोषयन्ति । केचिद्युद्धे प्रत्युपस्थिते पलायितुमशक्ता सन्त उत्पातादिनिमित्तान्युपलभ्य वेपमाना भूत्वा पश्यन्ति । केचित् महर्षीणा सिद्धाना च सघा स्वस्त्यस्तु जगत इत्युक्त्वा पुष्कलाभिर्गभिदावाक्यगोचराभि स्तुतिभि स्तुवन्ति ॥ २१ ॥

रुद्रादयो ऽपि त्वद्रूपं विस्मिता पश्यन्तीत्याह—

रुद्रादित्या वसवो ये च साध्या
विश्वे ऽश्विनौ मरुतश्चोष्मपाश्च ।
गन्धर्वयक्षासुरसिद्धसंघा
वीक्षन्ते त्वां विस्मिताश्चैव सर्वे ॥ २२ ॥

रुद्रेति । एकादश रुद्रा द्वादशादित्या अष्टौ वसवश्च साध्या नाम देवा ये च विश्वेदेवा अश्विनौ च मरुत सप्त ऊष्माण पिबन्तीति ऊष्मपा पितर , 'ऊष्मभागा हि पितर ' इति श्रुते । गन्धर्वा हाहाहूहूप्रभृतयः यक्षा. कुबेरप्रभृतय., असुरा विरोचनप्रभृतय., भूभारभूता दुर्योधनादयश्च सिद्धा कपिलादयश्च. तेषा सघा सर्व एव विस्मिता सन्त त्वा वीक्षन्ते पश्यन्ति ॥ २२ ॥

भगवद्रूपदर्शनतो लोकत्रयं व्यथितमित्युपसंहरति—

रूपं महत्ते बहुवक्त्रनेत्रं
महाबाहो बहुबाहूरुपादम् ।
बहूदरं बहुदंष्ट्राकरालं
दृष्ट्वा लोकाः प्रव्यथितास्तथा ऽहम् ॥ २३ ॥

रूपमिति । हे महाबाहो ! ते तव बहूनि वक्त्राणि नेत्राणि च यस्मिन् तत् बहुवक्त्रनेत्रम् । बहवो बाहव ऊरव पादाश्च यस्मिन् तत् बहुबाहूरुपादम् । बहून्युदराणि यस्मिन् तत् बहूदरम् । बह्वीभि दंष्ट्राभि कराल विकृत महदतिप्रमाण रूप दृष्ट्वा यथा लोका· प्रव्यथिता तथा ऽहमपीत्यर्थ ॥२३॥

स्वभीतौ हेत्वन्तरमाह—

नभःस्पृशं दीप्तमनेकवर्णं
व्यात्तानन दीप्तविशालनेत्रम् ।
दृष्ट्वा हि त्वा प्रव्यथितान्तरात्मा
धृतिं न विन्दामि शमं च विष्णो ॥ २४ ॥

नभ इति । हे विष्णो ! नभो द्युलोकं स्पृशतीति नभ·स्पृशम् । दीप्त प्रज्वलितम् । अनेकवर्णा भयकरा नानारूपा यस्मिन् तमनेकवर्णम् । व्यात्तानि विवृतान्याननानि यस्मिन् तं व्यात्ताननम् । दीप्तानि प्रज्वलितानि विशालानि च नेत्राणि यस्मिन् त दीप्तविशालनेत्रम् । एवरूप त्वा दृष्ट्वा भीत्या प्रव्यथितो ऽन्तरात्मा मनो यस्य सो ऽहं प्रव्यथितान्तरात्मा धृतिं धैर्य शम तुष्टि च न विन्दामि नोपलभ इत्यर्थ ॥ २४ ॥

दृश्यमाने ऽपि भगवद्रूपे धृतितुष्ट्यभावे हेत्वन्तरमाह—

दंष्ट्राकरालानि च ते मुखानि
दृष्ट्वैव कालानलसंनिभानि ।
दिशो न जाने न लभे च शर्म
प्रसीद देवेश जगन्निवास ॥ २५ ॥

दष्ट्रेति । हे देवेश ! त तव दष्ट्राभि करालानि विकृतानि प्रलयकाले लोकदाहकत्वेन प्रसिद्ध कालानलो ऽग्नि , तत्सदृशानि मुखानि दृष्ट्वैव पूर्वाग्नेयादिदिशो विदिशश्च न जाने । किं च मन प्रसाद-लक्षण शर्म सुख न लभे । यत एवमतो जगन्निवास ! प्रसीद प्रसन्नो भव ॥ २५ ॥

अस्माक जय परेषा पराजयश्च विस्पष्टमवलोकित इत्याह—अमो इति पञ्चभि· ।

अमी च त्वा धृतराष्ट्रस्य पुत्राः
सर्वे सहैवावनिपालसंघैः ।
भीष्मो द्रोणः सूतपुत्रस्तथा ऽसौ
सहास्मदीयैरपि योधमुख्यैः ॥ २६ ॥

अमी इति । अवनि पालयन्तीत्यवनिपाला जयद्रथादय , तेषा सघै सहामी च धृतराष्ट्रस्य पुत्रा दुर्योधनादय सर्वे, तथा भीष्मो द्रोणश्च सूतपुत्र कर्णश्च शिखण्डिधृष्टद्युम्नप्रभृतिभि अस्मदीयै सहैव तव वक्त्राणि विशन्तीत्युत्तरेणान्वयः ॥ २६ ॥

भगवद्रूपस्य पश्यद्भयकरत्वे हेत्वन्तरमाह—

वक्त्राणि ते त्वरमाणा विशन्ति
दंष्ट्राकरालानि भयानकानि ।
केचिद्विलग्ना दशनान्तरेषु
संदृश्यन्ते चूर्णितैरुत्तमाङ्गैः ॥ २७ ॥

वक्त्राणीति । ये पूर्वोक्ता धार्तराष्ट्रादय ते सर्वे दंष्ट्राकरालानि विकृतानि भयानकानि भयकराणि ते तव वक्त्राणि त्वरमाणा सन्तो विशन्ति । तव वक्त्राणि प्रविष्टाना मध्ये केचिद्दशनान्तरेषु विलग्ना सन्त चूर्णितैरुत्तमाङ्गै शिरोभि सदृश्यन्ते । दन्तपङ्क्तिसलग्नमासखण्डवत् समुपलभ्यन्त इत्यर्थ ॥ २७ ॥

भगवद्वक्त्रप्रवेशमेव दृष्टान्तेन स्पष्टयति—

यथा नदीनां बहवो ऽम्बुवेगाः
समुद्रमेवाभिमुखा द्रवन्ति ।
तथा तवामी नरलोकवीरा
विशन्ति वक्त्राण्यभिविज्वलन्ति ॥ २८ ॥

यथेति । यथा अनेकमार्गप्रवृत्ताना गङ्गाऽऽदिनदीना बहवो ऽम्बुवेगा प्रवाहा॰ समुद्राभिमुखा सन्त समुद्रमेव द्रवन्ति प्रविशन्ति, तथा ऽमी नरलोकवीरा ते भीष्मादय अभितो विज्वलन्ति सर्वत प्रदीप्यमानानि तव वक्त्राणि प्रविशन्ति ॥ २८ ॥

नदीदृष्टान्तेनाबुद्धिपूर्वकप्रवेशमुक्त्वा पतङ्गदृष्टान्तेन बुद्धिपूर्वकप्रवेशमाचष्टे—

यथा प्रदीप्तं ज्वलनं पतङ्गा
विशन्ति नाशाय समृद्धवेगाः ।
तथैव नाशाय विशन्ति लोका-
स्तवापि वक्त्राणि समृद्धवेगाः ॥ २९ ॥

यथेति । पतङ्गाः शलभाः समृद्धः उद्भूतो वेगो गतिः येषां ते समृद्धवेगाः सन्तः स्वनाशाय प्रदीप्तं ज्वलनमग्निं बुद्धिपूर्वकं यथा विशन्ति, तथैव बुद्धिपूर्वकं स्वनाशाय लोकाः प्राणिनः समृद्धवेगाः सन्तः तवापि वक्त्राणि विशन्ति । अपिशब्दस्वारस्यात्कार्यभूतानि स्वकारणावशेषाणि भवन्तीति द्योत्यते ॥ २९ ॥

ततः किमित्यत आह—

लेलिह्यसे ग्रसमानः समन्ता-
ल्लोकान्समग्रान्वदनैर्ज्वलद्भिः ।
तेजोभिरापूर्य जगत्समग्रं
भासस्तवोग्राः प्रतपन्ति विष्णो ॥ ३० ॥

लेलिह्यस इति । हे विष्णो व्यापनशील! समन्तात् ज्वलद्भिः वदनैः अग्रेण कार्यकरणसंघातेन सम विशिष्टाः समग्राः, तान् लोकान् भीष्मादीन् ग्रसमानोऽन्तः प्रवेशयन्सन् त्वं लेलिह्यसे आस्वादयसे । तव भासो दीप्तयः उग्राः क्रूराः सत्यः तेजोभिः विस्फुरणैः समग्रं सकार्यं जगदापूर्य प्रतपन्ति संतापं कुर्वन्तीत्यर्थः ॥ ३० ॥

भगवद्रूपस्यार्जुनेन ज्ञातपूर्वत्वात् तस्य तज्जिज्ञासा कथमुदितेत्याशङ्क्य भगवद्याथाऽऽत्म्यापरिज्ञानात् जिज्ञासोचितेत्याह—

आख्याहि मे को भवानुग्ररूपो
नमो ऽस्तु ते देववर प्रसीद ।
विज्ञातुमिच्छामि भवन्तमाद्यं
न हि प्रजानामि तव प्रवृत्तिम् ॥ ३१ ॥

आख्याहीति । उग्ररूप क्रूरकलेबरो भवान् क ? त्वद्रूपस्यैवमदृष्टपूर्वत्वात् मे मह्य भवत्स्वरूपमाख्याहि कृपयोपदिश । स्वरूपोपदेशात् पुरा तत्प्रतिपित्सुना प्रह्वीभाव. कर्तव्य इति सूचयति—नमो ऽस्त्विति । देवाना ब्रह्मादीनामपि प्रवरत्वात् हे देववर ! ते तुभ्य नमो ऽस्तु । प्रसीद प्रसन्नो भवेत्यर्थ । जानन्नपि किं मा ज्ञातुमिच्छसीति तत्राह—न हीति । हि यस्मात्तवेश्वरस्य प्रवृत्ति यदर्थं प्रवृत्तो ऽसीति न प्रजानामि तस्मादादौ भवमाद्य भवन्तमह विशेषेण यथावज्ज्ञातुमिच्छामि । केवलकृपया तावक भाव प्रकटयेत्यर्थ ॥ ३१ ॥

एवमर्जुनेन प्रार्थित स्वाभिप्रायं श्रीभगवानुवाच—कालो ऽस्मीति त्रिभि ।

श्रीभगवानुवाच—

कालो ऽस्मि लोकक्षयकृत्प्रवृद्धो
लोकान्समाहर्तुमिह प्रवृत्तः ।
ऋते ऽपि त्वा न भविष्यन्ति सर्वे
ये ऽवस्थिताः प्रत्यनीकेषु योधाः ॥ ३२ ॥

काल इति। लोकाना क्षय करोतीति लोकक्षयकृत् प्रवृद्धो वृद्धि गत काल अकुण्ठितक्रियाशक्त्युपहित परमेश्वरो ऽस्मि। यदर्थं प्रवृत्तो ऽसीति तत्राह—समाहर्तुमिति। इहास्मिन् लोके लोकान् समाहर्तुं संहारं कर्तुं प्रवृत्त· उद्युक्तो ऽस्मि। लोकसहारार्थं त्वयि प्रवृत्ते ऽपि मत्प्रवृत्ति विना भीष्मादीना सहर्तुमशक्यत्वात् त्वत्प्रवृत्तिर्नार्थवतीत्याशङ्क्याह—ऋते ऽपीति। प्रत्यनीकेषु प्रतिपक्षेषु ये ऽवस्थिता भीष्मद्रोणादय, ते सर्वे त्वामृते विना ऽपि न भविष्यन्ति न जीविष्यन्ति, मत्प्रातिकूल्यात् तवौदासीन्यमकिंचित्करमित्यर्थ ॥ ३२ ॥

भीष्मादयो मयैव हता अपि निमित्तमात्र त्व भवेत्याह—

तस्मात्त्वमुत्तिष्ठ यशो लभस्व
जित्वा शत्रून्भुङ्क्ष्व राज्यं समृद्धम्।
मयैवैते निहताः पूर्वमेव
निमित्तमात्रं भव सव्यसाचिन्॥ ३३॥

तस्मादिति। यस्मान्मत्प्रातिकूल्येन त्वत्प्रवृत्ति विना ऽपि भीष्मादयो मृतप्राया भवन्ति, तस्मात् युद्धाय त्वमुत्तिष्ठ युद्धोन्मुखीभवेत्यर्थ। तेषा त्वयैव निर्जितत्वात् तद्धनने को मे लाभ स्यादिति तत्राह— यश इति। भीष्मादीना देवैरपि दुर्जयत्वात् तादृशा अपि ते अर्जुनेन निर्जिता इति यशो लभस्व। चिरकालानुष्ठितपुण्यैर्हि यश प्राप्यते। राज्यलाभ विना केवलयशोलाभेन किं मे स्यादिति तत्राह—भुङ्क्ष्वेति। शत्रून् दुर्योधनप्रभृतीन् जित्वा निष्कण्टक यथा भवति तथा समृद्ध राज्य भुङ्क्ष्व। भीष्मादिष्वतिरथेषु सत्सु कुतो मे जयाशा स्यादिति तत्राह—निहता इति। एते तव शत्रवो भीष्मादयस्त्वदीययुद्धप्रवृत्तेः पुरैव मयैव कालात्मना

प्राणैर्वियोजिता इत्यर्थ । त्वयैव निहता मया हन्तु नोचिता इति तत्राह— निमित्तेति । दक्षिणपाणिनेव सव्येनापि पाणिना बाणक्षेपणनिपुणत्वात् हे सव्यसाचिन्' मयैव ते निहता अपि तद्धनने निमित्तमात्र भव ॥३३॥

'यद्वा जयेम यदि वा नो जयेयु·' इत्यादिशङ्का शातयति—

द्रोणं च भीष्मं च जयद्रथं च
कर्णं तथा ऽन्यानपि योधवीरान् ।
मया हतांस्त्वं जहि मा व्यथिष्ठा
युध्यस्व जेतासि रणे सपत्नान् ॥ ३४ ॥

द्रोणमिति । येषु योधेषु तस्याशङ्का जाता जेष्यामो न वेति तामाशङ्कामुन्मूलयति भगवान् । तत्र द्रोणो हि ने धनुर्वेदाचार्यो दिव्यास्त्र-संपन्न । स्वच्छन्दमृत्यु भीष्मो ऽपि तथा परशुरामेण द्वन्द्वयुद्धं प्राप्तो ऽपि न च तेन पराजितो भवति । यत्पित्रा 'यो भूमौ मत्पुत्रशिर पात-यिष्यति तच्छिरः पततु' इति तपः कृतं सो ऽयं जयद्रथो ऽपि तादृशः । शक्रदत्तामोघशक्तिसपन्न सूर्यपुत्र कर्णो ऽपि तादृश । तथा ऽन्ये योध-वीरा युद्धोत्सुका· । ते सर्वे कालात्मना मया हता· । यत एवमत· तान् जहि । मा व्यथिष्ठा तेभ्यो भय मा कार्षी । नि शङ्क युध्यस्व । त्वत्स-पत्नान् दुर्योधनप्रभृतीन् जेतासि ॥ ३४ ॥

कृष्णार्जुनवृत्तान्त धृतराष्ट्र प्रति सजय उवाच—

सजय उवाच—

एतच्छ्रुत्वा वचनं केशवस्य
कृताञ्जलिर्वेपमानः किरीटी ।

नमस्कृत्वा भूय एवाह कृष्णं

सगद्गदं भीतभीतः प्रणम्य ॥ ३५ ॥

एतदिति । केशवस्यैतत्पूर्वश्लोकत्रयात्मकं वचनं श्रुत्वा वेपमानः किरीटी कृताञ्जलिः सन् श्रीकृष्णं नमस्कृत्वा हर्षशोकोत्थितेनाश्रुपूर्णलोचनाञ्चितेनास्पष्टशब्दोच्चारणलक्षणेन गद्गदेन सह वर्तत इति सगद्गदं यथा भवति तथा भीतभीतः पुनः पुनर्भयाविष्टचेताः सन् भूयोऽपि प्रणम्य वक्ष्यमाणं वचनमाह । निमित्तीकृत्यार्जुनं भगवता द्रोणादिषु चतुर्ष्वपराजितेषु पराजितेषु सत्सु दुर्योधनस्यापि नाशमाशङ्कय धृतराष्ट्रः तयोः संधिं करिष्यतीति संजयाभिप्रायः । भगवतः सत्यसंकल्पत्वेन तदन्यथा कर्तुमशक्यत्वात् धृतराष्ट्रः तद्वचः कथं श्रद्दध्यादिति भावः ॥ ३५ ॥

भगवन्तं प्रत्यर्जुनः किं तद्गद्गदवचनमुक्तवानित्यपेक्षायाम् अर्जुन उवाचेत्यर्जुनवाक्यमनुक्रामति—स्थाने इत्येकादशभिः ।

अर्जुन उवाच—

स्थाने हृषीकेश तव प्रकीर्त्या
जगत्प्रहृष्यत्यनुरज्यते च ।
रक्षांसि भीतानि दिशो द्रवन्ति
सर्वे नमस्यन्ति च सिद्धसंघाः ॥ ३६ ॥

स्थानं इति । स्थानं इत्यव्ययम् । युक्तमित्यर्थः । किं तद्युक्तम्? हे हृषीकेश! तव प्रकीर्त्या भक्तवत्सलो भगवानिति त्वन्माहात्म्यसंकीर्तनेन न केवलमहमेव हृष्यामि, किं तु जगत्सर्वं प्रहृष्यतीति यत्तत् स्थाने युक्तम् ।

किं च सर्वेश्वर सर्वात्मा सर्वभूतसुहृदित्यहमिव जगदप्यनुरज्यत इति यत्तदपि स्थाने युक्तम् । जगत्प्रहृष्यत्यनुरज्यत इत्युक्त्या रक्षसा जगदन्त-पातित्वेन भगवति हर्षानुरागौ स्यातामित्यत आह—द्रवन्तीति । रक्षांसि भीतानि सन्ति दिशो यथेच्छ पलायन्ते । अस्मद्दौरात्म्योत्पाटनेनास्मान् कृतार्थीकर्तुं भगवदाविर्भाव इत्यज्ञानात् तत्पलायन यत्तदपि युक्तमेव । यागव्रततपोदानमन्त्रतन्त्रादिसिद्धाना सघा विशुद्धचित्तत्वात् नमस्यन्तीति यत्तदपि युक्तमेव, न चित्रमित्यर्थ ॥ ३६ ॥

उक्ते ऽर्थे हेत्वन्तरमाह—

कस्माच्च ते न नमेरन्महाऽऽत्मन्
गरीयसे ब्रह्मणो ऽप्यादिकर्त्रे ।
अनन्त देवेश जगन्निवास
त्वमक्षरं सदसत्तत्पर यत् ॥ ३७ ॥

कस्माच्चेति । महानक्षुद्र आत्मा ऽन्त करणमस्येति हे महाऽऽत्मन् ! यस्यान्त· इयत्तेति परिच्छेदो न विद्यते स त्वमनन्तः, त्रिविधपरिच्छेद-शून्यत्वात् हे अनन्त ! ब्रह्मादिसकलदेवानामपि नियन्तृत्वात् हे देव-देव ! जगतामन्तर्यामित्वेन तदधिष्ठानत्वेन वा स्थितत्वात् हे जगन्निवास ! तव महाऽऽत्मत्वमपरिच्छिन्नत्व सर्वनियन्तृत्व सर्वाश्रयत्व च सर्वनमस्कारादि-योग्यत्वे कारणम् । यत सर्वस्माद्गरीयसे गुरुतराय विराड्भावमापन्नस्य ब्रह्मण चतुराननस्याप्यादिकर्त्रे मूलकारणभूताय च तुभ्य कस्माद्धेतो ते सर्वे प्राणिनो न नमेरन् नमस्कारं न कुर्यु ? अतस्त्वमेव हर्षादीना नमस्कारस्य चास्पदमित्यर्थ । सर्वास्पदत्वे ऽपि कालत्रये स्वरूपान्न क्षरतीति

व्युत्पत्त्या यद्वेदान्ते श्रूयते तदक्षरं ब्रह्म त्वमेव । 'एतद्ध्येवाक्षरं ब्रह्म' इति श्रुते । 'यदक्षरं वेदविदो वदन्ति' तत्कि सदसदात्मकम्? नेत्याह— तत्परमिति । चक्षुरादिविषयो घटादिक सत्, तद्विपरीतमसत्, परमाक्षरातिरेकेण सदसतोरभावात् सदसच्च तदेवेत्युपचर्यते । परमार्थतस्तु सदसतोः परत्वेन विभानात् सदसत्पर तदेव त्वमित्यर्थ । 'अन्यदेव तद्विदितादथो अविदितादधि' इति श्रुतेः ॥ ३७ ॥

महाऽऽत्मत्वादिभिर्नवभिर्हेतुभि सर्वनमस्कार्यतामुक्त्वा सप्रति जगत्सृष्ट्यादिकर्तृत्वेनापि तदेव द्रढयति—

त्वमादिदेवः पुरुषः पुराण-
स्त्वमस्य विश्वस्य पर निधानम् ।
वेत्ता ऽसि वेद्यं च परं च धाम
त्वया ततं विश्वमनन्तरूप ॥ ३८ ॥

त्वमिति । ब्रह्मादिदेवानामप्यादित्वात् आदिदेवस्त्वमेव, जीवरूपेण पुरीतति शयनात् तन्नियामकरूपेण तत्साक्षिरूपेण वा पुरुषो ऽपि त्वमेव । जीवेशादिविभागात् पुरा ऽपि नवत्वेन प्रसिद्धत्वात् पुराणश्चिरतनो ऽपि त्वमेव । अवान्तरप्रलयादावस्य चेतनाचेतनात्मकविश्वस्य पर प्रकृष्ट निधान लयकारणमपि त्वमेव । स्वभेदेन स्वाभेदेन वा भासमानस्य वेद्यजातस्य वेत्ता ऽपि त्वमेव । सर्वज्ञत्वात् प्रत्यगभेदेन वेदनार्हतया वेदान्तगोचरो वेद्यं वस्त्वपि त्वमेवासि । मुमुक्षुप्राप्यत्वेन प्रसिद्ध पर प्रकृष्टं वैष्णव धाम त्वमेवासि । हे अनन्तरूप! त्वयैकेन समस्त विश्व ततमात्मत्वेन कबलितमित्यर्थः ॥ ३८ ॥

पूर्वोक्तै सप्तभिर्हेतुभि सार्वात्म्य प्रतिपाद्य तत्रैव हेत्वन्तरमाह—

वायुर्यमो ऽग्निर्वरुणः शशाङ्कः
प्रजापतिस्त्वं प्रपितामहश्च ।
नमो नमस्ते ऽस्तु सहस्रकृत्वः
पुनश्च भूयो ऽपि नमो नमस्ते ॥ ३९ ॥

वायुरिति । वायु सर्वप्राणिजीवनभूतत्वात्त्वमसि । यम स्वावाप्तिप्रतिबन्धिपापशोधकत्वात् त्वमेवासि । त्वमग्नि पुरुषार्थप्रापकत्वात् । त्वं वरुणो जगज्जीवनहेतुत्वात् । त्व शशाङ्क प्राणिसतापहारित्वात् । त्वं प्रजापति काश्यपादिरूपेण जगत्स्रष्टृत्वात् । प्रपितामहो ऽपि त्वमेव पितामहश्चतुरानन , तस्यापि जनकत्वात् । एव सर्वात्मकत्वेन भगवन्तमपरोक्षीकृत्य स्वानन्दपरवश सन् नमस्करोति—नम इति । सहस्रकृत्व ते तुभ्य नमो नमो ऽस्तु । पुनश्च भूयो ऽपि नमो नमस्त इति श्रद्धाभक्त्यतिशयख्यापनार्थम् ॥ ३९ ॥

प्रकारान्तरेण भगवद्भावमनुभूय स्वाभिमुखीकरणाय प्रह्वीभाव करोति—

नमः पुरस्तादथ पृष्ठतस्ते
नमो ऽस्तु ते सर्वत एव सर्व ।
अनन्तवीर्यामितविक्रमस्त्वं
सर्वं समाप्नोषि ततो ऽसि सर्वः ॥ ४० ॥

नम इति । पुरस्तात्पूर्वस्यां दिशि ते तुभ्यं नमो ऽस्तु । अथ पृष्ठतो ऽपि हे सर्व सर्वात्मन् ! सर्वत एव सकलदिक्षु विद्यमानाय ते तुभ्य

नमो ऽस्तु । अनन्त वीर्यममितो विक्रमश्च यस्य स त्वमनन्तवीर्यामितविक्रमो ऽसि । वीर्यविक्रमशब्दयोरेकार्थत्वेन न पुनरुक्ति शङ्कनीया, अर्थभेदसभवात् । यथा कश्चिल्लोके वीर्यवान् शक्तिमानपि स्वरिपुविषये न पराक्रमते मन्दपराक्रमत्वात् । कश्चित्पराक्रमवानपि स्वरिपुहननशक्त्यभावान्निर्वीर्यो भवति । यत एवमेकरूपेण सर्वं समस्त जगत्समाप्नोषि ततस्त्वमेव सर्वो ऽसि । त्वदतिरिक्तं भूत भवद्भविष्यद्वा वस्तुजातं न किंचिदस्तीत्यभिप्राय ॥ ४० ॥

भगवन्माहाऽऽत्म्यापरिज्ञानजनित स्वापराध क्षमापयति—सखेति द्वाभ्याम् ।

सखेति मत्वा प्रसभ यदुक्तं
हे कृष्ण हे यादव हे सखेति ।
अजानता महिमानं तवेदं
मया प्रमादात्प्रणयेन वा ऽपि ॥ ४१ ॥

सखेति । सखा समानवयस्कः त्वमसीति मत्वा प्रसभं हठात् तवेदं विश्वरूप महिमानमकुण्ठितक्रियाज्ञानेच्छाशक्तिवैभव चाजानता ऽज्ञानिना मूढेन मया प्रमादात् विक्षिप्तचेतोनिमित्तात् प्रणयेन स्नेहपरवशतो विस्रम्भेणापि वा हे कृष्ण हे यादव हे सखेति यदुक्त तत्क्षामय इत्युत्तरेणान्वय· ॥ ४१ ॥

विहारादौ यन्मयोक्त तदपि सोढव्यमित्याह—

यच्चापहासार्थमसत्कृतो ऽसि
विहारशय्याऽऽसनभोजनेषु ।
एको ऽथ वा ऽप्यच्युत तत्समक्षं
तत्क्षामये त्वामहमप्रमेयम् ॥ ४२ ॥

यच्चेति । भिदालेशमप्यसहन्सत्तासामान्यस्वरूपतो जात्वपि न च्यवत इति हे अच्युत ! प्राकृतयोरिव क्रीडा केलि विहारः एकस्मिन् तल्पे शय्या द्वयोरेकासन सहभोजन तेषु विहारशय्याऽऽसनभोजनेषु अपहास परिहास. तदर्थ तत्प्रयोजनाय मया असत्कृतो ऽवमानितो ऽसीति यद्रह-स्येक एकाकी सन् असत्कृतो ऽसीति च यत् । अथ वा, तत्समक्ष तेषा परिहासकारिणा सखीना समक्ष पुरतस्त्वमसकृदसत्कृतो ऽसीति यच्चास्ति, तज्जापराधजाल सोढव्यमिति प्रत्यक्षादिप्रमाणशतैरप्यचिन्त्यविभवत्वादप्रमेय त्वामह क्षमापये, क्षमानिधित्वात् भगवतो मत्कृतापराधपरपरा सोढव्येति विज्ञापन करोमीत्यर्थ ॥ ४२ ॥

मदपराध सोढव्य इत्युक्त्वा ऽथ मदपराधो न गणनीय , गणितो ऽपि सोढव्य एवेत्याह—

पिता ऽसि लोकस्य चराचरस्य
त्वमस्य पूज्यश्च गुरुर्गरीयान् ।
न त्वत्समो ऽस्त्यभ्यधिकः कुतो ऽन्यो
लोकत्रये ऽप्यप्रतिमप्रभाव ॥ ४३ ॥

पितेति । यत्प्रभावस्य प्रतिमोपमा न विद्यत इति हे अप्रतिम-प्रभाव ! चेतनाचेतनात्मकलोकस्य पिता जनयिता ऽसि । न केवल त्वमस्य जगत पिता, किं तु सर्वैरपि पूजनीयचरणत्वात् पूज्यो गुरु गरीयान् गुरोरपि गुरुत्वात् गुरुतर । कथमेवमवगम्यत इति तत्राह —न त्वदिति । लोकत्रयशब्द स्वाविद्याविजृम्भितानन्तकोटिब्रह्माण्डानामुपलक्षक । तत्रापि त्वत्तुल्यो ऽन्यो नास्ति । न चेश्वरद्वय श्रुति सोढु पारयति । यत एव

त्वत्समस्य मृग्यत्वात् त्वत्तो ऽभ्यधिकं कुतो मे लभ्यते ? अतस्ते गुरुतरत्वं युक्तमित्यर्थः ॥ ४३ ॥

यतः पित्रादिः पुत्त्रादिकृतमपराधं सहते प्राकृतो ऽपि, अतस्त्वमप्राकृतपितृत्वादनन्तापराधिनमपि मामनुगृह्णीष्वेत्याह—

तस्मात्प्रणम्य प्रणिधाय कायं
प्रसादये त्वामहमीशमीड्यम् ।
पितेव पुत्त्रस्य सखेव सख्युः
प्रियः प्रियायार्हसि देव सोढुम् ॥ ४४ ॥

तस्मादिति । यस्मादेवंप्रभावो ऽसि, तस्मादीशमीड्यं त्वा प्रणम्य प्रकर्षेण दण्डवत् कायं प्रणिधाय यथा पुनः पुत्त्रस्यापराधं पिता सख्युरपराधं सखा प्रियाया अपराधं प्रियः क्षमते, तथा त्वमपि मदपराधसहस्रं हे देव! सोढुमर्हसीति त्वामहं प्रसादये, प्रसीदेत्यर्थः ॥ ४४ ॥

एवं भगवन्तं प्रसाद्य विश्वरूपोपसंहारं कुर्विति प्रार्थयते—

अदृष्टपूर्वं हृषितो ऽस्मि दृष्ट्वा
भयेन च प्रव्यथितं मनो मे ।
तदेव मे दर्शय देव रूपं
प्रसीद देवेश जगन्निवास ॥ ४५ ॥

अदृष्टेति । हे देवेश! कदाचिदपि मया मदन्यैर्वा दृष्टपूर्वं न भवतीत्यदृष्टपूर्वं तवेदं विश्वरूपं दृष्ट्वा हृषितः तुष्टो ऽस्मि । तवैतद्विकृत-

रूपदर्शनजन्यभयेन च मे मम मन प्रव्यथित विक्षिप्तम् । मद्विक्षेप-प्रशान्तये हे जगन्निवास! तदेव तावक पूर्वरूप मे दर्शय । इत त्वद्विश्वरूप द्रष्टु न शक्नोमि, क्षिप्र प्रसीद ॥ ४५ ॥

कि तन्मे रूपमित्यपेक्षायामाह —

किरीटिनं गदिनं चक्रहस्त-
मिच्छामि त्वा द्रष्टुमह तथैव ।
तेनैव रूपेण चतुर्भुजेन
सहस्रबाहो भव विश्वमूर्ते ॥ ४६ ॥

किरीटिनमिति । हे सहस्रबाहो! विश्वरूपधरत्वात् हे विश्वमूर्ते! किरीटिन गदिन चक्र हस्ते यस्य त त्वा त्वामह द्रष्टुमिच्छामि । यथा पुरा यत्ते रूप मया दृष्ट तथा तेनैव रूपेण चतुर्भुजेन वसुदेवपुत्ररूपेण भव आविर्भव । मत्प्रत्ययहेतु विश्वरूपमुपसहृत्य मद्भागधेयभूतयदूत्तमरूपो भवेत्यर्थ । भवेति प्रार्थनात पूर्वमेव भगवन्त दृष्टवानित्यवगम्यते । विश्वरूपदर्शने किरीटिन गदिन चक्रिणमित्युक्तिरनेककिरीटाद्यभिप्रायेण । यत एवमतो न पुनरुक्ति ॥ ४६ ॥

अर्जुनप्रत्ययहेतु विश्वरूपमुपसंहृत्य तद्दर्शनतो भीतमर्जुनं प्रियवचनैराश्वासयन् श्रीभगवानुवाच—मयेति त्रिभि ।

श्रीभगवानुवाच—

मया प्रसन्नेन तवार्जुनेदं
रूपं परं दर्शितमात्मयोगात् ।

तेजोमयं विश्वमनन्तमाद्यं
यन्मे त्वदन्येन न दृष्टपूर्वम् ॥ ४७ ॥

मयेति । हे अर्जुन ! त्वदनुग्रहार्थं प्रसन्नेन मया आत्मयोगादैश्वर्य-सामर्थ्यात् त्वदन्येन न दृष्टपूर्वम्, तेज पुञ्जत्वात्तेजोमयम्, विश्वरूपत्वाद्विश्वम्, अव्ययत्वादनन्तम्, आदावेव सिद्धत्वादाद्यम्, अविद्यातत्कार्यात्पर यन्मे रूप तव दर्शित तन्मद्रूपदर्शनेन कृतार्थो भवसीत्यर्थ ॥ ४७ ॥

विश्वरूपसदर्शनेनार्जुनस्य कृतार्थता व्यक्तीकरोति—

न वेदयज्ञाध्ययनैर्न दानै-
र्न च क्रियाभिर्न तपोभिरुग्रैः ।
एवंरूपः शक्य अहं नृलोके
द्रष्टुं त्वदन्येन कुरुप्रवीर ॥ ४८ ॥

न वेदेति । कुरूणा प्रवरा· पाण्डवा·, तेषामर्जुनस्य वीर्योद्रेकात् हे कुरुप्रवीर ! नृणा मनुष्याणा लोके त्वदन्येन मदनुग्रहहीनेन द्रष्टुम् एवरूपो विश्वरूपधर· परमेश्वरो ऽहं न शक्य· । मदन्येनापि साधनपौष्कल्यात् द्रष्टु शक्यो ऽसीति तत्राह—नेति । वेदाध्ययनातिरेकेण यज्ञाध्ययना-भावात् यज्ञाध्ययनशब्देन यज्ञविद्या· कल्पसूत्रादयो लक्ष्यन्ते । वेदानां यज्ञविद्याना चाध्ययनै द्रष्टु न शक्य । न च सर्वस्वदानै । न चाग्नि-होत्रादिक्रियाभि । नाप्युग्रै कृच्छ्रचान्द्रायणादितपोभि । अपि तु त्वमेव केवल मत्प्रसादेनेद दृष्ट्वा कृतार्थो भवसीत्यर्थ ॥ ४८ ॥

विश्वरूपदर्शनमेव स्तुत्वा यतो विश्वरूप दृष्ट्वा बिभेष्यत तदुपसहृत्य त्वदीप्सित रूप दर्शयामीत्याह—

मा ते व्यथा मा च विमूढभावो
दृष्ट्वा रूपं घोरमीदृङ् ममेदम् ।
व्यपेतभीः प्रीतमनाः पुनस्त्वं
तदेव मे रूपमिदं प्रपश्य ॥ ४९ ॥

मेति । ईदृगीदृश घोर मत्प्रसादतो मद्भावविकलै द्रष्टु दु शकत्वात् ममेद विश्वरूप दृष्ट्वा व्यथा भी ते मा ऽस्तु । विमूढभावो विक्षिप्तचेतस्त्व च मा ऽस्तु । त्व व्यपेतभी निर्भयो भूत्वा प्रीतमना सतुष्टचित्त सन् त्वया बहुतिथमनुभूत यत्पुनस्तदेव शङ्खचक्रगदापद्मधर त्वत्सख मद्रूप पश्य ॥ ४९ ॥

भगवानेवमर्जुनायोक्त्वा पूर्वरूप दर्शितवानिति धृतराष्ट्र प्रति सजय उवाच—

संजय उवाच—

इत्यर्जुनं वासुदेवस्तथोक्त्वा
स्वकं रूपं दर्शयामास भूयः ।
आश्वासयामास च भीतमेनं
भूत्वा पुनः सौम्यवपुर्महाऽऽत्मा ॥ ५० ॥

इतीति । श्रीवासुदेवो ऽर्जुन प्रति मया प्रसन्नेनेत्यादि वच उक्त्वा यथा वसुदेवगृहाविर्भूत भक्तपूगम्वपदप्राप्तिसाधन च पुरा ऽऽसीत् तथा भूय. स्वक रूप दर्शयामास । महान् प्रसन्न आत्मा देहो यस्य सो ऽय महाऽऽत्मा भगवान् सौम्यवपुर्भूत्वा विश्वरूपदर्शनतो भीतमेनमर्जुन पुन. पुनराश्वासयामास । स्वस्थ चित्त निर्भय कृतवानित्यर्थ ॥ ५० ॥

एव भगवदाश्वस्तो निर्भय सन् भगवन्त प्रत्यर्जुन उवाच—

अर्जुन उवाच—

दृष्ट्वेदं मानुषं रूपं तव सौम्यं जनार्दन।
इदानीमस्मि संवृत्तः सचेताः प्रकृतिं गतः ॥ ५१ ॥

दृष्ट्वेति। हे जनार्दन! तवेद मत्सखत्वेन प्रसिद्ध सौम्य मानुष रूप दृष्ट्वा ऽह सचेता प्रसन्नचित्तो भूत्वेदानी सवृत्त सजातस्मृति सन् प्रकृति स्वस्थचित्तता गतो ऽस्मि ॥ ५१ ॥

सर्वजनोपासनार्हं स्वक विश्वरूप स्तुवन् श्रीभगवानुवाच—

श्रीभगवानुवाच—

सुदुर्दर्शमिदं रूपं दृष्टवानसि यन्मम।
देवा अप्यस्य रूपस्य नित्यं दर्शनकाङ्क्षिणः ॥ ५२ ॥

सुदुर्दर्शमिति। यन्मम विश्वरूप त्व दृष्टवानसि तदिद सुष्ठु दु खेन दर्शनमस्येति सुदुर्दर्शम्। द्रष्टुमशक्यमित्यर्थ। तत्र हेतु, यतो देवा अप्यस्य विश्वरूपस्य नित्य सर्वदा दर्शनकाङ्क्षिणो भवन्ति। तथा ऽपि न पश्यन्तीत्यर्थ ॥ ५२ ॥

देवाना त्वद्दर्शनोपायाभावात् कथ ते द्रक्ष्यन्तीत्यपेक्षायामुपायेषु सत्स्वपि यथा त्वया दृष्ट तथा तैर्द्रष्टु न शक्यो ऽस्मीत्याह—

नाहं वेदैर्न तपसा न दानेन न चेज्यया।
शक्य एवंविधो द्रष्टुं दृष्टवानसि मां यथा ॥ ५३ ॥

नाहमिति । यथा येन प्रकारेणैवंविध विश्वरूपधर मा दृष्टवानसि, तथा केवलवेदपारायणै सर्वस्वदानेनेज्यया यज्ञेन वा ऽपि द्रष्टु न शक्य ॥ ५३ ॥

तर्हि केनोपायेन द्रष्टु शक्यो ऽसीति तत्राह——

भक्त्या त्वनन्यया शक्य अहमेवंविधो ऽर्जुन ।
ज्ञातु द्रष्टुं च तत्त्वेन प्रवेष्टु च परतप ॥ ५४ ॥

भक्त्येति । हे अर्जुन ! भक्तिर्भजनम्, तया ऽहमेवंविधो विश्वरूपधर, परमात्मा वासुदेवो निष्कामकर्मानुष्ठानजनितचित्तशुद्ध्युत्तरकाल भाव्यवेदान्तविचाराज्ज्ञातु तदर्थमनननिदिध्यासनतो द्रष्टु साक्षात्कर्तु तत्त्वेन तत्त्वत प्रवेष्टु च स्वाविद्याकलनामुन्मूल्य स्वविद्यासर्वोत्कृष्टफल कैवल्य प्रतिपत्तु शक्य । किं जीवपरयोर्भेदरूपया मत्तस्त्वमुत्कृष्ट सेव्यत्वात्त्वत्तो ऽहमपकृष्ट सेवकत्वादित्येवभावापन्नया भक्त्या ज्ञातु द्रष्टु प्रवेष्टु च शक्यो ऽसीति तत्राह——अनन्ययेति । वासुदेवो ऽहमहमेव वासुदेव इत्यपृथग्भूतया मद्विज्ञानकबलितसेव्यसेवकभावया ऽनन्यभक्त्या प्रतिपत्तु योग्य इत्यर्थ. । तुशब्द सर्वकर्मसन्यासलक्षणमन्निष्ठाद्योतक । पर सेव्यसेवकभाव, तमनन्यभक्त्या तपतीति हे परतपेति सबुद्धिरुचितेति भाव. ॥ ५४ ॥

गीताशास्त्रार्थसर्वस्व समुच्चित्य कथयति——

मत्कर्मकृन्मत्परमो मद्भक्तः सङ्गवर्जितः ।
निर्वैरः सर्वभूतेषु यः स मामेति पाण्डव ॥५५॥ इति ।

इति श्रीमद्भगवद्गीतासु० विश्वरूपदर्शनयोगो नामैकादशो ऽध्याय. ।

मदिति । हे पाण्डव! मदर्थमेव न स्वतत्फलभागार्थं कर्म करोतीति मत्कर्मकृत् । परायाः गतेः त्वद्भिन्नत्वात् त्वदर्थं कर्मकृतः तल्लाभः कथमिति तत्राह—मत्परम इति । अहं प्रत्यगभिन्नः परमात्मा वासुदेवः परा गतिः यस्य सोऽयं मत्परमः । मदितरपुरुषार्थाभावात् । त्वद्भक्तिविकलस्य त्वद्गतिता कुत इति तत्राह—मद्भक्त इति । वासुदेवादितरन्न किंचिदस्ति, सर्वमहमपि वासुदेव एवेति भजनं भक्तिः, तद्वतो मद्गतितोपपद्यत इत्यर्थः । स्वदेहतदन्ययोरात्मात्मीयत्वाभिमानवतः कथं त्वद्भक्ततेति तत्राह—सङ्गवर्जित इति । स्वदेहदारपुत्रवित्तादीनां स्वव्यतिरेकेणाभावात् मिथ्येति जानतः तत्र कथं सङ्गो भवेत्? त्वद्भक्तत्वं संभवत्येवेत्यर्थः । स्वापकारिषु शत्रुभावमुपेयुषो निःसङ्गता कथमाविर्भवतीति तत्राह—निर्वैर इति । वासुदेवः सर्वमिति मनीषया सर्वभूतेषु स्वापकारिष्वपि निर्गतो वैरभावो यस्य सः सर्वभूतेषु निर्वैरः । यः ईदृशभावारूढो योगी स मां विदेहकैवल्यरूपमेति तस्याहमेव परा गतिः । तवायमेव परमोपदेशो मया कृपयोपदिष्टः । इतिशब्दः अध्यायपरिसमाप्त्यर्थः ॥ ५५ ॥

सर्वात्मभावनाजुष्टमुक्तप्रत्यगभेदतः ।
चकास्ति यत्परं ब्रह्म तन्मे क्षिप्रं प्रसीदतु ॥

इति श्रीमद्भगवद्गीताऽर्थप्रकाशिकायामेकादशोऽध्यायः ।

द्वादशो ऽध्यायः

विष्णो साकल्यनैष्कल्यभक्त्योर्नि श्रेयस प्रति ।
असाधारणता वक्तुमेष स्याद्द्वादशोद्यम ॥

'अशोच्यान्' इत्यारभ्य दशमाध्यायपर्यन्तमेकादशाध्यायान्ते ऽपि 'अविनाशि तु तद्विद्धि येन सर्वमिद ततम्' 'नित्य सर्वगत स्थाणुरचलो ऽय सनातन ' 'अव्यक्तो ऽयमचिन्त्यो ऽयमविकार्यो ऽयमुच्यते' 'विहाय कामान्य सर्वान्पुमाश्चरति नि स्पृह ' 'निर्ममो निरहकार ' 'स शान्तिमधिगच्छति' 'यस्त्वात्मरतिरेव स्यात्' 'ज्ञात्वा मा शान्तिमृच्छति' 'सर्व ज्ञानप्लवेनैव वृजिन सतरिष्यसि' 'स योगी ब्रह्मनिर्वाण ब्रह्मभूतो ऽधिगच्छति' 'यो मा पश्यति सर्वत्र सर्व च मयि पश्यति' 'वासुदेव सर्वमिति स महाऽऽत्मा सुदुर्लभ ' 'पुरुष स पर पार्थ भक्त्या लभ्यस्त्वनन्यया' 'मया ततमिद सर्व जगदव्यक्तमूर्तिना' 'अहमात्मा गुडाकेश सर्वभूताशयस्थित ' 'मत्कर्मकृन्मत्परमो मद्भक्त सङ्गवर्जित । निर्वैर सर्वभूतेषु य स मामेति पाण्डव ॥' 'भक्त्या त्वनन्यया शक्य अहमेवविधो ऽर्जुन' इत्यादिना निष्कलब्रह्मगोचरानन्यभक्तिनिष्ठात उत्तमाधिकारिणा ' कृतार्थता ऽभिहिता । विश्वरूपाध्याये तु सकलब्रह्मगोचरभक्तिनिष्ठया च तयोर्निष्कलसकलब्रह्मभक्तिनिष्ठयोर्मध्ये यद्भक्तिनिष्ठाऽऽरूढो योगी त्वामव्यवधानेनोपैतीति तद्विशेष बुभुत्सुरर्जुन उवाच—

अर्जुन उवाच—

एवं सततयुक्ता ये भक्तास्त्वां पर्युपासते ।
ये चाप्यक्षरमव्यक्तं तेषां के योगवित्तमाः ॥ १ ॥

एवमिति । मत्कर्मकृदित्यादिनैव ये सकलब्रह्मभक्ता सर्वकर्मार्पणादिना सतत नैरन्तर्येण युक्ता· समाहितचित्ता सन्त· सर्वज्ञ परमेश्वरम् अकुण्ठित-क्रियाज्ञानेच्छाशक्तिसपन्नत्वेन विश्वरूपधर त्वा पर्युपासते ध्यायन्ति, ये चापि सन्यस्तसर्वकर्माण त्वदनन्यभावलक्षणब्रह्मात्मनिष्ठाऽव्याविद्धसर्वोपाधित्वेन कालत्रये ऽपि न क्षरतीत्यक्षरमिन्द्रियद्वयागोचरत्वादव्यक्त नित्यशुद्धबुद्ध-परमानन्दस्वरूपसत्तासामान्यब्रह्माहमस्मीति त्वा पर्युपासते तेषा सकल-निष्कलब्रह्मभक्तिनिष्ठाना मध्ये के योगवित्तमा ब्रह्मात्मनिष्ठा ॥ १ ॥

ये निष्कलब्रह्मात्मभक्तिनिष्ठास्ते तिष्ठन्तु 'ज्ञानी त्वात्मैव मे मतम्' इत्युक्तमपि तान्प्रति यद्वक्तव्य तदुपरिष्टादुच्यते । सप्रति किमनयोर्निष्ठयो सुशका निष्ठा केति पृच्छ्यते, किमव्यवधानेन साक्षात्कैवल्यहेतु कति वेति विकल्प्य क्रमेणोत्तर श्रीभगवानुवाच—

श्रीभगवानुवाच—

मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते ।
श्रद्धया परयोपेतास्ते मे युक्ततमा मताः ॥ २ ॥

मयीति । ये मद्भक्ता विश्वरूपधरे सर्वज्ञत्वादिगुणविशिष्टे मयि मनो ऽन्त करणमावेश्य मदाराधनलक्षणनिष्कामकर्मानुष्ठाने नित्ययुक्ता भूत्वा परया प्रकृष्टया श्रद्धया भगवानेव स्वाविद्याविजृम्भितससारादुद्धरिष्य-

तीत्यास्तिक्यबुद्ध्योपेता सन्त सोपाधिक भगवन्त मामुपासते । ते मे मम परमेश्वरस्य युक्ततमा इति मता अभिप्रेता । सुप्तेरुत्थाय पुन सुप्त्यन्त यतस्ते मच्छरणा अभवन्. ततो युक्ततमा इति वक्तु युक्तमित्यर्थ ॥ १ ॥

किमितरे निष्कलब्रह्मनिष्ठा युक्ततमा न भवन्तीत्यपेक्षाया ब्रह्मैवाह-महमेव ब्रह्मेति मद्भावारूढाना मत्स्वरूपत्वेन मद्भावमारोढुमिच्छता साधकानामिव युक्ततमत्वस्य वक्तुमरमणीयत्वात् स्वातन्त्र्येण ते मामेव प्राप्नुवन्तीत्याज्ञापयति—ये त्विति द्वाभ्याम् ।

ये त्वक्षरमनिर्देश्यमव्यक्तं पर्युपासते ।
सर्वत्रगमचिन्त्यं च कूटस्थमचलं ध्रुवम् ॥ ३ ॥
संनियम्येन्द्रियग्रामं सर्वत्र समबुद्धयः ।
ते प्राप्नुवन्ति मामेव सर्वभूतहिते रताः ॥ ४ ॥

ये त्विति । ये तु निष्कलभक्तिनिष्ठया मामुपासते ते मामेव प्राप्नुवन्तीति योजना । सकलब्रह्मनिष्ठेभ्यो निष्कलब्रह्मनिष्ठाना वैशिष्ट्यद्योतक तुशब्द । सकलभक्तिनिष्ठेभ्यो विशिष्टाश्चेत् ते कीदृशा इति तत्राह—समबुद्धय इति । सर्वत्र सर्वदेष्टानिष्टप्राप्तावपि हर्षविषादवैकल्येन समा बुद्धि सर्व ब्रह्मेति ज्ञान येषा ते समबुद्धय , साम्यब्रह्मनिष्ठाकबलितविषमत्वात् । स्वाहितकारिष्वहितचिन्तकाना समबुद्धित्व कुत इति तत्राह—सर्वेति । सर्वेषा ब्रह्मादिस्तम्बान्तभूताना यदात्यन्तिक हित प्रत्यक्परचिदैक्यसुख तदितरविषयविस्मरणपूर्वक तत्रैव रतत्वात् सर्वभूतहिते रता । तेषा समबुद्धित्व निरडकुशमित्यर्थ । इन्द्रियग्रामस्य साम्यब्रह्मबुद्धिचालकत्वेन प्रसिद्धत्वात् तद्वत प्रत्यक्परचिदैक्यसुखरति कथमुपपद्यत इति तत्राह—सनियम्येति । ब्रह्मातिरेकेणेन्द्रियग्राम तद्व्यापारो वा कथ सभवदिति

प्रबोधेन स्वान्तर्बहिर्विजृम्भितमिन्द्रियग्राम सनियम्य ब्रह्मात्मना ग्रसित्वा स्वस्वरूपेण वर्तमानाना ब्रह्मानन्दरतिरुपपद्यतेतरामित्यर्थ । त एवविशेषण-विशिष्टा ब्रह्मात्मनिष्ठा किंविशेषणविशिष्ट त्वामुपासत इति तत्राह—अक्षरमिति; सत्तासामान्यरूपत कदाचिदपि न क्षरति न च्यवत इत्यक्षरम् । अक्षरमिति शब्दतो निर्दिष्टस्य क्षरत्वध्रौव्यात् अक्षरत्व कुत इति तत्राह—अनिर्देश्यमिति । यदिन्द्रियद्वयगोचरत्वेन प्रसिद्धं विशेष-सामान्यात्मक वस्तु तस्य निर्देष्टु शक्यत्वेन क्षरत्वमुपपद्यते । तद्विपरीतत्वेन सर्ववेदान्तप्रसिद्धमक्षर ब्रह्म स्वेतरत्वेन निर्देशासहत्वात् अनिर्देश्यमक्षरमुच्यते । अक्षरमिति व्यपदेशस्य तदवबोधोपायत्वादुदिते सति तद्बोधे स्वव्य-तिरेकेण व्यपदेशादर्शनात् न दोषाय तद्भवतीत्यर्थ । स्वतोऽनिर्देश्यमपि व्यक्तविश्वसमन्वयात् निर्देश्यतापदमर्हतीति तत्राह—अव्यक्तमिति । किं तद्ब्रह्मणो व्यक्तत्वम् उपाधितो गुणतो वा? नाद्य, स्वभिन्नोपाध्यभावेन निरुपाधिकत्वात् । न द्वितीय, निर्गुणत्वात् । विश्वनिष्ठव्यक्तताया स्वाज्ञान-कल्पितत्वेन मिथ्यात्वात् तथ्यातथ्ययोगवद्व्यक्ताव्यक्तसमन्वयस्य मृग्यत्वा-दनिर्देश्य ब्रह्माव्यक्तमेवेत्यर्थ । तादृशमव्यक्त ब्रह्म कुत्रासनमर्हतीति तत्राह—सर्वत्रेति । सर्वत्र गच्छतीति सर्वत्रग निरुपमविभुत्वात् । किं तद्वि-भुत्वेन चिन्त्यमिति तत्राह—अचिन्त्यमिति । ब्रह्मातिरेकेण विभु ब्रह्मेति चिन्तकचित्ताभावात् । ननु अचिन्त्य चेत् ब्रह्म तस्य कूटस्थत्व कुत इति तत्राह—कूटस्थमिति । स्वाविद्याद्वयतत्कार्यजात कूट तदन्तर्यामित्वेन तदधिष्ठानत्वेन वा यच्चैतन्य वर्तते तत्कूटस्थमुच्यते, तदध्यक्षस्वरूपत्वात् 'यो अस्याध्यक्ष' इति श्रुते । कूटस्य चलत्वेन तदध्यक्षस्यापि तथात्व किं न स्यादिति तत्राह—अचलमिति । यथा घटे चालिते ऽपि तत्सबन्धा-स्पृष्टमाकाशं न चलति, तथा स्वविकल्पितकूटसबन्धाभावादचलत्व सिद्ध-

मित्यर्थ । तत्र हेतुमाह—ध्रुवमिति । स्वत परतो वा यच्चलति तदध्रुव चलितत्वात् । यत्तद्विपरीत तद् ध्रुवम्, निश्चलत्वेन परमार्थसत्यत्वात् । प्रत्यगभेदेनैवंविशेषणविशिष्ट मा परि समन्तादुपासते । उपासन नाम स्वोपास्यविषयैकतानत्वम् । 'एव निष्कलभक्तिनिष्ठा भूत्वा ये मामुपासते तदुपासनासमकालमेव ते मा प्राप्नुवन्तीति वर्तमानप्रयोगस्तदुत्तरक्षणावाप्तिं न सहते । 'ज्ञानसमकालमेव मुक्त.' इति श्रुते. ॥ ३, ४ ॥

सकलभक्तिनिष्ठाऽपेक्षया निष्कलभक्तिनिष्ठाया श्रेष्ठत्वात् सकलभक्तिनिष्ठैरपि निष्कलभक्तिनिष्ठैव भजनीयेत्याकाङ्क्षाया देहाभिमानिनो निष्कलनिष्ठाया दुष्करत्वात् तदितराया सुकरत्वादित्याह—

क्लेशो ऽधिकतरस्तेषामव्यक्तासक्तचेतसाम् ।
अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते ॥ ५ ॥

क्लेश इति । हि यस्मात् अव्यक्ता निष्कलब्रह्मभक्तिनिष्ठाऽऽख्या गति देहवद्भि देहाभिमानिभिरवाप्यत इति यत्तद् दु ख दु खेनाप्यनवाप्यम्, दु शकमित्यर्थ. । यद्यपि मत्कर्मादिपरायणाना सकलब्रह्मशरणाना स्वेच्छाऽऽचारविहारिभ्य कामिभ्य स्वदेहाद्यभिमानपरित्यागनिमित्त क्लेशो ऽधिक, यदिन्द्रियद्वयागोचरस्तदव्यक्तम्, तस्मिन्नासक्त चेतो येषा निष्कलभक्तिनिष्ठानामव्यक्तासक्तचेतसा स्वेतरबुद्धिपरित्यागनिमित्त क्लेशो ऽधिकतर, तथा ऽपि परदृष्ट्यपेक्षया क्लेशस्याधिकतरत्वोक्ति न स्वदृष्ट्या, स्वानन्दकबलितसर्वक्लेशत्वादित्यर्थ ॥ ५ ॥

निष्कलभक्तिनिष्ठा ये 'ते प्राप्नुवन्ति मामेव' इत्यवधारणापूर्वकमव्यवधानेन त्वत्प्राप्तेरुक्तत्वात् सकलब्रह्मभक्तिनिष्ठाना त्वत्प्राप्तिर्विरलेत्य-

पेक्षाया तेषा ज्ञानाभावे ऽपि मच्छरणत्वात्तानहमुद्धरामीत्याह— ये त्विति द्वाभ्याम् ।

ये तु सर्वाणि कर्माणि मयि संन्यस्य मत्पराः ।
अनन्येनैव योगेन मां ध्यायन्त उपासते ॥ ६ ॥
तेषामहं समुद्धर्ता मृत्युसंसारसागरात् ।
भवामि न चिरात्पार्थ मय्यावेशितचेतसाम् ॥ ७ ॥

ये त्विति । हे पार्थ ! ये तु सकलशरणा पुरुषा । तुशब्दो भगवत्प्रसादलब्धसम्यग्ज्ञानद्वारा कैवल्यद्योतक । विश्वरूपधर परमेश्वरो ऽह परो येषा ते मत्परा सन्त परमेश्वरे मयि श्रौतस्मार्तचोदितानि सर्वाणि कर्माणि सन्न्यस्य समर्प्य विश्वरूप परमेश्वर एवास्माभि भजनीयो नान्य इति भावो ऽनन्य , तेन समाधियोगेनैव मा विराड्रूप ध्यायन्त सन्त उपासते, तेषा मय्यावेशितचेतसा सकलब्रह्मभक्तिनिष्ठाना मृत्यु स्वाज्ञान मरणाद्यनर्थनिदानत्वात्, तत्कार्य संसार स एव समुद्र , तस्मान्मृत्युससारसागरात् मज्ज्ञानप्लवदानेनोद्धर्ता भवामि ॥ ६, ७ ॥

यतो मदुपासना विशिष्टफला अत तन्निष्ठाया प्रयतितव्यमित्याह—

मय्येव मन आधत्स्व मयि बुद्धिं निवेशय ।
निवसिष्यसि मय्येव अत ऊर्ध्वं न संशयः ॥ ८ ॥

मयीति । विश्वरूपे मय्येव सकल्पविकल्पात्मक मन आधत्स्व । मयि निश्चयात्मिका बुद्धिं निवेशय । त्वयि मनोबुद्धिस्थापनेन किं मे स्यादिति तत्राह—निवसिष्यसीति । एव मयि मनोबुद्धिनिवेशन कुर्वस्त्व

मत्प्रसादलब्धज्ञानो भूत्वा अतो देहपतनादूर्ध्वं मय्येव परमात्मनि निवसिष्यसि मद्रूपो भविष्यसि । नास्मिन्नर्थे सशय कर्तव्य ॥ ८ ॥

एव कर्तु न शक्नोषि यदि तदा अभ्यासयोग वा कुर्वित्याह—

अथ चित्तं समाधातुं न शक्नोषि मयि स्थिरम् ।
अभ्यासयोगेन ततो मामिच्छाप्तुं धनंजय ॥ ९ ॥

अथेति । हे धनजय ! पूर्वोक्तार्थद्योतको ऽथशब्द । अथ यथोक्त तथा मयि चित्त समाधातु स्थिरीकर्तु न शक्नोषि यदि तदा तत पश्चात् स्थूलप्रतिमाऽऽदौ पौन पुन्येन मन प्रत्याहृत्य स्थिरीकरणमभ्यास , स एव योग , तेनाभ्यासयोगेन विश्वरूपधर मामाप्तुमिच्छ प्रार्थयेत्यर्थ ॥ ९ ॥

तत्राप्यशक्तश्चेत् मदर्थ कर्म कुर्वित्याह—

अभ्यासे ऽप्यसमर्थो ऽसि मत्कर्मपरमो भव ।
मदर्थमपि कर्माणि कुर्वन्सिद्धिमवाप्स्यसि ॥ १० ॥

अभ्यासेति । अभ्यासयोगे ऽप्यसमर्थो यदि भवसि तदा मदाराधनलक्षणस्वाश्रमोचितश्रुतिस्मृतिविहितनित्यनैमित्तिकोपवासपूजानमस्कारनामसकीर्तनादि कर्मैव परम साधन यस्य स त्व मत्कर्मपरमो भव । त्वदर्थ कर्म कुर्वत कि फलमिति तत्राह—अवाप्स्यसीति । मदर्थमेवंरूप कर्म कुर्वस्त्व तदुदितचित्तशुद्धिप्राप्यज्ञानद्वारा सिद्धिं मुक्तिमवाप्स्यसि ॥ १० ॥

मत्कर्मयोगमनुष्ठातुमप्यसमर्थस्योपायान्तरमादिशति—

अथैतदप्यशक्तो ऽसि कर्तुं मद्योगमाश्रितः ।
सर्वकर्मफलत्यागं ततः कुरु यतात्मवान् ॥ ११ ॥

अथेति। अथ मत्कर्मपरमत्व यदुक्त तदेतदपि कर्तुमशक्तो ऽसि, तदा श्रुतिस्मृत्यनुगृहीत स्वाश्रमोचित यत्कर्म तस्य मदर्थमनुष्ठान मद्योग, तमाश्रित सन् यतो नियत आत्मा ऽन्त करण. तद्वान् भूत्वा ततस्तदनन्तर सर्वेषा कर्मणा फलत्याग कुरु ॥ ११ ॥

इदानीमर्जुनप्ररोचनाय तस्य कर्मफलत्याग स्तौति—

श्रेयो हि ज्ञानमभ्यासाज्ज्ञानाद्ध्यानं विशिष्यते।
ध्यानात्कर्मफलत्यागस्त्यागाच्छान्तिरनन्तरम् ॥ १२ ॥

श्रेय इति। ज्ञानरहितात्केवलाभ्यासात् शास्त्रजन्य ज्ञान श्रेय.। हिशब्दो वैशिष्ट्यद्योतक। केवलशास्त्रजन्यज्ञानात् ज्ञानविशिष्ट ध्यान विशिष्यते। ज्ञानवत्कृतध्यानादपि कर्मफलत्यागो विशिष्यते। एव सर्वकर्मफलत्यागादनन्तरमेव ससारस्य शान्तिरुपशमो भवति। श्रेयो हि ज्ञानमित्याद्युत्तरोत्तरवैशिष्ट्योपदेशेन कर्मफलत्याग स्तूयते। 'अथ चित्त समाधातुम्' इत्यादिसाधनानुष्ठानाशक्तपुरुषानुष्ठेयत्वेन श्रुतत्वात् स्तुते प्ररोचनार्थत्वात्। वस्तुतस्तु 'यदा सर्वे प्रमुच्यन्ते कामा ये ऽस्य हृदि श्रिता' इत्यादिश्रुत्यनुरोधेन सर्वकर्ममूलसर्वकामप्रहाणत ससारशान्तिलक्षणामृतत्व सभवति। न हि त्यक्तसर्वकामाणा कर्मयोग उपपद्यते यतस्ते प्राप्नुवन्ति मामेवेति निष्कलब्रह्मभक्तनिष्ठाना कैवल्यावाप्तौ स्वातन्त्र्यम्। तेषामह समुद्धर्तेत्यादिनेतरेषामीश्वरपरतन्त्रत्व दर्शितम्। अत तदर्जुनप्ररोचनार्थमिति सिद्धम् ॥ १२ ॥

सकलब्रह्मनिष्ठाना तत्प्राप्तौ साधनमुक्त्वा निष्कलब्रह्मनिष्ठाना सन्यासिना धर्मपूगमुपन्यस्यति— अद्वेष्टेत्यादिभिरष्टभिः।

अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च।
निर्ममो निरहंकारः समदुःखसुखः क्षमी ॥ १३ ॥
संतुष्टः सततं योगी यतात्मा दृढनिश्चयः।
मय्यर्पितमनोबुद्धिर्यो मद्भक्तः स मे प्रियः ॥ १४ ॥

अद्वेष्टेति। सर्वेषा भूतानामद्वेष्टा स्वात्मातिरेकेण भूतभौतिकजातशून्यत्वात्। अद्वेष्टेत्यादिविशेषणविशिष्टो य सन्यासी स मे प्रियभक्त इत्यन्वय। स्वात्मापकारिणममित्रत्वेन पश्यत सर्वभूताद्वेष्टृत्व कुत इति तत्राह—मैत्र इति। स्वामित्रभूतानामपि स्वात्मत्वेन मित्रत्वात् सर्वभूताना मैत्र। मित्रतया वर्तनात् सर्वत्राद्वेष्टृत्वमुपपद्यते। करुणाविहीनस्य कुत्र वा मित्रतोपपद्यत इति तत्राह—करुण एव चेति। सर्वभूताना करुणया ऽवलोकनात् दु खितेषु तद्दु खमार्जनोपायचिन्तकत्वाच्च सर्वभूतमित्रतोपपद्यत इत्यर्थ। इद मे स्यादिति ममकाराविष्टस्य करुणा कुत इति तत्राह—निर्मम इति। देहधारणमात्रोपयोगिभक्तोपनीतभिक्षाऽऽदाविद ममेति ममकारविकलत्वात् निर्गतो ममकारो यस्मात् स निर्मम। स्वदेहादन्यत्र ममकाराभावे ऽपि स्वदेहादावहकार. स्यादिति तत्राह—निरहकार इति। 'यथैव मृन्मय कुम्भस्तद्वद्देहो ऽपि चिन्मय' इति श्रुत्यनुरोधेन देहादावपि निर्गतो ऽहकारो यस्मात् स निरहकार। सुखादिवैषम्य पश्यतो निरहकारता कथमिति तत्राह— समेति। द्वेषरागयो प्रवर्तके दु खसुखे यस्य समे स समदु खसुख। वैषम्यहेत्वज्ञानाभावात् क्षमाविकलस्य समत्व किमिति तत्राह —क्षमीति। स्वाज्ञजनै ताडितो ऽप्याक्रुष्ट सन्नविक्रिय एवावतिष्ठत इति क्षमावान्।

'क्रुध्यन्तं न प्रतिक्रुध्येदाक्रुष्ट कुशल वदेत्।
ताडित सनिरुद्धो वा वृत्त्या वा परितापित ॥

विष्ठितो मूत्रितो वा ऽज्ञैर्बहुधैव प्रकम्पित ।
श्रेयस्काम कृच्छ्रगत आत्मना ऽऽत्मानमुद्धरेत् ॥'

इत्यादिश्रुते । केनाप्यसतुष्टस्य क्षमित्व कथमिति तत्राह—सतुष्ट इति । अवर्जनीयशरीरस्थितिहेतोर्भैक्षादेर्लाभे ऽलाभे ऽप्यविकृतचित्तो भूत्वा बाह्यमनपेक्ष्य सतत स्वानन्देनैव सतुष्टत्वात् ।

'अप्राप्त हि परित्यज्य संप्राप्ते समता गत ।
अदृष्टखेदाखेदो य सतुष्ट इति कथ्यते ॥'

इति श्रुते । अयोगिन सतुष्टि कथमिति तत्राह—योगीति । प्रत्यक्परैक्यज्ञान योगस्तद्वान्योगी, तस्य परमानन्दपारावारमग्नचित्तत्वात् । अयतात्मनो योगित्व कुत इति तत्राह—यतात्मेति । स्वार्थतो यतो नियत आत्मा करणग्रामो येन स यतात्मा । निगृहीतेन्द्रियद्वयत्वाद्दृढनिश्चयवतो यतात्मता कथमिति तत्राह—दृढनिश्चय इति । ब्रह्मैवेद सर्वमह चेति दृढो निश्चयो यस्य स दृढनिश्चय । त्वय्यनर्पितमनोबुद्धे दृढनिश्चयता केति तत्राह—मयीति । प्रत्यगभिन्नब्रह्मरूपे मय्यर्पिते दृढ निवेशिते मनोबुद्धी यस्य संन्यासिन स मय्यर्पितमनोबुद्धि । एवविशेषणविशिष्टो यो मद्भक्त स मे मम प्रिय मन्निष्कलभक्तिनिष्ठाऽऽरूढत्वात् मत्सकलभक्तिनिष्ठेभ्यो विशिष्यते । 'तेषा ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते । प्रियो हि ज्ञानिनो ऽत्यर्थमह स च मम प्रिय ॥ उदारा सर्व एवैते ज्ञानी त्वात्मैव मे मतम् ।' इत्युक्तत्वात् ॥ १३, १४ ॥

कुत्राप्युद्वेगादिराहित्यमपि मन्निष्कलभक्तिनिष्ठलक्षणमाह—

यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः ।
हर्षामर्षभयोद्वेगैर्मुक्तो यः स च मे प्रियः ॥ १५ ॥

यस्मादिति । यस्मात् संन्यासिनो लोक प्राणिपूगो नोद्विजते उद्वेग क्षोभ न गच्छति, तथा य सन्यासी लोकात् प्राणिमात्रादपि नोद्विजते न सतप्यते, यश्च परिव्राट् स्वेप्सितविषयाधिगमे रोमाञ्चादिलिङ्गो हर्षश्च तदलाभे परश्रेयस्यसहिष्णुता अमर्षश्च द्वैतदर्शनजं भय त्रासश्च उद्वेग' सदा विक्षिप्तचित्तता च, तै हर्षामर्षभयोद्वेगै मुक्तो भवति, स च ब्रह्मात्मनिष्ठो मे प्रिय' ॥ १५ ॥

निरपेक्षत्वादिकमपि ज्ञानिनो लक्षणमित्याह—

अनपेक्षः शुचिर्दक्ष उदासीनो गतव्यथः ।
सर्वारम्भपरित्यागी यो मद्भक्तः स मे प्रियः ॥ १६ ॥

अनपेक्ष इति । अनपेक्ष देहेन्द्रियादिषु आत्मत्वात्मीयत्वाभिमानवैकल्येन कुत्राप्यपेक्षाऽभावात् निस्पृह इत्यर्थ । शुचि मद्भावनोदकेन स्वान्तर्बहिर्विलसिताशुचे क्षालितत्वात् । दक्ष प्रत्यक्परैक्यानुसधानकवलितजामिताकत्वात् । उदासीन' मित्रामित्रेष्वपि समत्वेन पक्षपाताभावात् । गतव्यथ परैस्ताडने कृते ऽप्यविक्षिप्तचित्तत्वात । सर्वे चारभ्यन्त इत्यारम्भाश्चेहामुत्रविजृम्भितकामकार्यकर्माणि सर्वारम्भा' तान्परित्यक्तुं शीलमस्येति सर्वारम्भपरित्यागी । एवविशेषणसपन्नो यो मद्भक्त स मे प्रिय ॥ १६ ॥

द्वेषहर्षादिराहित्यमपि ज्ञानिलक्षणमित्याह—

यो न हृष्यति न द्वेष्टि न शोचति न काङ्क्षति ।
शुभाशुभपरित्यागी भक्तिमान्यः स मे प्रियः ॥ १७ ॥

य इति । इष्टप्राप्तितो न हृष्यति अनिष्टप्राप्तितो न द्वेष्टि । प्रियवस्तुवियोगे न शोचति । न चाप्राप्त वस्तु किंचिदपि काङक्षति ।

शुभ कर्म स्वर्गादिप्रापकत्वात्, अशुभ कर्म निरयप्रापकत्वात्, शुभाशुभे कर्मणी परित्यक्तु सन्यसितु शीलमस्येति शुभाशुभपरित्यागी यो ऽयमुक्त-लक्षणविशिष्टो भक्तिमान् स मे प्रिय ॥ १७ ॥

सर्वत्र समत्वमपि ज्ञानिलक्षणमित्याह—

समः शत्रौ च मित्रे च तथा मानावमानयोः ।
शीतोष्णसुखदुःखेषु समः सङ्गविवर्जितः ॥ १८ ॥
तुल्यनिन्दास्तुतिर्मौनी संतुष्टो येन केनचित् ।
अनिकेतः स्थिरमतिर्भक्तिमान्मे प्रियो नरः ॥ १९ ॥

सम इति । शत्रुरापत्काले ऽपकारी तस्मिन् शत्रौ, मित्रमापत्काले प्राप्ते यथाबलमापन्मोचक तस्मिन्मित्रे च सम विषमबुद्धिविकलत्वात् । मान सभाया सन्मति., अवमान तत्रैवावमति , तयोर्मानावमानयो , तथा शीतोष्णसुखदु खेषु च सम । तत्र हेतु सर्वत्र सङ्गविवर्जित । निन्दा च स्तुतिश्च निन्दास्तुती, ते तुल्ये यस्य स तुल्यनिन्दास्तुति. । मौनमस्यास्तीति मौनी नियतवाग्व्यापारत्वात् । येन केनचित् शरीरस्थितिमात्रप्रयोजनेन संतुष्टः । तथा च स्मृति.—

'येन केनचिदाच्छन्नो येन केनचिदाशित ।
यत्र क्वचन शायी स्यात्त देवा ब्राह्मणं विदु ॥'

इति । निकेत आश्रयो निवासो गृहादिर्यस्य सन्यासिनो नियतो न विद्यते सो ऽनिकेत । 'ग्राम एकरात्र नगरे पञ्चरात्र क्षेत्रे सप्तरात्र तदुपरि न वसेत्' इति श्रुते· । ब्रह्मैवाहमहमेव ब्रह्मेति स्थिरा मतिर्यस्य स स्थिरमतिः

स्थितप्रज्ञ इत्यर्थ । य स्वात्मातिरिक्तवस्तुनि जात्वपि न रमत इति नरो ज्ञानी । स हि मे प्रियो भक्तिमान् ॥ १९ ॥

निष्कलब्रह्मभक्तिनिष्ठाना सन्यासिनामद्वेष्टेत्यादिना धर्मपूगो य प्रपञ्चितस्तमुपसहरति—

ये तु धर्म्यामृतमिदं यथोक्तं पर्युपासते।
श्रद्दधाना मत्परमा भक्तास्ते ऽतीव मे प्रियाः॥ २०॥ इति।

इति श्रीमद्भगवद्गीतासु० भक्तियोगो नाम द्वादशो ऽध्याय ॥

ये त्विति । ये तु सन्यासिन स्वधर्मादनपेत धर्म्यम्, धर्म्यं च तदमृत चेत्यमृतत्वहेतुत्वात् धर्म्यामृतमिदमद्वेष्टेत्यादि यथोक्तम् । श्रद्दधाना श्रद्धावन्तो भूत्वा निष्कलब्रह्माह वासुदेव परम पुरुषार्थो येषा ते मत्परमा सन्त पर्युपासते नित्यमनुतिष्ठन्ति, ते मे परमार्थज्ञानलक्षणा भक्तिमारूढा भक्ता प्रिया नेतर इत्यर्थ । 'भक्तास्ते ऽतीव मे प्रिया' इत्यादिना 'प्रियो हि ज्ञानिनो ऽत्यर्थम्' इति यदुक्त तद्व्याख्यातम् । यतो मत्प्रापकधर्म्यामृतोपासनान्मद्भक्ता भूत्वा विदेहकैवल्यं यान्ति, अत कैवल्येच्छुना मत्प्रापकधर्म्यामृतमनुष्ठेयम् । इतिशब्द अध्यायपरिसमाप्त्यर्थ ॥ २० ॥

यन्निष्कलब्रह्मभक्तिनिष्ठा अव्यवधानत ।
कैवल्य यान्ति स हरिस्तन्निष्ठा मे प्रयच्छतु ॥
येन श्रीकृष्णदेवेन स्वगीतामध्यषटकत ।
निरूपितस्तत्पदार्थस्तत्साक्षात्कृतिरस्तु मे ॥

इति श्रीमद्भगवद्गीतार्थप्रकाशिकाया द्वादशो ऽध्याय ॥

त्रयोदशो ऽध्यायः

गीताऽऽद्यमध्यषट्कोक्ततत्त्वपदकलक्ष्ययो ।
मिथो भेदभ्रम मार्ष्टुमन्त्यषट्क निगद्यते ॥
मज्ज्ञानदानत स्वीयानुद्धरामि भवार्णवात् ।
इत्युक्त तज्ज्ञानमिह स्फुटीकर्तुमुपक्रमः ॥

अतीतानन्तराध्याये ये त्वनन्येन योगेन मामुपासते तेषा मृत्यु-ससारसागरादुद्धर्ता भवामीति यत्प्रतिज्ञातम्, न च ब्रह्मात्मैक्यज्ञान विना स्वाज्ञानभवभावादुद्धरण सभवतीति तत्प्रतिज्ञातार्थसिद्धये, केन पुनस्तत्त्व-ज्ञानेन निष्कलब्रह्मभक्तिनिष्ठा सन्यासिन 'अद्वेष्टा' इत्यादियथोक्त-धर्मपूगचारिणो भूत्वा भगवद्रूपा भवन्तीत्याकाङ्क्षापूरणार्थ वा त्रयोदशाध्या-योपक्रम । सप्तमाध्याये परमात्मन अपरा परेति च द्वे प्रकृती सूचिते याभ्यामिद जगदाविर्भावतिरोभावहेतुतामापन्नमिव लक्ष्यते तत्प्रकृतिद्वयस्व-रूपकथनेन तत्कल्पनाऽऽस्पदब्रह्मात्मतत्त्वं प्रतिपिपादयिषु श्रीभगवानु-वाच—

श्रीभगवानुवाच—

इदं शरीरं कौन्तेय क्षेत्रमित्यभिधीयते ।
एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विदः ॥ १ ॥

इदमिति । हे कौन्तेय! घटवत्परिदृश्यमानमिद बाल्याद्यवस्थाभि-राध्यात्मिकादिदु खैश्च शीर्यत इति शरीरमिन्द्रियद्वयसघातास्पदत्वेन भोगा-यतनत्वात् । क्षेसार कर्षक त्रायत इति क्षेत्रम् । तत्र यद्वद्वीजमुप्त फलति तद्वद्यत्र कर्मफलं निष्पद्यते तदेतत्क्षेत्रमिति शब्देनाभिधीयते, ससारफलोद्भव-भूमित्वात् । इत्थ दृश्यत्वेन क्षेत्रस्वरूपमभिधाय तद्विलक्षणत्वेन तद्द्रष्टार विशिनष्टि—क्षेत्रज्ञ इति । उपदेशमन्तरैतत्क्षेत्रमहममाभिमानास्पदत्वेन यो वेत्ति तमेव ससारिण तत्क्षेत्रक्षेत्रज्ञस्वरूप विदन्तीति तद्विद क्षेत्रज्ञ इति शब्देन प्राहु कथयन्ति ॥ १ ॥

व्यष्टिक्षेत्रज्ञ ससारित्वेन निर्दिश्य समष्टिक्षेत्रज्ञमससारित्वेन परा-मृशन् क्षेत्रक्षेत्रज्ञयाथाऽऽत्म्यज्ञानमेव कैवल्यसाधनमित्युपदिशति—

क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत ।
क्षेत्रक्षेत्रज्ञयोर्ज्ञानं यत्तज्ज्ञानं मतं मम ॥ २ ॥

क्षेत्रज्ञमिति । य पूर्वस्मिन् श्लोके क्षेत्रज्ञ इति ससारित्वेन प्रकटित सर्वक्षेत्रेषु त मा ब्रह्मादिस्तम्बान्तानेकक्षेत्रोपाधिविलक्षणत्वेन सर्वक्षेत्रज्ञम-ससारिणमपि विद्धि । घटादिप्रपञ्चानुस्यूतव्योमवत्सर्वक्षेत्रानुस्यूतत्वात् । तत्त्व-मस्यहंब्रह्मास्मीत्यादिश्रुतिसिद्धव्यष्टिसमष्ट्यनुगतचितोरेकत्वादिति भाव । चापिशब्दाभ्या व्यष्टिसमष्टिचितोरेकत्व द्योत्यते । क्षेत्रक्षेत्रज्ञविज्ञानमेव सम्यग्ज्ञानमिति स्तौति—यत्तदिति । क्षेत्र स्वाविद्याद्वयतत्कार्यजात दृश्यम नात्मा, तस्य याथाऽऽत्म्य मायामात्र मिथ्येति निश्चय , क्षेत्रज्ञस्तु स्वातिरिक्त क्षेत्रजात नास्तीति यो जानाति स हि द्रष्टा प्रत्यगभिन्नपरमात्मा, तस्य याथाऽऽत्म्य स्वेतरभिदाऽसहसत्तासामान्यरूप स्वस्यैव क्षेत्रस्वरूपत्वेन तदन्तर्या-

मित्वेन तत्सत्तास्फूर्तिसुखदातृत्वेन तदध्यारोपापवादास्पदत्वेन तदुभयदोषा-स्पृष्टत्वेन च विद्यमानत्वाद्यस्मात् क्षेत्रक्षेत्रज्ञयाथाऽऽत्म्यव्यतिरेकेण सम्यग्ज्ञान-गोचरो न किंचिद्वस्त्वस्ति । तस्माद्येन ज्ञानेन क्षेत्रक्षेत्रज्ञावनात्मत्वात्मत्वाभ्या ज्ञायेते विषयीक्रियेते यत्क्षेत्रक्षेत्रज्ञयाथाऽऽत्म्यज्ञान तज्ज्ञानमेव सम्यग्ज्ञानमिति मे मम विष्णोर्मतमभिप्राय ॥ २ ॥

श्लोकद्वयमेव व्याख्याय प्रथमश्लोकपूर्वार्धोक्तक्षेत्रस्वरूप प्रपञ्चयितु प्रतिजानीते—

तत्क्षेत्रं यच्च यादृक् च यद्विकारि यतश्च यत् ।
स च यो यत्प्रभावश्च तत्समासेन मे शृणु ॥ ३ ॥

तदिति । यच्च क्षेत्रं स्वभावतो जडं यादृक् च जन्मादिकर्मवत् यद्विकारि चेन्द्रियादिकृतविकारसहितम् । यच्च स्थावरजङ्गमादिभेदभिन्नवत् चशब्दपञ्चकं त्वितरेतरसमुच्चयार्थम् । तदेतत्क्षेत्रं शरीरं यतो यस्मात् क्षेत्र-ज्ञेश्वरादाविर्भाव तिरोभाव च पुन पुनरुपैति य स्वरूपात्कदाचिदपि न व्यभिचरति स च क्षेत्रज्ञ परमात्मा यत्प्रभावो ये प्रभावा इन्द्रिय-द्वयोपाधिकृता द्रष्टृत्वादिशक्तयो यस्य स यत्प्रभावश्च तदेतद्यथाविशेषित क्षेत्रक्षेत्रज्ञयाथाऽऽत्म्य समासेन मदुक्तवाक्यत शृणु । श्रुत्वा सम्यगवधारये-त्यर्थ. ॥ ३ ॥

श्रोतृबुद्धिप्ररोचनाय यद्विवक्षित क्षेत्रक्षेत्रज्ञयाथाऽऽत्म्य तज्ज्ञान स्तौति —

ऋषिभिर्बहुधा गीतं छन्दोभिर्विविधैः पृथक् ।
ब्रह्मसूत्रपदैश्चैव हेतुमद्भिर्विनिश्चितैः ॥ ४ ॥

ऋषिभिरिति । भृग्वादिवसिष्ठान्तै महर्षिभि क्षेत्रक्षेत्रज्ञयाथाऽऽत्म्यज्ञान परमपुरुषार्थहेतुत्वेन गीत निरूपितम् । छन्दासि ऋगादीनि, तै छन्दोभि अशीत्युपरिशताधिकसहस्रशाखाभेदेन विविधैर्वेदान्तै उपनिषद्भि

'उपक्रमोपसहारावभ्यासो ऽपूर्वता फलम् ।
अर्थवादोपपत्ती च लिङ्ग तात्पर्यनिर्णय ॥'

इति षड्विधलिङ्गत क्षेत्रक्षेत्रज्ञयाथाऽऽत्म्यमेव गीतम् । कि च क्षेत्रक्षत्रज्ञयाथाऽऽत्म्यज्ञानगोचरो ब्रह्म 'यतो वा इमानि भूतानि जायन्ते' इत्यादितटस्थलक्षणवाक्यैरेभि सूच्यते सूच्यत इति ब्रह्मसूत्राणि । तथा 'सत्य ज्ञानमनन्त ब्रह्म' इत्यादिस्वरूपलक्षणवाक्यै. पद्यते साक्षाज्ज्ञायत इति पदानि तै ब्रह्मसूत्रपदैश्च बहुधा गीतम् । कि च 'सदेव सोम्यदमग्र आसीदेकमेवाद्वितीयम्' 'को ह्येवान्यात्कः प्रण्यात्, यदेष आकाश आनन्दो न स्यात्, एष ह्येवानन्दयाति' इत्यादिभिर्हेतुमद्भि युक्तिमद्भि श्रुतिवाक्यैर्विनिश्चितै· असदिग्धतया प्रतिपादकै विस्तरेणोक्त सक्षेपत तुभ्य प्रतिपादयामीत्यर्थ । यद्वा 'अथातो ब्रह्मजिज्ञासा' इत्यादीनि 'अनावृत्ति शब्दादनावृत्ति शब्दात्' इत्यन्तानि तुर्यतुर्यप्रतिपत्त्यर्थ षोडशपादात्मकानि ब्रह्मसूत्राणि गृह्यन्ते । तदेतत् क्षेत्रक्षेत्रज्ञयाथाऽऽत्म्यज्ञानगोचरस्तुर्यतुरीय ब्रह्म पद्यते निश्चीयत एभि पादैरिति पदानि, तैर्ब्रह्मसूत्रपदै हेतव तत्तदधिकरणविषयवाक्यपूगा हेतुमन्त्यधिकरणसूत्राणि, तैर्हेतुमद्भि न्यायतो विनिश्चितै ब्रह्मसूत्रपदै विस्तृतार्थ सक्षिप्योच्यत इत्यर्थ ॥ ४ ॥

स्वोक्तक्षेत्रक्षेत्रज्ञयाथाऽऽत्म्यज्ञान सर्ववेदान्तसिद्धान्तत्वेन स्तुत्वा ऽथ किं तत्क्षेत्रं को ऽयं क्षेत्रज्ञ किं तयोस्तादाऽऽत्म्यं किं तत्साधनमिति जिज्ञासवे ऽर्जुनायादौ क्षेत्रस्वरूप स्फुटयति —महाभूतानीति द्वाभ्याम् ।

इति स्मृते । सदा श्रेयोमार्गेऽव्यवसायित्व स्थिरतेत्याह—स्थैर्यमिति । आत्मशब्दवाच्यकार्यकरणसंघातस्योपवासादिना श्रेयोमार्गनियमन निग्रह इत्याह— आत्मविनिग्रह इति ॥ ७ ॥

न केवल ज्ञानस्यान्तरङ्गसाधनान्यमानित्वादीनि, कि तु तथाविधानि वैराग्यादीन्यपीति विशिनष्टि—

इन्द्रियार्थेषु वैराग्यमनहंकार एव च ।
जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनम् ॥ ८ ॥

इन्द्रियेति । ज्ञानकर्मेन्द्रियाणामर्थेषु शब्दादिष्वदृष्टदृष्टनष्टविषयभोगेषु नश्वरत्वभावनयोत्था विरक्तता विरागत्वमित्याह—वैराग्यमिति । देहादावहभावाभावो ऽनहकार इत्याह—अनहकार एव चेति । अवधारणचशब्दाभ्या अहकारवत्कुत्रापि ममकारो न कर्तव्य इति द्योत्यते । जन्म च मृत्युश्च जरा च व्याधयश्च दु खानि च तेषु जन्मादिदु खान्तेषु प्रत्येकं दोषदर्शन कर्तव्यमित्याह—जन्मेति । जन्मनि गर्भवासयोनिद्वारतो नि सरणम् । मृत्यौ कार्यकरणसंघातात्मककलेबरनिकृन्तनम् । जराया प्रज्ञाशक्तितेज कुण्ठनम् । व्याधावसहिष्णुत्वम् । दु खेष्वाध्यात्मिकादिषु विक्षिप्तचित्तत्वम् । तेषु जन्मादिषु पञ्चसु दोषदर्शन दोषानुसधान सदा कर्तव्यमित्यर्थ ॥ ८ ॥

पुनर्ज्ञानस्यान्तरङ्गत्वेन हेत्वन्तरमाह—

असक्तिरनभिष्वङ्गः पुत्रदारगृहादिषु ।
नित्यं च समचित्तत्वमिष्टानिष्टोपपत्तिषु ॥ ९ ॥

असक्तिरिति । पुत्रदारगृहादिषु आदिशब्देन दासीदासपरिजनेषु चात्मीयाभिमानाभावो ज्ञानसाधनमित्याह —असक्तिरिति । पुत्रभार्यादिषु सुखमसुख वा गतेष्वहमपि सुखी दु खी वेति तादाऽऽत्म्याभावो ऽपि ज्ञानसाधनमित्याह—अनभिष्वङ्ग इति । इष्ट सुखमनिष्ट दु खम् । तदुपपत्तिषु हर्षविषादराहित्य ज्ञानसाधनमित्याह—समचित्तत्वमिति ॥ ९ ॥

उक्तेभ्यो ज्ञानस्यान्तरङ्गसाधनमाह—

मयि चानन्ययोगेन भक्तिरव्यभिचारिणी ।
विविक्तदेशसेवित्वमरतिर्जनसंसदि ॥ १० ॥

मयीति । वासुदेवो ऽहमहमेव वासुदेव इति ज्ञानमनन्ययोग, तेनानन्ययोगेन परमेश्वरे मयि अव्यभिचारितया भजन ज्ञानान्तरङ्गसाधनमित्याह—भक्तिरिति । सुप्तेरुत्थाय पुन सुप्त्यन्त भगवदनुसधानातिरिक्तव्यापारपराङ्मुखत्वमव्यभिचारित्वम् । स्वभावत: संस्कारतो वा अशुचिभि: चोरव्याघ्रभयादिभिश्च रहितो ऽरण्यनदीपुलिनदेवालयादिर्विविक्तो देश, तं सेवितु शीलमस्येति विविक्तदेशसेवी, तद्भावो विविक्तदेशसेवित्वमपि ज्ञानसाधनमित्याह—विविक्तेति । विविक्तदेशे हि यतेश्चित्त प्रसीदति । प्राकृतजनाना ससदि ससर्गाभावो ज्ञानसाधनमित्याह—अरतिरिति ॥ १० ॥

इतश्च साधनान्तरमाह—

अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनम् ।
एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतो ऽन्यथा ॥ ११ ॥

अध्यात्मेति । ब्रह्मात्मैक्यमधिकृत्य वर्तमान ज्ञानमध्यात्मज्ञानम्, तस्मिन् अध्यात्मज्ञाने नित्यत्वेन निष्ठावत्त्व ज्ञानसाधनमित्यादिशति—अध्यात्मेति । तत्त्वपदलक्ष्यैकनिष्ठत्वमित्यर्थ, अमानित्वादिसाधनाना प्रत्यक्परैक्यज्ञाननिमित्तत्वात् । तद्धि तत्त्वज्ञानमुपायोपेययोरिकत्वात् । तस्य तत्त्वज्ञानस्यार्थो मोक्ष स्वाविद्यातत्कार्यनिवृत्तिलक्षणत्वात् । तस्य सर्वोत्कृष्टत्वदर्शन ज्ञानमिति व्यपदिशति—तत्त्वेति । तत्त्वज्ञानार्थपर्यालोचनया हि तत्साधनानुष्ठानप्रवृत्ति सभवति । अमानित्वादितत्त्वज्ञानार्थदर्शनान्तं विशतिसख्याक साधन यदुक्त तदेतज्ज्ञानार्थत्वात् ज्ञानमिति प्रोक्तमित्याचष्टे—एतदिति । यत् अत एतस्माद्यथोक्तज्ञानसाधनादन्यथा तद्विपर्यय मानित्वदम्भित्वाद्यज्ञानमिति च प्रोक्त वसिष्ठादिभिरित्यर्थ अनित्यससारहेतुत्वात्, तत्परिहर्तव्यम् ॥ ११ ॥

अमानित्वादीना ज्ञानसाधनत्वेन ज्ञानत्वमभिधाय तेन यज्ज्ञातव्य क्षेत्रज्ञयाथाऽऽत्म्यस्वरूप तद्विशदयति—ज्ञेयमिति षड्भि ।

ज्ञेयं यत्तत्प्रवक्ष्यामि यज्ज्ञात्वा ऽमृतमश्नुते ।
अनादिमत्परं ब्रह्म न सत्तन्नासदुच्यते ॥ १२ ॥

ज्ञेयमिति । यज्ज्ञातव्य प्रत्यगभिन्नब्रह्मस्वरूप ज्ञात्वा जन्तुरमृत मोक्षमश्नुते । यदमानित्वादिसाधनसिद्धज्ञानज्ञेय तत्तुभ्य प्रकर्षेण वक्ष्यामि । कि तदित्यत आह—अनादिमदिति । आदि कारणमस्यास्तीति आदिमत्, आदिमन्न भवतीत्यनादिमत्, आदेरप्यादित्वात्, स्वाविद्याद्वयतत्कार्यात्परत्वेनोपबृहणात् पर निरतिशय ब्रह्म आदि कारण यस्य न विद्यत इति बहुव्रीहिणा ऽनादित्वे सिद्धे पुनर्मतुप प्रयोगश्छान्दसः । यद्वा, स्वभिन्नकार्यकारणाभावादनादिवासुदेवाख्यमह पर

तत्त्व यस्य तन्मत्परमिति च पदद्वय मम विष्णो परमपद प्रत्यक्पर-चिदैक्यरूप ब्रह्मेत्यर्थ । किं तद्ब्रह्म सदसद्वा नाद्य, बाह्येन्द्रियग्राह्य विधिमुखत प्रमाणविषयो वा सच्छब्देनोच्यते, बाह्येन्द्रियाग्राह्यत्वादवैधेयस्वरूपत्वाच्च तद्ब्रह्म न सदुच्यते । तथा सत्यसत्त्व निरङ्कुशमिति तत्र न द्वितीय इत्याह—नासदिति । अन्तरिन्द्रियग्राह्य निषेधविषयो वा वस्त्वसच्छब्देनोच्यते । सर्वेन्द्रियग्राहकत्वेन 'अस्थूलमनणु[1]' इत्यादिनिषेधातीतविभवत्वात् केनाप्यविषयीकृतत्वाच्च सदसद्विलक्षण ब्रह्मेत्यर्थ ॥ १२ ॥

'ज्ञेय यत्तत्प्रवक्ष्यामि' इति प्रतिज्ञाय 'तन्न सन्नासत्' इति यदुक्त तदसाधु, सत्त्वेनासत्त्वेन वा ज्ञातुमविषयस्य ज्ञेयत्वासभवादित्याशङ्क्य 'अन्यदेव तद्विदितादथो अविदितादधि[2]' इति श्रुते विदिताविदितादन्यत्वेन ज्ञेयत्वप्रतिपादनपरत्वात् । जातिक्रियागुणसबन्धशून्यस्य ज्ञेयत्वानुपपत्तिरिति चेन्न, तद्विलक्षणत्वेनैव ज्ञेयत्वात् । गौरश्व इति वा जातितो ज्ञेयत्व नोपपद्यते, सभवप्रलयाभावात् । न च पाचक पाठक इति वा क्रियातो ज्ञेयत्वम्, निष्क्रियत्वात् 'निष्कल निष्क्रिय शान्तम्[3]' इति श्रुते. । न हि शुक्ल. कृष्ण इति वा गुणतो ज्ञेयत्वम्, निर्गुणत्वात् 'केवलो निर्गुणश्च[4]' इति श्रुते । नापि धनी गोमानिति वा सबन्धतो ज्ञेयत्वम्, अद्वैतत्वात् 'एकमेवाद्वितीयम्[5]' इति श्रुते. । तद्विलक्षणत्वेन ज्ञेयत्व सिद्धमित्यभिप्रेत्य सर्वप्रत्यगभेदेन ज्ञेयत्व प्रत्यादिशति—

[1] बृ, ३, ८, ८
[2] के, १, ४
[3] श्वे, ६, १९
[4] श्वे ६, ११
[5] छा, ६, २, १,

सर्वतःपाणिपादं तत्सर्वतोऽक्षिशिरोमुखम् ।
सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठति ॥ १३ ॥

सर्वत इति । यत्पाणिपादादिकरणसघाताढ्य तद्धि क्षेत्रमुच्यते । क्षेत्र-तत्कार्यसबन्धास्पर्श्यपि तदुपाधिक इव यो ऽभिलक्ष्यते स हि क्षेत्रज्ञ पर मात्मा तदारोपितक्षेत्रोपाधे मिथ्यात्वेन सदसद्विलक्षण क्षेत्रज्ञयाथाऽऽत्म्य ज्ञेयत्वेन व्यपदिश्यते, तस्येन्द्रियद्वयागोचरत्वेन निष्प्रपञ्चत्वात् । तदधि-गमाय खलु 'अध्यारोपापवादाभ्या निष्प्रपञ्च प्रपञ्च्यते' इति सप्रदायविदा वचन प्रवृत्तम् । क्षेत्रजातस्य मिथ्यात्वे ऽपि क्षेत्रज्ञयाथाऽऽत्म्याधिगमोपायत्वात् तदुपाधिकचैतन्याधिगमे निरुपाधिकचैतन्यावगमो भवेदिति सोपाधिक वैराज भावमाचष्टे—सर्वत इति । सर्वक्षेत्रानुस्यूतत्वेन सर्वत पाणय पादाश्चा-स्येति यद्वैराज तत्त्व तत्सर्वत पाणिपादम् । तथा सर्वत अक्षीणि शिरासि मुखानि च यस्य तत्सर्वतोऽक्षिशिरोमुखम् । सर्वत श्रुति श्रवणेन्द्रिय तदस्येति श्रुतिमत् । एव जीवलोके सर्वमावृत्य व्याप्य यत्तिष्ठति तदेतद्वैराजं ब्रह्म सर्वोपेयभूतक्षेत्रज्ञयाथाऽऽत्म्योपायत्वात् ज्ञेयमित्युच्यते ॥ १३ ॥

क्षेत्रज्ञे सर्वक्षेत्राध्यारोपात् तद्वत्ता स्यादित्यपेक्षायामाह—

सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जितम् ।
असक्तं सर्वभृच्चैव निर्गुणं गुणभोक्तृ च ॥ १४ ॥

सर्वेति । सर्वाणि च बाह्यज्ञानकर्मेन्द्रियाण्यन्तरिन्द्रियाणि च सर्वेन्द्रियाणि, तेषा गुणा शब्दादयो वचनादय. सकल्पादयश्च तै श्रोतेत्यादिना ऽवभासत इति सर्वेन्द्रियगुणाभासम्, सर्वेन्द्रियव्यापृतवत् ज्ञेयत्वात् 'ध्यायतीव लेलायतीव' इति श्रुते. । कथमेवमवगम्यत इति

तत्राह—सर्वेति । सर्वेन्द्रियविवर्जित सर्वकरणैरव्यापृतमपि तत्तत्करणव्यापृत्यास्पदत्वात्, तथा च श्रुति —

‘ अपाणिपादो जवनो ग्रहीता
पश्यत्यचक्षु स शृणोत्यकर्ण ।
स वेत्ति वेद्य न च तस्य वेत्ता
तमाहुरग्र्य पुरुष महान्तम्[1] ’

इति । सर्वेन्द्रियविवर्जितत्वेनापाणिपादत्वे ऽपि जवनादिक्रियावत्त्वदर्शनात् सक्रिय ब्रह्मेति चेन्न, ‘ अन्धो मणिमविन्दत । तमनङ्गुलिरावयत् । अग्रीव प्रत्यमुञ्चत् । तमजिह्वो असश्चत[2] ’ इत्यादिश्रुतिवदस्या श्रुते ज्ञेयस्याक्रियत्वबोधकत्वात् । तथा ऽपि ज्ञेयस्योपाधियोगेन तत्सक्ति स्यादिति तत्राह—असक्तमिति । व्यावृत्तघटाद्यनुवृत्तव्योमवत् स्वव्यावृत्तक्षेत्रतत्कार्यसश्लेषायोगात् । तथा सति सर्वास्पदत्व कुत इति तत्राह—सर्वभृदिति । यतो मृगतृष्णिकाऽऽदि निरास्पदत्वेन भात्यत सर्व बिभर्तीति सर्वभृत् । सर्वत्र सद्बुद्ध्यनुगमात् सर्वास्पदं चेद्ब्रह्म सगुण स्यादिति तत्राह—निर्गुणमिति । स्वभिन्नसर्वाभावेन तदास्पदत्वस्य मृग्यत्वान्निरास्पदमपि सन्निर्गुणं ब्रह्म स्वभावत सत्त्वरजस्तमोगुणाना भावाभावोपलब्धृत्वात् गुणभोक्तृ चेत्युपचर्यते । अतो न निर्गुणत्वव्याहति ॥ १४ ॥

इतो ऽपि सदसद्विलक्षणत्वेन ज्ञेय ब्रह्मास्तीत्याह—

बहिरन्तश्च भूतानामचरं चरमेव च ।
सूक्ष्मत्वात्तदविज्ञेयं दूरस्थं चान्तिके च तत् ॥ १५ ॥

[1] श्वे, ३, १९
[2] तै, आ, प्र, १

बहिरिति । स्वाविद्याकल्पितक्षेत्रमपेक्ष्य त्वगिन्द्रियार्थबाह्य बहिरुच्यते। लिङ्गदेहमपेक्ष्य प्रत्यगात्मपर्यन्तमन्तरुच्यते। चेतनाचेतनाना भूताना बहिरन्तश्च कटकमकुटकुण्डलानुस्यूतसुवर्णवत्स्थितम् तिष्ठत्वेव बहिरन्तस्तदन्तराले नास्तीति चेदुच्यते, सैन्धवघनवत् सर्वत्रैकरसत्वात् बहिरन्तरिव तदन्तराले ऽप्यनुस्यूतमित्यर्थ । किं च तदेवाचर स्थावर चरमेव न जङ्गम भूतजात कार्यजातस्य कारणानतिरिक्तत्वात् । तथा चेत् सर्वैरिदमित्थमिति किं न ज्ञायते ? उच्यते । यथा व्योमतत्त्वमविदुषा सर्वासङ्गत्वेन ज्ञेयमपि व्योमाविज्ञेय भवति । तथा ऽविदुषा स्वेन रूपेण ज्ञेयमपि व्योम्नो ऽप्यन्तरतमत्वेन सुसूक्ष्मत्वात् तदविज्ञेय भवति । विदुषा तु 'ब्रह्मैवेद सर्वम्[1]' 'आत्मैवेद सर्वम्'[2] इत्यादिप्रमाणदृष्टित्वात्, नित्यविज्ञातं स्वरूपेण ज्ञातु शक्यत्वात्, तत्पुनरविदुषा दूरस्थम् । आत्मभूतमप्यनन्तकोटियोजनान्तरितमिव स्थितत्वात्, तत्पुनर्विदुषा त्वन्तिके च, नित्यसंनिहितप्रत्यगभिन्नत्वात्,

'तदेजति तन्नैजति तद् दूरे तद्वन्तिके ।
तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यत[3] ॥'

इति श्रुते ॥ १५ ॥

सर्वविलक्षणत्वेन ज्ञेयतासिद्ध्यै हेत्वन्तरमाह—

अविभक्तं च भूतेषु विभक्तमिव च स्थितम् ।
भूतभर्तृ च तज्ज्ञेयं ग्रसिष्णु प्रभविष्णु च ॥ १६ ॥

[1] मु, २, २, ११
[2] छा, ७, २५, २
[3] ई, ५

अविभक्तमिति । चेतनाचेतनात्मकेषु भूतेष्वविभक्त कारणात्मनैकत्वात् कार्यात्मना विभक्त प्रतिशरीर भिन्नमिव स्थितम् । इवशब्दस्वारस्यादात्मभेदकल्पने घटादेरिवानात्मत्व स्यात्, घटाद्यवच्छिन्नव्योमवदात्मैकत्व द्योत्यते । यदेवंप्रकारेण स्थित भाति तदेतज्ज्ञेयम् । स्थितिकाले भूतानि बिभर्तीति भूतभर्तृ च विष्णुरूपेण तत्पालकत्वात्, प्रलयकाले च सर्व ग्रसति इति ग्रसिष्णु रुद्रात्मना ग्रसनशीलत्वात्, सृष्टिकाले कार्यात्मना प्रभवतीति प्रभविष्णु च चतुराननात्मना प्रभवनशीलत्वात् । न च कार्यकारणयोर्भेदात् नाद्वैतसिद्धिरिति वाच्यम् । कार्यमात्रस्य कारणविवर्तत्वात् यथा ऽनुवृत्तरज्जौ व्यावृत्तसर्पादिकमनुवृत्तरज्ज्वतिरेकेण निरूपयितुमशक्यम्, तथैवानुवृत्तब्रह्मातिरेकेण व्यावृत्तकार्यजातस्य निरूपयितुमशक्यत्वात् नाद्वैतत्वव्याहतिरित्यर्थ ॥ १६ ॥

इतश्च क्षेत्रज्ञस्य सर्वावभासकत्वेन तमस परत्वेन ज्ञेयत्व स्फुटयति –

ज्योतिषामपि तज्ज्योतिस्तमसः परमुच्यते ।
ज्ञानं ज्ञेयं ज्ञानगम्यं हृदि सर्वस्य विष्ठितम् ॥ १७ ॥

ज्योतिषामिति । नक्षत्रचन्द्रार्कादिज्योतिषामपि ज्योति सर्वप्रकाशकत्वात् 'येन सूर्यस्तपति तेजसेद्ध[1]' 'तस्य भासा सर्वमिदं विभाति[2]' इति श्रुते । ज्ञेयस्य ज्योतिषा ज्योतिष्ट्वे तत्कुत्रासनमर्हतीति तत्राह— तमस· परमिति । तमस· स्वाज्ञानतत्कार्यात्परत्वेन विभानात् तमस परमुच्यते, 'आदित्यवर्ण तमस परस्तात्' इति मन्त्रवर्णात् । विशुद्धसत्त्व-

[1] तै स ३ १२ ९७
[2] कठ ५. १५

बुद्धिवृत्तावभिव्यक्तं ज्ञानममानित्वादिज्ञानसाधनैकलभ्यत्वात् ज्ञानगम्यं क्षेत्रज्ञयाथाऽऽत्म्यं ज्ञेयम् । तत्कुत्रोपलभ्यत इति तत्राह—हृदीति । सर्वस्य प्राणिजातस्य हृदि प्रत्यगभेदेन विशेषतस्तिष्ठतीति विष्ठितम् । सर्वगमपि तत्रैवोपलभ्यमानत्वादित्यर्थः ॥ १७ ॥

क्षेत्रक्षेत्रज्ञयाथाऽऽत्म्यस्वरूपमुक्त्वा तज्ज्ञानफलमुपसंहरति—

इति क्षेत्रं तथा ज्ञानं ज्ञेयं चोक्तं समासतः ।
मद्भक्त एतद्विज्ञाय मद्भावायोपपद्यते ॥ १८ ॥

इतीति । इत्येवमुक्तप्रकारेण महाभूतादि धृत्यन्तं क्षेत्रममानित्वादि तत्त्वज्ञानार्थदर्शनपर्यन्तं ज्ञानमनादिमदित्यादि तमसः परमित्यन्तं ज्ञेयं समासतो मयोक्तम् । एतावान् हि सर्ववेदान्तार्थो गीताऽर्थश्च । तत्र कोऽधिक्रियत इति तत्राह—मद्भक्त इति । ब्रह्मादिस्तम्बान्तदेशिके मयि समर्पितसर्वात्मभावो मद्भक्तः सन्नेतद्यथोक्तं क्षेत्रक्षेत्रज्ञयाथाऽऽत्म्यं विज्ञाय प्रत्यगभिन्नतया मद्रूपेणावस्थानं मद्भावो मोक्षः, तस्मै मद्भावायोपपद्यते मुक्तो भवतीत्यर्थः ॥ १८ ॥

सप्तमाध्याये परमेश्वरसंबन्धिन्यपरा परेति क्षेत्रक्षेत्रज्ञस्वरूपिणी द्वे प्रकृती उपन्यस्ते, ताभ्यामेव हीश्वरस्येश्वरत्वम् 'एतद्योनीनि भूतानि' इति प्रकृतिद्वययोनित्वमुक्तम् । तत्प्रकृतिद्वयस्य स्वाज्ञानकालमारभ्य स्वज्ञानावधिस्थायित्वेनानादित्वमाचष्टे—प्रकृतिमिति पञ्चभिः—

प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि ।
विकारांश्च गुणांश्चैव विद्धि प्रकृतिसंभवान् ॥ १९ ॥

प्रकृतिमिति । क्षेत्रस्वरूपामपरप्रकृति परप्रकृतिरूपिणं पुरुष क्षेत्राभिमानिन जीव चैवोभावपि प्रकृतिपुरुषावनादी इति विद्धि । तयो स्वाज्ञानकालमारभ्य स्वज्ञानाविर्भावपर्यन्तमस्थायित्वादनादित्वमापेक्षिकम् । तयो पारमार्थिकानादित्वे ज्ञानकोट्या ऽपि निवृत्त्यसभवात् तावदेव हीश्वरस्येश्वरत्व यावत्प्रकृतिद्वयमधिष्ठाय जगदाविर्भावतिरोभावहेतुतामनुभवति । तत पर तस्यैव कार्यकारणभावविकलब्रह्मात्मरूपत्वात् । प्रकृतिपुरुषयो पारमार्थिकानादित्व केचिदामनन्ति, तत्कृतमेव जगत नेश्वरस्य तद्धेतुत्वमिति च तदसत् । अनृतजडदु खात्मकजगद्व्यतिरेकेण प्रकृतिद्वयस्य मृग्यत्वात् जडत्वकिचिज्ज्ञत्वविशिष्टप्रकृतिद्वयस्य कार्यकारणताऽऽपत्तौ कर्मकर्तृविरोधात् । तस्मात्प्रकृतिद्वयातिरिक्त परमात्मा प्रकृतिद्वयमवष्टभ्य जगदुत्पत्तिस्थितिलय हेतुरीश्वरो ऽस्तीति मन्तव्य । प्रकृतिद्वयपारमार्थिकानादित्वस्य पुरस्तादेव परिहृतत्वान् स्वाज्ञानत ससारदशामारभ्य स्वाज्ञानतत्कार्यनिवृत्तिपर्यन्त बन्धमोक्षादिव्यवहारसिद्ध्यै प्रकृतिद्वयस्यानादित्व भगवद्भाष्यकाराभ्यामङ्गीकृतमित्यर्थ । क्षेत्रस्वरूपप्रकृते विकारयोनित्व दर्शयति— विकारानिति । निर्विकारेश्वरस्य विकारकारणशक्ति प्रकृति त्रिगुणात्मिका माया सभवो येषा बुद्ध्यादिदेहपर्यन्तविकाराणा सुखदु खमोहात्मकत्वेन परिणतगुणाना च तान्प्रकृतिसभवानिति विकाराश्च गुणाश्चैव विद्धि जानीहि ॥ १९ ॥

ईश्वरस्य निर्विकारत्वनिर्गुणत्वख्यापनार्थमपरप्रकृते कर्तृत्वम्, परप्रकृत्यात्मपुरुषस्य भोक्तृत्व चाह—

कार्यकरणकर्तृत्वे हेतुः प्रकृतिरुच्यते ।
पुरुषः सुखदुःखानां भोक्तृत्वे हेतुरुच्यते ॥ २० ॥

कार्येति । कार्यं शरीर ज्ञानेन्द्रियपञ्चक कर्मेन्द्रियपञ्चक मनो बुद्धिरहंकारश्चेति त्रयोदश करणानीत्युच्यन्ते । तेषा कार्यकरणाना कर्तृत्वमुत्पादयितृत्वम्, तस्मिन् कार्यकरणकर्तृत्वे हेतु कारण प्रकृतिरुच्यते । कार्यकारणकर्तृत्व इति पाठान्तरम् । तत्र कार्यं विकार· कारण विकारी, तयोः कार्यकारणयो विकारविकारिणो कर्तृत्वे कार्यकारणकर्तृत्व इति । यद्वा—ज्ञानकर्मेन्द्रियाणि दश मनश्चैकं शब्दादिविषया पञ्च आहृत्य षोडश विकारा कार्यशब्देनोच्यन्ते । महानहकारो भूततन्मात्राणीति सप्त प्रकृतिविकृतय· कारणशब्देनोच्यन्ते । तेषामारम्भकत्वात्प्रकृतेरित्यर्थ । प्राणधारणनिमित्तत्वात् पुरुषो जीव । क्षेत्रज्ञ भोग्याना सुखदु खाना भोक्तृत्वे हेतुरुच्यते । न चाचेतनाया प्रकृते कर्तृत्व तद्विपरीतस्य पुरुषस्य भोक्तृत्व नोपपद्यत इति वाच्यम् । तयो मिथ सनिधानात्कर्तृत्वभोक्तृत्वसभवात् चेतनसंनिधानादचेतनप्रकृते कर्तृत्वमचेतनसंनिधानात् पुरुषस्यापि भोक्तृत्व चोपपद्यते । क्रियानिर्वाहकत्व हि कर्तृत्वम् । भोक्तृत्व तु सुखदु -खसंवेदनम् । तस्य प्रकृत्यवच्छिन्नचेतनधर्मत्वादित्यर्थ· ॥ २० ॥

पुरुषस्य निर्विकारत्वेन सद्बोधानन्दरूपत्वात् तस्य सुखदु खभोक्तृत्व किंनिमित्तमिति तत्राह—

पुरुषः प्रकृतिस्थो हि भुङ्क्ते प्रकृतिजान्गुणान् ।
कारणं गुणसङ्गोऽस्य सदसद्योनिजन्मसु ॥ २१ ॥

पुरुष इति । हि यस्मात्पुरुष भोक्ता क्षेत्रज्ञ स्वाविद्यारूपा प्रकृतिमात्मत्वेन गृहीत्वा तस्या तिष्ठतीति प्रकृतिस्थो भवति । तस्मात् स्वाविद्याप्रकृतितो जातान् प्रकृतिजान् सुखदु खमोहाकाराभिव्यक्तान् गुणान् भुङ्क्ते । अह सुखी दुःखी मूढः पण्डितो वेत्यात्मान मन्यत इत्यर्थ. ।

प्रकृतिजगुणभोक्ता पुरुषो भवतु, तस्य जन्मकारण किमिति तत्राह—गुणसङ्ग इति। अस्य पुरुषस्य स्वप्रकृतिजसुखादिगुणसङ्गो देवमनुष्यपश्वादिसदसद्योनिजन्मसु कारण निमित्तम्। यद्वा—प्रकृतिजगुणसङ्ग सदसद्योनिजन्मस्वस्य ससारस्य कारणमित्यर्थ.। 'स यथाकामो भवति तत्क्रतुर्भवति[1]' इत्यादिश्रुते ॥ २१ ॥

'यज्ज्ञात्वा मोक्ष्यसे ऽशुभात्' इत्यादिना क्षेत्रज्ञयाथाऽऽत्म्यवेदन ज्ञान तद्वेद्य क्षेत्रज्ञशब्दवाच्य ज्ञेयमिति चोक्तम्। तादृशक्षेत्रज्ञस्य स्वयाथाऽऽत्म्याज्ञानलक्षणप्रकृतितत्कार्यसङ्गात्, ससारित्व पुन स्वयाथाऽऽत्म्यज्ञानकबलितप्रकृतितत्कार्यतत्सङ्गत स्वस्वरूपत्व प्रतिपादयति—

उपद्रष्टा ऽनुमन्ता च भर्ता भोक्ता महेश्वरः।
परमात्मेति चाप्युक्तो देहे ऽस्मिन्पुरुषः परः ॥ २२ ॥

उपद्रष्टेति। यथा ऋत्विग्यजमानेषु यज्ञकर्मव्यापृतेषु कश्चिद्यज्ञविद्याकुशल ऋत्विगादिव्यापारगुणदोषाणामीक्षिता तथा कार्यकरणसंघातेषु व्यापृतेष्वपि तद्विलक्षणत्वेन स्वयमव्यापृत तत्सर्वद्रष्टोपद्रष्टेत्युन्यते। यद्वा अन्त करणवृत्तय द्रष्टार', तद्विलक्षणत्वेन तदन्तरतम प्रत्यगुपद्रष्टेत्युच्यते। प्रतीचो ऽन्तरतमाभावात् उपद्रष्टृत्वमुचितमित्यर्थ। यद्वद्यज्ञव्यापृतमृत्विगादिक स्वयमव्यापृतो ऽपि व्यापृतवन्न निवार्यते तद्वत्स्वव्यापारप्रवृत्त करणग्राम तद्व्यापारान्न निवारयतीति अनुमन्तेत्युच्यते। अलुप्तनित्यचैतन्यस्वरूपेण स्वारोपितातत्प्रपञ्चभरणात् भर्तेत्युच्यते। स्वभास्यबुद्ध्यादिप्रत्ययभासकत्वात् भोक्तेत्युच्यते। सर्वात्मकत्वात् महाश्चासौ सर्वनियामकत्वादीश्वरश्चेति महेश्वर त्रिविधपरिच्छेदविकलविभवत्वात् स्वाविद्याकल्पितानामव्यक्तादि-

[1] बृ. ४. ४. ५

बुद्ध्यन्ताना परत्वेनोपद्रष्टृत्वादिलक्षण पर इत्युच्यते । य क्षराक्षराभ्या मुत्कृष्ट उत्तम पुरुष स परमात्मेति चाप्युक्त श्रुतिभिरित्यर्थ । कासावस्मिन् देह एवोपलभ्यते, विदुषा प्रत्यगभेदेनेत्यर्थ ॥ २२ ॥

स्वोक्तरीत्या क्षेत्रक्षेत्रज्ञयाथाऽऽत्म्य यो वेत्ति तमेवं स्तौति—

य एवं वेत्ति पुरुषं प्रकृतिं च गुणैः सह ।
सर्वथा वर्तमानोऽपि न स भूयोऽभिजायते ॥ २३ ॥

य इति । एवमुक्तप्रकारेण प्रकृतिप्राकृतसबन्धास्पृष्टत्वेन सत्तास्फूर्तिसुखस्वरूपत. सर्वत्र पूरणात् पुरुष क्षेत्रज्ञमयमहमस्मीति गुणै सत्त्वादिभि. सह वर्तमाना स्वाविद्यालक्षणा प्रकृतिं च स्वविद्यया अभावमापादिता यो वेत्ति स मुनि सर्वथा सर्वप्रकारेण वर्तमानोऽपि परदृष्ट्या वर्तमानदेहे स्थिते मृते वा न भूय पुन देहान्तरायाभिजायते, देहारम्भकहेत्वज्ञानाभावात् । अपिशब्दत. सुवृत्तो न जायत इति किमु वक्तव्यमिति द्योत्यते ॥ २३ ॥

क्षेत्रक्षेत्रज्ञयाथाऽऽत्म्यज्ञानसाधनविकल्पानाचष्टे—

ध्यानेनात्मनि पश्यन्ति केचिदात्मानमात्मना ।
अन्ये सांख्येन योगेन कर्मयोगेण चापरे ॥ २४ ॥

ध्यानेनेति । केचिदुत्तमाधिकारिण क्षेत्रक्षेत्रज्ञयाथाऽऽत्म्यविद आत्मना प्रत्यगभिन्नब्रह्मभावापन्नमनसा प्रत्यगात्मनि परमात्मान पश्यन्ति । केनेति तत्राह—ध्यानेनेति । ध्यान नाम इन्द्रियद्वयार्थादिन्द्रियद्वय सनिरुध्य ब्रह्मैवाहमहमेव ब्रह्मेति तैलधारावत् दीर्घघण्टानिनादवच्चाविच्छिन्न-

प्रत्ययप्रवाह । तेनोपायेन पश्यन्तीत्यर्थ । 'ध्यायतीव पृथिवी ध्यायतीवान्तरिक्ष ध्यायतोव द्यौ[1]' इत्यादिश्रुते । मध्यमाधिकारिण निर्दिशति—अन्य इति । अन्ये शास्त्रार्थज्ञानिन शास्त्रार्थपर्यालोचनया त्रिगुणात्मक क्षेत्र तद्विलक्षणत्वेन तद्भावांभावप्रकाशकः क्षेत्रज्ञ इत्यनुचिन्तन साख्ययोग, तेन साख्येन योगेनात्मना ऽऽत्मान पश्यन्तीत्यनुषज्यते । मन्दाधिकारिणो दर्शयति—अपर इति । अपरे योगिन परमेश्वरार्पणधिया ऽनुष्ठीयमान कर्मैव योग, तेन कर्मयोगेण चित्तशुद्धिगम्यज्ञानद्वारा आत्मन्यात्मना आत्मान पश्यन्तीति पूर्ववदनुषज्यते ॥ २४ ॥

अधमतराधिकारिणा मोक्षमार्गप्रवृत्ति प्रत्याययति—

अन्ये त्वेवमजानन्तः श्रुत्वा ऽन्येभ्य उपासते ।
ते ऽपि चातितरन्त्येव मृत्युं श्रुतिपरायणाः ॥ २५ ॥

अन्ये त्विति । अन्ये तु अत्यन्तं मन्दाधिकारिणः एवमुक्तप्रकारेणोपद्रष्टृत्वादिविशेषणविशिष्ट प्रत्यगभिन्न परमात्मान ध्यानाद्युक्तसाधनत स्वातन्त्र्येणाजानन्त· सन्त· अन्येभ्य आचार्येभ्य इदमेव त्वयैव चिन्तनीयमिति श्रुत्वा तद्वाक्यावष्टम्भेन तदेवोपासते स्वतो विवेकाभावे ऽपि परोपदेशज्ञाने श्रद्दधाना· तदेव चिन्तयन्तीत्यर्थ । तेषा स्वतो विवेकविकलत्वात परोपदेशप्रवृत्ति नार्थवतीति तत्राह—ते ऽपीति । ते स्वतो विवेकविकला अपि मोक्षमार्गप्रवृत्तौ श्रुति श्रवण परमयन साधन येषा ते श्रुतिपरायणा सन्त, मृत्यु मृत्युयुक्त ससारमतितरन्त्यतिक्रामन्त्यव । अपिशब्दात प्रमाणज्ञानकुशला मृत्युमतिक्रामन्तीति किमु वक्तव्यमिति द्योत्यते ॥ २५ ॥

[1] छा ७. ६

'यज्ज्ञात्वा मोक्ष्यसे ऽशुभात्' इति क्षेत्रज्ञयाथाऽऽत्म्यज्ञान मोक्ष-साधनमित्युक्तम्, तन्निवर्त्य· ससार कस्मात् संभूत इत्याकाङ्क्षाया क्षेत्रक्षेत्र-ज्ञयाथाऽऽत्म्याज्ञानादित्याचष्टे—

यावत्संजायते किंचित्सत्त्वं स्थावरजङ्गमम् ।
क्षेत्रक्षेत्रज्ञसंयोगात्तद्विद्धि भरतर्षभ ॥ २६ ॥

यावदिति । हे भरतर्षभ ! यावत्स्थावरजङ्गम यत्किचित्सत्त्व प्राणि-जात सजायते उत्पद्यते तत्सर्व तम प्रकाशवत विरुद्धस्वभावयो क्षेत्रक्षेत्र-ज्ञयोरितरेतराध्यासरूपसयोगसबन्धात् क्षेत्रक्षेत्रज्ञसयोगात् जातमिति विद्धि । क्षेत्रक्षेत्रज्ञयाथाऽऽत्म्यापरिज्ञानात् जन्मादि ससारो ऽविरलतापद भजतीति विजानीहीत्यर्थ ॥ २६ ॥

क्षेत्रक्षेत्रज्ञयाथाऽऽत्म्याज्ञानप्रभवससारनिवर्तक तद्याथाऽऽत्म्यज्ञानमुक्त-मपि तस्यातिसूक्ष्मत्वेन दुर्विज्ञेयत्वादधिकारिभेदानुग्रहार्थ पुन· शब्दान्तरेण स्फुटयति—

समं सर्वेषु भूतेषु तिष्ठन्तं परमेश्वरम् ।
विनश्यत्स्वविनश्यन्तं यः पश्यति स पश्यति ॥ २७ ॥

सममिति । सम निर्विशेष यथा भवति तथा ब्रह्मादिस्तम्बान्त-भूतेषु तिष्ठन्त नित्यादिप्रलये सर्वभूतेषु विनश्यत्स्वप्यविनश्यन्त षड्भाव-विकारवद्भूतजातात् परत्वेन विभानात् परम सर्वोत्कृष्टश्चासावीश्वरश्चेति परमेश्वर, त प्रत्यगभेदेन यो मुमुक्षु पश्यति स हि ब्रह्मात्मान पश्यति । न चैव मुमुक्षुरेव पश्यति नेतर इति को ऽय नियमः सर्वो ऽपि पश्य-

तीति वाच्यम् । मुमुक्षिवतरस्य विपरीतदृष्टित्वात् । यथा तिमिरदृष्टि स्वदृष्टिदोषादनेक चन्द्र पश्यति तमपेक्ष्य य एकचन्द्रदर्शी स पश्यतीति विशिष्यते, तथैव स्वदृष्टिदोषादनेकात्मदर्शिभ्य एकमविभक्त सर्वप्रत्यगभेदेन सम ब्रह्मास्मीति य 'पश्यति स पश्यतीति विशिष्यते, इतरो लोकस्तावत् पश्यन्नपि न पश्यति, स्वाज्ञानावृतदृष्टित्वादित्यर्थ ॥ २७ ॥

सम्यग्ज्ञानसाधनश्रवणादौ पुरुष प्रवर्तयितु तत्फल स्तौति—

समं पश्यन्हि सर्वत्र समवस्थितमीश्वरम् ।
न हिनस्त्यात्मना ऽऽत्मानं ततो याति परां गतिम् ॥२८॥

सममिति । सर्वत्र चेतनाचेतनात्मके जगति सत्तास्फूर्तिसुखरूपेण सम विषमभाववैकल्येन समवस्थितमीश्वर कूटस्थरूप परमात्मान प्रत्यग्भावापन्नेनात्मना ऽन्त करणेन पश्यन्न हिनस्ति । तत स्वात्माहिसनात् परा गति मुक्ति याति । न च स्वात्मान स्वयमज्ञो ऽपि न हिनस्तीति वाच्यम्, अज्ञस्यात्महननोपपत्ते । हन्तेस्तिरस्करणार्थत्वात स्वाविद्याद्वयतत्कार्यविलक्षण प्रत्यगभिन्न परमात्मान तिरस्कृत्य स्वाविद्यातत्कार्यदेहादिकमात्मत्वेन परिगृह्य स्वात्मतिरस्करणदोषेण ससारचक्रे परिभ्रमति सर्वो ऽज्ञो लोकः । हिशब्दो ज्ञजनवैलक्षण्यद्योतक । हिशब्दद्योतित अज्ञजनविलक्षणो मुमुक्षु ब्रह्मात्मातिरस्करणत ब्रह्मात्मभावलक्षणा परा गति यातीति भाव. ॥ २८ ॥

आत्मनो देह प्रति धर्माधर्मादिवैचित्र्यतो विषमत्वात कथ समत्वमित्याशङ्क्य घट प्रत्यनुस्यूताकाशवत् सर्वदेहानुस्यूतप्रतीचस्त्वेकत्वात् सर्वभूतसमत्व निरङ्कुशमित्याह --

प्रकृत्यैव च कर्माणि क्रियमाणानि सर्वशः ।
यः पश्यति तथाऽऽत्मानमकर्तारं स पश्यति ॥ २९ ॥

प्रकृत्येति । त्रिगुणात्मिका प्रकृति भगवतो माया 'माया तु प्रकृति विद्यान्मायिन तु महेश्वरम्' इत्यादिश्रुते । तया कार्यकरणरूपेण परिणतया प्रकृत्यैव च सर्वश सर्वप्रकारै मनोवाक्कायारभ्याणि कर्माणि क्रियमाणानि नात्मनेति य पश्यति स परमार्थदर्शी । यथा प्रकृति काम्यादिकर्महेतुत्वेन पश्यति तथा सर्वोपाधिविनिर्मुक्त क्षेत्रज्ञ स्वात्मानमकर्तार पश्यति ब्रह्मात्मनो निर्गुणत्वेन प्रकृतिप्राकृतास्पृष्टत्वादकर्तृत्वाद्युपपद्यतेतरामित्यर्थ ॥ २९ ॥

पुनरपि सम्यग्दर्शनफल विधाऽन्तरेण व्यनक्ति—

यदा भूतपृथग्भावमेकस्थमनुपश्यति ।
तत एव च विस्तारं ब्रह्म संपद्यते तदा ॥ ३० ॥

यदेति । यदा यस्मिन् काले भूताना चेतनाचेतनाना पृथग्भाव नानात्वम्, 'ब्रह्मैवेद सर्वम्[1]' 'आत्मैवेद सर्वम्[2]' इत्यादिश्रुत्याचार्योपदेशमनु सर्वकल्पनाऽऽस्पदे ब्रह्मात्मन्येकस्मिंस्तिष्ठतीत्येकस्थमनुपश्यति । ब्रह्मात्मसत्ताऽतिरिक्तसत्ताशून्यत्वात् नानात्वस्येत्यर्थ । तदा तस्मिन् काले तत प्रत्यगभिन्नपरमाद्वैतब्रह्मसम्यग्दर्शनादेव च त्रिविधपरिच्छेदशून्यत्वेन भूमात्मरूपत्वात् विस्तार ब्रह्म सपद्यते ब्रह्मैव भवति । एवचशब्दाभ्या सम्यग्ज्ञानेतरसाधनाना ब्रह्माप्तावहेतुत्व द्योत्यते । 'तदेव विद्वानमृत इह

[1] मु २, २, ११
[2] छा, ७, २५, २.

भवति' 'ज्ञानादेव तु कैवल्यम्' 'नान्य पन्था विमुक्तये' इत्यादिश्रुतिस्मृतिभ्य ॥ ३० ॥

यथा क्षीरस्य पवित्रत्वे ऽपि सुराभाण्डसस्पर्शादपवित्रता तथा ऽऽत्मनो ऽपि देहेन्द्रियादिसस्पर्शादपवित्रतेति तत्राह—

अनादित्वान्निर्गुणत्वात्परमात्मा ऽयमव्ययः ।
शरीरस्थो ऽपि कौन्तेय न करोति न लिप्यते ॥ ३१ ॥

अनादित्वादिति । यद्धचादिमत्तत्स्वेनात्मना व्येति सावयवत्वात् । यस्यादि कारण नास्ति सो ऽनादि, तद्भावो ऽनादित्वम्, तस्मादनादित्वात् संभूतिप्रयुक्तव्ययशून्य इत्यर्थ । सगुणं वस्तु गुणव्ययाद्व्येति । अयं तु निर्गुणत्वात् न व्येति । स्वत परतो वा व्ययो ऽस्य न विद्यत इत्यव्यय । अव्यक्तादिदेहान्तात्परत्वेन विभानात्परमात्मा सर्वगतत्वे ऽप्यात्मन शरीरेषूपलब्धिर्भवतीति शरीरस्थ इत्युच्यत, तथा ऽपि न करोति किंचिदपि कर्म, कर्माकरणादेव तत्फलेन न लिप्यते । य करोति स हि कर्मफलेन लिप्यते । यतो ऽयमकर्ता अतो न लिप्यते । क्षीरसुराभाण्डयो मूर्तद्रव्यत्वेन संश्लेषात् क्षीरस्यापवित्रतोचिता । क्षेत्रक्षेत्रज्ञयो मूर्तामूर्तत्वेन घटाकाशयोरिव सश्लेषायोगान्नापवित्रताऽवकाश इति भाव । क पुनरसौ शरीरस्थ कर्म करोति तेन लिप्यत इत्युच्यते । स तावच्छरीरी परस्माद्भिन्नो यदि स्यात्तदा 'क्षेत्रज्ञ चापि मा विद्धि' इति क्षेत्रज्ञेश्वरत्वमनुपपन्नम् । यदि क्षेत्रज्ञादन्य ससारी न स्यात् तदा करोति लिप्यते इत्याद्यनुपपन्नतर भवेत् । तथा सति करोति लिप्यत इति व्यवहृति कथ प्रवर्तेत इत्याशङ्काया पूर्वमेव भगवतोक्तम 'स्वभावस्तु प्रवर्तते' इति । अविद्यामात्रस्वभाव करोति लिप्यत इति व्यवह्रियते, न परमार्थतो ऽव्यवहार्ये

क्षेत्रज्ञे व्यवहार सभवति 'अमात्रश्चतुर्थो ऽव्यवहार्य प्रपञ्चोपशम शिवो ऽद्वैत[1]' इत्यादिश्रुते । यत एवमत परमात्मदर्शनेन तिरस्कृताविद्या-तत्कार्याणा परमहसपरिव्राजकाना कर्माधिकारस्तत्र तत्र निराकृत· 'तस्य कार्यं न विद्यते' 'ज्ञाने परिसमाप्यते' इत्यादिनेत्यर्थ ॥ ३१ ॥

किमिवात्मा न करोति न लिप्यत इत्यपेक्षायामाकाशदृष्टान्तेनात्मनो निर्लेपत्व प्रकटयति—

यथा सर्वगतं सौक्ष्म्यादाकाशं नोपलिप्यते ।
सर्वत्रावस्थितो देहे तथा ऽऽत्मा नोपलिप्यते ॥ ३२ ॥

यथेति । यथा वाय्वाद्यपेक्षया सौक्ष्म्यात् स्वकार्यवाय्वाद्यनुस्यूतत्वात् भूताकाश सर्वगतमपि पङ्कादिभिर्नोपलिप्यते असङ्गत्वात् , तथा ऽय ब्रह्मात्मा देहे देहोपलक्षिताविद्यापदे सर्वत्रावस्थितो ऽपि तद्गतानृतजडदु खैर्नोप-लिप्यते । स्वसत्तास्फूर्तिसुखकबलितानृतजडदुःखत्वादित्यर्थः ॥ ३२ ॥

आकाशदृष्टान्तेनात्मनो निर्लेपत्वमुक्त्वा रविदृष्टान्तेन स्वभास्यधर्म-शून्यत्वमाह—

यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रविः ।
क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत ॥ ३३ ॥

यथेति । हे भारत! यथा रविरेको ऽपि सन्निम परिदृश्यमान कृत्स्न लोक प्रकाशयति तथा ऽय क्षेत्री प्रत्यगभिन्नपरमात्मैको ऽपि सन्

[1] मा, ११.

महदादिधृत्यन्तमव्यक्तादिस्थावरान्त च कृत्स्नमिद क्षेत्र प्रकाशयति रविवत् प्रकाश्यगतधर्मैर्न लिप्यत इत्यर्थ ॥ ३३ ॥

क्षेत्राध्यायार्थ. तज्ज्ञानफल चोपसहरति—

क्षेत्रक्षेत्रज्ञयोरेवमन्तरं ज्ञानचक्षुषा ।
भूतप्रकृतिमोक्षं च ये विदुर्यान्ति ते परम् ॥ ३४ ॥ इति ।

इति श्रीमद्भगवद्गीतासु० क्षेत्रक्षेत्रज्ञविभागयोगो नाम त्रयोदशो ऽध्याय ।

क्षेत्रेति । ये मुमुक्षव पुरुषा अत्याचार्यप्रसादलब्धक्षेत्रक्षेत्रज्ञयाथाऽऽत्म्यदर्शन ज्ञान तदेव चक्षुस्तेन ज्ञानचक्षुषा ऽनृतजडदु खात्मक क्षेत्रम्, तद्विपरीतत्वेन क्षेत्रज्ञ सच्चिदानन्दात्मक इति क्षेत्रक्षेत्रज्ञयोरेवमन्तरमितरेतरवैलक्षण्य स्वप्रकृतितो भवन्तीति चेतनाचेतनात्मकानि भूतानि प्रकृति स्वाविद्या, तेषा तस्या भूतप्रकृते स्वविद्यातो मोक्षण च विदुर्जानन्ति पश्यन्तीत्यर्थ । ते पुरुषाः स्वाविद्याद्वयतत्कार्यजातात् परत्वेन विभातं परं ब्रह्म प्रत्यगभेदेन यान्ति । विदेहमुक्ता भवन्तीत्यर्थ । इतिशब्द अध्यायपरिसमाप्तिद्योतक ॥ ३४ ॥

क्षेत्रक्षेत्रज्ञयाथाऽऽत्म्यावबोधनयनास्त्यज ।
पश्यन्ति यत्पद तन्मे प्रसीदतु निरन्तरम् ॥

इति श्रीमद्भगवद्गीताऽर्थप्रकाशिकाया त्रयोदशो ऽध्याय ॥

चतुर्दशो ऽध्यायः

गुणत्रयात्मकं द्वैतमद्वैतं निर्गुणात्मकम् ।
निर्गुणाद्वयबोधाय गुणाध्यायो निगद्यते ॥

'यावत्संजायते किंचित्सत्त्वं स्थावरजङ्गमम् । क्षेत्रक्षेत्रज्ञसंयोगात्तद्विद्धि भरतर्षभ ॥' इत्यादिना क्षेत्रक्षेत्रज्ञसंयोगो ऽखिलजगन्निमित्तकारणमिति, 'पुरुषः प्रकृतिस्थो हि भुङ्क्ते प्रकृतिजान्गुणान् । कारणं गुणसङ्गो ऽस्य सदसद्योनिजन्मसु ॥' इति श्लोकेन गुणसङ्गः संसारकारणमिति चोक्तं त्रयोदशाध्याये । तत्र किं निरीश्वरसांख्यानामिव क्षेत्रक्षेत्रज्ञसंयोगः, अथ सेश्वरसांख्यानामिव परमेश्वरतन्त्रता? गुणसङ्गः कीदृशः? के वा गुणाः? कथं बध्नन्ति? यदात्मकं द्वैतं वदन्ति तद्विपरीताद्वैतात्मावगतये गुणमोक्षणं कथम्? गुणातीतस्य लक्षणं कीदृशम्? इत्याकाङ्क्षापूरणार्थं चतुर्दशाध्यायः श्रीभगवानुवाच— परं भूय इति द्वाभ्याम्—

श्रीभगवानुवाच—

परं भूयः प्रवक्ष्यामि ज्ञानानां ज्ञानमुत्तमम् ।
यज्ज्ञात्वा मुनयः सर्वे परां सिद्धिमितो गताः ॥ १ ॥

परमिति । यद्वक्ष्यमाणं ज्ञानं ज्ञात्वा ऽपरोक्षीकृत्य ब्रह्मात्मैक्यमनन-शीला मुनयः संन्यासिन इतः क्षेत्राभिमानात् परां प्रकृष्टां सिद्धिं मुक्तिं

गता प्राप्ता, तदिद ज्ञान पूर्वेष्वध्यायेषु असकृदुक्तमपि तस्य परमसूक्ष्मवस्तुगोचरत्वेन दुर्विज्ञेयत्वात् भूय पुनरपि प्रकर्षेण वक्ष्यामि। तुभ्यमिति शेष। श्रोतारमभिमुखीकर्तुं परोत्तमशब्दाभ्या ज्ञान स्तौति—परमित्यादि। परब्रह्मविषयकत्वात्परम्। सर्वेषा यज्ञतपोदानतत्फलज्ञेयविषयाणा ज्ञानानामिदमेव ज्ञानमुत्तमम्, सर्वोत्कृष्टकैवल्यफलत्वात् ॥ १ ॥

ज्ञानफलस्य कर्मफलवैलक्षण्यमुपलम्भयति—

इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः।
सर्गे ऽपि नोपजायन्ते प्रलये न व्यथन्ति च ॥ २ ॥

इदमिति। वक्ष्यमाणमिद ज्ञान तत्साधनश्रवणादिकमुपाश्रित्यानुष्ठाय मद्व्यतिरिक्तमणुमात्रमपि न विद्यत इति ममेश्वरस्य यो धर्म, सत्तासामान्यस्वाभावो हि स धर्म, तस्य भाव साधर्म्य सत्तासामान्यस्वरूपावस्थानलक्षण कैवल्यमागताः सन्त ब्रह्मादीना सर्गे नोपजायन्ते। चतुर्विधप्रलये ऽपि न व्यथन्ति च। सभूतिप्रलयहेतुस्वाज्ञानाभावादित्यर्थ ॥२॥

एवं ज्ञानप्रशंसया श्रोतारमभिमुखीकृत्य क्षेत्रक्षेत्रज्ञसंयोगो निखिलकारणमिति प्रकाशयति—

मम योनिर्महद्ब्रह्म तस्मिन्गर्भं दधाम्यहम्।
संभवः सर्वभूतानां ततो भवति भारत ॥ ३ ॥

ममेति। हे भारत! ममेश्वरस्य सत्ताऽतिरिक्तसत्ताशून्यत्वात् मदीया वैष्णवी त्रिगुणात्मिका प्रकृतिर्माया योनि सर्वभूतकारणत्वात् स्वकार्येभ्यो महत्त्वान्महत्, स्वविकाराणामुपबृंहणात् ब्रह्मेति प्रकृतिरेव विशेष्यते।

तस्मिन् योनौ महति ब्रह्मणि चतुराननादिसर्वभूतजन्मकारण गर्भं बीज दधामि । निक्षिपामीत्यर्थ । क्षेत्रक्षेत्रज्ञप्रकृतिद्वयशक्तिसपन्नत्वात् ईश्वरो ऽहमविद्याकर्मोपाधिक क्षेत्रज्ञ क्षेत्रेण सयोजयामीति भाव । ततस्तस्मात् गर्भनिधानात् चतुराननोत्पत्तिद्वारेण सर्वभूताना सभव उत्पत्तिर्भवति ॥ ३ ॥

न केवल सृष्टिकाल एव मदधिष्ठितप्रकृतिद्वयतो भूतोत्पत्ति , कि तु सर्वदैवेत्याह—

सर्वयोनिषु कौन्तेय मूर्तयः संभवन्ति याः ।
तासां ब्रह्म महद्योनिरहं बीजप्रदः पिता ॥ ४ ॥

सर्वेति । हे कौन्तेय ! देवमनुष्यपश्वादिषु सर्वयोनिषु देहविशेषा या मूर्तय सभवन्ति तासा मूर्तीना सर्वावस्थत्वेन महद् ब्रह्म प्रकृतिर्योनि कारण सर्वमूर्तगर्भधारणात् अहमीश्वरो बीजप्रद पिता गर्भाधानकर्तृत्वात् , परमेश्वरादेव क्षेत्रक्षेत्रज्ञसयोगत सर्वोत्पत्तिदर्शनात् । स एव स्वाविद्यया ससरतीत्यर्थादुक्त भवतीति भाव ॥ ४ ॥

एवमीश्वराधीनक्षेत्रक्षेत्रज्ञसंयोगतो भूतोत्पत्तिं निरूप्येदानीं प्रकृतिगुणसयोगेन पुरुषस्य ससारित्व साधयति—सत्त्वमित्यादिभिश्चतुर्दशभि —

सत्त्वं रजस्तम इति गुणाः प्रकृतिसंभवाः ।
निबध्नन्ति महाबाहो देहे देहिनमव्ययम् ॥ ५ ॥

सत्त्वमिति । हे महाबाहो ! सत्त्व रजस्तम इत्येतन्नामानो गुणा न द्रव्याश्रिता गुणगुणिनोरभेदस्य विवक्षितत्वात् । गुणा इव नित्यपरतन्त्रास्ते कुत उद्भूता इति तत्राह—प्रकृतीति । गुणाना साम्यावस्था प्रकृतिर्माया-

शक्ति सभवो येषा ते प्रकृतिसभवा गुणा देहे शरीरे देहिन देहस्वामिन क्षेत्रज्ञ स्वत परतो वा न व्येतीत्यव्ययमपि त निमित्तीकृत्याभिव्यक्ता भवन्तीति निबध्नन्तीत्युच्यते । निबध्नन्तीवेत्यर्थ । देहिनो निर्गुणत्वात् त कथ स्वकार्यसुखदु खमोहपाशै स्प्रष्टुमपि पारयन्ति ॥ ५ ॥

गुणाना मध्ये सत्त्वलक्षण तन्निबन्धनप्रकार चाह—

तत्र सत्त्वं निर्मलत्वात्प्रकाशकमनामयम् ।
सुखसङ्गेन बध्नाति ज्ञानसङ्गेन चानघ ॥ ६ ॥

तत्रेति । हे अनघ ! गुणाना मध्ये स्फटिकमणिवत् निर्मलत्वात् स्वेतरगुणप्रकाशकमनामय निरुपद्रव यथा भवति तथा देहे देहिन बध्नाति । कथम् ? स्वकार्येण गुणेन सुख्यहमिति य सङ्गस्तेन गुणसङ्गेन, सत्त्वपरिणामो ज्ञानमह ज्ञानीति ज्ञानसङ्गेन च निबध्नातीत्यर्थ । क्षेत्रधर्मत्वेन विषयभूतयो सुखज्ञानयो विषयिणि क्षेत्रज्ञात्मनि सश्लेषभ्रमादेव सुख ज्ञान च मे सजातमिति या धी सैषा क्षेत्रक्षेत्रज्ञाविवेककरी मृषैव । न हि विषयभूतक्षेत्रधर्मो विषयिण क्षेत्रज्ञ स्प्रष्टु पारयति । येनाह सुखी दु खीत्यभिमन्यते तत्सर्व मृषेत्यर्थ ॥ ६ ॥

रजोलक्षण किम् ? तत्कथ वा बध्नातीत्यत आह—

रजो रागात्मकं विद्धि तृष्णासङ्गसमुद्भवम् ।
तन्निबध्नाति कौन्तेय कर्मसङ्गेन देहिनम् ॥ ७ ॥

रज इति । हे कौन्तेय ! अप्राप्तार्थविषयको ऽभिलाषस्तृष्णा, प्राप्तार्थे ऽधिकप्रीति सङ्ग , तयो समुद्भवो यस्मात्तत् तृष्णासङ्गसमुद्भवम् , रज्यते

ऽनेन पुरुष इति रज राग असावात्मा ऽस्येति गैरिकादिधातुवद्रञ्ज-नात्मकत्वात् रागात्मक विद्धि। तद्रजो देहिन देहस्वामिन कर्तृत्वादि-धर्मपूगास्पृष्ट दृष्टादृष्टार्थकर्मसु सङ्ग आसक्तिस्तेन कर्मसङ्गेन कर्मेद करोमी-त्यभिमानेन निबध्नाति प्रवर्तयतीत्यर्थ ॥ ७ ॥

किंलक्षण तम कथ पुरुष बध्नाति? तत्राह

तमस्त्वज्ञानजं विद्धि मोहनं सर्वदेहिनाम्।
प्रमादालस्यनिद्राभिस्तन्निबध्नाति भारत ॥ ८ ॥

तम इति। हे भारत! तमस्तु तृतीयो गुण सर्वेषा देहिना मोहन मोहकरम्। अतस्मिस्तद्भावकरमज्ञानाज्जातमज्ञानज विद्धि। तत्तम देहिनम् अनवधान प्रमादश्च अनुद्यम आलस्य च बुद्धेस्तमसि लयो निद्रा च, ताभि प्रमादालस्यनिद्राभि निबध्नाति गाढमावृणोतीत्यर्थ ॥ ८ ॥

एवमुक्ताना गुणाना मध्ये कस्मिन्कार्ये कस्य गुणस्योद्रेक इत्या-शङ्क्य पुनर्गुणव्यापर सक्षेपत आचष्टे—

सत्त्वं सुखे सञ्जयति रजः कर्मणि भारत।
ज्ञानमावृत्य तु तमः प्रमादे सञ्जयत्युत ॥ ९ ॥

सत्त्वमिति। हे भारत! सत्त्व सत्त्वगुण दु खमोहहेतौ सत्यपि पुरुष सुखे सञ्जयति सश्लेषयति। स्वात्मसुखमपि विषयसुखाभिमुख करोतीत्यर्थ। रजो रजोगुण पुरुष सुखमोहहेतौ सत्यपि ऐहिकामुष्मिकसाध्ये कर्मणि सञ्जयति। अकर्त्रात्मान कर्तृत्वे नियोजयतीत्यर्थ। तमस्तु सुखदु खहेतौ सत्यपि सत्सङ्गोत्थज्ञानमावृत्याच्छाद्य प्रमादे सञ्जयति उत। निरावृतज्ञानं संपन्नमपि आवृणोति जामिताऽऽदावपि नियोजयतीत्यर्थ ॥ ९ ॥

सत्त्वादय इतरेतरतिरोधानक्रमेण वा युगपद्वोत्कृष्यन्त इत्याशङ्क्य सत्त्वादीनामितरेतराभिभवार्थं क्रमपक्षावष्टम्भेनोत्तरमाह—

रजस्तमश्चाभिभूय सत्त्वं भवति भारत ।
रजः सत्त्वं तमश्चैव तमः सत्त्वं रजस्तथा ॥ १० ॥

रज इति । हे भारत ! सत्त्व सत्त्वगुण रजस्तमश्चेति गुणद्वयमभिभूय तिरस्कृत्य प्राण्यदृष्टवशात् भवति । तत स्वकार्यसुखादौ पुरुष सयोजयति । सत्त्व तमश्चेति गुणद्वयमभिभूय रजो ऽपि भवति । तत स्वकार्यतृष्णाऽऽदौ सञ्जयति । सत्त्व रजश्चेति गुणद्वयमभिभूय तमो ऽपि भवति उद्रिक्त भवति । तत स्वकार्यप्रमादालस्यादौ सञ्जयति ॥ १० ॥

इदानीं सत्त्वादीना लिङ्गानि दर्शयति—सर्वद्वारेष्विति त्रिभि ।

सर्वद्वारेषु देहे ऽस्मिन्प्रकाश उपजायते ।
ज्ञानं यदा तदा विद्याद्विवृद्धं सत्त्वमित्युत ॥ ११ ॥

सर्वद्वारेष्विति । आत्मनो भोगायतने ऽस्मिन्देहे श्रोत्रादिद्वाराण्युपलब्धिसाधनानि, तेषु सर्वद्वारेषु अन्त करणस्य व्याप्ति प्रकाश उपजायते । यदैव प्रकाशो ज्ञानाख्य उपजायते तदा ऽनेन प्रकाशज्ञानलिङ्गेन सत्त्वमित्युतापि विवृद्धमुद्भूतमुद्रिक्त विद्यात् ॥ ११ ॥

उद्रिक्तरजसो लिङ्गमाह—

लोभः प्रवृत्तिरारम्भः कर्मणामशमः स्पृहा ।
रजस्येतानि जायन्ते विवृद्धे भरतर्षभ ॥ १२ ॥

लोभ इति। हे भरतर्षभ! रजसि विवृद्ध उद्रिक्ते सति, परद्रव्यलिप्सा स्वद्रव्यादित्सा वा लोभः, मुधाचेष्टाप्रवर्तन प्रवृत्ति, नित्यनैमित्तिककाम्यप्रतिषिद्धकर्मणामुपक्रम आरम्भ, अनिगृहीतेन्द्रियत्वमशमः, सर्वसामान्यवस्तुविषयतृष्णा स्पृहा, एतानि लिङ्गानि जायन्ते प्रादुर्भवन्ति ॥ १२ ॥

उद्रिक्ततमोलिङ्ग स्फुटयति—

अप्रकाशोऽप्रवृत्तिश्च प्रमादो मोह एव च।
तमस्येतानि जायन्ते विवृद्धे कुरुनन्दन ॥ १३ ॥

अप्रकाश इति। हे कुरुनन्दन! अप्रकाश मतिभ्रश, अप्रवृत्तिश्च शुभाशुभप्रवृत्त्यभाव, प्रमाद कर्तव्यार्थाद् भ्रश, मोहो मिथ्याऽभिनिवेश एव च तमसि प्रवृद्धे सत्येतानि लिङ्गानि जायन्ते। एतैर्लिङ्गै तमसो वृद्धि जानीयादित्यर्थ ॥ १३ ॥

मरणकाले विवृद्धाना सत्त्वादीनामपि फलविशेष विवृणोति—यदेति द्वाभ्याम्—

यदा सत्त्वे प्रवृद्धे तु प्रलयं याति देहभृत्।
तदोत्तमविदां लोकानमलान्प्रतिपद्यते ॥ १४ ॥

यदेति। यदा सत्त्वे प्रवृद्धे वृद्धि गते तु सति देहभृदात्मा जीव प्रलय मरण याति तदोत्तमान् हिरण्यगर्भादीन् विदन्तीत्युत्तमविद, तेषा ये लोका अमला सुखभोगस्थानविशेषास्तान् लोकान् प्रतिपद्यते ॥ १४ ॥

रजस्तमसोरुद्रेके मरण प्रपन्नस्य फलविशेष विवृणोति—

रजसि प्रलयं गत्वा कर्मसङ्गिषु जायते ।
तथा प्रलीनस्तमसि मूढयोनिषु जायते ॥ १५ ॥

रजसीति । रजसि प्रवृद्धे सति देही प्रलय गत्वा कर्मतत्फलसङ्गिषु मनुष्येषु जायते । तमसि विवृद्धे सति तथा प्रलीनो मृतो जन्तु पश्वादि-मूढयोनिषु जायते ॥ १५ ॥

इदानीं सत्त्वादीना स्वानुरूपकर्मद्वारतो विचित्रफलहेतुत्व प्रकटयति—

कर्मणः सुकृतस्याहुः सात्त्विकं निर्मलं फलम् ।
रजसस्तु फलं दुःखमज्ञानं तमसः फलम् ॥ १६ ॥

कर्मण इति । सुष्ठु कृतस्य निष्कामबुद्ध्या ऽनुष्ठितस्य कर्मण सात्त्विक चित्तनैर्मल्य फलमिति विशुद्धचित्ता आहु । रजसो राजसस्य कर्मण प्रकृतत्वात् तत्फल दु खमाहु । तमसस्तामसस्य कर्मण अज्ञानं मूढत्वं फलमाहु ॥१६॥

सत्त्वादिकार्य व्यनक्ति—

सत्त्वात्संजायते ज्ञानं रजसो लोभ एव च ।
प्रमादमोहौ तमसो भवतो ऽज्ञानमेव च ॥ १७ ॥

सत्त्वादिति । सत्त्वात् सत्त्वगुणोद्रेकप्रभवात्कर्मण आत्मानात्मविवेक-ज्ञान जायते । तस्य निरतिशयसुख फल भवति । रजसो दु खहेतुत्वात तत्पूर्वकस्य कर्मण दु खमेव फल भवति । तमसस्तमउद्रिक्तकर्मण प्रमाद-मोहौ फल भवत अज्ञानमेव च ॥ १७ ॥

सत्त्वादिप्रवृत्तिप्रधानानां फलभेदं प्रत्याययति—

ऊर्ध्वं गच्छन्ति सत्त्वस्था मध्ये तिष्ठन्ति राजसाः ।
जघन्यगुणवृत्तिस्था अधो गच्छन्ति तामसाः ॥ १८ ॥

ऊर्ध्वमिति । सत्त्वस्थाः सत्त्वगुणप्रधानाः पुरुषा ऊर्ध्वमुच्चस्थानं गच्छन्ति, देवलोकादिषूत्पद्यन्ते । राजसा रजोगुणप्रधानाः पुरुषा मध्ये तिष्ठन्ति, मनुष्ययोनिषु जायन्ते । जघन्यश्चासौ गुणश्चेति जघन्यगुण-स्तमोगुणः, तस्य वृत्तिः निद्राऽऽलस्यादिः, तस्मिन् तिष्ठन्तीति जघन्यगुण-वृत्तिस्थाः तमोगुणप्रधाना मूढा अधो गच्छन्ति, पश्वादियोनिषूत्पद्यन्ते ॥१८॥

'कारणं गुणसङ्गो ऽस्य सदसद्योनिजन्मसु' इति पूर्वाध्याये संक्षे-पतो यो ऽर्थो ऽभिहितः, तमेतमर्थम् 'सत्त्वं रजस्तम इति गुणाः प्रकृति-संभवाः' इत्यारभ्य सत्त्वादिगुणस्वरूपं गुणानां बन्धकत्वं तत्तद्गुणप्रधानस्य गतिरपि च एतत्सर्वं क्रमेण व्याख्यातम् । एतावती द्वैतनिष्ठा संसारगतिः । यत एतत्सर्वं क्षेत्रक्षेत्रज्ञयाथाऽऽत्म्याज्ञानकल्पितमतः सर्वं मिथ्यैव । ततः परं यद्वक्तव्यमद्वैतनिर्गुणब्रह्मात्मसम्यग्ज्ञानं तदुच्यते—

नान्यं गुणेभ्यः कर्तारं यदा द्रष्टा ऽनुपश्यति ।
गुणेभ्यश्च परं वेत्ति मद्भावं सो ऽधिगच्छति ॥ १९ ॥

नान्यमिति । द्रष्टा तत्त्वपदलक्ष्यैक्यदर्शी विद्वान् यदा यस्मिन् काले देहेन्द्रियादिविषयाकारपरिणतेभ्यः सत्त्वादिगुणेभ्यो ऽन्यं व्यतिरिक्तं कर्तारं नानुपश्यति । ब्रह्मात्मज्ञानानन्तर्यद्योतको ऽनुशब्दः । अपि तु सत्त्वादिगुणा एव पुण्यपापकर्मणां कर्तार इति पश्यति । य एवं पश्यन् सत्त्वादिगुणेभ्य-

स्तत्कार्यदेहेन्द्रियादिभ्य पर तद्भावाभावप्रकाशक प्रत्यक्तत्त्व चशब्दात्तदभेदेन परतत्त्वमपि वेत्ति । तदैव स विद्वान् वासुदेव सर्वमिति मद्भाव प्रत्यगभिन्न-ब्रह्मस्वरूपावस्थानलक्षण कैवल्यमधिगच्छति, सद्योमुक्तिमुपैतीत्यथ ॥ १९ ॥

कथ पुनर्गुणतत्कार्यविजृम्भितद्वैतभ्रान्तिमुन्मूल्य तद्विपरीतमद्वैतब्रह्मात्म-भावमुपैतीत्यत आह—

गुणानेतानतीत्य त्रीन्देही देहसमुद्भवान् ।
जन्ममृत्युजरादुःखैर्विमुक्तो ऽमृतमश्नुते ॥ २० ॥

गुणानिति । देहेन्द्रियाद्याकार समुद्भव परिणामो येषा गुणाना तान् देहसमुद्भवान् देहोत्पत्तिबीजभूतानेतान् त्रीनपि गुणानतीत्य देही देहातिरिक्तप्रत्यगभिन्नब्रह्मज्ञानी जन्म च मृत्युश्च जरा च दु ख च, तैर्जन्म-मृत्युजरादु खै जीवन्नेव विमुक्त सन् अमृत भूमानन्दलक्षण कैवल्य-मश्नुते ॥ २० ॥

गुणानेतानतीत्यामृतमश्नुत इति प्रश्नबीजमुपलभ्य गुणातीतलक्षण तदाचार गुणत्यागोपाय च बुभुत्सुरर्जुन उवाच—

अर्जुन उवाच—

कैर्लिङ्गैस्त्रीन्गुणानेतानतीतो भवति प्रभो ।
किमाचारः कथं चैतांस्त्रीन्गुणानतिवर्तते ॥ २१ ॥

कैरिति । हे प्रभो ! कै कीदृशैरात्मन्युत्पन्नै लिङ्गै देही ब्रह्मात्म-निष्ठ एतान् गुणानतीतो भवतीति गुणातीतलक्षणप्रश्न । किमाचार तदा-

चार कीदृश इति तच्चर्याप्रश्न । कथ च केनोपायेन त्रीनप्येतान् गुणानतीत्य वर्तते ॥ २१ ॥

द्वितीयाध्याये स्थितप्रज्ञस्य का भाषेत्यादिप्रश्नानुरूप प्रतिवचनमुक्तमपि पुनर्विशेषबुभुत्सया पृच्छतीति तदभिप्रायानुरोधेन तल्लक्षणादिक श्रीभगवानुवाच—प्रकाश चेति सप्तभि. । तत्रैकेन लक्षणमाह—

श्रीभगवानुवाच—

प्रकाशं च प्रवृत्तिं च मोहमेव च पाण्डव ।
न द्वेष्टि संप्रवृत्तानि न निवृत्तानि काङ्क्षति ॥ २२ ॥

प्रकाशमिति । हे पाण्डव ! सर्वद्वारेषु देहे ऽस्मिन् इति पूर्वोक्त सत्त्वकार्य प्रकाश च, लोभ प्रवृत्तिरारम्भ इत्युक्त रज कार्य प्रवृत्ति च, अप्रकाशो ऽप्रवृत्तिश्चेत्युक्त तम कार्य मोहमेव च, इत्येव प्रवृत्तानि ममेदानीं सत्त्वप्रत्ययो जात तेनाह स्वरूपसुखभ्रशित स्याम्, ममेदानीं दु खात्मिका राजसी प्रवृत्तिरुत्पन्ना तया ऽह स्वरूपस्फूर्त्या प्रचलित. सन् घोरे कर्मणि प्रवर्तित, इदानीं मम सर्वानर्थकरस्तामस प्रत्यय उद्भूत तेनाह स्वरूपसत्ताभ्रशमुपेत्य समूढो भवामीति न द्वेष्टि । सात्त्विकादिकार्याण्यात्मान प्रत्युपलभ्य निवृत्तानि भूयो न काङक्षति । स्वात्मार्थमेव तल्लक्षण स्वात्मप्रत्यक्षत्वात् न हि स्वात्मविषय द्वेषमाकाङ्क्षा वा पर पश्यति सो ऽय गुणातीत उच्यत इति चतुर्थेनान्वय ॥ २२ ॥

एव स्वसवेद्य गुणातीतलक्षणमुक्त्वेदानीं गुणातीत किमाचार इति द्वितीयप्रश्नप्रतिवचनमुपलम्भयति—उदासीनवदिति त्रिभि ।

उदासीनवदासीनो गुणैर्यो न विचाल्यते ।
गुणा वर्तन्त इत्येव यो ऽवतिष्ठति नेङ्गते ॥ २३ ॥

उदासीनवदिति । यथोदासीनो न कस्यचित्पक्षमवष्टभ्य व्यवहरति तथा ऽयमुदासीनवदासीनो गुणातीतत्वोपायमार्गे स्थित सन्यासी गुणैर्गुणकार्यैः सुखादिभिर्न विचाल्यते । कदाचिदपि प्रत्यक्परैक्यभावनातो न प्रच्यवत इत्यर्थ । तदेव व्यक्तीकरोति—गुणा इति । कार्यकरणविषयाकारतो ये गुणा परिणता ते खलु स्वस्वविषये प्रवर्तन्त इति यो ऽवतिष्ठति । यो ऽनुतिष्ठतीति वा पाठान्तरम् । एवमनुसधान कृत्वा स्वस्वरूपान्नेङ्गते न चलति, स गुणातीत उच्यत इत्युत्तरेणान्वय ॥ २३ ॥

गुणातीतस्य लक्षणान्तरमाह—

समदुःखसुखः स्वस्थः समलोष्टाश्मकाञ्चनः ।
तुल्यप्रियाप्रियो धीरस्तुल्यनिन्दाऽऽत्मसंस्तुतिः ॥ २४ ॥

समेति । समे दुःखसुखे यस्य स समदुःखसुखः साम्यब्रह्मात्मभावकबलितसुखदुःखवैषम्यत्वात्, अत एव स्वस्थ स्वे महिम्नि स्थितत्वात् । समानि लोष्टाश्मकाञ्चनानि यस्य स समलोष्टाश्मकाञ्चनः स्वातिरिक्तहेयोपादेयविकलत्वात्, तुल्ये सुखासुखमूले प्रियाप्रिये यस्य स तुल्यप्रियाप्रिय । अशरीरब्रह्मभावापन्नत्वात्, 'अशरीर वा व सन्त न प्रियाप्रिये स्पृशत[1]' इति श्रुते । स्वात्मनो निन्दा स्तुतिश्च यस्य तुल्या सो ऽय तुल्यनिन्दाऽऽत्मसस्तुति निन्दाऽऽद्यविषयत्वात् ।

[1] छा—८ १२ १

एवविशेषणविशिष्टा धी यस्य स धीरो ब्रह्मात्मनिष्ठ, स गुणातीत उच्यत इत्यन्वय ॥ २४ ॥

इतश्च गुणातीतत्वे हेत्वन्तरमाह—

मानावमानयोस्तुल्यस्तुल्यो मित्रारिपक्षयो' ।
सर्वारम्भपरित्यागी गुणातीतः स उच्यते ॥ २५ ॥

मानेति । स्वसमगोष्ठ्या बहुमत्यवमतिलक्षणयो मानावमानयो स्वहिताहितकारिणौ मित्रारिपक्षौ, तयोर्मित्रारिपक्षयोरपि तुल्य मानावमान-हिताहितहेतुदेहादावात्मत्वात्मीयत्वाभिमानाभावात् । यद्यपि गुणातीतस्य मित्रादिप्रतिभासो नास्ति, तथा ऽपि वयमस्य मित्राण्यरयश्चेति परेषा प्रतिभास सभवतीति कृत्वा तुल्यो मित्रारिपक्षयोरित्युक्तम् । इहामुत्र-फलहेतुभूतानि सर्वाणि नित्यनैमित्तिककाम्यप्रतिषिद्धकर्माणि मनोवाक्कायत आरभ्यन्त इत्यारम्भाः, तान् सर्वारम्भान् परित्यक्तु सन्यसितु शीलमस्येति सर्वारम्भपरित्यागी देहधारणामात्रनिमित्तातिरिक्तसर्वकर्मपरित्यागीत्यर्थ । एव-भूतो यः सन्यासी वर्तते स गुणातीत इत्युच्यते ॥ २५ ॥

'उदासीनवत्' इत्यादि 'गुणातीत स उच्यते' इत्यन्त गुणातीत-लक्षणमुक्त्वेदानीं त्रीन् गुणान् कथमतिवर्तत इति तृतीयप्रश्नस्योत्तरमाचष्टे—

मां च यो ऽव्यभिचारेण भक्तियोगेन सेवते ।
स गुणान्समतीत्यैतान्ब्रह्मभूयाय कल्पते ॥ २६ ॥

मामिति । ब्रह्मात्मनिष्ठो य सन्यासी कदाचिदपि यन्निष्ठातो न व्यभिचरति इत्यव्यभिचार, तेनाव्यभिचारेण ब्रह्मैवाहमहमेव ब्रह्मेति ब्रह्मा-

त्मैक्यभजन भक्ति, सैव योग, तेन भक्तियोगेन प्रत्यगभिन्नब्रह्मास्खलित-सम्यग्ज्ञानेन, मा च। चशब्दो ऽवधारणार्थं । मामेव सर्वप्रत्यगभिन्नपरमात्मान नारायण सेवते। सो ऽयमेतान् सत्त्वादींस्त्रीन्गुणान्समतीत्य ब्रह्मणो भवनं भूयो ब्रह्मभूय, तस्मै ब्रह्मभूयाय कल्पते। विमुक्तो भवतीत्यर्थ ॥ २६ ॥

एव यो मद्भावारूढ सन्मामुपास्ते तस्यैव प्रत्यगभिन्नब्रह्मरूपत्वात् सो ऽहमेवेति वदन्नध्यायार्थमुपसहरति—

ब्रह्मणो हि प्रतिष्ठा ऽहममृतस्याव्ययस्य च।
शाश्वतस्य च धर्मस्य सुखस्यैकान्तिकस्य च ॥ २७ ॥ इति।

इति श्रीमद्भगवद्गीतासु० गुणत्रयविभागयोगो नाम चतुर्दशो ऽध्यायः।

ब्रह्मण इति। हि यस्मात् प्रतीचि सर्वं प्रतितिष्ठति पर्यवस्यतीति प्रतिष्ठा ऽह प्रत्यक्तत्त्वस्वरूपत्वात्। कस्य प्रतिष्ठा त्वमसीति तत्राह —ब्रह्मण इति। स्वयमेव सर्वस्वरूपेणोपबृहणात् ब्रह्म, तस्येत्यर्थ । किंविशेषण-विशिष्टस्येति तत्राह—अमृतस्येति। अविनाशिन मर्त्यधर्मविलक्षणत्वात् अव्ययस्याविकारिण व्ययास्पदविकाराभावात् शाश्वतस्य धर्मस्य ज्ञानयोग-प्राप्यस्य सुखस्यैकान्तिकस्य भूमानन्दस्वरूपस्य ब्रह्मण परमात्मन प्रतिष्ठा ऽहम्। यदेतत्प्रत्यग्ज्ञान तेन खलु परमात्मा निश्चीयते। कुत एतदिति तत्रोच्यते। यया स्वशक्त्या भक्तानुग्रहार्थं ब्रह्म प्रत्यक्त्व गत सा शक्तिर्ब्रह्मैव, शक्तिशक्तिमतोरभेदात्। यद्वा स्वकार्यजातेनोपबृहणात् अविद्यापद ब्रह्मो-च्यते। तस्माविद्यापदस्य ब्रह्मण प्रतिष्ठा ऽह त्रिपाद्ब्रह्मस्वरूपत्वात्। तस्मा-दमृतस्यामरणधर्मात्मकस्याव्ययस्य निर्विकारनिष्कलब्रह्मस्वरूपावस्थानलक्षणस्य कैवल्यस्य च प्रतिष्ठा ऽह मद्रूपावस्थानलक्षणकैवल्यस्य जीवन्मुक्तपूगगम्य-

त्वात् शाश्वतानन्दलक्षणकैवल्यहेतुत्वात्तद्धर्मस्यापि शाश्वतत्वमुच्यते । यत शाश्वतस्य धर्मस्य च ज्ञाननिष्ठालक्षणस्य विदेहकैवल्यरूपेण प्रतिष्ठा ऽहमत तदीयसुखस्यैकान्तिकस्य च भूमानन्दकबलितविषयानन्दसतते प्रतिष्ठा ऽह निरतिशयानन्दसमुद्रत्वात् । इतिशब्द अध्यायपरिसमाप्त्यर्थ ॥ २७ ॥

परित्यक्ताखिलारम्भास्त्यक्त्वा त्रैगुण्यवैभवम् ।
यन्निर्गुणं पदं यान्ति तन्मे ब्रह्म प्रसीदतु ॥

इति श्रीमद्भगवद्गीतार्थप्रकाशिकाया चतुर्दशो ऽध्याय ।

पञ्चदशो ऽध्यायः

वैराग्यभक्तिसयुक्त ज्ञानं कैवल्यसाधनम् ।
इति सस्थापनार्थाय भवेत्पञ्चदशोद्यम ॥

. पूर्वाध्याये 'मा च यो ऽव्यभिचारेण भक्तियोगेन सेवते । स गुणान्समतीत्यैतान्ब्रह्मभूयाय कल्पते ॥' इत्युक्तम् । यत एव कर्मज्ञान-फलयो मदायत्तता, अतो ये प्रत्यगभिन्नब्रह्मज्ञानलक्षणभक्तियोगेन मा सेवन्ते ते खलु गुणातीता भूत्वा कैवल्य यान्ति । तादृशकैवल्यप्रापकमनन्यभक्ति-योगलक्षण सम्यग्ज्ञान कीदृशमित्यपृष्टमपि तद्विवक्षया वैराग्याभावे सम्यग्ज्ञा-नानुदयात् तदर्थमध्यायादौ ससार वर्णयन् सम्यग्ज्ञान श्रीभगवानुवाच—

श्रीभगवानुवाच—

ऊर्ध्वमूलमधःशाखमश्वत्थं प्राहुरव्ययम् ।
छन्दांसि यस्य पर्णानि यस्तं वेद स वेदवित् ॥ १ ॥

ऊर्ध्वमूलमिति । स्वाविद्याद्वयतत्कार्यविलक्षणत्वेन त्रिविधपरिच्छेदशून्य पुरुषोत्तमतत्त्वमूर्ध्वमुच्यते । तदेव मूलमास्पदमधिष्ठान यस्य ससारवृक्षस्य सो ऽयमूर्ध्वमूल , तमूर्ध्वमूलम् ,

'ऊर्ध्वमूलो ऽवाक्शाख एषो ऽश्वत्थ सनातन '

इति श्रुते । यस्याधोभागे महदहकारतन्मात्रादय शाखा इव विराजन्ते तमधःशाखम्, श्व प्रभातपर्यन्तमपि स्थास्यतीति विश्वासानर्हत्वादश्वत्थस्त प्राहु, तद्याथाऽऽत्म्यविद इति शेष । सम्यग्ज्ञानोदयानन्तरमदर्शनादश्वत्थत्व युक्तमेवेत्यर्थ.। स्वाज्ञानकालमारभ्य स्वज्ञानावधि यस्तिष्ठति सो ऽय ससारवृक्षो ऽव्यय, तमव्ययम्, अनाद्यनन्तदेहादिसातत्यास्पदत्वात्। तस्यैव विशेषणान्तरमादिशति---छन्दासीति । यथा वृक्षरक्षणार्थानि पर्णानि तथा ससारवृक्षस्य च्छादनात् गोपनात् छन्दासि वेदाश्चत्वार इहामुत्रफलप्रदर्शनार्थत्वात्। एव यथाव्याख्यातो ऽस्माभि ससारवृक्षः। त यो वेद जानाति स वेदवित्, वेदार्थसप्रदायविदित्यर्थ । न हि समूलससारवृक्षादात्मानात्मरूपादन्यज्ज्ञेय वस्त्वस्ति । यत एवमतस्तज्ज्ञानिन. सर्ववेदार्थविदिति स्तुतिरूपपद्यतेतरामिति भाव ॥ १ ॥

अस्य ससारवृक्षस्यावयवकल्पनोच्यते—

अधश्चोर्ध्वं प्रसृतास्तस्य शाखा
गुणप्रवृद्धा विषयप्रवालाः ।
अधश्च मूलान्यनुसंततानि
कर्मानुबन्धीनि मनुष्यलोके ॥ २ ॥

अधश्चेति । तस्य ससारवृक्षस्य महदहकारपञ्चतन्मात्रादय शाखास्थानीया अधश्च प्रसृता विस्तृता, महदाद्युपाधिका ईश्वरहिरण्यगर्भादय शाखास्थानीया ऊर्ध्वं च प्रसृता, ईश्वरादीना महदाद्यधिष्ठातृत्वात्। या पुन ससारवृक्षस्याधश्चोर्ध्वं च प्रसृता शाखास्ता किंविशेषणविशिष्टा इति तत्राह—गुणप्रवृद्धा इति । स्वोपाधिभूतै सत्त्वरजस्तमोगुणै प्रवृद्धा वृद्धिं गता.। यासा शाखाना शब्दादयो विषया प्रवालस्थानीया भवन्ति ता

विषयप्रवाला , शाखाऽग्रस्थानीयेन्द्रियवृत्तिगोचरत्वात् । अधश्चेति चशब्दादूर्ध्वं च गृह्यते । ऊर्ध्वमूल पुरुषोत्तमतत्त्वम् । तत्पुरस्तादेवोक्तम् । अधो मूलानि तावदवान्तरमूलानीत्युच्यन्ते । तानि च ब्रह्मादिस्तम्बान्तमनुसततान्यनुस्यूतान्यनुप्रविष्टानि । तत्तदुपाधितारतम्यत कारणानुरोधेन प्रवृत्तिदर्शनात्, मनुष्यलोके तु कर्मानुबन्धीनि, धर्माधर्मलक्षण कर्म, तदेवानुबन्धो निबन्धन येषा मूलाना तानि कर्मानुबन्धीनि कर्मफलजनितरागद्वेषादिवासनामूलानि धर्माधर्मप्रवृत्तिनिमित्तत्वात् । अत एव सर्वज्ञेन भगवतोक्तम् चातुर्वर्ण्यं मया सृष्ट गुणकर्मविभागश ' 'क्षिप्र हि मानुषे लोके सिद्धिर्भवति कर्मजा ' 'मम वर्त्मानुवर्तन्ते मनुष्या ' इत्यादि । मनुष्यलोकस्य कर्मफलार्जनभूमित्वात् तत्रैव कर्माधिकारो नान्यत्रेति श्रुतत्वात् तन्मूलानि कर्मानुबन्धीनीत्यर्थ. ॥ २ ॥

एव वर्णित ससारवृक्षो यो ऽश्वत्थ इति, सो ऽयमिदमित्थमिति ज्ञातु शक्य इति तत्राह—

न रूपमस्येह तथोपलभ्यते
नान्तो न चादिर्न च संप्रतिष्ठा ।
अश्वत्थमेनं सुविरूढमूल-
मसङ्गशस्त्रेण दृढेन छित्त्वा ॥ ३ ॥

न रूपमिति । इह ससारचक्रे भ्रमद्भि प्राणिभि अस्य ससारवृक्षस्य रूप यथा वर्णितम् 'ऊर्ध्वमूलम्' इत्यादिना तथा नोपलभ्यते स्वाप्निकप्रपञ्चवद् गन्धर्वनगरवच्चादृष्टदृष्टनष्टस्वरूपत्वात् । क्षणभङ्गुरत्वेन तत्साक्षात्काराभावे ऽपि तदन्तो द्रष्टुं शक्य इति तत्राह—नेति । अन्तो ऽवसान समाप्ति न विद्यते स्वाज्ञानकल्पितस्य स्वज्ञानेन विना समाप्त्यसभवात् । अवसानस्यादर्शने

ऽपि सादित्व स्यादित्यत आह—न चेति । इत आरभ्य ससारवृक्ष प्रादुर्भूत इति केनापि निर्णेतुमशक्यत्वात्तस्यानादित्वमित्यर्थ. । तस्यानादित्वेन तत्प्रतिष्ठोपलब्धिगोचर स्यादिति तत्राह—न चेति । स्वाज्ञानेन विना न चास्य प्रतिष्ठा स्थिति केनचिदुपलभ्यते, स्वज्ञानसूर्योदये स्वाज्ञानप्रभवस्य ससारध्वान्तस्यादर्शनात् । तथा चेत् क्षणप्रध्वसिन ससारवृक्षस्य स्वत एव नाशसभवात् तद्भेदने प्रयत्नो न कर्तव्य इत्याशङ्क्य रज्ज्वज्ञानोत्थसर्पाभासवदधिष्ठानज्ञान विना यतो दुरुच्छेदो भवति, अत तदधिष्ठानज्ञानमवष्टभ्य तदङ्गभूतविवेकवैराग्यशस्त्रेण च्छेत्तव्य इत्याह—छित्त्वेति । सुष्ठु विरूढानि सुदृढानि मूलानि यस्य त सुविरूढमूलमेन यथोक्तलक्षणमश्वत्थमिव संमाराभिध कोमलार्द्रवृक्ष दारैषणाधनैषणालोकैषणातो व्युत्थानमसङ्गशस्त्रम्, तेनासङ्गशस्त्रेण ब्रह्मात्मभावदृढीकृतेन पुन पुन विवेकवैराग्याभ्यासोपलनिशितेन समूल छित्त्वा तन्मूल ब्रह्म ज्ञातव्यमित्यर्थ ॥ ३ ॥

ससारवृक्षोन्मूलनानन्तर किं कर्तव्यमिति तत्राह—

ततः पदं तत्परिमार्गितव्यं
यस्मिन्गता न निवर्तन्ति भूयः ।
तमेव चाद्यं पुरुषं प्रपद्ये
यतः प्रवृत्तिः प्रसृता पुराणी ॥ ४ ॥

तत इति । तत ससारविषवृक्षच्छेदनानन्तर, यस्मिन् ससारवृक्षावूर्ध्वपदे गतास्तद्भावापन्ना यतयो न निवर्तन्ति भूय 'पुन ससाराय नावर्तन्ते । यत पुरुषोत्तमात् तदज्ञानभवससारविषवृक्षप्रवृत्ति ऐन्द्रजालिकरचिता मायेव पुराणी चिरतनी प्रसृता, य पद्यत इति पदशब्देनोक्त,

तमादौ भवमाद्य भूमब्रह्मरूपेण सर्वपरिपूरणात् पुरुष प्रत्यगभेदेन प्रपद्य इत्येव तदेतद्वैष्णव पद परिमार्गितव्य परिमार्गणमन्वेषण कर्तव्य ज्ञातव्यमित्यर्थ. ॥४॥

के पुनरेव ज्ञात्वा तत्पद गच्छन्तीत्यपेक्षायामाह—

निर्मानमोहा जितसङ्गदोषा
अध्यात्मनित्या विनिवृत्तकामाः ।
द्वंद्वैर्विमुक्ताः सुखदुःखसंज्ञै-
र्गच्छन्त्यमूढाः पदमव्ययं तत् ॥ ५ ॥

निर्मानेति । मूलाज्ञानारूढा मूढा कामिन , तद्विपरीता अमूढा सन्यासिन यत्स्वत परतो वा न व्येतीत्यव्यय तदेतत् पद विदेहकैवल्य गच्छन्ति । मानमोहजुष्टानाममूढत्व कुत इति तत्राह—निर्मानमोहा इति । अहकारो मानश्च, अतस्मिंस्तद्भावो मिथ्याऽभिनिवेशो मोहश्च, तौ मानमोहौ येभ्यो निर्गतौ ते खल्वमूढपदमर्हन्तीत्यर्थ । दारपुत्रादिसङ्गिना निर्मानमोहता कथमिति तत्राह—जितसङ्गदोषा इति । यै एषणात्रयव्युत्थानत पुत्रादि-सङ्गदोषो जित तेषा निर्मानमोहत्वमुपपद्यत इत्यर्थ । कथमध्यात्मशास्त्र-विमुखाना जितसङ्गदोषत्वमिति तत्राह—अध्यात्मनित्या इति । ब्रह्मात्मया-थाऽऽत्म्यमधिकृत्य भवतीत्यध्यात्म प्रत्यक्परैक्यज्ञानम्, तदेव नित्यत्वसाधन येषा त एव जितसङ्गदोषा । तादृशज्ञान विना दारादिसङ्गस्य दुस्त्यजत्वात् कुत कामिनामध्यात्मनित्यतेति तत्राह—विनिवृत्तकामा इति । मनोगतना-नासकल्पत्यागतो विनिवृत्त कामो येभ्यस्तेषामकामिनामध्यात्मनित्यत्वं सिद्धमित्यर्थ । द्वद्वाभिभूतानामकामित्व कुत इति तत्राह—विमुक्ता इति । शीतोष्णसुखदु खप्रियाप्रियादिद्वद्वैर्विमुक्तत्वात् तेषामकामित्व निरङ्कुश-मित्यर्थ ॥ ५ ॥

एवविशेषणविशिष्टै सूरिभि यत्पद प्राप्यने तदेव पुनर्विशिनष्टि—

न तद्भासयते सूर्यो न शशाङ्को न पावकः ।
यद्गत्वा न निवर्तन्ते तद्धाम परमं मम ॥ ६ ॥

न तदिति । यदिद वैष्णव धाम पद गत्वा सूरयो जात्वपि न निवर्तन्ते तदेतत्पद सर्वावभासको ऽपि सूर्यो न भासयते न प्रकाशयति, तथा न शशाङ्क पावको ऽपि, तदेव मम ब्रह्मात्मनो वासुदेवस्य परम सर्वोत्कृष्ट धाम । किचिदपि भिदागन्धासहसत्तासामान्यरूपकैवल्यत्वात् ॥ ६॥

यद्गत्वा न निवर्तन्ते तन्मदीय धामेति कथमुच्यते गतेरागत्यन्तत्वेन सयोगस्य विप्रयोगान्तत्वेन च प्रसिद्धे ? यदि नाम त्वदीय धाम प्रविष्टाना नावृत्ति तदा 'सति रूपद्य न विदु सति सपत्स्यामहे' इत्यादिश्रुत्यनुरोधेन प्रलयकाले सर्वेषा त्वत्प्राप्तेरविशेषात् । तथा सति को नाम ससारी त्वदुक्तसाधनसपत्त्या त्वद्धाम गत्वा न निवर्तेतेत्याकाङ्क्षायामाह—ममेति पञ्चभि —

ममैवांशो जीवलोके जीवभूतः सनातनः ।
मनःषष्ठानीन्द्रियाणि प्रकृतिस्थानि कर्षति ॥ ७ ॥

ममेति । यथा जले प्रतिबिम्बित सूर्य सूर्याश इति व्यवह्रियते यथा वा घटाद्युपाध्यवच्छिन्न व्योम व्योमाश इति व्यवह्रियते, तथा प्रत्यगभिन्नपरमात्मनो नारायणस्य ममैवाश इति व्यवह्रियते । को ऽयम् ? यो ऽय कर्ता भोक्तेति प्रसिद्धो जीवलोके ससारभूमौ जीवभूत इति च, सो ऽय सनातनः मत्स्वरूपत्वेन चिरतनत्वात् । यथा जलबिम्बितः सूर्याशो जलापाये

सनातन सूर्य प्राप्य न निवर्तते, यथा वा घटाद्यवच्छिन्न आकाशांशो घटाद्यपाये सनातनत्वेन प्रसिद्ध महाऽऽकाश भूत्वा सनातनो नावर्तते, तथा ऽय जीवलोको मदश स्वाविद्याऽपाये मामेव प्राप्य न पुनरावर्तत इति सिद्धत्वादुपपन्नम् 'यद्गत्वा न निवर्तन्ते' इत्यादि, 'सति सपद्य' इत्यादिश्रुत्यनुरोधेन स्वापादौ जीवभूतस्य सप्रकृतिके सति सपन्नत्वात्। न च निष्प्रकृतिके मयि। अत एवोक्तम् 'अव्यक्ताद्व्यक्तय सर्वा प्रभवन्ति' इत्यादिना अविदुषा पुनरावृत्तिमत्त्वम्। निरशस्य ममाशत्वेन कल्पितजीवसद्भावात् सो ऽय जीवो यो ऽय मदशत्वेन कल्पित सृष्टिप्रलययो स्वप्रकृतौ कर्णशष्कुल्यादौ तिष्ठन्तीति प्रकृतिस्थानि मन षष्ठ येषा तानि श्रोत्रादिज्ञानेन्द्रियाणि। प्राणकर्मेन्द्रियाणामुपलक्षणार्थमिन्द्रियग्रहणम्। ससारभोगार्थं कर्षति, तानि सर्वाण्याकृष्य ससरतीत्यर्थ ॥ ७ ॥

कदा जीव प्रकृतिस्थानीन्द्रियाण्याकृष्य ससरतीत्यपेक्षायामाह—

शरीरं यदवाप्नोति यच्चाप्युत्क्रामतीश्वरः।
गृहीत्वैतानि संयाति वायुर्गन्धानिवाशयात्॥ ८॥

शरीरमिति। देहेन्द्रियसंघातस्वामीश्वरो जीवो यद्यदा शरीरं कर्मवशादाप्नोति, यच्च यतश्च स्वाधिष्ठेयशरीरादुत्क्रामति तदा वायु पुष्पाशयात् तद्गतगन्धानिव मन षष्ठान्येतानि सर्वेन्द्रियाणि गृहीत्वा आदाय सयाति लोकान्तर शरीरान्तर स्वीकृत्य गच्छतीत्यर्थ ॥ ८ ॥

कानि तानीन्द्रियाणि यदर्थ गृहीत्वा गच्छतीति तत्राह—

श्रोत्रं चक्षुः स्पर्शनं च रसनं घ्राणमेव च।
अधिष्ठाय मनश्चायं विषयानुपसेवते॥ ९॥

श्रोत्रमिति । श्रोत्र चक्षु स्पर्शन रसन घ्राणमित्येतानि बाह्येन्द्रियाणि मनो ऽन्त करणमन्तरिन्द्रिय चाधिष्ठाय जीवो देहस्वामी शब्दादीन्विषयान् सकल्पादींश्चोपसेवते ॥ ९ ॥

'शरीर यदवाप्नोति' इत्यादिना शरीरेन्द्रियादिभ्यो जीवस्य वैलक्षण्यमुक्तम् । एव शरीरेन्द्रियसघातभावाभाववेत्तार कूटस्थमात्मान सर्वे किमिति न पश्यन्तीत्यपेक्षायामाह—

उत्क्रामन्तं स्थितं वा ऽपि भुञ्जानं वा गुणान्वितम् ।
विमूढा नानुपश्यन्ति पश्यन्ति ज्ञानचक्षुषः ॥ १० ॥

उत्क्रामन्तमिति । विक्षेपमूलावरणशक्त्या आवृतविवेकदृष्टयो विमूढा अज्ञानिन, पूर्वोपात्तशरीरमुत्क्रामन्त तत्परित्यज्य गच्छन्त तादात्म्याध्यासेन देहे स्थित वा शब्दादीन्विषयान् भुञ्जान वा सुखदु खमोहाख्यै सत्त्वादिभिस्त्रिभिर्गुणैरन्वितमेवमत्यन्तदर्शनयोग्यमप्येन नानुपश्यन्ति देहेन्द्रियाद्यतिरेकेण न जानन्ति, विषयभोगाभिलाषावृतदृष्टित्वात् । तमेव के पुन पश्यन्तीति तत्राह—ज्ञानेति । श्रुत्याचार्यप्रसादतो विचारितवेदान्तसिद्धान्तवाक्यार्थप्रत्यक्परैक्यज्ञानमेव चक्षुर्येषा विदुषा ते ज्ञानचक्षुषो देहातिरिक्त प्रत्यञ्च पराभेदेन पश्यन्ति जानन्तीत्यर्थ ॥ १० ॥

'पश्यन्ति ज्ञानचक्षुष' इत्युक्तम् । किं सर्वे शास्त्रार्थदृश पश्यन्तीत्यपेक्षायामेवमनेकेषु सत्सु केचिदेव पश्यन्तीत्याह—

यतन्तो योगिनश्चैनं पश्यन्त्यात्मन्यवस्थितम् ।
यतन्तो ऽप्यकृतात्मानो नैनं पश्यन्त्यचेतसः ॥ ११ ॥

यतन्त इति। केचिद्विशुद्धचित्ता योगिन श्रवणमनननिदिध्यासनै यतन्त सन्त स्वात्मन्यन्त करणे तत्साक्षित्वेनावस्थितमेन प्रत्यञ्चमात्मान परमात्माभेदेन पश्यन्ति । ब्रह्मैवाहमहमेव ब्रह्मेत्यपरोक्षतया जानन्तीत्यर्थ । श्रुत्याचार्यप्रसादात्तशास्त्रादिप्रमाणैरकृतो ऽसस्कृत आत्मा ऽन्त करण येषा ते ऽकृतात्मान केचिद्योगिन श्रवणादिभिर्यतन्तो ऽपि विषयतृष्णया ब्रह्मात्मभावापन्न चेतो येषा न विद्यते ते अचेतसो भूत्वा प्रकृतमेनमात्मानमयमहमस्मीति न पश्यन्ति, विषयव्यापारानुपरतत्वात् ॥ ११ ॥

सर्वावभासको ऽप्यादित्यो यत्पदमवभासयितु न पारयति, जीवन्मुक्तपूगो यत्पद प्राप्य न पुनरावर्तते, यत्पद सर्वात्मकत्वेन सर्वव्यवहारास्पद भवति, तत्पद प्रकटयितु स्वविभूतिसक्षेपमादिशति भगवान्वासुदेव — यदिति चतुर्भि ।

यदादित्यगतं तेजो जगद्भासयते ऽखिलम् ।
यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम् ॥ १२ ॥

यदिति । आदित्यगत यत्तेजो दीप्तिरखिल जगद्भासयते, चन्द्रमस्यग्नौ च यद्यत्स्वभास्यभासक तेजो वर्तते, तदेतदखिल तेजो मामकमिति विद्धि । यद्वा, आदित्यचन्द्राग्न्यादिगत प्रत्यक्तेजो मामक वैष्णव विजानीहीत्यर्थ । चेतनाचेतनेषु चैतन्यज्योतिष समत्वात् यदादित्यगतमित्यादि विशेषण कथमुपपद्यत इत्यपेक्षायामादित्यादीनामत्यन्तसत्त्वोपाधित्वेन तद्गतचैतन्यस्फूर्तेः सर्वजनप्रत्यक्षत्वाद्यदादित्यगतमिति तद्विशिष्यते न तु तत्रैवाधिकमिति । यथा दर्पणकुड्यादौ पार्थिवत्वेन समे ऽपि दर्पणस्य स्वच्छत्वेन तत्र सौर तेज स्फुटमवगम्यते, न तथा कुड्यादौ, तेन न च सौरतेजस सर्वसमप्रकाशकत्वव्याहतिस्तद्वदित्यर्थ ॥ १२ ॥

इतश्च प्रकृतपदस्य सार्वात्म्यं स्फोरयति—

गामाविश्य च भूतानि धारयाम्यहमोजसा ।
पुष्णामि चौषधीः सर्वाः सोमो भूत्वा रसात्मकः ॥ १३ ॥

गामिति । अहमीश्वरो भूदेवतारूपेण गा भूमिमाविश्य, च ओजसा कामरागविवर्जितेन पारमेश्वरबलेन चेतनाचेतनात्मकानि भूतानि धारयामि । अत एव हि भूमि गुरुभारेण विदीर्य नाध पतति, 'स दाधार पृथिवीं द्याम्' इति मन्त्रवर्णात् । सर्वरसानामाकरत्वात् रसात्मको ऽह सोमो भूत्वा स्वात्मरसानुप्रवेशेन व्रीह्यादिसर्वौषधी पुष्णामि पुष्टिमती स्वादुमतीश्च करोमीत्यर्थ ॥ १३ ॥

इतश्च स्वस्य सर्वात्मकत्वे हेत्वन्तरमाह—

अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः ।
प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम् ॥ १४ ॥

अहमिति । 'अयमग्निर्वैश्वानरो यो ऽयमन्तः पुरुषे येनेदमन्न पच्यते[1]' इतिश्रुत्यनुरोधेनाह परमेश्वरो जाठरवैश्वानरो भूत्वा प्राणिना देहमाश्रित सन् प्राणापानाभ्यामूर्ध्वाधोगतिभ्या समायुक्त सहितो भूत्वा भक्ष्यभोज्यलेह्यचोष्यभेदात् चतुर्विधमन्न पचामि पक्व करोमि । दन्तैरवखण्ड्यावखण्ड्य यद्भक्ष्यते तदपूपादि भक्ष्यम् । जिह्वया ऽऽलोड्य निगीर्यते पायसादि यत्तद्भोज्यम् । जिह्वाया निक्षिप्य यत्तु निगीर्यते द्रवीभूत गुडादि तत्तु लेह्यम् । यत्तु दन्तैर्निष्पीड्य रसाश स्वीकृत्य शिष्ट त्यज्यते तत्त्विक्षु-

[1] बृ ५. ९.

खण्डादि चोष्यमित्युच्यते । वैश्वानरदृष्टिर्भोक्तरि सोमदृष्टिर्भोज्यवर्गे, एव भोक्तृभोज्यरूपमिद सर्वमग्नीषोमात्मकमिति भुक्तिकाले यो ध्यायति, तस्य भोक्तुरन्नकृतो दोषो न भवतीति भाव ॥ १४ ॥

इतश्च स्वस्य सर्वात्मकत्वे हेत्वन्तर स्फुटयति—

सर्वस्य चाहं हृदि संनिविष्टो
मत्तः स्मृतिर्ज्ञानमपोहनं च ।
वेदैश्च सर्वैरहमेव वेद्यो
वेदान्तकृद्वेदविदेव चाहम् ॥ १५ ॥

सर्वस्येति । सर्वस्य ब्रह्मादिस्तम्बान्तप्राणिजातस्य हृदि अन्त करणे तद्भावाभावप्रकाशकत्वेन तद्गतगुणदोषास्पृष्टत्वेन च यत परमेश्वरो ऽह सनिविष्ट ,अतो मत्त परमेश्वरादेव पुण्यकर्मणा पुरुषाणा स्वस्वकर्मानुरोधेन जन्मान्तरादावनुभूतपदार्थस्मृतिरात्मानात्मयाथाऽऽत्म्यज्ञान च प्रादुर्भवति, पापकर्मणा स्वकृतकर्मानुरोधेन स्मृतिज्ञानयोरपोहन च भवति । सर्वैर्वेदैश्च, चशब्दात् निखिलशास्त्रपुराणेतिहासैरह परमेश्वरो वेद्यो वेदितव्यो भवामि , कि च वेदान्तकृद्वेदान्तसंप्रदायप्रवर्तकज्ञानप्रदत्वात ब्रह्मादिस्तम्बान्तदेशिको ऽहमेव,वेदवित् निरङ्कुशसर्वज्ञत्वादित्यर्थ ॥ १५ ॥

'यदादित्यगत तेज ' इत्यादिना विशिष्टोपाधितो विभूतिसक्षेप उक्त । इदानीं सर्ववेदान्तसिद्धान्तार्थं निष्कल पुरुषोत्तमभाव क्षराक्षरातीतत्वेन प्रतिपादयति—द्वाविति त्रिभि ।

द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च ।
क्षरः सर्वाणि भूतानि कूटस्थो ऽक्षर उच्यते ॥ १६ ॥

द्वाविति। लोके ऽस्मिन् संसारभूमौ द्वाविमौ पुरुषावुच्येते। कौ ताविति तत्राह—क्षर इति। क्षरतीति क्षरः क्षणभङ्गुरत्वात्, अविद्या-तत्कार्यतो न क्षरतीत्यक्षरः, क्षरश्चाक्षर एव चेति द्वाविमौ पुरुषौ विद्येते इत्यर्थः। को ऽय क्षर इति तत्राह—सर्वाणीति। भूतानि ब्रह्मादिस्तम्बान्त-भूतग्रामशरीराणि, तेषामदृष्टदृष्टनष्टरूपत्वेन मध्यमक्षणभावित्वात् सर्वाणि भूतान्येव क्षरशब्देनोच्यन्ते। अज्ञलोकस्य शरीरेष्वेव पुरुषत्वप्रसिद्धेः। को ऽयमक्षर इति तत्राह—कूटस्थ इति। स्वात्तोपाधिषु प्रतिक्षणं विनश्यत्स्वपि कूटः शिलाराशिरिवाविनाशितया तिष्ठतीति कूटस्थः। यद्वा कूटं तूलाविद्या-तत्कार्यजातम्, तत्राविकारित्वेन तिष्ठतीति कूटस्थः चेतनो जीवो ऽक्षरः पुरुष उच्यते विवेकिभिर्देहातिरेकेण पुरुषग्रहणात् ॥ १६ ॥

यदर्थमेतौ विवक्षितौ तदेतत्क्षराक्षरातीतत्वेन नित्यशुद्धबुद्धपरमानन्द-स्वभावं परमाक्षरं क्षराक्षरोपाधिगुणदोषास्पृष्टत्वात् स्वस्य निष्कलं भावमुप-दिशति—

उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः।
यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः ॥ १७ ॥

उत्तम इति। स्वतः परतो वा नास्य व्ययो विद्यत इति यो ऽव्ययो नारायणः सर्वज्ञः परमेश्वरो भूरादिलोकत्रयमविद्यापदस्थूलसूक्ष्मबीज-भागोपलक्षणार्थं तत्समग्रं वा स्वसत्तास्फूर्तिसुखस्वरूपेणाविश्य स्वीयक्रिया-ज्ञानेच्छाशक्तिभिर्बिभर्ति धारयति, सो ऽय क्षराक्षरपुरुषाभ्यामुत्कृष्टतमत्वा-दुत्तमः पुरुषस्त्वन्यः, ताभ्यामत्यन्तविलक्षणत्वात्। तदेव स्फोरयति—परमात्मेति। स्वाविद्याद्वयतत्कार्यविलक्षणत्वेन परमश्चासावात्मा चेति परमा-त्मेत्युदाहृतो वेदान्तेष्वित्यर्थः ॥ १७ ॥

यो ऽय सर्वप्रत्यगभिन्न परमात्मा पुरुषोत्तम इत्युक्त , तस्य लोक-वेदप्रसिद्धमन्वर्थं नाम निर्दिशति—

यस्मात्क्षरमतीतो ऽहमक्षरादपि चोत्तमः ।
अतो ऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ॥ १८ ॥

यस्मादिति । यस्मात् संसारमायावृक्षं क्षरतीति क्षरमतीतो ऽह मायाससारवृक्षबीजादक्षरादपि चोत्तम उत्कृष्टतमो भवामि, अतस्तस्मा त्ताभ्या क्षराक्षराभ्यामुत्तमत्वात् पुरुषोत्तम इति लोके वेदे च प्रथित प्रख्यात इति कवय सर्वत्रेद नाम निबध्नन्ति ॥ १८ ॥

यथोक्त पुरुषोत्तमतत्त्वं यो वेद तस्य सर्वज्ञत्व फलमादिशति—

यो मामेवमसंमूढो जानाति पुरुषोत्तमम् ।
स सर्वविद्भजति मां सर्वभावेन भारत ॥ १९ ॥

य इति । हे भारत ! श्रुत्याचार्यप्रसादात्तस्वज्ञानकबलितमूलाज्ञाना-वरणस्वान्तो यो ऽसमूढो विद्वानेवमुक्तप्रकारेण यथोक्तविशेषणविशिष्ट पुरुषोत्तमं मां जानाति सर्वप्रत्यगभिन्नपरमात्मा ऽस्मीत्यपरोक्षीकरोति सर्वभावेन सर्वात्मकतया मा पुरुषोत्तम भजति, सो ऽय विद्वान् सर्वात्मान मा वेत्तीति सर्ववित् सर्वज्ञो भवति । सर्वात्मभावलक्षणा विदेहमुक्ति प्राप्नोतीत्यर्थ ॥१९॥

स्वतत्त्वज्ञानिनः कैवल्यफलमुक्त्वा ऽध्यायार्थमुपसहरति—

इति गुह्यतमं शास्त्रमिदमुक्तं मया ऽनघ ।
एतद् बुद्ध्वा बुद्धिमान्स्यात्कृतकृत्यश्च भारत ॥२०॥ इति ।

इति श्रीमद्भगवद्गीतासु० पुरुषोत्तमयोगो नाम पञ्चदशो ऽध्याय ।

इतीति। हे अनघ! इत्येवमुक्तप्रकारेणैतत् गुह्यतममनधिकारिष्वत्यन्तमेव गोपनीयत्वात्। किं तत्? शास्त्रं गीताशास्त्रस्यास्मिन्नध्याये सक्षेपेणोक्तत्वात् 'यस्त वेद स वेदवित्' 'वेदैश्च सर्वैरहमेव वेद्य' इत्यादिना सर्ववेदान्तार्थस्य चात्रैव परिसमाप्तत्वादिदमेव पुरुषोत्तमाध्यायाख्य शास्त्रमिति सर्वज्ञेन मयोक्तम्। हे भारत! यथा मया प्रकटितमेतच्छास्त्रमर्थतो य कश्चन वा यथावद्बुद्ध्वा, प्रत्यक्परैक्यविषयकबुद्धिर्ज्ञान तद्वान् बुद्धिमान् कृत कृत्य कर्तव्य येन स कृतकृत्यश्च स्यात्। प्रत्यगभेदेन भगवत्तत्त्वे विदिते ब्राह्मण्यपद प्रतिपन्नेन यत्कर्तव्य तत्सर्व कृत भवेदिति भाव। 'सर्व कर्माखिल पार्थ ज्ञाने परिसमाप्यते' इत्युक्तत्वात्। यत त्वमेतच्छास्त्र श्रुतवानसि अत कृतार्थो भवसि। इतिशब्द अध्यायपरिसमाप्त्यर्थ ॥२०॥

सञ्छिद्याश्वत्थमधुना तन्मूलज्ञानखड्गत ।
यतयो यत्पद यातास्तन्मे दिशतु मङ्गलम् ॥

इति श्रीमद्भगवद्गीताऽर्थप्रकाशिकाया पञ्चदशो ऽध्याय ॥

षोडशो ऽध्यायः

दैवीं सपदमाश्रित्य यस्त्यजेदासुरीं श्रियम् ।
तस्य ज्ञानाधिकार स्यादित्याख्यातुमुपक्रम ॥

पू .ध्यायान्ते 'गुह्यतम शास्त्रम्' 'एतद्बुद्ध्वा बुद्धिमान्स्यात्' इत्युक्तम् । तत्रैतत्तत्त्व को बुध्यति, को वा न बुध्यतीत्यपेक्षाया, तत्त्वज्ञानाधिकार्यनधिकारिविवेचनार्थं, नवमाध्याये प्राणिना प्रकृतयो दैव्यासुरी राक्षसी चेति त्रिधा सूचिता । तासा मध्ये, राक्षसीमासुरीं चेति प्रकृतिद्वयमुन्मूल्य, दैवीं प्रकृति यो भजति, स एव मत्प्रापकज्ञानाधिकारी नान्य इति प्रतिपादयितु षोडशाध्याग श्रीभगवानुवाच । तत्रादौ दैवीं संपदमाह—अभयमिति त्रिभि ।

श्रीभगवानुवाच—

अभयं सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः ।
दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम् ॥ १ ॥

अभयमिति । भयहेतुद्वैताभावात् अभय भयादर्शनम् । सत्त्वस्यान्तःकरणस्य सशुंद्धि व्यवहारकाले ऽपि परवञ्चनानृतादिवर्जनपूर्वक शुद्धसत्त्वभावेन स्थिति । श्रुत्याचार्यमुखतः प्रत्यगभेदेन ब्रह्मवेदन ज्ञानम्, तज्ज्ञान लब्ध्वेन्द्रियद्वयेनेन्द्रियद्वयार्थाग्रहणेन यद् ब्रह्मात्मैक्यध्यान तदेव योग.,

तयोर्ज्ञानयोगयो र्व्यवस्थिति तन्निष्ठाप्रधानैषा दैवी सपत्। यथोक्ताधिकारिणि ब्रह्मविद्योपदेशो दानम्। बाह्यकरणनिग्रहो दमश्च। चशब्दादन्त.-करणनिग्रहश्च गृह्यते। अग्निष्टोमादिर्यज्ञश्च। चशब्दात् स्मार्तो देवयज्ञादि गृह्यते। ऋगाद्यध्ययन स्वाध्याय। आत्मानात्मयाथाऽऽत्म्यालोचन तप। सर्वदा ऋजुत्वमार्जवम्॥ १॥

अहिसाऽऽदिरपि दैवी सपदित्याह—

अहिंसा सत्यमक्रोधस्त्यागः शान्तिरपैशुनम्।
दया भूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलम्॥ २॥

अहिसेति। प्राणिनामहिसनमहिसा। प्राण्यप्रियानृतवर्जनपूर्वकं यथाऽर्थवचन सत्यम्। स्वावरजनकृतस्वपरिभवताडनादिभवक्रोधसहनमक्रोध। सर्वसङ्गपरित्यागलक्षण सन्यासस्त्याग, पूर्वमेव दानस्योक्तत्वात्। सर्वत्रालंमति शान्ति। अन्यत्र पररन्ध्रप्रकटीकरण पैशुनम्, अपैशुन तदभाव। दु खितेषु भूतेषु कृपैव दया। विषयसनिधाने ऽप्यविकृतचित्तत्वमलोलुप्त्वम्। अलोलुपत्वमिति वक्तव्ये अलोप आर्ष। कुत्रापि क्रौर्यानवकाशात् सर्वत्र मृदुत्व मार्दवम्। अविद्वद्गोचरार्थप्रवृत्तौ लज्जैव ह्री। दु साधे ऽर्थे बाह्यान्तरिन्द्रियाव्यापारयितृत्वमचापलम्॥ २॥

प्रागल्भ्यादिकमपि दैवी सपदित्याह—

तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता।
भवन्ति संपदं दैवीमभि जातस्य भारत॥ ३॥

तेज इति। हे भारत! सूक्ष्मबुद्धिमत्त्व प्रागल्भ्य वा तेज, न त्वगिन्द्रियगता दीप्ति। परैस्ताडितस्यापि अन्तर्विक्रियाऽनुत्पत्तिः क्षमा।

क्षमाऽक्रोधयो न पुनरुक्ति, तयो शब्दभेदवदर्थभेदस्योक्तत्वात्। क्रोधानुत्पत्ति क्षमा, उदितायामपि क्रोधवृत्तौ तदुपशमनमक्रोध । इत्थ क्षमाऽक्रोधयोर्विशेष । यदवष्टम्भत करणग्रामो नावसीदति सेय धृति धैर्यम्। बाह्यमान्तर चेति द्विविध शौचम्। मृज्जलाभ्या बाह्यशुद्धि, मनोबुद्धिनैर्मल्यमन्त शुद्धि, रागादिकालुष्यराहित्यम्। स्वस्मिन्विश्वस्तस्वामिमित्रानपकृतिरद्रोह । विद्वानहमित्यादिमतिर्मान, मत्सदृश' को ऽपि नास्तीत्यतिमान, स यस्य विद्यते सो ऽतिमानी, तद्भावो ऽतिमानिता, तदभावो नातिमानिता। एषैव सात्त्विकी दैवी सपत्। एतानि विशेषणानि कस्येत्यत आह-- अभि जातस्येति। देवानामिय दैवी सात्त्विकी सपत्, तामभि जातस्य भाविकल्याणभाजनस्य साधकस्याभयादीन्यनतिमानिताऽन्तानि ज्ञानसाधनानि षड्विशतिभेदतो भवन्ति। एव षड्विशतिसाधनसपन्नो यो मुमुक्षु स एव प्रत्यगभिन्नब्रह्मज्ञानाधिकारी, नेतर इत्यर्थ ॥ ३ ॥

ज्ञानाधिकारिनिर्देशार्थ दैवीं सपदमुक्त्वा तदनधिकारिण निर्देष्टुमासुरीं सपदमाचष्टे—

दम्भो दर्पो ऽतिमानश्च क्रोधः पारुष्यमेव च।
अज्ञानं चाभि जातस्य पार्थ संपदमासुरीम्॥ ४ ॥

दम्भ इति। धर्मध्वजित्व दम्भ । विद्याधनस्वजनादिप्रयुक्तो गर्वो दर्प । स्वस्मिन् सर्वोत्कृष्टत्वाध्यारोपश्च अतिमान । स्वावरापकारिषु नेत्राद्युत्कटक्षोभहेतु अन्त करणवृत्तिविशेष क्रोध । साधून् प्रति परुषवचनमेव च पारुष्यम्। कर्तव्याकर्तव्यविवेकराहित्यमज्ञानम्, एषा सपद्व्यासुरी। कस्यैतानि विशेषणानि भवन्तीत्यत आह—अभि जातस्येति। हे पार्थ!

असुराणामियमासुरी सपद्राजसी, तामभि जातस्य पुरुषस्य दम्भादीन्य-
ज्ञानान्तानि ज्ञानानधिकारितासूचकानि षड् लिङ्गानि भवन्ति ॥ ४ ॥

अनयो सपदो. फलमाह—

दैवी संपद्विमोक्षाय निबन्धायासुरी मता।
मा शुचः संपदं दैवीमभि जातो ऽसि पाण्डव ॥ ५ ॥

दैवीति । ससारबन्धनाद्विमोक्षाय दैवी सपद्भवति । आसुरी सपत्तु ससार एव नियतो बन्धो निबन्ध, तस्मै निबन्धाय मता । तथा राक्षसी सपच्च । एव भगवद्वचनमाकर्ण्य किमहमासुरसपद्युक्त किं वा दैवसपद्युक्त इति सदिहानमर्जुनमालक्ष्याह— मा शुच इति । हे पाण्डव! दैवीं सपदमभि जातो ऽसि, भाविकल्याणभागसि । नो चेत् मच्छिष्यत्व मद्दर्शनादिर्वा कथ ते भवेत् । यत एवमतस्त्व मा शुच आसुरीं सपदमभि जातो ऽस्मीवेति शोक मा कार्षीरित्यर्थ ॥ ५ ॥

निर्दया राक्षसी सपदस्ति चेत् कस्मात्सा नोक्तेत्यपेक्षाया तस्या-स्तावदासुर्यामेवान्तर्भावात्सा पृथड् न वक्तव्येत्याह—

द्वौ भूतसर्गौ लोके ऽस्मिन्दैव आसुर एव च ।
दैवो विस्तरशः प्रोक्त आसुरं पार्थ मे शृणु ॥ ६ ॥

द्वाविति । हे पार्थ! लोके ऽस्मिन् ससारमण्डले दैव आसुर एव चेति दैवासुरसपदो प्रकृतत्वात् भूताना सर्गौ सृष्टी द्वौ द्विसख्या-कावुच्येते । तथा च श्रुति —'द्वया ह प्राजापत्या देवाश्चासुराश्च[1]'

[1] बृ १ ३

इति। तयो भूतसर्गयो 'अभय सत्त्वसशुद्धि' इत्यादिना दैवो ऽय सर्गो विस्तरश प्रोक्त, न त्वासुर। समग्रमासुर सर्ग मे मम वचनात् विस्तरश शृणु अवधारय। न चासुरसर्गस्य परिहर्तव्यत्वेन तद्वेदनमनर्थकमिति वाच्यम्, तद्याथाऽऽत्म्यज्ञानाभावे परिहर्तुमशक्यत्वात् तत्परिहाराय तद्वेदन युक्तमित्यर्थ ॥ ६ ॥

ज्ञात्वा खलु परिहर्तव्यमित्यासुरी सपद विस्तरशो निरूपयति-- प्रवृत्ति चेत्यादिभिर्द्वादशभि ।

प्रवृत्तिं च निवृत्तिं च जना न विदुरासुराः।
न शौचं नापि चाचारो न सत्यं तेषु विद्यते ॥ ७ ॥

प्रवृत्तिमिति। आसुरा जना पुरुषार्थसाधनत्वेन धर्मप्रवृत्ति च स्वानर्थहेतुत्वेनाधर्मनिवृत्ति च न विदु न जानन्ति। न केवल तेषा प्रवृत्तिनिवृत्त्यज्ञानम्, किं तु तेष्वासुरस्वभाववज्जनेषु बाह्यान्तरभेदेन शौचद्वय न विद्यते। नापि स्वाश्रमोचितसपत्ति। सत्य च यथाऽर्थवचनलक्षण सत्यमपि न विद्यते ॥ ७ ॥

वेदोक्तधर्माधर्मप्रवृत्तिनिवृत्ती कथ न विदु, धर्माधर्मानङ्गीकारे कथ जगत सुखदु खादिव्यवस्था स्यात्, कथमीश्वराज्ञालक्षणा स्वाश्रमोचितशौचाचारादिनियति लङ्घयेयु, ईश्वरानङ्गीकारे कुतो जगदुत्पत्त्यादि स्यादित्यपेक्षायामाह--

असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम्।
अपरस्परसंभूतं किमन्यत्कामहैतुकम् ॥ ८ ॥

असत्यमिति। यथा वयमनृतप्राया तथेदं जगदसत्यम्। नास्य धर्माधर्मौ प्रतिष्ठाहेतू विद्येते। अत एवाप्रतिष्ठितं जगदाहुः। न च जगच्छासितेश्वरो विद्यते। यत एवमतो निरीश्वरं जगदाहुः। के ते? आसुरा जनाः। तर्हि जगत्कस्मादुत्पन्नमिति तत्राह—अपरस्परेति। अपरः परश्चेत्यपरस्परम्, अपरस्परतः अन्योन्यतः स्त्रीपुरुषमिथुनात् जगत्सम्भूतम्। किमन्यदस्ति कारणम्? किं तु स्त्रीपुरुषयोरन्योन्यसंयोगः कामः, स एव प्रवाहरूपेण हेतुः। एवं कामहैतुकम्। न हि कामातिरेकेण धर्माधर्मादिकारणान्तरं विद्यत इति लौकायतिकदृष्टिमाश्रित्य प्राहुरित्यर्थः ॥ ८ ॥

का दृष्टिमवष्टभ्यैवमेते वदन्तीति तत्राह—

एतां दृष्टिमवष्टभ्य नष्टात्मानोऽल्पबुद्धयः।
प्रभवन्त्युग्रकर्माणः क्षयाय जगतोऽहिताः ॥ ९ ॥

एतामिति। देहादावात्मत्वात्मीयत्वाभिमानेनाल्पा परिच्छिन्नविषया बुद्धिर्येषामासुराणां ते अल्पबुद्धयः पुरुषा लौकायतिकाश्रयामेतां दृष्टिमवष्टभ्य नष्ट आत्मा ऽन्तःकरणं येषां ते नष्टात्मानः भ्रष्टपरलोकसाधनानुष्ठानमनसो भूत्वा प्राणिमात्रस्य जगतोऽहिताः शत्रवः सन्तः उग्रं क्रूरं हिंसाऽऽत्मकं कर्म येषां त उग्रकर्माणो भूत्वा जगतः क्षयाय प्रभवन्ति प्रादुर्भवन्तीत्यर्थः ॥ ९ ॥

तानेव प्रकारान्तरेण व्यनक्ति—

काममाश्रित्य दुष्पूरं दम्भमानमदान्विताः।
मोहाद् गृहीत्वाऽसद्ग्राहान्प्रवर्तन्तेऽशुचिव्रताः ॥ १० ॥

काममिति। अशुचीनि कलञ्जमद्यमांसविषयाणि व्रतानि येषां ते अशुचिव्रताः पुरुषाः दुःखेनापि यस्य कुक्षिः न पूर्यते तं दुष्पूरमिच्छा-

विशेष काममाश्रित्य, दम्भश्च मानश्च मदश्च दम्भमानमदा , तैरन्विता सन्त मोहादनेन मन्त्रेणैता देवतामुपास्य निध्यादीन् प्राप्स्याम इत्यसद्ग्रहान्दुरवग्रहान् स्वीकृत्य प्रवर्तन्ते ॥ १० ॥

पुनर्विधाऽन्तरेण तानेव विशदयति —

चिन्तामपरिमेयां च प्रलयान्तामुपाश्रिताः ।
कामोपभोगपरमा एतावदिति निश्चिताः ॥ ११ ॥

चिन्तामिति । प्रलयो मरणमेवान्तो ऽवसान यस्या चिन्ताया ता प्रलयान्ताम्, यस्या स्वरूपमियत्तया परिमातुमशक्य तामपरिमेया चिन्तामुपाश्रिता आसुरा जना , काम्यन्त इति कामा विषया शब्दादय , श्रोत्राद्यक्षै तदुपभोग एव परम पुरुषार्थो येषा ते कामोपभोगपरमा भूत्वा, देहधारिणैतावदेव प्राप्तव्य नातो ऽतिरिक्तमस्तीति निश्चिता सन्तो ऽर्थसचयानीहन्त इत्युत्तरेणान्वय । यतश्चैतन्यविशिष्ट पुरुष कामयते अत काम एव परमपुरुषार्थ इति मन्यन्त इत्यर्थ ॥ ११ ॥

पुन प्रकारान्तरेणासुरानाचष्टे—

आशापाशशतैर्बद्धाः कामक्रोधपरायणाः ।
ईहन्ते कामभोगार्थमन्यायेनार्थसंचयान् ॥ १२ ॥

आशेति । आसुरा पुरुषा , आशा एव पाशा , तेषा शतैर्बद्धा इतस्तत आकृष्यमाणा सन्त , कामक्रोधौ परमयन येषा ते कामक्रोधपरायणा भूत्वा, कामितविषयभोगार्थ कामभोगप्रयोजनाय न धर्मार्थम्, अन्यायेन चौर्यादिना ऽर्थाना सचयान्राशीनीहन्ते इच्छन्ति ॥ १२ ॥

तेषा मनोराज्यप्रभावतो नरकप्राप्ति प्रकटयति—इदमिति चतुर्भि· ।

इदमद्य मया लब्धमिदं प्राप्स्ये मनोरथम् ।
इदमस्तीदमपि मे भविष्यति पुनर्धनम्॰ ॥ १३ ॥

इदमिति । अद्येद द्रव्य मया लब्ध मनस्तुष्टिकर 'मनोरथमिद प्राप्स्ये । मद्रिपूणा यदिदं धनमस्ति तदिदमपि मे मम पुनरागामिवर्षे भविष्यति । अत ऊर्ध्वमह धनी स्यामित्यर्थ ॥ १३ ॥

नि सपत्न मनोराज्य करोतीत्याह—

असौ मया हतः शत्रुर्हनिष्ये चापरानपि ।
ईश्वरो ऽहमहं भोगी सिद्धो ऽहं बलवान्सुखी ॥ १४ ॥

असाविति । असौ दुर्जयो देवदत्तनामक शत्रुर्मया हत । तथा-विधानपरानपि शत्रून् हनिष्ये, कस्यापि मत्तुल्यैश्वर्याभावादहमेवेश्वर , तथा ऽहमेव भोगी स्याम्, अहमेव सिद्धपुरुषः, अतीव बलवानहम्, अतीव सुखीत्यादि मनोराज्य करोतीत्यर्थ ॥ १४ ॥

सर्वप्रकारै मत्तुल्य को ऽपि नास्तीत्यभिमन्यत इत्याह—

आढ्यो ऽभिजनवानस्मि
को ऽन्यो ऽस्ति सदृशो मया ।
यक्ष्ये दास्यामि मोदिष्य
इत्यज्ञानविमोहिताः ॥ १५ ॥

आढ्य इति । धनादिसंपत्त्या अहमाढ्य , सप्तपुरुषश्रोत्रियत्वादि-संपत्त्या अभिजनवानस्मि , सर्वप्रकारतो मत्सदृश को ऽपि नास्ति , यज्ञदा-नादिकर्तृभ्यो ऽधिका प्रतिष्ठामारोढु यक्ष्ये , अह नटविटगायकेभ्यो दास्यामि स्वार्जित धनम् , एतादृशसंपदा मत्तुल्यो नास्तीति मोदिष्य इत्यज्ञानेन विमोहिता । वैदिका अप्येव मुह्यन्तीत्यर्थ ॥ १५ ॥

कृत्याकृत्यविवेकविकलाना परमफल प्रकटयति—

अनेकचित्तविभ्रान्ता मोहजालसमावृताः ।
प्रसक्ताः कामभोगेषु पतन्ति नरके ऽशुचौ ॥ १६ ॥

अनेकेति । अनेकमनोरथाविष्ट चित्तमनेकचित्तम् , तेन विभ्रान्ता आसुरा पुरुषा यथा मत्स्या सूत्रजालसमावृता तथा ते ऽपि स्वा-ज्ञानमोहमयजालसमावृता भूत्वा कामोपभोगेष्वभिनिविष्टा अशुचौ रौरवादि-नरके पतन्ति ॥ १६ ॥

वैदिकानामासुरधर्मप्रवृत्तावपि नरकपातो नास्तीति तत्राह—आत्मेति द्वाभ्याम् ।

आत्मसंभाविताः स्तब्धा धनमानमदान्विताः ।
यजन्ते नामयज्ञैस्ते दम्भेनाविधिपूर्वकम् ॥ १७ ॥

आत्मेति । आत्मसभाविता सर्वगुणविशिष्टा वयमित्यात्मनैवात्मान स्तुवन्तो न तु सन्मार्गगामिभि सभाविता वैदिका आसुरा , सकृन्नतिमात्रत स्वाघहारिषु यदृच्छया प्राप्तेषु सत्स्वपि, तेषु स्वाधिकत्वबुद्धिविकलत्वात् स्तब्धा अनम्रा अस्मानेते न नमन्तीति विक्षिप्तचित्ता भूत्वा ,धनेन संजातो यो मानो

मदश्च ताभ्यामन्विता सन्त, नाममात्रेण ये यज्ञा ते नामयज्ञा दीक्षित सोमयाजी वाजपेयीत्यादिनाममात्रसिद्धये दम्भेन न तु श्रद्धया अविधिपूर्वक यथा भवति तथा नामयज्ञै वाचारम्भणपर्यवसानै यजन्ते । तादृशयज्ञफल रौरवादावनुभवन्तीत्यर्थ ॥ १७ ॥

आसुरवैदिकानामविधिपूर्वकत्वमेव प्रपञ्चयति—

अहंकारं बलं दर्पं कामं क्रोधं च संश्रिताः ।
मामात्मपरदेहेषु प्रद्विषन्तो ऽभ्यसूयकाः ॥ १८ ॥

अहकारमिति । आसुरवैदिका स्वप्ने ऽप्यप्राप्यान्सद्गुणानात्मन्यारोप्यानेकसुगुणविशिष्टो ऽहमिति यो ऽभिमान सो ऽहकार तम्, कामरागान्वित पराभवनिमित्त सर्वानर्थमूल बलम्, यस्योद्भवमात्रेण स्वधर्मपराङमुखो भवति स दर्प तम्, स्रग्चादिविषयाभिलाष काम तम्, तदभिलाषकुण्ठन भव क्रोध त च सश्रिता सन्त सर्वप्रत्यग्रूप मामात्मपरदेहेषु प्रद्विषन्त सन्तो नामयज्ञैर्यजन्ते । स्वपरदेहेषु भगवद्द्वेष कथमिति तत्रोच्यते । नामयज्ञेषु श्रद्धावैकल्यात स्वायासमात्रमतिरिच्यते । तथैव पश्वादीनामविधिहिसगा चैतन्यद्रोह एवाविशिष्यत इति प्रद्विषन्त इत्युक्तम् । कि चाभ्यसूयका परश्रेयोऽसहिष्णुत्वेन दुर्गुणविकलेषु सत्स्वपि दोषारोपका इत्यर्थ ॥ १८ ॥

आसुरवैदिकानामासुरस्वभावप्रच्युतिर्जात्वपि न भवतीत्याह—तानिति द्वाभ्याम् ।

तानहं द्विषतः क्रूरान्संसारेषु नराधमान् ।
क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु ॥ १९ ॥

तानिति । आसुरवैदिका ये तान् सन्मार्गप्रतिपक्षान् स्वात्मपर-देहेषु मामीश्वर द्विषतो नराधमान् अत एव क्रूरानशुभाचारानासुरीषु व्याघ्रसर्पादियोनिष्वेवाजस्र क्षिपामि । परमेश्वरो ऽह तेषा तादृश फल ददामीत्यर्थ ॥ १९ ॥

आसुरवैदिकानामपि बहूना जन्मनामन्ते श्रेयो भविष्यतीति तत्राह-

आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि ।
मामप्राप्यैव कौन्तेय ततो यान्त्यधमां गतिम् ॥ २० ॥

आसुरीमिति । मूलाविद्याऽऽरूढा मूढा ,जन्मनि जन्मनि प्रतिजन्म आसुरीं सर्पादियोनिमापन्ना सन्त हे कौन्तेय ! मा प्रत्यगभिन्नब्रह्मरूप वासुदेवमप्राप्यैव , ततो ऽप्यधमा मशकादियोनिप्राप्तिलक्षणा कुत्सिता गति यान्ति । मामप्राप्यैवेत्येवकारात् नि श्रेयसप्राप्ति कदाचिदपि तेषा नास्तीति द्योत्यते ॥ २० ॥

उक्तासुरीदोषपरिहारोपायाभावात कस्यापि नि श्रेयसप्रवृत्तिर्विरला भवेदित्याशङ्कायामासुरीदोषमूले भगवद्भक्तिखड्गतो निर्मूलिते नि श्रेयस-प्रवृत्ति स्यादित्युपदिशति—त्रिविधमिति द्वाभ्याम् ।

त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः ।
कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत् ॥ २१ ॥

त्रिविधमिति । यस्मिन्नासुरीसपत्पूगो ऽनन्तो ऽप्यन्तर्भवति, यत्सर्वा नर्थमूलम्, यत्परिहारेणासुरीसपद्वृन्द निर्मूल भवति, तदिद हि नरकस्य द्वार नरकप्राप्तिसाधनत्वात् आत्मनो नाशन नीचयोनिप्रापकत्वात । तत्कृति-

विधमिति तत्राह — त्रिविधमिति । कथम् ? अप्राप्तविषयाभिलाष काम, स यथा सर्वानर्थमूलम्, कामेन प्रेरितो जन्तुर्मातरमपि कामयत इति प्रसिद्ध कामस्य स्वानर्थमूलत्वम् । तथा क्रोध, क्रोधाविष्ट पितॄनपि हन्तुमीहते । यथा क्रोधस्तथा लोभ, लोभ सर्वगुणान् हन्तीति प्रसिद्धम् । यस्मादेतत् कामादित्रयमात्मनो नीचयोनिद्वार तस्मात् भागवतसङ्गजनितभगवद्भक्ति-खड्गत एतत्कामादित्रय त्यजेदुन्मूलयेदित्यर्थः ॥ २१ ॥

एतत्त्यागात्कि फल स्यादित्यपेक्षायामाह—

एतैर्विमुक्तः कौन्तेय तमोद्वारैस्त्रिभिर्नरः ।
आचरत्यात्मनः श्रेयस्ततो याति परां गतिम् ॥ २२ ॥

एतैरिति । हे कौन्तेय ! तमसो नरकस्य नीचयोनिप्राप्तेरपि द्वार-भूतैरेतै त्रिभि कामादिभि विमुक्त, तेन नरकानर्हत्वात् नर स्वात्मन श्रेय साधन निष्कामकर्मतपोयोगभगवद्भक्त्यादिकर्माचरति, ततस्तदनुष्ठानप्रभव-प्रत्यगभिन्नब्रह्मज्ञानेन स्वाविद्यातत्कार्यलक्षणासुरीसपद परा गति मुक्ति याति प्राप्नोति ॥ २२ ॥

सर्वासुरसपत्त्यागहेतुनि श्रेयससाधनाचरणस्य शास्त्रमूलकत्वात् तदेव प्रमाणम्, तद्व्यतिरेकेण कामकारेण वर्तमानस्य पूर्वविपरीतफलमाह—

यः शास्त्रविधिमुत्सृज्य वर्तन्ते कामकारतः ।
न स सिद्धिमवाप्नोति न सुखं न परां गतिम् ॥ २३ ॥

य इति । य पुरुष कर्तव्याकर्तव्यलक्षणशास्त्रविधि विधिप्रतिषे-कामकारतः स्वेच्छाचरणेन वर्तते सो ऽय स्वेच्छाचारी

पुरुषार्थोपयोगिनीं सिद्धि नाप्नोति। नापि सुख नापि परा प्रकृष्टा गति स्वर्ग मनुष्यादिलोक वा आप्नोतीत्यर्थ ॥ २३ ॥

यत. स्वेच्छाऽऽचरित पुरुषार्थवैरल्य भवत्यत शास्त्रानुरोधेन नि-श्रेयससाधनमनुष्ठेयमित्युपसहरति—

तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ।
ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसि ॥२४॥ इति।

इति श्रीमद्भगवद्गीतासु० दैवासुरसंपद्विभागयोगो नाम षोडशो ऽध्याय ॥

तस्मादिति। यस्मादेव तस्मात् ते तव कार्याकार्यव्यवस्थितौ कर्तव्याकर्तव्यव्यवस्थाया शास्त्र प्रमाण ज्ञानसाधनप्रमाण भवतु। इद कुर्यादिदं न कुर्यादिति शास्त्रविधानोक्त ज्ञात्वा ज्ञानसाधनीभूतस्वाश्रमोचितं कर्म कर्तुमिहार्हसि। इहेति कर्माधिकारभूमिप्रदर्शनार्थ। इतिशब्द अध्यायपरिसमाप्त्यर्थ ॥ २४ ॥

आसुरीं सपद त्यक्त्वा, दैवीमाश्रित्य भिक्षव।
यन्निष्कलपद यान्ति तत्प्रसीदतु मे ऽनिशम् ॥

इति श्रीमद्भगवद्गीताऽर्थप्रकाशिकायां षोडशो ऽध्याय ॥

सप्तदशो ऽध्यायः

शुद्धसत्त्वमयीं श्रद्धामाश्रितो ऽन्यत्परित्यजन् ।
ब्रह्मज्ञानाधिकारीति वक्तु सप्तदशोद्यम ॥

पूर्वाध्यायान्ते 'य शास्त्रविधिमुत्सृज्य कामकारेण वर्तते । न स सिद्धिमवाप्नोति' इत्यादिना शास्त्रोक्तविधिमुत्सृज्य कामकारतो वर्तमानस्य ज्ञानाधिकाराभाव प्रकटित । तत्र कामकार विना शास्त्रविधिमतिक्रम्य श्रद्धाया वर्तमानाना कि ज्ञानाधिकारो ऽस्ति न वेति जिज्ञासया भगवन्त प्रत्यर्जुन उवाच—

अर्जुन उवाच—

ये शास्त्रविधिमुत्सृज्य यजन्ते श्रद्धया ऽन्विताः ।
तेषां निष्ठा तु का कृष्ण सत्त्वमाहो रजस्तमः ॥ १ ॥

य इति । हे कृष्ण ! ये स्वाज्ञोल्लङ्घिन पुरुषा केचित्, एव कर्तव्यमेव, न कर्तव्यमिति श्रुतिस्मृतिचोदनालक्षण शास्त्रविधिमुत्सृज्यान्धपरपरया श्रद्धया ऽऽस्तिक्यबुद्ध्या ऽन्विता सन्तो देवादीन्यजन्ति तेषा शास्त्रानभिज्ञाना देवादियजनलक्षणा निष्ठा तु का कीदृशी ? कि सत्त्व सात्त्विकी, आहोस्विद्रज राजसी, उत तम तामसीति प्रश्न । न च शास्त्रविधिमुत्सृज्य यजन्त इत्यादिना बुद्ध्वा ऽपि शास्त्रार्थं तमुल्लङ्घ्य कामकारतो वर्तन्त इति

वाच्यम्, तेषा श्रद्धापूर्वकयजनानुपपत्ते । न हि शास्त्रविरुद्ध ऽर्थे शास्त्रज्ञाना श्रद्धोदेति । केवलदु स्वबुद्ध्या ऽऽलस्याद्वा शास्त्रार्थपरिचयपराङ्मुखा सन्त अन्धपरपरया श्रद्धया क्वचिद्देवताऽऽराधनादौ प्रवर्तन्त इति भाव ॥ १ ॥

अर्जुनकृतप्रश्नस्य सामान्यविषयत्वेन प्रतिवचनानर्हत्वमभिप्रेत्य प्रकारान्तरेण प्रतिवचनं श्रीभगवानुवाच—

श्रीभगवानुवाच—

त्रिविधा भवति श्रद्धा देहिनां सा स्वभावजा ।
सात्त्विकी राजसी चैव तामसी चेति तां शृणु ॥ २ ॥

त्रिविधेति । शास्त्रार्थज्ञाना प्रत्यगभिन्नब्रह्मैक्यविषया सात्त्विकी श्रद्धैकैव । देहिनामन्धपरपरया प्रवर्तमानाना स्वभावजा श्रद्धा सात्त्विकी राजसी तामसी चेति त्रिविधा भवति । स्वभावो नाम जन्मान्तरकृतधर्माधर्मादिसस्कारो यो मरणकाले ऽभिव्यज्यते सो ऽयमित्यर्थ । स्वभावमन्यथाकर्तु हि शास्त्र प्रवृत्त, यतस्तज्ज्ञान तेषा नास्ति, अत केवलस्वभावजश्रद्धा त्रिविधेति यस्या निष्ठा त्व पृच्छसि तामिमा त्रिविधा श्रद्धा शृणु । श्रुत्वा अवधारयेत्यर्थ ॥ २ ॥

देवादिपूजाविषया सात्त्विकी श्रद्धा, यक्षराक्षसादिपूजाविषया राजसी, भूतप्रेतपिशाचादिपूजाविषया तामसीति श्रद्धायास्त्रैविध्य कथमित्यपेक्षाया रजस्तमोमिश्रसत्त्वत्रैविध्य पुरस्कृत्य श्रद्धाया अपि त्रैविध्य सभवतीत्याह—

सत्त्वानुरूपा सर्वस्य श्रद्धा भवति भारत ।
श्रद्धामयो ऽयं पुरुषो यो यच्छ्रद्धः स एव सः ॥ ३ ॥

सत्त्वेति। विवेकिनो ऽविवेकिनो वा सर्वस्य लोकस्य सत्त्वतारतम्यानुरूपा श्रद्धा भवति। यद्येव तत कि स्यादिति तत्राह—श्रद्धेति। यो ऽय पुरुष ससारी जीव श्रद्धामय श्रद्धाप्रचुरो भवति। या श्रद्धा यस्य जीवस्य सो ऽय यच्छ्रद्ध ,तच्छ्रद्धारूप एव स भवति॥ ३ ॥

कथ पुन पुरुषस्य सात्त्विकादिश्रद्धा ज्ञातु शक्येत्यपेक्षाया कार्येणानुमेयेत्याह—

यजन्ते सात्त्विका देवान्यक्षरक्षांसि राजसाः।
प्रेतान्भूतगणांश्चान्ये यजन्ते तामसा जनाः॥ ४॥

यजन्त इति। सत्त्वगुणप्रधाना सात्त्विका जना सत्त्वप्रकृतीन्देवानेव यजन्ते। रजोगुणप्रधाना राजसास्तु रज प्रकृतीन्यक्षान्रक्षासि च यजन्ते। एतेभ्यो ऽन्ये तु तामसा प्रेतान् स्वाश्रमाचारभ्रशत प्रादुर्भूतवायुशरीरान् भूतगणान् ब्राह्मयादिचामुण्डाऽन्तमातृकाऽऽदीन्यजन्ते। एवमुक्तप्रकारेण सत्त्वादिनिष्ठा स्वस्वकार्यलिङ्गेन द्रष्टव्या। लोके तावत् सहस्रेषु कश्चिदेव सत्त्वनिष्ठो भूत्वा देवान् यजते। प्रायशो बाहुल्येन रजोनिष्ठास्तमोनिष्ठाश्च प्राणिनो भवन्तीति भाव ॥ ४ ॥

राजसतामसेषु पुनर्विशेषमाह—अशास्त्रविहितमिति द्वाभ्याम्।

अशास्त्रविहितं घोरं तप्यन्ते ये तपो जनाः।
दम्भाहंकारसंयुक्ताः कामरागबलान्विताः॥ ५॥

अशास्त्रविहितमिति। केचित्पुरुषा शास्त्रविधिमजानन्तो ऽपि पुरातन पुण्यसस्कारत सात्त्विका भवन्ति। केचिन्मध्यमा राजसाः, केचिदधमा-

स्तामसा । ये तु पुनरत्यन्तमन्दभाग्येनान्विता पाषण्डसङ्गतस्तदाचारवर्तिनो जना यच्छास्त्रबहिर्गत तदशास्त्रविहित प्राणिनामात्मनश्च घोर पीडाकर तपस्तप्यन्ते। इत्थ तप कैर्योगत तप्यन्त इति तत्राह—दम्भेति। दम्भश्च धर्मध्वजित्व देहादावात्मभावो ऽहकारश्च, ताभ्या सयुक्ताः, कामश्च रागश्च कामरागौ तत्सस्कृत बल कामरागबल तेनान्विता कामरागबलान्विता ये वर्तन्ते तानासुरनिश्चयान् विद्धि इत्युत्तरेणान्वय ॥ ५ ॥

पुनस्तानेव प्रकारान्तरेण विशदयति—

कर्शयन्तः शरीरस्थं भूतग्राममचेतसः।
मां चैवान्तःशरीरस्थं तान्विद्ध्यासुरनिश्चयान् ॥ ६ ॥

कर्शयन्त इति। श्रुतिस्मृती हि भगवच्छासनरूपे, तयोश्चेतो येषा न विद्यते ते खल्वचेतसो मन्दप्रज्ञा अविवेकिन अत्यन्ततामसा पुरुषा, शीर्यत इति शरीरम्, तस्मिन् शरीरे तिष्ठतीति शरीरस्थो भूतग्रामो भूतसमुदय, त करणग्राम तद्भावाभावप्रकाशकत्वेन शरीरस्यान्त हृदये तिष्ठामीत्यन्त शरीरस्थ, त मा चान्त शरीरस्थ मिथ्याकामाभिनिवेशतो मुधोपवासादिभि कर्शयन्तो ये तपश्चरन्ति तानसुराणा निश्चयो येषा तानासुरनिश्चयान् परिहरणार्थं विद्धि। मच्छासनरूपश्रुतिस्मृत्युक्तस्वाश्रमाचारवैरल्यतो मद्भावविकलतया देहादावात्मत्वात्मीयत्वाभिमानो मत्कर्शनमित्यर्थ ॥ ६ ॥

आहारयज्ञतपोदानाना सात्त्विकादिभेद दर्शयति—आहार इत्यादिभिस्त्रयोदशभि —

आहारस्त्वपि सर्वस्य त्रिविधो भवति प्रियः।
यज्ञस्तपस्तथा दानं तेषां भेदमिमं शृणु ॥ ७ ॥

आहारस्त्विति । सर्वस्य प्राणिजातस्याहारो ऽन्नादि यथा त्रिविध प्रियो भवति, तथा यज्ञतपोदानानि च त्रिविधानि भवन्ति । तेषा वक्ष्यमाणमिम भेद शृणु । श्रुत्वा सत्त्वाहारयज्ञतपोदानावष्टम्भेन रजस्तमोगुणवर्धकमाहारादिक परित्यजेत्यर्थ ॥ ७ ॥

सात्त्विकमाहार दर्शयति—

आयुःसत्त्वबलारोग्यसुखप्रीतिविवर्धनाः ।
रस्याः स्निग्धाः स्थिरा हृद्या आहाराः सात्त्विकप्रियाः ॥८॥

आयुरिति । आयुर्जीवनम्, सत्त्वमुत्साह, बल सामर्थ्यम्, आरोग्य रोगराहित्यम्, सुख चित्तस्वास्थ्यम्, प्रीति परमो हर्ष, आयुश्च सत्त्व च बल चारोग्य च सुख च प्रीतिश्च तासामायु सत्त्वबलारोग्यसुखप्रीतीना विवर्धना, ते च रसोपेता रस्या, स्नेहवन्त स्निग्धा, देहे चिरकालस्थायिन स्थिरा, आस्वादनमात्रेण हृदयप्रिया हृद्या, एवभूता आहारा सात्त्विकप्रकृतिविशिष्टपुरुषप्रिया सात्त्विकैरेव भोज्या इत्यर्थ ॥ ८ ॥

राजसाद्यमाहारविशेषं दर्शयति—

कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः ।
आहारा राजसस्येष्टा दुःखशोकामयप्रदाः ॥ ९ ॥

कट्विति । अतिशब्द कट्वादिषु सप्तस्वपि सबध्यते । निम्बादिरतिकटुश्च । अत्यम्लश्च अतिलवणश्च अत्युष्णश्च प्रसिद्ध । मरीच्यादिरतितीक्ष्णश्च हिङ्ग्वादिरतिरूक्षश्च सर्षपादिरतिविदाही च कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिन । एते आहारा राजसप्रकृतिविशिष्टपुरुषस्येष्टा । तदाहार-

फलमाह—दु खेति । तात्कालिकहृदयसतापादि दु खम् , पश्चाद्भावि दौमेनस्य शोकः, व्याधिरामय , तान्प्रयच्छन्तीति दु खशोकामयप्रदा सात्त्विकप्रकृतिमिच्छता परित्याज्या इत्यर्थ ॥ ९ ॥

तामसप्रकृतिभोज्यमाहारविशेष दर्शयति—

यातयामं गतरसं पूति पर्युषितं च यत् ।
उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम् ॥ १० ॥

यातयाममिति । यस्य पक्वस्यौदनादे शैत्यावस्थाहेतु यामो यात तद्यातयामम्, निष्पीडितसार गतरसम्, दुर्गन्ध पूति, दिनान्तरपक्व पर्युषितम्, अन्यभुक्तावशिष्टमुच्छिष्टम्, अभक्ष्यत्वात्कलञ्जाद्यमेध्यम्, एवविध भोजन तामसप्रकृतिविशिष्टपुरुषभोज्य प्रियम् । सात्त्विकप्रकृतिमिच्छतैतदपि त्याज्यमित्यर्थ ॥ १० ॥

अथेदानीं यज्ञस्यापि त्रैविध्यमुच्यते—अफलेति त्रिभि ।

अफलाकाङ्क्षिभिर्यज्ञो विधिदृष्टो य इज्यते ।
यष्टव्यमेवेति मनः समाधाय स सात्त्विकः ॥ ११ ॥

अफलेति । फल्गुतया लीयन्त इति फलानि, तेषामाकाङ्क्षा फलाकाङ्क्षा, सा येषा न विद्यते ते अफलाकाङ्क्षिण , तैरफलाकाङ्क्षिभि पुरुषैरीश्वराराधनलक्षणनिष्कामधिया यज्ञकर्म यष्टव्यमेवेति मन समाधाय विधिना ऽऽवश्यिकतया दृष्टो विहितो यो यज्ञ इज्यते अनुष्ठीयते स सात्त्विको यज्ञ चित्तशुद्धिहेतुत्वात् ॥ ११ ॥

सात्त्विकयज्ञमुक्त्वा राजसयज्ञं दर्शयति—

अभिसंधाय तु फलं दम्भार्थमपि चैव यत्।
इज्यते भरतश्रेष्ठ तं यज्ञं विद्धि राजसम्॥ १२॥

अभिसंधायेति। भरतानां कौरवाणां श्रेष्ठत्वात् हे भरतश्रेष्ठ! तुशब्दः सत्त्वयज्ञवैलक्षण्यद्योतकः। स्वर्गादि फलमभिसंधायोद्दिश्य दम्भार्थं महत्त्वख्यापनार्थमपि च यो यज्ञ इज्यते तं यज्ञं राजसं विद्धि चित्तशुद्ध्यनुपयोगात्॥ १२॥

तामसयज्ञमाह-

विधिहीनमसृष्टान्नं मन्त्रहीनमदक्षिणम्।
श्रद्धाविरहितं यज्ञं तामसं परिचक्षते॥ १३॥

विधिहीनमिति। चोदनास्पर्शानर्हत्वात् विधिहीनम्, ब्राह्मणादिभ्यो यस्मिन्यज्ञे ऽन्नमसृष्टमदत्तं सो ऽयमसृष्टान्नस्तम्, मन्त्रैर्हीनम्, तत्र हेतुरदक्षिणम् उक्तिमात्रदक्षिणं पश्चाद्दास्याम इति, अत एव श्रद्धाविरहितं च यज्ञं तामसमिति शिष्टाः परिचक्षते कथयन्ति। ऐहिकामुष्मिकफलवैरल्यात् राजसतामसयज्ञौ सात्त्विकैः त्याज्यावित्यर्थः॥ १३॥

अथेदानीं शारीरादिभेदेन तपसस्त्रैविध्यमुच्यते—देवेति त्रिभिः।

देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवम्।
ब्रह्मचर्यमहिंसा च शारीरं तप उच्यते॥ १४॥

देवेति । देवा इन्द्रादय द्विजा श्रुताध्ययनसपन्ना गुरवो देशिका प्राज्ञा गुरुतुल्या , तेषा पूजन बाह्यशौचमार्जवमृजुत्व ब्रह्मचर्यं गुरुकुलवास अहिंसा च प्राणिमात्रापीडनम् । एतत्सर्वं शरीरेण निर्वर्त्यत्वात् शारीर तप उच्यते ॥ १४ ॥

शारीर तप उक्त्वा वाचिक तप उदाहरति---

अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत् ।
स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते ॥ १५ ॥

अनुद्वेगेति । प्राणिमात्रस्याप्युद्वेग भय न करोतीत्यनुद्वेगकर वाक्य यत् तत्, किंविशेषणविशिष्टम् ? सत्य यथाभूतार्थभाषण प्रिय दृष्टार्थाविरोधि हित चादृष्टार्थाविरोधि । अनुद्वेगादिभिश्चतुर्भिर्विशेषणैर्वाक्य विशिष्यते । चकार चतुर्विशेषणसमुच्चयार्थ । परप्रत्ययार्थप्रयुक्तानुद्वेगकरवाक्यस्यानृतोक्तित्ववारणार्थं सत्यपदम् दृष्टदोषनिवारणाय प्रियपदम्, अदृष्टदोषनिवारणाय हितपदम्, एतद्विशेषणविशिष्टं वाक्यं / प्राङ्मुखत्वपवित्रपाणित्वादिविधिमनतिक्रम्य स्वाध्याय ऋगादि, तस्यावर्तनमभ्यसन चैव वागिन्द्रियनिर्वर्त्यत्वात् वाङ्मय तप उच्यते ॥ १५ ॥

मानस तपो विशिनष्टि—

मनःप्रसादः सौम्यत्वं मौनमात्मविनिग्रहः ।
भावसंशुद्धिरित्येतत्तपो मानसमुच्यते ॥ १६ ॥

मन इति । मनस प्रसाद संकल्पत्यागत स्वच्छताऽऽपादनम्, मुखादिप्रसादहेत्वन्त करणवृत्ते सौमनस्य सौम्यत्वम्, ' यच्छेद्वाङ् मनसी

प्राज्ञ [1] ' इति श्रुत्यनुरोधेन वाक्सयमस्यापि मन सयमहेतुत्वादिति मन सयमो मौन मनन वा, आत्मन करणग्रामस्य स्वार्थेभ्यो निरोध आत्मविनिग्रह, परैर्व्यवहारकाले ऽपि कुटिलतावैरल्य यत्तत्तपो मानसमुच्यते ॥ १६ ॥

कायवाड्मनोनिर्वर्त्यं तप. कथ त्रैविध्यमर्हतीति तत्राह—श्रद्धयेति त्रिभि ।

श्रद्धया परया तप्तं तपस्तत्त्रिविधं नरैः ।
अफलाकाङ्क्षिभिर्युक्तैः सात्त्विकं परिचक्षते ॥ १७ ॥

श्रद्धयेति । अफलाकाड्क्षिभि फलाकाड्क्षारहितै फलसङ्गतो नरक भवतीति ये मन्यन्ते तै सत्त्वप्रकृतिभि नरै परया श्रद्धया युक्तै यत्तप कायिकवाचिकमानसभेदेन त्रिविध तप्त तत्तप सत्त्वनिर्वृत्तत्वात् सात्त्विकमिति परिचक्षते शिष्टा कथयन्तीत्यर्थ ॥ १७ ॥

सात्त्विकतपोलक्षणमुक्त्वा राजसतपोलक्षणमाह—

सत्कारमानपूजाऽर्थं तपो दम्भेन चैव यत् ।
क्रियते तदिह प्रोक्तं राजसं चलमध्रुवम् ॥ १८ ॥

सत्कारेति । राजसप्रकृतिभिः साधुरयं तपस्वीति परैः श्लाघन साधुकार सत्कारश्च प्रत्युत्थानाभिवादनादि मानन मानश्च पादप्रक्षालनधनार्पणादि पूजा च सत्कारमानपूजा, तदर्थं केवल दम्भेन चैव यत् तप क्रियते तत्तपो राजसमनियतफलत्वाच्चल क्षणभड्गुरत्वादध्रुवमिति च प्रोक्तम् ॥ १८ ॥

[1] कठ ३, १३.

तामस तप आह—

मूढग्राहेणात्मनो यत्पीडया क्रियते तपः ।
परस्योत्सादनार्थं वा तत्तामसमुदाहृतम् ॥ १९ ॥

मूढेति । मूढग्राहो ऽविवेकिनिश्चय , तेन मढग्राहेणात्मन पीडया परस्योत्सादनार्थं नाशनार्थं वा यत्क्रियते तत्तप तामसमुदाहृतम् ॥ १९ ॥

दानस्यापि त्रैविध्य यत्प्रतिज्ञात तत्र सात्त्विक दान सक्षिपति—

दातव्यमिति यद्दानं दीयते ऽनुपकारिणे ।
देशे काले च पात्रे च तद्दानं सात्त्विकं स्मृतम् ॥ २० ॥

दातव्यमिति । अनुपकारिणे प्रत्युपकारासमर्थाय निरपेक्ष यथा भवति तथा दातव्यमिति यद्दान दीयते कुरुक्षेत्रादिपुण्यदेशे सक्रान्तिग्रहणादिपुण्यकाले च सषडङ्गवेदपारगब्रह्मविदादौ पात्रे च तद्दान सात्त्विक स्मृतम् ॥ २० ॥

राजस दानमाह—

यत्तु प्रत्युपकारार्थं फलमुद्दिश्य वा पुनः ।
दीयते च परिक्लिष्टं तद्राजसमुदाहृतम् ॥ २१ ॥

यत्त्विति । अय तु समये मा प्रत्युपकरिष्यतीति प्रत्युपकारार्थं पुनरस्य दानस्येदमिहामुत्रसुखप्रापक भवेदिति फलमुद्दिश्य वा परिक्लिष्टं दु.खान्वित यद्दीयते तद्दान राजसमुदाहृतम् ॥ २१ ॥

तामस दान व्यनक्ति—

अदेशकाले यद्दानमपात्रेभ्यश्च दीयते ।
असत्कृतमवज्ञातं तत्तामसमुदाहृतम् ॥ २२ ॥

अदेशेति । देशकालपात्रसपत्तावपि म्लेच्छादिसकीर्ण पापदेशो यो ऽयमदेश तस्मिन् सक्रान्त्यादिविशेषरहितत्वात् अकाले नटविटगायकेभ्यो ऽपात्रेभ्यो यद्दान दीयते, प्रमादतो देशादिसपत्तौ वा तत्र प्रियवचनपाद-प्रक्षालनपूजाऽऽदिवैरल्यादसत्कृत स्वनीचबुद्धितो ऽवज्ञात च तद्दान ताम-समुदाहृतम् ॥ २२ ॥

आहारयज्ञतपोदानाना राजसत्वादिदोषापनुत्तये को ऽयमुपाय इत्य-पेक्षाया तेषा साद्गुण्यायेममुपायमाह—

ओं तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः ।
ब्राह्मणास्तेन वेदाश्च यज्ञाश्च विहिताः पुरा ॥ २३ ॥

ओं तत्सदितीति । 'ओमित्येतदक्षरमिद सर्वम्[1]' इत्यादिश्रुते ओमिति, 'तत्त्वमसि' इति प्रत्यक्परचिदैक्यप्रतिपादकश्रुते तदिति, 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्[2]' इति श्रुते सदिति च निर्दिश्यते ऽनेनेति ब्रह्मण ओ तत्सदिति त्रिविधो नामनिर्देशो वेदान्तेषु ब्रह्मविद्भि स्मृतश्चिन्तित । त्रितयोच्चारणेनान्यतमोच्चारणेन वा रजस्तमोदोषप्रयुक्त वैगुण्यमपि यज्ञादिकस्य साद्गुण्य भवेदित्यर्थ । पुरा सर्गादौ विधात्रा तेन निर्देशत्रयेण ब्राह्मणा वेदाश्च यज्ञाश्च विहिता निर्मिता ॥ २३ ॥

[1] मा १ १
[2] छा ६ २ १

ओकारादीना प्राशस्त्य प्रकटयति—

तस्मादोमित्युदाहृत्य यज्ञदानतपःक्रियाः ।
प्रवर्तन्ते विधानोक्ताः सततं ब्रह्मवादिनाम् ॥ २४ ॥

तस्मादिति । यस्मादेव ब्रह्मणो निर्देश प्रकटित तस्मादोमित्युदाहृत्योच्चार्य ब्रह्मवादिना वेदवादिनामिद कर्तव्यमिद न कर्तव्यमिति विधायकत्वात् विधान शास्त्रम्, तेनोक्ता चोदिता यज्ञदानतपसा क्रिया सततं प्रवर्तन्ते अङ्गलोपे ऽपि साङ्गा भवन्तीत्यर्थ ॥ २४ ॥

ब्रह्मण प्रथमनिर्देशमुक्त्वा द्वितीयनिर्देशमाह—

तदित्यनभिसंधाय फलं यज्ञतपःक्रियाः ।
दानक्रियाश्च विविधाः क्रियन्ते मोक्षकाङ्क्षिभिः ॥२५॥

तदिति । मोक्षकाङ्क्षिभि पुरुषै तदिति ब्रह्मणो द्वितीयनिर्देशमुच्चार्य यज्ञादिकर्मफलमनभिसधाय यज्ञक्रिया तप क्रियाश्च क्षेत्रहिरण्यादिभेदेन विविधा दानक्रियाश्च क्रियन्ते निर्वर्त्यन्ते ॥ २५ ॥

ब्रह्मणस्तृतीय निदेश निर्दिशति—सदिति द्वाभ्याम् ।

सद्भावे साधुभावे च सदित्येतत्प्रयुज्यते ।
प्रशस्ते कर्मणि तथा सच्छब्दः पार्थ युज्यते ॥ २६ ॥

सदिति । पुत्त्रस्याविद्यमानस्यासतो जन्मनि सद्भावे असाधो साधुभावे च ब्रह्मणस्तृतीयमभिधान सदित्येव प्रयुज्यते । यथा सद्भावसाधु-

भावयो सच्छब्द प्रयुक्त तथा विवाहादौ प्रशम्ते कर्मणि हे पार्थ! सच्छब्दो युज्यते प्रयुज्यत इत्यर्थ ॥ २६ ॥

विधाऽन्तरेण सच्छब्दम्य विनियोग विवृणोति—

यज्ञे तपसि दाने च स्थितिः सदिति चोच्यते ।
कर्म चैव तदर्थीयं सदित्येवाभिधीयते ॥ २७ ॥

यज्ञ इति । यज्ञे तपसि दाने च या स्थिति तात्पर्येणावस्थान सा सदिति चोच्यते । ब्रह्मवादिभिरिति शेष । यस्य ब्रह्मणो ऽभिधानत्रय प्रकृतमो तत्सदिति यज्ञदानतप क्रियाऽऽदिक सर्वं तदर्थीय फलाभिसधिवैकल्येन यज्ञादिकर्मणामनुष्ठीयमानत्वात् सर्वं सदित्येवाभिधीयते । तदेतद्यज्ञादिक कर्म रजस्तमोदोषेण विगुणत्व गतमपि ओ तत्सदिति ब्रह्मणो ऽभिधानयोगात् सात्त्विकत्वमुपेत्य साद्गुण्य भजेदित्यर्थ ॥ २७ ॥

यत श्रद्धापूर्वकमनुष्ठीयमान कर्म चित्तशुद्धिगम्यज्ञानद्वारा मोक्षहेतुर्भवति, अतो ऽश्रद्धया ऽनुष्ठीयमान कर्मजात सर्वमसदेवेत्युपसहरति—

अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत् ।
असदित्युच्यते पार्थ न च तत्प्रेत्य नो इह ॥ २८ ॥ इति ।

इति श्रीमद्भगवद्गीतासु० श्रद्धात्रयविभागयोगो नाम सप्तदशो ऽध्याय ।

अश्रद्धयेति । अश्रद्धया ऽग्नौ हुत ब्राह्मणेभ्यो दत्त कृच्छ्रचान्द्रायणादि तपस्तप्त स्तुतिनमस्कारादिक यत्किंचित्कर्म कृत च यत् हे पार्थ! तत्सर्वमसदित्युच्यते मत्प्राप्त्यावहेतुत्वात् । न च तद्बहुलायासकृतमपि प्रेत्य

मृत्वा ऽपि परमार्थफलाय कल्पत विगुणत्वात् । नो इहास्मिन् लोके ऽपि शर्म प्रयच्छति अयशस्करत्वात् । तद्विपरीताना शास्त्रार्थज्ञानाभावे ऽपि श्रद्धावता राजसतामसाहारादित्यागेन सात्त्विकाहारादिसेवया सत्त्वप्रधानाना ज्ञानद्वारा विदेहकैवल्य सिध्यतीति भाव । इतिशब्द अध्यायपरिसमाप्त्यर्थ ॥ २८ ॥

श्रद्धयो तत्सदित्येवमनुसधाय सूरय ।
यद्विष्णो परम धाम यान्ति तन्मे प्रसीदतु ॥

इति श्रीमद्भगवद्गीताऽर्थप्रकाशिकाया सप्तदशो ऽध्याय ॥

अष्टादशो ऽध्यायः

सर्ववेदान्तसिद्धान्तगीताशास्त्रार्थनिर्णयम् ।
पार्थायाष्टादशेनाह सक्षेपात्परमेश्वर ॥

सर्ववेदान्ताना सिद्धान्तो गीताशास्त्रकृत्स्नार्थस्य चास्मिन्नध्याये सग्रहेण वक्तव्य इत्यष्टादशो ऽध्याय आरभ्यते । पूर्वोक्तार्थानामत्रावगम्यमानत्वात् अर्जुनस्तु 'सर्वकर्माणि मनसा सन्यस्यास्ते सुख वशी' 'नवद्वारे पुरे देहे नैव कुर्वन्न कारयन्' 'यस्त्वात्मरतिरेव स्यात्' 'तस्य कार्यं न विद्यते' 'सन्यासयोगयुक्तात्मा' इत्यादिना कायिकवाचिकमानसकर्मणा सन्यासो वर्णित । तथा च 'त्यक्त्वा कर्मफलासङ्ग नित्यतृप्तो निराश्रय' 'सर्वकर्मफलत्याग तत कुरु यतात्मवान्' इत्यादिना कर्मफलमात्रत्यागत कर्मानुष्ठानमुक्तम् । न हि मिथो विरुद्ध सर्वज्ञो भगवानुपदिशेत् । अत कर्मसन्यासकर्मफलत्यगयोरविरोध बुभुत्सुरर्जुन उवाच—

अर्जुन उवाच—

संन्यासस्य महाबाहो तत्त्वमिच्छामि वेदितुम् ।
त्यागस्य च हृषीकेश पृथक्केशिनिषूदन ॥ १ ॥

सन्यासस्येति । भक्तापन्निवारणे महान्तौ बाहू यस्य स त्वं हे महाबाहो! हृषीकेश! सन्यासस्य त्यागस्य च पृथक्तत्त्व याथाऽऽत्म्य हे

केशिनिषूदन ! वेदितुमिच्छामि । कृपया वदेत्यर्थ । केशी नाम हयवेषधारी कश्चनासुर , त निषूदितवान्भगवानिति ॥ १ ॥

अर्जुनप्रश्नप्रतिवचनं श्रीभगवानुवाच —

श्रीभगवानुवाच—

काम्यानां कर्मणां न्यासं सन्यासं कवयो विदुः ।
सर्वकर्मफलत्यागं प्राहुस्त्यागं विचक्षणाः ॥ २ ॥

काम्यानामिति । 'ज्योतिष्टोमेन स्वर्गकामो यजेत' इत्येवमादीना काम्याना कर्मणा न्यास परित्याग सन्यास कवय पण्डिता विदु , विचक्षणास्तु सर्वेषा काम्याना नित्यनैमित्तिककर्मणा फलमात्रपरित्याग त्याग प्राहु , न तु सर्वकर्मत्यागम् । काम्यकर्मपरित्याग फलपरित्याग इति च सन्यासत्यागशब्दयोरेकार्थत्वादिति न पुनर्वच , तयोर्मन्दमध्यमाधिकारिविषयत्वात् । मन्दस्तावत् बन्धहेतुभिया काम्यकर्मजात परित्यजति । तस्मादुत्कृष्ट कश्चिन्मध्यम स्वचित्तशुद्धये सर्व कर्म कृत्वा तत्फलमात्र परित्यजति । उत्तमाधिकारी तु विशुद्धचित्तत्वेन कर्मतत्फलप्रयोजनाभावात् समग्र कर्म परित्यजति । नित्यादिकर्मणा फलाभावाद्वन्ध्यापुत्रत्यागवत्तत्त्यागः कथमुपपद्यते इति चेन्न, नित्यादिकर्मणामपि फलवत्त्वप्रदर्शनादनिष्टमिष्ट मिश्र चेत्यादिना ॥ २ ॥

अविदुष कर्मफलत्याग एव त्यागशब्दार्थो न कर्मत्याग इति मतान्तरमुपन्यस्यति —

त्याज्यं दोषवदित्येके कर्म प्राहुर्मनीषिणः ।
यज्ञदानतपःकर्म न त्याज्यमिति चापरे ॥ ३ ॥

त्याज्यमिति । एके मनीषिण साख्याभिमानिनो न पारमार्थिकसाख्यपदमारूढा, चित्तशुद्ध्यभावे ऽप्यहिंसाशास्त्रावष्टम्भेन हिसाऽऽदिदोषो ऽस्यास्तीति दोषवत् कर्मबन्धहेतुत्वात् त्याज्य त्यक्तव्यमित्याहु । अपरे तु मीमासका यज्ञदानतप कर्म चित्तशुद्धिहेतुत्वेनाहिसाशास्त्रापेक्षया यागीयपशुहिसाया प्रबलत्वान्न त्याज्यमेवेत्याहु । एते विकल्पा अविद्वद्विषया न तु विदुषाम्, तान्प्रति पृथगुपदेशात 'ज्ञानयोगेन साख्याना कर्मयोगेण योगिनाम्' इति यथा ऽस्मिन् सर्वशास्त्रार्थोपसंहारप्रकरणे ऽविद्वासो विचार्यन्ते तथा विद्वासो ऽपि विचार्यन्तामिति चेन्न, तेषा विचारासहब्रह्मात्मनिष्ठत्वात् 'वेदाविनाशिनम्' 'सर्वकर्माणि मनसा सन्यस्य' 'नैव कुर्वन्न कारयन्' 'सर्वारम्भपरित्यागी' 'गुणातीत' इत्यादिना परमार्थसाख्याना सन्यासिना विशेषितत्वाज्ज्ञाननिष्ठा सन्यासिनो नेह विचारमर्हन्ति ॥ ३ ॥

तेषा सन्यासिना विकल्पानर्हत्वमर्थादुपन्यस्य विकल्पभेदेषु स्वमतमुपन्यस्यति —

निश्चयं शृणु मे तत्र त्यागे भरतसत्तम ।
त्यागो हि पुरुषव्याघ्र त्रिविधः संप्रकीर्तितः ॥ ४ ॥

निश्चयमिति । हे भरतसत्तम ! तत्र विप्रतिपन्ने त्यागे त्यागसन्यासविकल्पे मे मम निश्चय शृणु । हे पुरुषव्याघ्र ! त्यागसन्यासयोरैक्यद्योतको हिशब्द । सो ऽय त्याग तामसादिभेदेन त्रिविध शास्त्रेषु सम्यक्प्रकीर्तित । यत सन्यासत्यागाधिकारिणो ऽविद्वास न परमार्थतत्त्वज्ञा साख्या सन्यासिन, अतो ऽयमर्थो दुर्विज्ञेय । यस्मान्न तत्तत्त्वमन्यो वक्तु पारयति तस्मादैश्वर मतमवधारयेति भाव ॥ ४ ॥

क पुनरसौ त्वदीयो निश्चय इत्यपेक्षायामाह—यज्ञेति द्वाभ्याम् ।

यज्ञदानतपःकर्म न त्याज्यं कार्यमेव तत् ।
यज्ञो दानं तपश्चैव पावनानि मनीषिणाम् ॥ ५ ॥

यज्ञेति ।, यज्ञो दान तप इत्येतत्त्रिविध कर्मानुत्पन्नचित्तशुद्धिभि न त्याज्यम् । यज्ञादिकर्मत्यागे चित्तशुद्ध्यनुदयेन ज्ञानानुत्पत्त्या पुरुषार्था-सभवात् तदर्थ मुमुक्षुभि यज्ञादि कर्म कार्यमेव । किमर्थमेतत्करणीयमिति तत्राह—पावनानीति । कर्मफलाभिलाषविधुराणा मनीषिणा परमेश्वराराध-नार्थमनुष्ठितानि यज्ञो दान तपश्चैव पावनानि चित्तशुद्धिकराणीत्यर्थ ॥ ५ ॥

प्रतिज्ञातार्थमुपसहरति—

एतान्यपि तु कर्माणि सङ्गं त्यक्त्वा फलानि च ।
कर्तव्यानीति मे पार्थ निश्चितं मतमुत्तमम् ॥ ६ ॥

एतानीनि । यानि यज्ञदानतपासि पावनानीत्युक्तानि तान्येतान्यपि तु कर्माणि तेषु सङ्गमासक्ति तत्फलानि च त्यक्त्वा कर्तव्यान्यनुष्ठेयानीति मे मम निश्चितमुत्तम मतम । अपितुशब्दाभ्या फलासक्त्या वा कर्मकर्त-व्यता द्योत्यते । ज्ञानरहितस्य केवलकर्मत्यागापेक्षया कर्मकरणस्य स्वर्गादि-हेतुत्वेन ज्यायस्त्वात् ॥ ६ ॥

मुमुक्षोस्तावत् ‘दूरेण ह्यवर कर्म बुद्धियोगात्’ ‘यज्ञार्थात्कर्मणो ऽन्यत्र’ बन्धहेतुत्वस्य निश्चितत्वात् निश्चय शृणु मे तत्रेति प्रतिज्ञाय पावनहेतवे एतान्यपि तु कर्माणि कर्तव्यानीत्युपसहृत्य कर्तव्यस्य कर्मण तामसादिभेदेन त्रैविध्य दर्शयति—नियतस्येति त्रिभि ।

नियतस्य तु संन्यासः कर्मणो नोपपद्यते ।
मोहात्तस्य परित्यागस्तामसः परिकीर्तितः ॥ ७ ॥

नियतस्येति । बन्धहेतुत्वात काम्यस्य कर्मण सन्यासो युक्त, नियतस्य नित्यकर्मणस्तु सन्यास परित्यागो नोपपद्यते, चित्तशुद्धिगम्य-ज्ञानद्वारा मुक्तिहेतुत्वात् । यतो नियतमवश्य नियमेन कर्तव्यं नित्य कर्म त्यज्यते विप्रतिषिद्धमतो मोहनिमित्तस्तत्परित्याग तामस इति परिकीर्तित । मोहस्य तमोरूपत्वात् तथात्वमित्यर्थ ॥ ७ ॥

मोहतस्तामसत्यागमुक्त्वा मोह विना ऽपि राजसत्यागमाह—

दुःखमित्येव यत्कर्म कायक्लेशभयात्त्यजेत् ।
स कृत्वा राजसं त्यागं नैव त्यागफलं लभेत् ॥ ८ ॥

दु खमिति । स कर्ता ब्रह्मज्ञान विना कायक्लेशभयात् दु खमिति नित्य कर्म त्यजेदिति यत्तादृशस्त्यागो राजसो दु खस्य रज कार्यत्वात् । स राजस पुरुष एव राजस त्याग कृत्वा ज्ञानपूर्वकसर्वकर्मसन्यासलक्षणस्य त्यागस्य फल मोक्ष न लभेत् न लभेतेत्यर्थ ॥ ८ ॥

सात्त्विकत्याग विशिनष्टि—

कार्यमित्येव यत्कर्म नियतं क्रियतेऽर्जुन ।
सङ्गं त्यक्त्वा फलं चैव स त्यागः सात्त्विको मतः ॥ ९ ॥

कार्यमिति । हे अर्जुन ! नियतमवश्यकर्तव्यतया स्वाश्रमोचितं नित्य कर्म, तत्र सङ्ग तत्फल च त्यक्त्वा कार्यमित्येव क्रियत इति यत्तत्कर्म-सङ्गफलत्याग. सात्त्विको मत निश्चित इत्यर्थ ॥ ९ ॥

एवं सात्त्विकत्यागिनो लक्षणमाह—

न द्वेष्ट्यकुशलं कर्म कुशले नानुषज्यते ।
त्यागी सत्त्वसमाविष्टो मेधावी च्छिन्नसंशयः ॥ १० ॥

न द्वेष्टीति । मेधया ब्रह्मात्मैक्यज्ञानलक्षणया प्रज्ञया युतत्वान्मेधावी ब्रह्मात्मैक्यज्ञानहेतुना सत्त्वेन समाविष्टो भूत्वा ब्रह्मात्मैक्यानुसधानजनित-निश्चयज्ञानेन च्छिन्नसशय सन् शरीरारम्भकत्वेन ससारकारणमकुशलमशो-भन काम्य कर्म न द्वेष्टि, कुशले नित्यकर्मणि चित्तशुद्धिगम्यज्ञानद्वारा मोक्षसाधनमिति नानुषज्यते प्रीति न करोति, स एव त्यागी जीवन्मुक्त उच्यते । यत्र परकृतपरिभवादि महद् दु खमपि सोढ्वा स्वर्गादिसुखप्रीतिस्त्य-ज्यते तत्र तात्कालिकसुखदु खसहन कियदिति भाव ॥ १० ॥

एवमीश्वराराधनलक्षणनिष्कामकर्मानुष्ठानजनितविशुद्धान्त करणो ज-न्मादिषड्भावविकाररहितमात्मान परमात्माभेदेन ज्ञात्वा सर्वकर्माणि मनसा सन्यस्य पुन नैव कुर्वन्न कारयन्नैष्कर्म्यलक्षणा ब्रह्मात्मनिष्ठामर्हतीत्युक्त्वा देहाभिमानिनो ऽबाधितकर्त्रादिज्ञानवत सकलकर्मसन्यासस्याशोभनत्वात् कर्मफलसङ्गत्यागपूर्वक कर्मानुष्ठान एवाधिकार· नान्यत्रेति प्रतिपादयति—

न हि देहभृता शक्यं त्यक्तुं कर्माण्यशेषतः ।
यस्तु कर्मफलत्यागी स त्यागीत्यभिधीयते ॥ ११ ॥

न हीति । देह बिभर्तीति देहभृत् देहाभिमानी कर्मण्यधिकृतो ऽज्ञो जन , तेन देहभृता कर्माण्यशेषत त्यक्तु न हि शक्यम् । यस्मादेव तस्मात् यस्त्वज्ञ कर्मण्यधिकृतो नित्यादिकर्म कुर्वन् कर्मफलाभिसधिमात्रत्यागी भवति, सो ऽय कर्म्यपि सन् त्यागी सन्यासीत्यभिधीयते स्तूयत इत्यर्थ ।

देहाभिमानिना कर्म त्यक्तुमशक्यमित्युक्त्या देहाभिमानविकलेन निःशेषत· सर्वाणि कर्माणि त्यक्तु शक्यमिति द्योत्यते ॥ ११ ॥

कर्म तत्फलमाचष्टे—

अनिष्टमिष्टं मिश्रं च त्रिविधं कर्मणः फलम् ।
भवत्यत्यागिनां प्रेत्य न तु संन्यासिनां क्वचित् ॥ १२ ॥

अनिष्टमिति । अत्यागिनामज्ञाना कर्मिणा प्रेत्य शरीरपातादूर्ध्वमनिष्ट तिर्यगादिलक्षण नरकमिष्ट देवादिलक्षणम् इष्टानिष्टमिश्र मानुषलक्षण चेति बाह्यानेककारकव्यापाराधीनधर्माधर्मलक्षणस्य कर्मण स्वप्नमायागन्धर्वनगरवत्फल्गुतया लय गच्छतीति त्रिविध फल भवति । कर्मफलत्यागिना चित्तशुद्धिद्वारा मोक्षहेतुज्ञान भवति । परमार्थसन्यासिना तु परमहसपरिव्राजकाना कर्मफलप्रवृत्ति तन्निवृत्तिर्वा न क्वचिदपि सभवतीत्यर्थ ॥ १२ ॥

कर्म कुर्वत कर्मफल कथ न भवेदित्यपेक्षाया तत्फलसङ्गाभावात् तल्लेपो नास्तीत्याह—पञ्चैतानीति पञ्चभि ।

पञ्चैतानि महाबाहो कारणानि निबोध मे ।
सांख्ये कृतान्ते प्रोक्तानि सिद्धये सर्वकर्मणाम् ॥ १३ ॥

पञ्चेति । हे महाबाहो' सर्वकर्मणा सिद्धये निष्पत्त्यर्थं ज्ञातव्या पदार्था यस्मिन् शास्त्रे सख्यायन्ते तत्साख्य वेदान्त, तस्मिन् साख्ये कृतमिति कर्मोच्यते, तस्यान्त समाप्तिर्यत्र स कृतान्त तस्मिन् कृतान्ते 'सर्वं कर्माखिल पार्थ ज्ञाने परिसमाप्यते' इत्युक्तत्वात । यानि कृतान्ते

कर्मान्ते ज्ञानार्थे प्रोक्तानि कथितानि तान्येतानि कारणानि वक्ष्यमाण-लक्षणानि पञ्चप्रकारेण मे मम वचनात् वस्तुवैषम्यद्योतनार्थं चेत समाधानार्थं वा निबोध अवधारयेत्यर्थः ॥ १३ ॥

तानि कानीत्यत आह—

अधिष्ठानं तथा कर्ता करणं च पृथग्विधम् ।
विविधाश्च पृथक् चेष्टा दैवं चैवात्र पञ्चमम् ॥ १४ ॥

अधिष्ठानमिति । इच्छाद्वेषसुखज्ञानादीनामधिष्ठानं शरीरम् इच्छादी-नामाश्रयत्वात् तथा चिज्जडग्रन्थिरहंकारः कर्ता प्रवर्तकत्वात् चक्षुरादि-पृथग्विधं करणं च कार्यतः स्वरूपतश्च विविधा पृथग्भूता प्राणादीनां चेष्टा व्यापारा, एतेषु पञ्चमं चक्षुराद्यनुग्राहकं दैवं तदन्तर्यामि चैतन्यं वा पञ्चसंख्यापूरकमित्यर्थः ॥ १४ ॥

तेषामधिष्ठानादीनां सर्वकर्महेतुत्वं विवृणोति—

शरीरवाङ्मनोभिर्यत्कर्म प्रारभते नरः ।
न्याय्यं वा विपरीतं वा पञ्चैते तस्य हेतवः ॥ १५ ॥

शरीरेति । नरः पुमान् शरीरवाङ्मनोभिः यत्कर्म प्रारभते निर्वर्त-यति तत्कीदृशमिति न्याय्यं शास्त्रीयं वा तद्विपरीतमशास्त्रीयं वा यच्चापि देहेन्द्रियादिचेष्टारूपं कर्म तदपि न्याय्यविपरीतग्रहणेन गृहीतं स्यात् । अधिष्ठानादिभिः पञ्चभिरारभ्यमाणस्य कर्मणः त्रिष्वेवान्तर्भावात् शारीरं वाचिकं मानसं चेति कर्म त्रिविधम् । तस्य त्रिविधस्य कर्मणः पञ्चैते अधिष्ठानादयो हेतवः कर्मत्रयस्य तन्निर्वर्त्यत्वात् ॥ १५ ॥

तत किमित्यपेक्षायामाह—

तत्रैवं सति कर्तारमात्मानं केवलं तु यः ।
पश्यत्यकृतबुद्धित्वान्न स पश्यति दुर्मतिः ॥ १६ ॥

तत्रेति । तत्र प्रकृते कर्मणि यथोक्तै पञ्चभिर्हेतुभिरेव निर्वर्त्ये सति केवलमशेषविशेषशून्यमकर्तारमप्यात्मान कर्तार य पश्यति, कस्मात् श्रुत्याचार्योपदेशन्यायैरकृतबुद्धित्वादसस्कृतबुद्धित्वादात्मन तत्त्व कर्मणो वा याथाऽऽत्म्य न पश्यति । यत एवमतो दुष्टा कुत्सिता जन्मादिविकृतिहेतुभूता मतिरस्येति दुर्मति पश्यन्नपि स न पश्यतीत्यर्थ ॥ १६ ॥

क सुमति स्वात्मकर्मणोस्तत्त्व पश्यन्विमुच्यत इत्यपेक्षायामाह—

यस्य नाहंकृतो भावो बुद्धिर्यस्य न लिप्यते ।
हत्वा ऽपि स इमाँल्लोकान्न हन्ति न निबध्यते ॥१७॥

यस्येति । यस्य पुरुषधौरेयस्याधिष्ठानादिपञ्चहेतुनिर्वर्त्यकायिकवाचिकमानसकर्मकर्ता ऽहमित्यहंकृतो भाव कर्तृत्वाभिनिवेशो नोदेति यस्य बुद्धिरिष्टानिष्टबुद्ध्या कर्मसु न लिप्यते अधिष्ठानादीनामेव कर्मत्रयकर्तृत्वालोचनया तदतिरिक्तब्रह्मात्मदृष्टित्वात्, सो ऽयमेवभूतो विद्वान् परदृष्ट्या सर्वानिमान् लोकान् हत्वा ऽपि स्वदृष्ट्या न हन्ति हननक्रिया न करोति । न च तत्फलै निबध्यते निष्क्रियब्रह्मात्मदृष्टित्वात् । यथा शुक्त्यादौ रजताद्यध्यारोप तथा अधिष्ठानादिविक्रिया ऽऽत्मन्यध्यस्यते । अतो विद्वान्न हन्ति न निबध्यत इति यदुक्त तद्युक्तम् । शास्त्रादौ तावत् 'नाय हन्ति न हन्यते' इति प्रतिज्ञाय 'न जायते' इत्यादिना

षड्भावविकलत्वमुक्त्वा ‘वेदाविनाशिनम्’ इत्यादिना विदुष कर्माधिकारतामुन्मूल्य ‘सर्वकर्माणि मनसा सन्यस्य नैव कुर्वन्न कारयन्नास्ते’ इत्यादिना सर्वकर्मसन्यासलक्षणज्ञाननिष्ठा प्रकटीकृत्येहास्मिन् प्रकरणे विद्वान्न हन्ति न निबध्यते इत्युपसहार कृत इति पण्डितै. प्रतिपत्तव्यमित्यर्थ ॥ १७ ॥

अधिष्ठानादेरेव कर्तृत्व नात्मन तद्विलक्षणत्वादित्यविक्रियत्व प्रतिपाद्येदानीम् ‘चोदनेति क्रियाया प्रवर्तक वचनम्[1]’ इति भाष्यानुरोधेन कर्मणा प्रवर्तकत्व प्रत्याययति—

ज्ञानं ज्ञेयं परिज्ञाता त्रिविधा कर्मचोदना ।
करणं कर्म कर्तेति त्रिविधः कर्मसंग्रहः ॥ १८ ॥

ज्ञानमिति । सर्वमनेन ज्ञायत इति ज्ञानम् । सामान्यविशेषतो यज्ज्ञातव्य तज्ज्ञेयम् । अविद्यापरिकल्पितोपाधितो भोक्ता परिज्ञातेत्येतत्त्रय चोद्यते प्रवर्त्यते ऽनयेति त्रिविधा कर्मचोदना । ज्ञानज्ञेयपरिज्ञातृसनिपातत पञ्चभिरधिष्ठानादिभि आरब्ध कायवाङ्मनोनिर्वर्त्य त्रिगुणात्मक ज्ञानादित्रयमालम्ब्य कर्मविधि प्रवर्त्यत इत्यर्थ । तथा चोक्तम् ‘त्रैगुण्यविषया वेदा’ इति । क्रियते अनेनेति बाह्यान्तरिन्द्रिय करणम्, कर्तुरीप्सिततम कर्म, करणग्रामव्यापारयिता क्रियानिर्वर्तक कर्ता च । एव करणादि त्रिविध कारक सगृह्यते ऽस्मिन्निति कर्मसग्रह । यत सप्रदानादिकारकत्रय परपरया क्रियानिर्वर्तक न तु साक्षात, अत करणादित्रितयमेव क्रियाहेतुरिति भाव ॥ १८ ॥

[1] शाब—अ १ सू २

क्रियाकारकफलाना गुणात्मकत्वेन तद्भेदप्रकटनायावतारयति—

ज्ञानं कर्म च कर्ता च क्रियैव गुणभेदतः ।
प्रोच्यते गुणसंख्याने यथावच्छृणु तान्यपि ॥ १९ ॥

ज्ञानमिति । कार्यभेदेन सत्त्वादिगुणा ख्यायन्ते प्रतिपाद्यन्ते ऽस्मिन्निति गुणसख्यान कापिल शास्त्रम् । तस्मिन् गुणसख्याने ज्ञान कर्म च क्रिया न कारकमीप्सिततमत्वात् कर्ता च क्रियानिर्वर्तकत्वात् सत्त्वादिगुणभेदत प्रत्येक त्रिधैव प्रोच्यते, तान्यपि वक्ष्यमाणानि ज्ञानादीनि यथावच्छृणु । त्रिधैवेत्येवकारत सत्त्वादिगुणत्रयातिरेकेण जात्यन्तराभावो द्योत्यते ॥ १९ ॥

इदानीं ज्ञानस्य तावत् त्रैविध्यमुच्यते—सर्वभूतेष्विति त्रिभि ।

सर्वभूतेषु येनैकं भावमव्ययमीक्षते ।
अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्त्विकम् ॥ २० ॥

सर्वभूतेष्विति । सर्वेषु ब्रह्मादिस्तम्बान्तभूतेषु स्वात्तोपाधितो मिथो विभक्तेषु व्यावृत्तेषु सर्वत्र स्वत परतो वा न व्येतीत्यव्ययमविभक्त परमाद्वैतं निर्विकार भाव प्रत्यगभिन्नब्रह्मतत्त्व येन ज्ञानेनेक्षते पश्यति तत्तु परमाद्वैतप्रत्यगभिन्नब्रह्मज्ञान सात्त्विकमिति विद्धि जानीहीत्यर्थ ॥ २० ॥

सात्त्विकज्ञानमुक्त्वा राजसज्ञानमाह—

पृथक्त्वेन तु यज्ज्ञानं नानाभावान्पृथग्विधान् ।
वेत्ति सर्वेषु भूतेषु तज्ज्ञान विद्धि राजसम् ॥ २१ ॥

पृथगिति । प्रतिशरीर पृथक्त्वेन यज्ज्ञान नानाभावान् चिदाभासान् पृथग्विधान् सर्वेषु भूतेषु शरीरेषु वेत्ति विजानाति ज्ञानस्य कर्तृत्वासभवात् येन ज्ञानेन वेत्ति तज्ज्ञान, राजस रजोगुणनिर्वृत्त विद्धि ॥ २१ ॥

तामसज्ञानमाह—

यत्तु कृत्स्नवदेकस्मिन्कार्ये सक्तमहैतुकम् ।
अतत्त्वार्थवदल्पं च तत्तामसमुदाहृतम् ॥ २२ ॥

यत्त्विति । यत्तु नग्नश्रमणाना देहपरिमाणो जीव ईश्वरो वा पाषाणदार्वादिमात्र इति कार्ये सक्त कृत्स्नवत् समस्तवद् घटपटादिवत् निर्युक्तिकत्वात् अहैतुक वेदान्तप्रमाणबहिर्मुखत्वादतत्त्वार्थवत् प्रमाणयुक्तिवैकल्याद्विषयत फलतो वा अल्प च ज्ञानमस्ति तज्ज्ञान तामसमुदाहृतम् । तामसप्राणिज्ञानमीदृशमित्यर्थ ॥ २२ ॥

ज्ञानस्य त्रैविध्यमुक्त्वा कर्मणस्त्रैविध्यमाह —नियतमिति त्रिभि ।

नियतं सङ्गरहितमरागद्वेषतः कृतम् ।
अफलप्रेप्सुना कर्म यत्तत्सात्त्विकमुच्यते ॥ २३ ॥

नियतमिति । 'अहरह सध्यामुपासीत' 'यावज्जीवमग्निहोत्र जुहुयात्' इति नित्यतया कर्तव्य नियत सङ्गरहितमासक्तिवर्जित फल प्राप्तुमिच्छतीति फलप्रेप्सु, तद्विपरीतो ऽफलप्रेप्सु तेनाफलप्रेप्सुना कर्त्रा ऽरागद्वेषतो रागद्वेषवैकल्येन यत्कर्म कृत तत् सात्त्विकमुच्यते ॥ २३ ॥

राजस कर्माह—

यत्तु कामेप्सुना कर्म साहंकारेण वा पुनः ।
क्रियते बहुलायासं तद्राजसमुदाहृतम् ॥ २४ ॥

यत्त्विति। कामेप्सुना फलेच्छुना मत्समो ऽन्य श्रोत्रिय को ऽस्तीति साहकारेण वा यत्कर्म क्रियते, यत्तु पुन फल्गुफलापेक्षया बहुलायाससाध्यं तत्कर्म राजसमुदाहृतम्। रजोगुणप्राणिनिर्वर्त्यमित्यर्थ ॥ २४ ॥

तामस कर्माह—

अनुबन्धं क्षयं हिंसामनपेक्ष्य च पौरुषम्।
मोहादारभ्यते कर्म यत्तत्तामसमुच्यते ॥ २५ ॥

अनुबन्धमिति। पश्चाद्भावि शुभाशुभमनुबन्ध, तमनुबन्ध यस्मिन् कर्मणि क्रियमाणे बलार्थयो क्षय स्यात् त क्षय प्राणिजातहिंसा शक्तोमीद कर्म समापयितुमिति स्वशक्ति पुरुषकार पौरुष चानपेक्ष्य मोहादविवेकात् यत्कर्मारभते तत्तामस तमोगुणप्रधानै निर्वृत्तमुच्यते ॥ २५ ॥

कर्मत्रैविध्यमुक्त्वा कर्तृत्रैविध्यमाह—मुक्त इति त्रिभि ।

मुक्तसङ्गो ऽनहंवादी धृत्युत्साहसमन्वितः।
सिद्ध्यसिद्ध्योर्निर्विकारः कर्ता सात्त्विक उच्यते ॥२६॥

मुक्तसङ्ग इति। कर्मफलेषु मुक्त परित्यक्त सङ्गो येन स मुक्तसङ्ग, अनहंवादी अह करोमीति गर्वाभिनिवेशवैकल्यात्, धैर्य धृतिरुद्यम उत्साह ताभ्या समन्वित, केवलस्वाश्रमोचितकर्मफलसिद्ध्यसिद्ध्यो लाभालाभयो निर्विकार कर्तृत्वाभिमानविकलो य कर्ता स सात्त्विक उच्यते ॥ २६ ॥

राजसकर्मकर्तारमाह—

रागी कर्मफलप्रेप्सुर्लुब्धो हिंसाऽऽत्मको ऽशुचिः ।
हर्षशोकान्वितः कर्ता राजसः परिकीर्तितः ॥ २७ ॥

रागीति । दारपुत्रादिषु रागो ऽस्यास्तीति रागी, यथावत्कर्माकरणे ऽपि कर्मफलप्रेप्सु कर्मफलार्थी, सदा परधनेषु समुत्पन्नतृष्णो लुब्ध देशकालपात्रेषु स्वद्रव्यापरित्यागी वा, प्राणिमात्रहिसाऽऽत्मक, अशुचि विहितबाह्याभ्यन्तरशौचपराङ्मुख, इष्टानिष्टलाभालाभप्रयुक्तहर्षविषादान्वित, एवभूतो य कर्ता स राजस परिकीर्तित ॥ २७ ॥

तामसकर्मकर्तारमाह—

अयुक्तः प्राकृतः स्तब्धः शठो नैकृतिको ऽलसः ।
विषादी दीर्घसूत्री च कर्ता तामस उच्यते ॥ २८ ॥

अयुक्त इति । श्रुतिस्मृतिविहितस्वाश्रमोचितकर्मण्ययुक्त, स्वतो विवेकवैकल्यात् प्राकृत श्रुत्याचार्यासस्कृतबुद्धित्वात्, स्तब्ध कस्मैचित् दण्डवन्ननमनात्, शठः स्वसामर्थ्यापरिज्ञानात्, कृतिः परोपकृति, निगता कृतिर्यस्य स निकृतिक, निकृतिक एव नैकृतिक सदा परापकारी, अलस जामितापरवशत्वात्, विषादी अशोच्यानुद्दिश्य सदा शोचनात्, यदद्य श्वो वा कर्तव्य तन्मासेनापि न करोतीति दीर्घसूत्री च, यश्चैवभूत कर्ता स तामस उच्यते । कर्तुस्त्रैविध्यतो ज्ञातृज्ञेययोस्त्रैविध्यमुक्तमिति ज्ञातव्यमिति भाव ॥ २८ ॥

ज्ञानकर्मकर्तृणा त्रैविध्यमुक्त्वा ऽथ बुद्धिधृत्योस्त्रैविध्यं प्रतिपादयितु भूमिका करोति—

बुद्धेर्भेदं धृतेश्चैव गुणतस्त्रिविधं शृणु ।
प्रोच्यमानमशेषेण पृथक्त्वेन धनंजय ॥ २९ ॥

बुद्धेरिति । हे धनजय! मानुषदैवधनयोर्जितत्वात्, सत्त्वादिगुणतो बुद्धेर्धृतेश्च भेदं त्रिविधमशेषेण प्रोच्यमानं पृथक्त्वेन विवेकत शृणु ॥ २९ ॥

सात्त्विकबुद्धिमाह—

प्रवृत्तिं च निवृत्तिं च कार्याकार्ये भयाभये ।
बन्धं मोक्षं च या वेत्ति बुद्धिः सा पार्थ सात्त्विकी ॥३०॥

प्रवृत्तिमिति । धर्मे प्रवृत्तिमधर्मे निवृति च, यस्मिन् देशे काले च कर्तव्याकर्तव्ये कार्याकार्ये तत्प्रभवार्थानर्थरूपे भयाभये, देहादावहभावो बन्ध, तदभावो मोक्ष, त बन्ध मोक्ष च या बुद्धि अन्त करण वेत्ति, हे पार्थ! सा बुद्धि सात्त्विकी । य पुमान्वेत्तीति वक्तव्ये काष्ठानि पचन्तीतिवत् करणे कर्तृत्वोपचारो द्रष्टव्य ॥ ३० ॥

राजसबुद्धिमाह—

यया धर्ममधर्मं च कार्यं चाकार्यमेव च ।
अयथावत्प्रजानाति बुद्धिः सा पार्थ राजसी ॥ ३१ ॥

ययेति । हे पार्थ! पुमान्यया बुद्ध्या शास्त्रचोदित धर्मं शास्त्रप्रतिषिद्धमधर्मं च कर्तव्य कार्यं चाकर्तव्यमकार्यमेव च अयथावत् सदेहास्पदत्वेन प्रजानाति सा बुद्धि. राजसी ॥ ३१ ॥

तामसबुद्धिमाह—

अधर्मं धर्ममिति या मन्यते तमसा ऽऽवृता ।
सर्वार्थान्विपरीतांश्च बुद्धिः सा पार्थ तामसी ॥ ३२ ॥

अधर्ममिति । हे पार्थ! शास्त्रप्रतिषिद्धमधर्मं शास्त्रविहितं धर्ममिति सर्वानेव ज्ञेयपदार्थान् विपरीतान् या बुद्धिस्तमसा ऽऽवृता सती मन्यते सा बुद्धि तामसी ॥ ३२ ॥

इदानीं धृतेस्त्रैविध्यमाचष्टे—धृत्येति त्रिभि ।

धृत्या यया धारयते मनःप्राणेन्द्रियक्रियाः ।
योगेनाऽव्यभिचारिण्या धृतिः सा पार्थ सात्त्विकी ॥३३॥

धृत्येति । हे पार्थ! चित्तसमाधानहेतुना योगेन यया ऽव्यभिचारिण्या विषयान्तरपराङ्मुख्या धृत्या मनश्च प्राणश्चेन्द्रियाणि च तेषा क्रियाश्चेष्टारूपा धारयते उच्छास्त्रप्रवृत्तितो वारयति, यया धृत्या धार्यमाणा उच्छास्त्रविषयविमुखा भवन्ति, सा धृति सात्त्विकी ॥ ३३ ॥

राजसी धृतिमाह—

यया तु धर्मकामार्थान्धृत्या धारयते ऽर्जुन ।
प्रसङ्गेन फलाकाङ्क्षी धृतिः सा पार्थ राजसी ॥ ३४ ॥

ययेति । हे अर्जुन! धर्मश्च कामश्चार्थश्च तान् धर्मकामार्थान् मनसि कर्तव्यरूपान्यया धृत्या धारयते, य पुरुष प्रसङ्गेन फलाकाङ्क्षी च भवति, हे पार्थ! तस्य सा धृति. राजसी स्मृता ॥ ३४ ॥

तामसीं धृतिमाह—

यया स्वप्नं भयं शोकं विषादं मदमेव च।
न विमुञ्चति दुर्मेधा धृतिः सा पार्थ तामसी ॥ ३५ ॥

ययेति। हे पार्थ! आत्मानात्मविवेकवैकल्येन दुष्टा मेधा यस्य स योऽयं दुर्मेधा पुरुषो यया धृत्या स्वप्नं निद्रां भयं त्रासं शोकं विषण्णतां सर्वप्रकारेण मत्तुल्यः कोऽपि नास्तीति मदमेव च कदाऽपि न विमुञ्चति, तस्य सा धृतिः तामसी स्मृतेत्यर्थः ॥ ३५ ॥

सुखस्यापि त्रैविध्यं प्रतिजानीते—

सुखं त्विदानीं त्रिविधं शृणु मे भरतर्षभ।
अभ्यासाद्रमते यत्र दुःखान्तं च निगच्छति ॥ ३६ ॥

सुखमिति। हे भरतर्षभ! यत्र यस्मिन् सुखविशेषे अभ्यासादतिपरिचयात्पुमान् रमते न तु सहसा विषयसुख इव रतिमनुभवति, यद्रमणतो दुःखस्यान्तमवसानं नितरां गच्छति मे मम वचनात् इदानीं तु त्रिविधं सुखं शृणु। श्रुत्वा रजस्तमःसुखं निराकृत्य शुद्धसत्त्वसुखाभ्यासे मनः कुर्वित्यर्थः ॥ ३६ ॥

तत्र सत्त्वसुखमाह—

यत्तदग्रे विषमिव परिणामेऽमृतोपमम्।
तत्सुखं सात्त्विकं प्रोक्तमात्मबुद्धिप्रसादजम् ॥ ३७ ॥

यत्तदिति। यत्तत्सुखमग्रे ज्ञानवैराग्यध्यानसमाध्यभ्यासात् 'पुरा तदभ्यासस्यात्यन्तायासपूर्वकत्वात् विषमिव दुःखात्मकं भवति, एवमभ्या-

सपरिणामे ज्ञानवैराग्यध्यानसमाध्यभ्यासपरिपाकज सुखममृतोपम सत्, ब्रह्मात्मैक्यविषया बुद्धिरात्मबुद्धि तस्या प्रसादो नैर्मल्य ततो जातं तत्सुखं सात्त्विकमिति विद्वद्भि प्रोक्तम् ॥ ३७ ॥

राजस सुखमाह—

विषयेन्द्रियसंयोगाद्यत्तदग्रे ऽमृतोपमम् ।
परिणामे विषमिव तत्सुखं राजसं स्मृतम् ॥ ३८ ॥

विषयेति । यत्तत्सुखमग्रे प्रथमक्षणे शब्दादिविषयै श्रोत्रादीन्द्रिय-सयोगात् अमृतमुपमा यस्य तादृश भवति । तादृशविषयेन्द्रियसयोगज-सुखस्य प्रज्ञामेधाबलवीर्यधनोत्साहहानिहेतुत्वादमुत्रापि रौरवादिनरकहेतुत्वाच्च तत्परिणामे विषमिवानर्थहेतु यदस्ति तत्सुख राजस स्मृतम् ॥ ३८ ॥

तामस सुखमाह—

यदग्रे चानुबन्धे च सुखं मोहनमात्मनः ।
निद्राऽऽलस्यप्रमादोत्थं तत्तामसमुदाहृतम् ॥ ३९ ॥

यदिति । अग्रे प्रथमक्षणे अनुबन्धे च पश्चादपि स्वात्मनो मोहन मोहकर यत्सुखमस्ति तत्तामसमिति उदाहृतम् । तत्कुत उत्पन्नमिति तत्राह—निद्रेति । निद्रा चालस्य च प्रमादश्च निद्राऽऽलस्यप्रमादा तेभ्य समुत्तिष्ठतीति निद्राऽऽलस्यप्रमादोत्थम् । अत एवात्ममोहकरत्वमुपपद्यत इत्यर्थ । बुद्धिवृत्तिर्ज्ञानम्, यद्वा अन्त करणस्य वृत्तिर्बुद्धिरपि । इच्छाद्वेषा-दीनामप्यन्त करणवृत्तित्वात् सर्वासा वृत्तीनामपि गुणतस्त्रैविध्यमूह्यमिति भाव ॥ ३९ ॥

अनुक्तमपि सगृह्णन् प्रकरणार्थमुपसहरति—

न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः ।
सत्त्व प्रकृतिजैर्मुक्तं यदेभिः स्यात्त्रिभिर्गुणैः ॥ ४० ॥

न तदिति । प्रकृतिसभवैरेतत्सत्त्वादित्रिगुणैर्मुक्त विहीन सत्त्व प्राणिजातमन्यद्वा यत्स्यात् पृथिव्या मनुष्यादिषु दिवि देवेषु वा क्वापि पुनस्तत्सत्त्व नास्तीत्यर्थ ॥ ४० ॥

क्रियाकारकफलात्मक सर्वमपि प्राणिजात त्रैगुण्यात्मक चेत् तस्य कथ तन्मुक्ति स्यादित्यपेक्षाया निष्कामकर्मानुष्ठानजनितचित्तशुद्धिप्राप्यप्रत्यगभिन्नब्रह्मज्ञानात् स्वाज्ञानतत्कार्यगुणत्रयमतीत्य कैवल्य यातीति सर्ववेदान्तसारसग्रहभूतगीताशास्त्रार्थसार सग्रहेण प्रकटयति—ब्राह्मणेत्यादि यावदध्यायपरिसमाप्ति ।

ब्राह्मणक्षत्त्रियविशां शूद्राणां च परंतप ।
कर्माणि प्रविभक्तानि स्वभावप्रभवैर्गुणैः ॥ ४१ ॥

ब्राह्मणेति । हे परतप ! ब्राह्मणाश्च क्षत्त्रियाश्च विशश्च तेषा ब्राह्मणक्षत्त्रियविशा सजातीयत्वे ऽपि वेदानधिकारात् त्रैवर्णिकात् पृथग्ग्रहण शूद्राणामिति । ब्रह्मक्षत्त्रविट्शूद्राणा च स्वभावस्त्रिगुणात्मिका पारमेश्वरी माया प्रभवो येषा सत्त्वादिगुणाना तै स्वभावप्रभवै । यद्वा अनन्तकोटिजन्मनिदानभूता वासना वर्तमानजन्मनि स्वकार्याभिमुखीकरणस्वभाव , स प्रभवो येषा तै स्वभावप्रभवै । अथ वा सत्त्वगुणप्रभवो ब्राह्मणस्वभाव , सत्त्वोपसर्जनरज:प्रभवः क्षत्त्रियस्वभावः, तमउपसर्जनरज.प्रभवो वैश्यस्वभाव., रजउप-

सर्जनतम प्रभव शूद्रस्वभाव इति तेषा स्वस्वभावप्रभवै सत्त्वादित्रिगुणै शमदमादिकर्माणीतरेतरासस्पृष्टतया प्रविभक्तानि व्यवस्थापितानि भवन्तीत्यर्थ ॥४१॥

तत्र ब्राह्मणस्वाभाविककर्माण्याह—

शमो दमस्तपः शौचं क्षान्तिरार्जवमेव च ।
ज्ञानं विज्ञानमास्तिक्यं ब्राह्मं कर्म स्वभावजम् ॥ ४२ ॥

शम इति । अन्तरिन्द्रियनिग्रह शम । बाह्येन्द्रियनिग्रहो दम । कृच्छ्रचान्द्रायणादिक तप । बाह्यमाभ्यन्तरमिति द्विविध शौचम् । सहन क्षान्ति । सर्वत्रावक्रतैवार्जवमेव च । शास्त्रजन्य ज्ञानम् । तदेव स्वानुभूतिरूढं चेद्विज्ञानम् । श्रुत्याचार्यवाक्यश्रद्धैवास्तिक्यम् । ब्राह्मणजाते स्वभावजमेतत् ब्राह्म कर्म स्वभावज सहजमित्यर्थ । स्वभावप्रभवैर्गुणैरित्युक्तत्वात् ॥४२॥

क्षात्रस्वभावकर्माह—

शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनम् ।
दानमीश्वरभावश्च क्षात्त्रं कर्म स्वभावजम् ॥ ४३ ॥

शौर्यमिति । शूरस्य भाव शौर्यम् । प्रागल्भ्य तेज । यया ऽऽविष्टस्यावसादो न भवति सा धृति । सर्वजनश्लाघनीयकार्येष्वप्रमादतया प्रवृत्ति दक्षस्य भावो दाक्ष्यम् । युद्धे चाप्यपलायन शत्रोरपृष्ठप्रदानम् । अर्थिना याच्ञापूरण दानम् । ईशितव्यान्प्रति स्वशक्तिप्रकटीकरणमीश्वरभावश्च क्षत्रियजाते कर्तव्य कर्म क्षात्र क्षत्रियस्वभावजमित्यर्थ ॥ ४३ ॥

वैश्यशूद्रयो कर्माचष्टे—

कृषिगौरक्ष्यवाणिज्यं वैश्यं कर्म स्वभावजम् ।
परिचर्याऽऽत्मकं कर्म शूद्रस्यापि स्वभावजम् ॥ ४४ ॥

कृषीति। भूमेर्विलेखन कृषिश्च, गा रक्षतीति गोरक्ष तस्य भावो गौरक्ष्य च क्रयविक्रयादिलक्षण वणिक्कर्म वाणिज्य च कृषिगौरक्ष्यवाणिज्यम्। वैश्यजाते स्वभावज कर्म वैश्य कर्म। शूद्रस्यापि त्रैवर्णिकाना परिचर्याऽऽत्मक स्वभावज कर्म। एव निष्कामतया स्वस्वजातिविहितकर्मानुष्ठानात् चित्तशुद्धिर्भवेदिति भाव ॥ ४४ ॥

ब्राह्मादिकर्मणा ज्ञानहेतुत्व विशदयति—

स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः।
स्वकर्मनिरतः सिद्धिं यथा विन्दति तच्छृणु ॥ ४५ ॥

स्व इति। यथोक्तभेदलक्षणे ब्राह्मादिनि स्वे स्वे कर्मण्यभिरत तत्परो नर ससिद्धि स्वधर्मानुष्ठानजनितचित्तशुद्धित कायेन्द्रियाणा प्रत्यगभिन्नब्रह्मनिष्ठायोग्यतालक्षणा लभते। एवमधिकृत पुरुष स्वकर्मनिरत सन् सिद्धि यथा येन प्रकारेण विन्दति तदिदानीं शृणु। श्रुत्वाऽवधारयेत्यर्थ ॥ ४५ ॥

तदेव स्फुटयति—

यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम्।
स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः ॥ ४६ ॥

यत इति। यत परमेश्वरात् ब्रह्मादिस्तम्बान्तभूताना स्वस्वकर्मप्रवृत्तिरुत्पत्तिर्वा जायते येन परमेश्वरेण चराचरात्मक सर्व जगत्ततम्, मानवो निष्कामी पूर्वोक्तेन स्वकर्मणा तमीश्वरमभ्यर्च्याराध्य चित्तशुद्धिद्वारा ज्ञाननिष्ठालक्षणा सिद्धि विन्दति प्रत्यगभिन्नब्रह्मात्मनिष्ठो भवतीत्यर्थ ॥ ४६ ॥

स्वकर्मणेति विशेषणस्य फलमाह—

श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात् ।
स्वभावनियतं कर्म कुर्वन्नाप्नोति किल्बिषम् ॥ ४७ ॥

श्रेयानिति । सम्यगनुष्ठितात् परधर्मात् विगुणो ऽपि स्वधर्म श्रेयान् । यत पुमान् पूर्वोक्तस्वभावनियत कर्म कुर्वन् किल्बिष नाप्नोति । अत स्वधर्म एव श्रेयान् । यथा विषजक्रिमे विष न दोषावह स्वजीवनहेतुत्वात् न मधु गुणावह स्वप्राणवियोगहेतुत्वात् तद्वदिति भाव ॥ ४७ ॥

साख्याभासदृष्टिमाश्रित्य यदि स्वधर्मे हिसाऽऽदिदोषं मत्वा परधर्मे तदभाव मन्यसे तदा स दोष परधर्मे ऽपि तुल्य इत्याह—

सहजं कर्म कौन्तेय सदोषमपि न त्यजेत् ।
सर्वारम्भा हि दोषेण धूमेनाग्निरिवावृताः ॥ ४८ ॥

सहजमिति । हे कौन्तेय ! सहज स्वभावविहित कर्म त्रिगुणात्मकत्वेन सदोषमपि कुर्यात्, न त्यजेत् । हि यस्मादारभ्यन्त इत्यारम्भा सर्वकर्माणि सहजेन धूमेनाग्निरिव त्रैगुण्यदोषेण समावृता स्वधर्मपरित्यागे परधर्मपरिग्रहे ऽपि दोषस्य तुल्यत्वात् । यथा ऽग्नेर्धूमाशमपास्य शीतनिवृत्तये अग्नि सेव्यते तथा कर्मणो दोषाश फलाभिलाष विहाय गुणाश सहज कर्म चित्तशुद्धये सेव्य न त्याज्यमिति भाव ॥ ४८ ॥

क्रियमाणे कर्मणि दोषाशपरित्यागतो गुणाश कथ सपद्यत इति तत्राह—

असक्तबुद्धिः सर्वत्र जितात्मा विगतस्पृहः ।
नैष्कर्म्यसिद्धिं परमां संन्यासेनाधिगच्छति ॥ ४९ ॥

असक्तेति । सर्वत्र पुत्त्रदारगृहादिष्वसक्ता सङ्गरहिता बुद्धि अन्त -करणं यस्य सो ऽयमसक्तबुद्धि', विषयवैमुख्येन जितो वशीकृत आत्मा ऽन्त'-करण यस्य स जितात्मा, देहजीवितभोगेषु विगता स्पृहा यस्मात्स विगतस्पृहो योगी, निष्क्रियब्रह्मात्मप्रबोधान्निर्गतानि कर्माणि यस्मात्स निष्कर्मा, तस्य भावो नैष्कर्म्य च तन्निष्क्रियब्रह्मात्मस्वरूपावस्थानलक्षणा सिद्धिश्च ता नैष्कर्म्यसिद्धि कर्मजसिद्धे परमा सर्वकर्मसन्यासेनाधिगच्छति, विदेहमुक्तो भवतीत्यर्थ ॥ ४९ ॥

एवभूतस्य परमहसस्य निष्ठा निगमयति— सिद्धिमिति षड्भि ।

सिद्धिं प्राप्तो यथा ब्रह्म तथा ऽऽप्नोति निबोध मे ।
समासेनैव कौन्तेय निष्ठा ज्ञानस्य या परा ॥ ५० ॥

सिद्धिमिति । हे कौन्तेय! य स्वकर्मणेश्वरमाराध्य तत्प्रसादजा प्रत्यगभिन्नब्रह्मज्ञानयोग्यतालक्षणा सिद्धि प्राप्तो मुमुक्षु यथा येन प्रकारेण प्रत्यगभिन्न ब्रह्म प्राप्नोति तथा त प्रकार ज्ञाननिष्ठाप्राप्तिक्रमं समासेन मे मम वचनान्निबोध सम्यगवधारय । निबोधेति वचनात् प्रतिज्ञाता या मुक्तिः तामेव निर्दिशति—निष्ठेति । प्रत्यगभिन्नब्रह्मज्ञानस्य या परा प्रकृष्टा निष्ठा काष्ठा पर्यवसान परिसमाप्ति, सैव मुक्तिरित्यर्थ ॥ ५० ॥

ज्ञानस्य या परा निष्ठोक्ता सा कथ सेव्येत्यपेक्षायामाह—

बुद्ध्या विशुद्धया युक्तो धृत्या ऽऽत्मानं नियम्य च ।
शब्दादीन्विषयांस्त्यक्त्वा रागद्वेषौ व्युदस्य च ॥ ५१ ॥

बुद्ध्येति । विद्वान् विशुद्धया ऽध्यवसायलक्षणया बुद्ध्या युक्त सन् धृत्या सत्त्वगुणविशिष्टया कार्यकरणलक्षणमात्मान नियम्य च देहधारणेतरशब्दादिविषयास्त्यक्त्वा तत्रापि रागद्वेषौ व्युदस्य च परित्यज्य ब्रह्मभूयाय कल्पत इत्युत्तरेणान्वय ॥ ५१ ॥

तत किमित्यत आह—

विविक्तसेवी लघ्वाशी यतवाक्कायमानसः ।
ध्यानयोगपरो नित्यं वैराग्यं समुपाश्रितः ॥ ५२ ॥

विविक्तेति । विविक्तदेशान् नदीपुलिनगिरिकदरादीन् सेवितु शीलमस्येति विविक्तसेवी लघ्वशनमशितु शीलमस्येति लघ्वाशी विविक्तसेवालघ्वशनाभ्या वाक् च कायश्च मानस च वाक्कायमानसानि यतानि सयतानि यस्य सो ऽय यतवाक्कायमानस सन् ध्यान प्रत्यगभेदेन ब्रह्मानुसधान तत्रैव मनएकाग्रीकरण योग, तौ ध्यानयोगौ परत्वेन कर्तव्यौ यस्य स. ध्यानयोगपरायणो भूत्वा दृष्टादृष्टविषयेषु विरागस्य भावो वैराग्य वैतृष्ण्य नित्य सम्यगुपाश्रित सन् ब्रह्मभूयाय कल्पत इत्यर्थ ॥ ५२ ॥

तत किमिति तत्राह—

अहंकारं बलं दर्पं कामं क्रोधं परिग्रहम् ।
विमुच्य निर्ममः शान्तो ब्रह्मभूयाय कल्पते ॥ ५३ ॥

अहकारमिति । देहादावहकरणमहकार, त कामरागसयुत बल सामर्थ्यं हृष्टो दृप्यति दृप्तो धर्ममतिक्रामतीति हर्षानन्तरभावी धर्मातिक्रमणहेतु दर्प तम् इच्छाविशेष काम त तदपूरणसजात क्रोध त देह-

धारणेतरपरिग्रहं च विमुच्य देहस्थितिमात्रपरिग्रहे ऽपि ममेदमित्यभिनिवेशवैकल्येन निर्मम शान्त उपरतसर्वव्यापृति परमहंसपरिव्राजको भूत्वा ब्रह्मात्मरूपावस्थानलक्षण कैवल्य ब्रह्मभूयम्, तस्मै ब्रह्मभूयाय कैवल्याय कल्पते समर्थो भवतीत्यर्थ ॥ ५३ ॥

ब्रह्मभवनावस्थानलक्षणफलमाह—

ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति ।
समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम् ॥ ५४ ॥

ब्रह्मभूत इति । ब्रह्मभूतो ब्रह्मण्यवस्थित श्रुत्याचार्यप्रसादत प्रसन्न आत्मा ऽन्त करण यस्य सो ऽय प्रसन्नात्मा स्वात्मनो वैगुण्यमर्थवैकल्य वोद्दिश्य न शोचति न ह्यप्राप्तविषयजात वा काङ्क्षति । सर्वेषु भूतेषु सम सर्वसाम्यब्रह्मदर्शनकवलितविषमत्वात्, एवभूतो ज्ञाननिष्ठो योगी परा सर्वोत्कृष्टा ब्रह्मैवाहमहमेव ब्रह्मेति भजनलक्षणा मद्भक्तिं लभते ॥ ५४ ॥

तत किमित्यपेक्षायामाह—

भक्त्या मामभिजानाति यावान्यश्चास्मि तत्त्वतः ।
ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम् ॥ ५५ ॥

भक्त्येति । प्रत्यगभिन्नब्रह्मज्ञानलक्षणया भक्त्या मामभिजानाति किंविशेषणविशिष्टस्त्वमिति तत्राह—यावानिति । उपाधिसबन्धाद्यावान् पारमैश्वर्यसंपन्न स्वत संशान्तोपाधिभेदात्, यश्चास्मि तत्त्वत प्रत्यक्परविभागासहसत्तासामान्यरूपो ऽस्मि । ततस्तादृशज्ञानादुक्तलक्षणमुत्तमपुरुष मामेव तत्त्वतो ज्ञात्वा तदनन्तर तज्ज्ञानस्यापि ब्रह्मात्मसमाप्तत्वान्मा विशते, विदेहमुक्तो भवतीत्यर्थ. ॥ ५५ ॥

मदाराधनलक्षणनिष्कामकर्मानुष्ठानजनितचित्तशुद्धिप्राप्यसम्यग्ज्ञान - द्वारा मुमुक्षु कैवल्य यातीत्युपसहरति—

सर्वकर्माण्यपि सदा कुर्वाणो मद्व्यपाश्रयः।
मत्प्रसादादवाप्नोति शाश्वतं पदमव्ययम् ॥ ५६ ॥

सर्वेति। मुमुक्षु सर्वाणि नित्यनैमित्तिककाम्यप्रतिषिद्धकर्माण्यपि सदा कुर्वाण सन्नहमेव वासुदेव परमात्मा व्यपाश्रय आश्रयणीयो यस्य नेहामुत्रफल स मद्व्यपाश्रयो भूत्वा मत्प्रसादादाविर्भूतचित्तशुद्धिगम्य-प्रत्यगभिन्नब्रह्मज्ञानात् शाश्वतमनादित्वादव्यय परमार्थनित्यत्वान्मुमुक्षुकोटिभि पद्यत इति तद्विष्णो परम पदमवाप्नोति, मुक्तो भवतीत्यर्थ ॥ ५६ ॥

यत एवमत त्वमपि सर्वकर्माणि मयि समर्प्य मच्चित्तो भवेत्याह—

चेतसा सर्वकर्माणि मयि संन्यस्य मत्परः।
बुद्धियोगमुपाश्रित्य मच्चित्तः सततं भव ॥ ५७ ॥

चेतसेति। निष्कामचेतसा सर्वकर्माणि मयि सन्यस्य समर्प्याहमेव पर पुरुषार्थो यस्य स त्व मत्परो भूत्वा सतत कर्मानुष्ठानकाले ऽपि 'ब्रह्मार्पण ब्रह्म हवि' इत्यादिना साख्यबुद्धियोगमुपाश्रित्य प्रत्यगभिन्न-ब्रह्मरूपे मय्येव चित्त यस्य स त्व मच्चित्तो भव ॥ ५७ ॥

त्वच्चित्तत्वे कि स्यादित्यपेक्षायामाह—

मच्चित्तः सर्वदुर्गाणि मत्प्रसादात्तरिष्यसि।
अथ चेत्त्वमहंकारान्न श्रोष्यसि विनङ्क्ष्यसि ॥ ५८ ॥

मच्चित्त इति । मच्चित्तश्चेत् त्व मत्प्रसादात् ज्ञानीतरै· सर्वैरपि दुस्तरत्वात् ससारस्य सर्वदुर्गाणि यद्वा सर्वाण्यपि सासारिकाणि दुर्गाणि दु खानि तरिष्यसि । विपर्यये विपरीतफलमाह—अथेति । अथ मच्चित्तत्वविपरीतपक्षे यदि त्वमहकारात्पण्डितो ऽहमिति मदुक्त न श्रोष्यसि तदा विनङ्क्ष्यसि पुरुषार्थात् भ्रश्यसे ॥ ५८ ॥

विनङ्क्ष्यामि चेदपि बन्धुभिर्युद्धं न करोमीति मन्यमानमालक्ष्याह—

यद्यहंकारमाश्रित्य न योत्स्य इति मन्यसे ।
मिथ्यैष व्यवसायस्ते प्रकृतिस्त्वां नियोक्ष्यति ॥ ५९ ॥

यदीति । मदीयममृतोपम वचस्त्वमनादृत्य मिथ्याऽहकारमाश्रित्य बन्धुभिर्न योत्स्य इति यदि मन्यसे एवभूतो य स एष व्यवसाय ते तव मिथ्यैव तव स्वातन्त्र्याभावात् । तदेवाह—नियोक्ष्यतीति । रजोगुणरूपेण परिणता क्षत्रियप्रकृति· त्वा युद्धे नियोक्ष्यति प्रेरयिष्यतीत्यर्थ· ॥ ५९ ॥

सर्वो हि जन्तु· स्वभावबद्ध , तथा त्वमपीत्याह—

स्वभावजेन कौन्तेय निबद्धः स्वेन कर्मणा ।
कर्तु नेच्छसि यन्मोहात्करिष्यस्यवशो ऽपि तत् ॥ ६० ॥

स्वभावजेनेति । हे कौन्तेय ! पूर्वकर्मसस्कार स्वभाव , तेन जातेन स्वभावजेन स्वेन स्वकीयेन शौर्य तेज इत्यादिना क्षात्रकर्मणा निबद्धो नियन्त्रित एवभूतो ऽस्यपि मोहादविवेकतो यद्युद्धलक्षण कर्म कर्तु नेच्छसि तदेव कर्मावशो ऽपि स्वभावपरवश एव करिष्यसि ॥ ६० ॥

केवलसाख्यमतमवलम्ब्य प्रकृतिपारतन्त्र्यमुक्त्वेदानीं स्वमतमाचष्टे— ईश्वर इति द्वाभ्याम्—

ईश्वरः सर्वभूतानां हृद्देशे ऽर्जुन तिष्ठति ।
भ्रामयन्सर्वभूतानि यन्त्रारूढानि मायया ॥ ६१ ॥

ईश्वर इति । हे अर्जुन ! यथा लोके सूत्रधारो दारुयन्त्रारूढानि कृत्रिमाणि भूतानि भ्रामयन्नलक्ष्य तत्रैव तिष्ठति तथेश्वरो निजमायाशक्त्या स्वाविद्याकामकर्मगहने ऽनिश भ्रामयन् सन् सर्वभूताना हृद्देशे गूढस्तिष्ठति 'य सर्वेषु भूतेषु तिष्ठन् सर्वेभ्यो भूतेभ्यो ऽन्तरो य सर्वाणि भूतानि न विदु यस्य सर्वाणि भूतानि शरीर य सर्वेभ्यो भूतेभ्यो ऽन्तरो यमयत्येष त आत्मा ऽन्तर्याम्यमृत [1] ।'

'एको देव सर्वभूतेषु गूढ सर्वव्यापी सर्वभूतान्तरात्मा ।
कर्माध्यक्ष सर्वभूताधिवास साक्षी चेता केवलो निर्गुणश्च [2] ॥'

इति श्रुते ॥ ६१ ॥

एवमीश्वरेणैव कृत चेत् ससारभ्रमणशान्ति केनोपायेन भवेदित्य-पेक्षायामाह—

तमेव शरणं गच्छ सर्वभावेन भारत ।
तत्प्रसादात्परां शान्तिं स्थानं प्राप्स्यसि शाश्वतम् ॥ ६२ ॥

तमिति । यत सर्वे जीवा परमेश्वरतन्त्रास्तत्र न को ऽपि स्वतन्त्र अत स्वातन्त्र्याभिमान परित्यज्य सर्वमीश्वर एव नान्यो ऽतिरिक्त किंचिद-

[1] बृ ३-७-१५
[2] श्वे ६-११

स्तीत्यनवरतभावन भाव, तेन सर्वभावेन तमेवेश्वर प्रत्यगभेदेन शरणमाश्रय गच्छ। एव करोषि चेदुपात्तदुरितक्षयद्वारेश्वरकटाक्षस्त्वयि भवेत्। तत्प्रसादात्परा सर्वोत्कृष्टामविद्याद्वयतत्कार्यलक्षणससारशान्ति, नित्य पारमेश्वर स्थान मम विष्णो परमपद प्राप्स्यसि ॥ ६२ ॥

सर्वगीताऽर्थमुपसहरति—

इति ते ज्ञानमाख्यातं गुह्याद्गुह्यतरं मया।
विमृश्यैतदशेषेण यथेच्छसि तथा कुरु॥ ६३ ॥

इतीति। इत्यनेन प्रकारेण ते तुभ्य सर्वज्ञेन परमकारुणिकेन मया गुह्यात् मन्त्रयोगादिज्ञानादपि गुह्यतर प्रत्यगभिन्नब्रह्मज्ञानमाख्यातम्। मयोपदिष्टमेतद्गीताशास्त्रमशेषेण विमृश्य पर्यालोच्य पश्चाद्यथेच्छसि तथा कुरु। एतस्मिन्नेव पर्यालोचिते सति पुरावत्त्वदीयो मोहस्त्वा द्रष्टु स्प्रष्टु वा न पारयतीत्यर्थ. ॥ ६३ ॥

मदुक्तगीताशास्त्रस्यातिगम्भीरत्वेन येन केनाप्यशेषत पर्यालोचयितुमशक्यत्वं पर्यालोच्य मन्दप्रज्ञेष्वतिकृपया स्वयमेव गीताशास्त्रार्थसार सगृह्य प्रकाशयति—सर्वगुह्यतममिति त्रिभि ।

सर्वगुह्यतमं भूयः शृणु मे परमं वचः।
इष्टो ऽसि मे दृढमिति ततो वक्ष्यामि ते हितम्॥ ६४॥

सर्वेति। असकृदुक्तमपि भूय पुनरपि प्रकृष्टफलहेतुत्वात् मे मम परम वच शृणु, प्रत्यक्परविभागासहसत्तासामान्यब्रह्मस्वरूपावस्थानलक्षणकैवल्यासाधारणहेतुत्वात्। तत्कीदृशमिति तत्राह—सर्वेति। सर्वेभ्यो गुह्येभ्यो

गुह्यतरेभ्यश्चात्यन्तगुह्यत्वाद्गुह्यतमम् । गुह्य मन्त्रशास्त्रगोचर वच , गुह्यतरं योगशास्त्रगोचरम्, गुह्यतम प्रत्यगभिन्नब्रह्मगोचरम् । एव गुह्यतम चेत् किमर्थं मह्य वक्ष्यसीति तत्राह—इष्टो ऽसीति । दृढमव्यभिचारेण मे मम परमेश्वरस्येष्टो भक्तो ऽसीति ते तव हित हिततम तत कारणात् वक्ष्यामि न भयान्नाप्यर्थान्तरकाङ्क्षयेत्यर्थ ॥ ६४ ॥

यदेतद्वक्ष्यामीत्युक्त तदेवाह—

मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ।
मामेवैष्यसि सत्यं ते प्रतिजाने प्रियो ऽसि मे ॥ ६५ ॥

मन्मना इति । मय्येव मनश्चित्त यस्य स त्व मन्मना भव । वासुदेव सर्वमिति मदीय भजन मद्भक्ति । तद्वान् मद्भक्तो भव । मद्यजन मदर्पणबुद्ध्या निष्कामकर्मानुष्ठान करोषीति मद्याजी भव । सर्वत्र सर्वभावेन मामेव नमस्कुरु ।

'ब्रह्मादिस्तम्बभूतेषु प्रविष्टो भगवानिति ।
प्रणमेद्दण्डवद्भूमावाश्वचण्डालगोखरम् ॥'

इति स्मृते । एव करोषि चेत् मत्प्रसादलब्धज्ञानतो मामेवैष्यसि, सशयमत्र मा कार्षी । यतस्त्व मे प्रियभक्तो ऽसि, अतस्तुभ्यमह सत्य यथा भवति तथा प्रतिजाने, मामेवैष्यसीति प्रतिज्ञा करोमीत्यर्थ ॥ ६५ ॥

एव मत्सत्यप्रतिज्ञा बुद्ध्वा मद्भक्तेरपि कैवल्यहेतुत्वमवधार्य मदेकशरणाना सर्ववेदान्तसिद्धान्तार्थो वक्तव्य इत्याह—

सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज ।
अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ॥ ६६ ॥

सर्वेति । सर्वे च ते धर्माश्चेति सर्वधर्मा । सर्वधर्मशब्देन अधर्मो ऽपि गृह्यते ।

'त्यज धर्ममधर्मं च उभे सत्यानृते त्यज ।
उभे सत्यानृते त्यक्त्वा येन त्यजसि त त्यज ॥'

इति श्रुत्यनुरोधेन सर्वधर्मानधर्मांश्च परित्यज सर्वकर्माणि संन्यस्येत्यर्थ, नैष्कर्म्यस्य विवक्षितत्वात् । तत कि कर्तव्यमिति तत्राह—शरणमिति सर्वप्रत्यगभेदेन सन्त परमात्मान मामेक न मत्तो ऽन्यत्किञ्चिदस्त्यहमेवेद सर्वमिति शरण व्रज । ततस्त्व कि करोषीति तत्राह—मोक्षयिष्यामीति । एव निश्चयबुद्धिं त्वा त्वामह स्वात्मभावप्रकाशीकरणेन सर्वपापेभ्यो धर्माधर्मनिमित्तेभ्य॰ पुण्यपापतन्मिश्रेभ्यो मोक्षयिष्यामि । उक्त चैतत् । 'नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता' इति । एवरूपा भगवत्प्रपत्ति मा तारयेन्न वेति सदिह्य मा शुच शोक मा कार्षीरित्यर्थ ॥ ६६ ॥

एवं स्वाविद्याद्वयतत्कार्यनिवर्तकत्वेन प्रसिद्धं सर्ववेदान्तसिद्धान्तसारसग्रहभूत निष्ठाद्वयमधिकृत्य प्रवृत्त गीताशास्त्रमुपदिश्याथेदानीं सर्वशास्त्रसंप्रदायनियमविधिमुपदिशति—

इदं ते नातपस्काय नाभक्ताय कदाचन ।
न चाशुश्रूषवे वाच्यं न च मां यो ऽभ्यसूयति ॥ ६७ ॥

इदमिति । इदं मयोक्त ससारमोहनिवर्तक गीताशास्त्र ते तव अहितायातपस्काय श्रुतिस्मृतिविहितस्वाश्रमोचितधर्मानुष्ठानरहिताय न त्वया वाच्यम् । तपस्विने ऽपि गुरुदेवाभक्ताय न वाच्यम् । तपस्वी भक्तिमानपि अशुश्रूषुर्यदि तदा ऽशुश्रूषवे कदाचन कस्याचिदवस्थायामपि न वाच्यम् ।

य प्रत्यगभिन्नब्रह्मरूप मा मनुष्य मत्वा स्वात्मप्रशसनमेव करोतीत्यभ्यसूयति तस्मा अपि न त्वया वाच्यमिद गीताशास्त्रम् । हिताय तपस्विने गुरुदेव-भक्ताय शुश्रूषवे भगवत्यनसूयवे वाच्यमित्यर्थाल्लभ्यते । एवमेव सर्ववेदान्त-शास्त्रसप्रदायविधिरित्यर्थ ॥ ६७ ॥

यथोक्ताधिकारिणे गीताशास्त्रोपदेष्टु फलमाचष्टे--

य इमं परमं गुह्यं मद्भक्तेष्वभिधास्यति ।
भक्तिं मयि परां कृत्वा मामेवैष्यत्यसंशयः ॥ ६८ ॥

य इति । यो मद्भक्त नि श्रेयसार्थत्वात् परममिम ग्रन्थ गोप्यत-मत्वात् गुह्य मद्भक्तेष्वभिधास्यति वक्ष्यति ग्रन्थतो ऽर्थतश्च वदतीत्यर्थ । भगवत परमेश्वरस्य शुश्रूषा मया क्रियत इति मयि परा भक्ति कृत्वा स मद्भक्त तत्फलभूत मामेवैष्यति मुच्यते ससारबन्धनात् । अस्मिन्नर्थे सशयो न कर्तव्य इत्यर्थ ॥ ६८ ॥

एव सप्रदायकर्तुस्तुल्यो ऽन्य प्रियो मे नास्तीत्याह—

न च तस्मान्मनुष्येषु कश्चिन्मे प्रियकृत्तमः ।
भविता न च मे तस्मादन्यः प्रियतरो भुवि ॥ ६९ ॥

न चेति । प्राणिमात्रेषु देवतिर्यङ्मनुष्येषु सर्ववेदान्तसिद्धान्तगीता-शास्त्रसप्रदायैकृत तस्मान्महानुभावान्मे मम परमेश्वरस्य कश्चिदप्यन्य प्रियकृत्तमो न चास्ति लोके ऽस्मिन् भुवि तस्मादन्य प्रियतरो न च भविता न भविष्यतीत्यर्थ ॥ ६९ ॥

पाठयितु फलमाह—

अध्येष्यते च य इमं धर्म्यं संवादमावयोः ।
ज्ञानयज्ञेन तेनाहमिष्टः स्यामिति मे मतिः ॥ ७० ॥

अध्येष्यत इति । य पुमानावयो कृष्णार्जुनयोरिम धर्मादनपेत धर्म्यं सवादमध्येष्यते जपरूपेण पठिष्यति तेन पुसा उच्चैरुपाशु मानसाना यज्ञाना ज्ञानयज्ञस्य मानसत्वात् वैशिष्ट्यमिति गीताशास्त्राध्ययनरूपज्ञानयज्ञेनाहमिष्ट प्रसादित स्यामिति मे मम परमेश्वरस्य मति ॥ ७० ॥

अन्यस्य पठत श्रोतु श्रवणफलमाह —

श्रद्धावाननसूयश्च शृणुयादपि यो नरः ।
सो ऽपि मुक्तः शुभाँल्लोकान्प्राप्नुयात्पुण्यकर्मणाम् ॥७१॥

श्रद्धावानिति । श्रद्धावान् यो नर स्वस्य पठनशक्त्यभावे ऽपि परस्य पठत. शृणुयात् श्रोता श्रद्धावानपि किमुच्चैः पठति किमबद्धमिति दोषदृष्टि न कुर्यात् तद्व्यावृत्त्यर्थमनसूयु असूयारहित सन् शृणुयात सो ऽपि सर्वपापै मुक्त सन् अश्वमेधादिपुण्यकर्मणा शुभान् लोकान् प्राप्नुयात् ॥ ७१ ॥

त्वयैकाग्रचित्तेन मदुपदिष्टार्थ कि यथावद्गृहीत येन स्वाज्ञानजमोहनिवृत्ति स्यात्, यदि ते मदुपदेशत स्वप्रबोधो नोदित तदा पुनरुपदेश करोमीत्याशयेन श्रीभगवानुवाच—

श्रीभगवानुवाच—

कच्चिदेतच्छ्रुतं पार्थ त्वयैकाग्रेण चेतसा ।
कच्चिदज्ञानसंमोहः प्रनष्टस्ते धनंजय ॥ ७२ ॥

कच्चिदिति । हे पार्थ ! त्वयैकाग्रेण चेतसा मयोक्त श्रुत कच्चिच्छ्रवणेनावधारित किम्, कि वा प्रमादतो नावधारितम् । तव शास्त्रश्रवणायासो ममोपदेष्टृत्वायासश्च यदर्थो ऽय प्रवृत्त सो ऽयमज्ञानसमोह प्रनष्ट कच्चित् हे धनजय ! अविवेकस्वभावो नाश गत किमिति प्रश्नार्थ ॥ ७२ ॥

भगवदुपदेशत स्वात्मन कृतार्थता ख्यापयन्नर्जुन उवाच—

अर्जुन उवाच—

नष्टो मोहः स्मृतिर्लब्धा त्वत्प्रसादान्मया ऽच्युत ।
स्थितो ऽस्मि गतसंदेहः करिष्ये वचनं तव ॥ ७३ ॥

नष्ट इति । हे अच्युत ! त्वदुपदेशजनितप्रबोधमार्तण्डेन स्वाज्ञानमोहध्वान्तो नष्ट कबलित । त्वत्प्रसादान्मया ब्रह्मैवाहमहमेव ब्रह्मेति प्रत्यगभिन्नब्रह्मस्मृतिर्लब्धा यया स्मृत्या सर्वग्रन्थीना विप्रमोक्षो भवति । स्वाज्ञानमोहनिवृत्तितो ब्रह्मात्मस्मृतिलाभश्चेत्येतावत्खलु सर्ववेदान्तसिद्धान्तज्ञानफल यतो नातो ऽतिरिक्तमस्ति अतो ऽह गतसंदेह सस्त्वच्छासने स्थितो ऽस्मि । चित्तशुद्ध्यर्थं स्वधर्मानुष्ठान कुर्विति यत्त्वयोक्त तव तद्वच करिष्ये । न मे कर्तृत्वमस्ति, त्वदुपदेशतो मम कृतार्थत्वादित्यर्थ । एव कृष्णार्जुनसवाद धृतराष्ट्र प्रत्युक्त्वा ऽथ कथासबन्धप्रदर्शनार्थ सजय उवाच—

संजय उवाच—

इत्यहं वासुदेवस्य पार्थस्य च महाऽऽत्मनः ।
संवादमिममश्रौषमद्भुतं रोमहर्षणम् ॥ ७४ ॥

इतीति । इत्येवमुक्तप्रकारेणाहमत्यन्तविस्मयहेतुत्वादद्भुतं रोमाञ्चकरत्वात् रोमहर्षणं महाऽऽत्मनो वासुदेवस्य पार्थस्य च संवादमिममश्रौषं श्रुतवानस्मीत्यर्थः ॥ ७४ ॥

कस्मादेवं श्रुतवानसीत्यपेक्षायामाह—

व्यासप्रसादाच्छ्रुतवानेतद्गुह्यतमं परम् ।
योगं योगेश्वरात्कृष्णात्साक्षात्कथयतः स्वयम् ॥ ७५ ॥

व्यासेति । व्यासेन भगवता यतो मह्यं दिव्यं चक्षुः श्रोत्रं दत्तम्, अतोऽहमेतद्गुह्यतमं सर्ववेदान्तसारसंग्रहभूतं गीताशास्त्रं श्रुतवानस्मि । किं तदिति तत्राह—परमिति । स्वाविद्याद्वयतत्कार्यात्परं प्रत्यक्परचितो योगमैक्यज्ञानं श्रुतवानित्यर्थः । कस्मादिति तत्राह—कृष्णादिति साक्षात्स्वयमेव कथयत उपायोपेयभूतनिष्ठाद्वयात्मकं गीताशास्त्रं योगेश्वरात् कृष्णात् ब्रह्मादिस्तम्बान्तदेशिकादित्यर्थः ॥ ७५ ॥

एतदेव स्मृत्वा सदा हृष्यामीत्याह—

राजन्संस्मृत्य संस्मृत्य संवादमिममद्भुतम् ।
केशवार्जुनयोः पुण्यं हृष्यामि च मुहुर्मुहुः ॥ ७६ ॥

राजन्निति । हे राजन् धृतराष्ट्र ! सकृच्छ्रवणमात्रतः सर्वपापहरत्वात् पुण्यं केशवार्जुनयोः अद्भुतमिमं संवादं संस्मृत्य संस्मृत्य मुहुर्मुहुः हृष्यामि ॥

भगवद्रूपस्मरणतोऽपि हृष्यामीत्याह—

तच्च संस्मृत्य संस्मृत्य रूपमत्यद्भुतं हरेः ।
विस्मयो मे महान्राजन्हृष्यामि च पुनः पुनः ॥ ७७ ॥

तच्चेति । हे राजन्! हरेरत्यद्भुत तच्च विश्वरूप सस्मृत्य सस्मृत्य मे महान् विस्मय प्रादुर्भूत । तेनैवाह पुन पुन हृष्यामि ॥ ७७ ॥

एवभूते भगवति प्रसन्ने सति पाण्डवाना पराजयशङ्का कुत इत्याह—

यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः ।
तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ॥७८॥ इति ।

इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसवादे संन्यासयोगो नामाष्टादशो ऽध्याय ॥

यत्रेति । यत्र यस्मिन् पाण्डवपक्षे योगाना योगिना चेश्वर श्रीकृष्णो भगवान् वर्तते, यत्र च पार्थो गाण्डीवधनुर्धरो जागर्ति तत्रैव ध्रुवा राज्यश्री ध्रुवो विजय ध्रुवा विभूति ध्रुवा नीति न्यायो ऽपीति मे मति निश्चय । इतिशब्द शास्त्रपरिसमाप्त्यर्थ ॥ ७८ ॥

येन वेदान्तसिद्धान्तसार सम्यक्प्रकाशित ।
यान्ति यज्ज्ञानतो मुक्ति तस्मिञ्शाम्यतु मे मन ॥
येन पार्थाय गीताऽन्त्यषट्कतस्तत्त्वमर्थयो ।
लक्ष्यैक्य भणित मे ऽद्य कैवल्य स प्रयच्छतु ॥

इति श्रीमत्परमहसपरिव्राजकाचार्यश्रीवासुदेवेन्द्रशिष्यश्रीरामचन्द्रेन्द्रकृतौ श्रीमद्भगवद्गीताऽर्थप्रकाशिकायामष्टादशो ऽध्याय ॥

नैष्कर्म्योपनिषद्ब्रह्मजृम्भिता षट्सहस्रिका ।
गीताऽर्थबोधिनी सेह त्रिपान्नारायणार्पिता ॥

ओं श्रीमद्विश्वाधिष्ठानपरमहससद्गुरुरामचन्द्राय नम ॥

BRAHMAVIDYĀ

THE ADYAR LIBRARY BULLETIN

Editor Prof C Kunhan Raja, M A, D Phil (Oxon)

Jt Editor A N Krishna Aiyangar, M A, L T

Rates of Subscription

Life Subscription Rs 100

or $ 50

or £ 10

	(Per Annum)	Single copy
India & Ceylon	Rs 6	Rs 2-8
U S A	$ 3	$ 1 25
British Empire	Sh 12	Sh 5
Other Countries	Rs 9	Rs 3-8

All Communications to be addressed to

THE DIRECTOR,

Adyar Library,

Adyar, Madras, S India